Barcode : 5990010121721
Title - Tatvachintamani
Author - gangesa Upadhyaya
Language - sanskrit
Pages - 235
Publication Year - 1957
Barcode EAN.UCC-13
5 990010 121721

TATTVACINTĀMANI

OF

GANGESA UPĀDHYĀYA

With

ĀLOKA

of

PAKṢADHARA MISRA

and

DARPANA

of

MAHĀRĀJA MAHESA ṬHĀKURA

Vol. I

(*Prāmāṇyavāda*)

Edited by

MAHAMAHOPĀDHYĀYA UMESHA MISHRA

M A. D. Litt.

Formerly Director, Mithila Institute

With the help of

Mahā-Naiyāyika, Pradhānācārya

PAṆḌITA SRI SASINATHA JHA

Mithila Institute

Published by The Director, Mithila Institute of Post-Graduate Studies and Research in Sanskrit Learning

DARBHANGA

1957

पक्षधरमिश्रकृतालोकसनाथो

गङ्गेशोपाध्यायविरचितः

तत्त्वचिन्तामणिः

महाराजमहेशठक्कुरनिर्मितदर्पणप्रोद्भासितः

प्रामाण्यवादान्तः प्रथमः खण्डः

नैयायिकप्रवरझोपाह्वश्रीशशिनाथशर्मणां साहाय्येन

भूतपूर्वमिथिलाविद्यापीठप्रधानेन

महामहोपाध्यायेन

श्रीमदुमेशमिश्रेण

संस्कृतः

UNIVERSITY LIBRARY
1 JUN 1959
ALLAHABAD.

मिथिलाविद्यापीठप्रधानेन

प्रकाशतां नीतः

विक्रमाब्दः २०१३   ऐशवीयाब्दः १९५७

Copies of this Volume, postage paid, can be had of the Director, Mithila Institute, Darbhanga, on receipt of Rs. 12/- by M. O. or Postal Order or Cash.

Printed by Binda Prasad for Darbhanga Press Company (Pri.) Limited, Darbhanga, and Published by Dr. P. L. Vaidya, Director, Mithila Institute of Post-Graduate Studies and Research in Sanskrit Learning, Darbhanga.

THE GOVERNMENT OF BIHAR established the *Mithila Institute* of Post-Graduate Studies and Research in Sanskrit Learning at Darbhanga in 1951 with the object, *inter-alia*, to promote advanced studies and research in Sanskrit learning, to bring together the traditional Pandits with their profound learning and the modern scholars with their technique of research and investigations, to publish works of permanent value to scholars. This Institute is one of the five others planned by this Government as a token of their homage to the tradition of learning and scholarship for which ancient Bihar was noted Apart from the Mithila Institute, three others have been established and have been doing useful work during the ast three or four years—Nalanda Institute of Research and Post-Graduate Studies in Buddhist Learning and Pali at Nalanda, K. P. Jayaswal Research Institute at Patna, and the Bihar Rashtra Bhasha Parishad for research and advanced studies in Hindi at Patna. In the establishment of the Mithila Institute the State Government received a generous donation from the Maharajadhiraja of Darbhanga for construction of the building on a plot of land also donated by him.

As part of this programme of rehabilitating, and re-orientation of ancient learning and scholarship, the editing and publication of this volume has been undertaken with co-operation of scholars in Bihar and outside. The Government of Bihar hope to continue to sponsor such projects and trust that this humble service to the world of scholarship and learning would bear fruit in the fulness of time.

PREFACE

THE following pages which are now presented to the scholarly world embody the learned commentaries on the *Tattvacintāmaṇi* of Gangeśa Upādhyāya by Pakṣadhara Miśra, alias Jayadeva Miśra, called Āloka, and by Maheśa Thakur, the founder or the Khandava dynasty of the present Mithila Rajya* on the Aloka, called Darpaṇa. The volume under publication ends with the *Prāmāṇyavāda.*

Gangeśa Upādhyāya flourished in Mithilā in the 13th century A. D. He is the founder of the Navya-Nyāya School. He took only one Sūtra, प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि, I. i 3, from Gautama's Nyāyasūtra and wrote his *Tattvacintāmaṇi.* It is divided into four sections, one on each pramāṇa. From the study of the *Tattvacintāmaṇi,* it is evident that Gangeśa was a keen dialectician and a brilliant controvercialist. He devoted his energy to the task of expounding problems connected with the Theory of Knowledge. He did not 'indulge in any metaphysical problem. Even the small section on the ईश्वरानुमान which has come down to us from his pen, has nothing to do with ontology. It really forms part of the Anumāna Section.

Science of Debate has a very old history in Indian thought. It existed even prior to the Upaniṣads. It was revived with great vigour by Akṣapāda Gautama after the Mahānirvāṇa of of the Buddha Since then great debaters and dialecticians flourished in India, both among the Buddhists and the non-Buddhists. The typical method of Gangeśa influenced almost all the Śāstras, and scholars began to take delight in indulging in pure and free dialectics.

Gangeśa had a long list of followers beginning with his own son, Vardhamāna. To write on the Tattvacintāmaṇi was considered a great achievement in the scholarly field. Mithilā became the great centre of the Neo-Logic School with Pakṣadhara Miśra, Vāsudeva Miśra, Rucipati Upādhyāya, Raghupati, Bhagīratha and many others. The chain has remained unbroken, it may be said, even up to the present generation in Mithilā, though the standard has not been maintained.

Later on, the study of Neo-logic found a School in Navadvīpa in Bengal. Vāsudeva Sārvabhauma of Bengal came to Mithilā and studied Navya-Nyāya under Pakṣadhara Miśra. He was very successful in the *Śalākā-Parīkṣā,* the then known method of testing merit in Mithilā, took leave of his teacher, went to Bengal and founded a Neo-Logic School at Navadvīpa. It flourished with a host of scholars of Bengal, such as Raghunātha Śiromaṇi, Mathurānātha, Jagadīśa, Gadādhara and many others. All of them wrote on the *Tattvacintāmaṇi.*

The two commentaries published here are very useful. They explain the text very lucidly without much indulging in the intricacies of Neo-Logic. The speciality of the *Darpaṇa* lies in the fact that besides explaining the lines of the *Āloka,* t also explains almost all the points of the *Cintāmaṇi* which have been left unexplained in the Āloka. Thus, both these commentaries, supplementing each other, enable the students o understand the text easily.

As it may take a long time to complete the entire work, : was thought proper to issue only the Prāmāṇyavāda for the resent.

The present edition is based on the manuscripts in ossession of the Government Sanskrit College, Banaras, of the ite Pandit Hemaraj Sharma, Rājguru of Nepal, and of my wn collection. I am thankful to the Officer-in-charge of the)arbhanga Raj Library who gave us an opportunity to compare ur manuscripts with the Raj manuscript. I am grateful to l those who have helped me to see the volume through the ress, particularly, Pandit Shashinath Jha and Professor nantalal Thakur, both of the Mithila Institute, Darbhanga.

Tirabhukti
Allahabad
March 6, 1957

UMESHA MISHRA

आमुखम्

अयं तत्त्वचिन्तामणिः नव्यन्यायशास्त्रस्यादिमो ग्रन्थः। गौतमरचित-न्यायसूत्रेभ्यः 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि' इत्येकमेव सूत्रं गृहीत्वा मिथिलालंकारभूतो गङ्गेशोपाध्यायोऽमुं ग्रन्थरत्नं विरचितवान्। अस्य ग्रन्थस्य पाण्डित्येन लेखपरिपाट्या च समस्तविद्वन्मण्डली चकिता बभूव। अतः परमस्यैव ग्रन्थस्याध्ययनेऽध्यापने च विद्वांसो दत्तचित्ता बभूवुः। गङ्गेशेन प्रवर्तितां नव्यन्याय-शैलीमनुसृत्यैव व्याकरणादिशास्त्राणामप्यालोचनं प्रारभत। न्यायमते प्रमेय-ज्ञानार्थं चत्वार्येव प्रमाणान्यपेक्षितानि। तदर्थं च चतुर्षु विभागेषु ग्रन्थममुं विभज्य गङ्गेशेन ग्रन्थविस्तारः कृतः।

पूर्वं तु मिथिलैवास्या अध्ययनाध्यापनशैल्याः केन्द्रमासीत्। तत्र वर्धमान-पक्षधरवासुदेवरुचिपतिरघुपतिभगीरथादिभिर्विद्वद्वर्यैः परिष्कृता अध्ययनाध्यापन-विवेचनादिभिश्च चमत्कृतेयं नव्यन्यायमणिः अद्यपर्यन्तं चकास्ति। पश्चात् पञ्च-दशमिते शतके वासुदेवरघुनाथप्रभृतयो वङ्गीया विद्वांसो मिथिलातोऽधीत्य नवद्वीपं गत्वा तत्रास्य ग्रन्थस्याध्ययनादिकं पल्लवितं चक्रुः। अस्योपरि सूक्ष्मेक्षिकया बृहदालोचनादिसंपन्ना विस्तृता विवेचना कृता एतैर्विद्वद्भिः। तां तामेव विवेचना-मधीत्य कालेऽस्मिन् शास्त्रेऽस्मिन् पाण्डित्यप्रकर्षं प्राप्नुवन्ति विद्वांसः।

ग्रन्थोऽयं नूनमेवानतिसरलः। अस्य गाम्भीर्यवर्णने कः समर्थो भवति? मिथिलायां वङ्गदेशे च बहुभिः ग्रन्थस्यास्य टीकाः कृताः। सर्वासु टीकासु पृथक् पृथक् स्वस्ववैलक्षण्यं वर्तत एव। कियत्यः टीकाः प्रकाशिताः। परन्तु मैथिलानां विदुषां व्याख्या प्रायो नैव काचिदपि पूर्वं प्रकाशिता। पक्षधरमिश्रस्यालोकस्य कियानेवांशः कथंचित् पूर्वं प्रकाशितः। मैथिलैः कीदृशमस्य ग्रन्थस्य व्याख्यानं कृतमिति तु न सर्वतोभावेन विदितमासीत्। अत एवात्र जयदेवापरनामकपक्षधर-मिश्रविरचितालोकेन मिथिलाराज्योपार्जकमहेशठक्कुरनिर्मितेन दर्पणेन च सहैव तत्त्वचिन्तामणिः प्रकाश्यते।

अधुना प्रामाण्यवादपर्यन्तोऽयं सटीको ग्रन्थः प्रकाश्यते। क्रमशोऽव-शिष्टानामपि भागानां प्रकाशनं भविष्यत्येव।

प्रकाशनकार्ये मिथिलासंस्कृतविद्यापीठप्राध्यापकेन नैयायिकप्रवरेण श्रीशशिनाथशर्मणा महदुपकृतोऽस्मि। तस्य साहाय्यमन्तरा दुरूहस्यास्य सटीकस्य ग्रन्थस्य प्रकाशनमसंभवमेवासीत्। तथा च मिथिलाविद्यापीठस्थेन प्राध्यापकेन श्रीमदनन्तलालठक्कुरेणापि ग्रन्थस्य प्रूफसंशोधने बहूपकृतम्। एतावुभावपि धन्यवादार्हौ।

आदर्शरूपेण ग्रन्थानामेतेषां संशोधनाय काशीस्थराजकीयसंस्कृतमहाविद्यालयतः नेपालराजगुरोः स्वर्गीयहेमराजशर्मणः सकाशाच्च हस्तलिखितान् ग्रन्थानानीय दरभङ्गाराजकीयपुस्तकालयस्थग्रन्थसाहाय्येन संस्करणमिदं प्रस्तुतम्। एतेऽपि धन्यवादार्हा इति शुभम्।

प्रयागे
फाल्गुनशुक्लपञ्चम्यां बुधे
१७७६ शकसंवत्सरे।

वशंवदः
उमेशमिश्रः

तत्त्वचिन्तामणिः

प्रत्यक्षखण्डम्

—:※:—

मङ्गलाचरणम्

गुणातीतोऽपीशस्त्रिगुणसचिवस्त्र्यक्षरमय-
स्त्रिमूर्त्तिर्यः सृष्टि[1]स्थितिविलयकर्म्माणि तनुते ।
कृपापारावारः परमगतिरेकस्त्रिजगतां
नमस्तस्मै कस्मैचिदमितमहिम्ने पुरभिदे ॥१॥

आलोकः

ओँ नमस्तस्यै

वक्त्राणि पञ्च कुचयोः प्रतिबिम्बितानि
दृष्ट्वा दशाननसमागमनभ्रमेण ।
भूयोऽपि शैलपरिवृत्तिभयेन गाढ-
मालिङ्गितो गिरिजया गिरिशः पुनातु ॥१॥
अधीत्य जयदेवेन हरिमिश्रात् पितृव्यतः ।
तत्त्वचिन्तामणेरित्थमालोकोऽयं प्रकाश्यते ॥२॥

दर्पणः

श्रीः

शङ्करजगदम्बिकयोरङ्के पङ्केन खेलन्तम् ।
लम्बोदरमवलम्बे य वेद न तत्त्वतो वेदः ॥१॥
पुंसामार्त्तिभिदे कलानिधिकुलोत्तंसाय संसारभी-
विध्वंसाय मुनीन्द्रमानससरोहंसाय कंसारये ।
अङ्कालम्बितशिक्यमुज्ज्वलरुचि गुञ्जावतंसादिना
य साशङ्कमुपागमत्कमलभूः कृष्णाय तुभ्यं नमः ॥२॥

---

१. दर्पणपाठानुरोधेन 'सर्ग' स्थाने 'सृष्टि'रित्येव पाठः स्वीकृतः ।

चतुर्भिरास्यैश्चतुरोऽपि वेदानुच्चारयन्नक्रमतो विरञ्चिः ।
पाठाग्रपश्चात्त्वविशेषमोपसन्तोषिशिष्यः शिवमातनोतु ॥३॥

धत्ते नावनति महीधरसुताभागावरुद्ध शिरो
नैवोदञ्चति चारुसान्त्वनवचो मूकायितेऽर्द्धे मुखे ।
आश्लेषोऽपि यथोचित न हि भवत्येकाकिना बाहुना
मामव्यादिति विक्लव. प्रियतमामानापनोदे शिवः ॥४॥

धनाय पद्मा भविकाय दुर्गा गृहाय गौरीमितरे श्रयन्तु ।
अह महानन्दपदस्य धात्री विद्याविधात्रीं गिरमाश्रितोऽस्मि ॥५॥

गौर्या गिरीशादिव कार्तिकेयो यो धीरया चन्द्रपतेरलम्भि ।
आलोकमुद्दीपयितु नवीन स दर्पण व्यातनुते महेशः ॥६॥

अत्र श्लोकाना व्याख्या **टीकाकृता** सुकरत्वादुपेक्षिता । **सा त्वेवं** प्रारिप्सितप्रतिबन्धक-विघ्नविघातक पुरभिन्नमस्काररूप मङ्गल शिष्यशिक्षायै निबध्नाति—**गुणेति** । सत्त्वरजस्तमोरूपान् गुणानतीतो **गुणातीत** । यद्यपि **नैयायिकमते** सत्त्वाद्यो गुणाः **साङ्ख्या**देरिव नातिरिक्ताः, तथापि स्थित्यादिसर्गादिसहारादिकार्यानुगुणास्मदाद्यदृष्टविशेषा एव सत्त्वरजस्तमासि इति ध्येयम् । **ईशो**ऽप्रतिहतेच्छुः । **त्रिगुणसचिवः** ज्ञानेच्छाप्रयत्नरूपगुणत्रयवान् । **अक्षरमय.** अकारोकार-मकारात्मकप्रणववाच्यः । वाच्यताया मयट् । **त्रिमूर्त्ति**र्ब्रह्मविष्णुरुद्रात्मकशरीरत्रयवान् । **सृष्टि-स्थितिविलय**रूपाणि **कर्माणि** कार्याणि यः **तनुते** विस्तारयति, पुनः पुनः करोतीत्यर्थः । कर्मपदोपादान कार्यत्वपुरस्कारेण सृष्ट्यादिभिरीश्वरानुमान सूचयितुम् । ईश्वर एव ब्रह्मविष्णुरुद्र-शरीराणि गृह्णातीति **मते**नेदम् ।

कृपेति । निरुपधिपरदुःखप्रहाणेच्छाया अतिशयिताश्रय इत्यर्थः । **त्रिजगतां** त्रिजग-द्वर्तिप्राणिना, **परमगतिः** परमहितकर्ता । **एकः** स्वसमानजातीयद्वितीयरहित· ।

पुरभिदे पुरनामकदैत्यभेदनकर्त्रे । अनेन विघ्नवारणक्षमत्व सूचितम् । **कस्मैचिद्** विशिष्याशक्यनिर्वचनीयमहिम्ने । अत्र हेतुः **अमितमहिम्ने** । **अपि**शब्दोऽत्र गुणातीत-विशेषणेन सहान्येषां विशेषणाना विरोधाभाससूचनाय । तत्र विरोधस्याभासत्व व्याख्यानरीत्या । विरोधभानन्तु सर्वत्र गुणपदस्य **वैशेषिक**सिद्धगुणसामान्यपरत्वे । **ईश**त्रिगुणसचिवयोः यथा-व्याख्यातयोः । **मयटः** समवायपरत्वे । **मूर्ति**पदस्यावच्छिन्नपरिमाणपरत्वे । बहुव्रीहिलभ्यशरीर-सयोगपरत्वे वा । **तनुत** इत्यत्राख्यातार्थे । **कृपे**त्यत्र यथोक्तार्थे । **परमे**त्यत्र यथोक्तार्थ एव । एकपदस्य सङ्ख्यापरत्वे । सर्वत्र चैकवचनेन एकत्वसङ्ख्यालाभे । **पुरभिद** इत्यत्र यथाव्याख्यात-कृतिरूपार्थे । **कस्मैचिदमितमहिम्ने** इत्यनयोर्महत्त्वाख्यगुणपरत्वे इति ।

अन्वीक्षानयमाकलय्य गुरुभिर्ज्ञात्वा गुरूणां मतं
चिन्तादिव्यविलोचनेन च तयोः सारं विलोक्याखिलम् ।
तन्त्रे दोषगणेन दुर्गमतरे सिद्धान्तदीक्षागुरु-
र्गङ्गेशस्तनुते मितेन वचसा श्रीतत्त्वचिन्तामणिम् ॥२॥

यतो मणेः पण्डितमण्डनक्रिया
प्रचण्डपाषण्डतमस्तिरस्क्रिया ।

प्रसङ्गान्मङ्गलस्य समाप्तिहेतुतां स्थापयितुं भूमिमारचयति—इहेति । इह लोके । खलु वाक्यालङ्कारे । एकवाक्यता अविप्रतिपत्तिरतो भ्रममूलकताशङ्का निराकृता । विवादाङ्गसंशयबीजविप्रतिपत्त्यप्रदर्शनान्न्यूनता च परिहृता । तत्त्वनिर्णिनीषुविचार-तयाऽन्यहेतुकसंशयस्यापि भावात् । तदुक्तम्—अन्यत्र[1] सर्वहेतुक इति ।

तत्र विचारे । तत्र प्रथमोद्दिष्टत्वेन पुरःस्फूर्तिकतया प्रथमं[3] प्रत्यक्षमेव प्रमाण-माशङ्क्य निषेधति—नान्वयेति । नान्वयव्यतिरेकसहचारज्ञानसचिवाध्यक्षगम्येत्यर्थः ।

निजकीर्तेरनुवर्तनाय स्वनाम ग्रन्थनाम च दर्शयन्प्रेक्षावत्प्रवृत्त्यर्थमितरग्रन्थापेक्षया स्वग्रन्थस्य प्रकर्षमाह—अन्वीक्षेति । अत्रोभयशास्त्रसाराभिज्ञकृतत्वं दुर्बोधतरन्यायशास्त्र-सिद्धान्तोपदेशगुरुकृतत्वं सङ्क्षिप्तत्वं च प्रकर्षः ।

मणिनामधारणोपयोगि मणिसादृश्यमाह—यत इति ।

प्रसङ्गादिति । स्मृतस्योपेक्षानर्हत्वादित्यर्थः ।

केचिदिहोपोद्घातसङ्गतिः निष्फलस्योक्त्यसम्भवेनोक्तसिद्ध्यर्थत्वादेतच्चिन्ताया इत्याहुः ।

भूमिमिति । कर्तव्यविचारोपयोगिनमर्थं दर्शयतीत्यर्थः । एकं एकजातीयं वाक्यं येषान्ते एकवाक्या अविप्रतिपत्तिमन्तः पुरुषाः, तेषां भाव एकवाक्यतेत्यभिप्रेत्याह—एकेति । अनेन समाप्तिकामा मङ्गलाचरणवन्तः सकलशिष्टाविप्रतिपत्तेरिदमनुमानं सूचितं भवतीति भावः ।

अन्यत्र वादे । सर्वहेतुकः साधारणधर्मदर्शनादिहेतुकस्त्रिविधोऽयमित्यर्थः ।

नान्वयेत्यादिसाध्ये विनापीति हेतुर्न सङ्गच्छते । व्यभिचारादर्शिनः कारणताग्रहसम्भ-वादित्यत आह—तत्र विचार इति । तथा च विचारे सति यदन्वयव्यतिरेकगम्यत्वं प्रमाविषय-त्वरूपं तन्निषेधस्य विवक्षितत्वात् नोक्तदोष इति भावः । यद्वा विप्रतिपत्तिजसंशयानावश्यकत्वेऽपि संशयावश्यकत्वादाह—तत्रेति ।

विचारे संशये । सति सप्तमीयम् । तत्राचार इति पाठः । निमित्तसप्तमी चेयमित्यन्ये ।

---

१. विजिगीषुविचारदिति भावः ।

विपक्षपक्षे न विचारचातुरी
न च स्वसिद्धान्तवचोदरिद्रता ॥३॥

इह खलु सकलशिष्टैकवाक्यतया अभिमतकर्म्मारम्भसमये तत्समाप्तिकामा मङ्गलमाचरन्ति। तत्र यद्यपि मङ्गलस्य कारणता नान्वयव्यतिरेकगम्या

अत्र यद्यपि कारणताशरीरप्रविष्टाया व्याप्तेरन्वयव्याप्तितया न व्यतिरेकसहचारापेक्षावश्यकी तथापि सति व्यतिरेके हेतोस्तत्र सत्त्वशङ्कया व्यभिचारशङ्काग्रस्ततयाऽन्वयोऽप्यकिञ्चित्कर इति तच्छङ्कानिवृत्त्यर्थं व्यतिरेकापेक्षाप्यस्तीति द्वयमप्युपात्तम्।

वस्तुतो नान्वयगम्या न व्यतिरेकगम्येति साध्यद्वयम्। न चात्र हेतोर्द्वितीयतत्र अभिमतकर्मसमाप्तावितिमूलार्थ इति केचित्।

प्रथमोद्दिष्टत्वेनेति। पुरः स्फूर्तिकत्वे प्रथमोद्दिष्टत्वम्। तत्र च कार्यकारणभावो वीजमिति भावः।

नान्वयेति। अन्वयव्यतिरेकयो. स्वरूपसतोर्गमकत्व नेत्यतः तयोर्ज्ञान तस्यापि सहकारित्वमतो विशिष्ट साध्यमिति भावः। **यद्यपीति**। कारणताया अशत्रयमनन्यथासिद्धत्व नियमः कार्यप्रागभावावच्छिन्नसमयवर्तित्वम्। तत्र नियमस्यान्वयव्याप्तितया न व्यतिरेकसहचारापेक्षाऽऽवश्यकीत्यर्थः।

तत्रेति। कार्यस्येति शेषः। तथा च व्यतिरेकसहचारज्ञानस्य साक्षादजनकत्वेऽपि व्यभिचारशङ्कानिराकरणद्वारा उपयोगित्वमस्त्येव[1]। यद्यपि व्यतिरेकसहचारग्रहे सत्यपि क्वचिद्व्यभिचारशङ्का तिष्ठत्येव तथापि यत्किञ्चिदधिकरणीयप्रतिबन्धकनिराकरणेऽप्युपयोगित्वसिद्धिः। नियतव्यतिरेकसहचारविवक्षया वा सार्वत्रिकव्यभिचारशङ्कावारणमिति भावः।

नन्वेव तुल्यकक्षतयोभयोपादानमसङ्गतमित्यनुशयादाह—**वस्तुत** इति। **नान्वयगम्या** नान्वयसहचारज्ञानसहकृतप्रत्यक्षगम्या। **न व्यतिरेकगम्या**। न व्यतिरेकसहचारज्ञानसहकृतप्रत्यक्षगम्येति मूलमेव व्याख्येयम्। व्यभिचारज्ञानविरोधिसहचारज्ञानत्वेनोभयोस्तुल्यवदन्वयव्याप्तौ ग्राहकत्वस्य वक्ष्यमाणत्वादिति भावः।

---

१. अत एव तदधिकरणीयतद्विरोधिसहचारधियो व्याप्तिग्राहकत्वं वक्ष्यामः।
नन्वेवं साध्याभावान्यसाधनाभावसहचारग्रहस्यापि तदधिकरणे साध्याभाववति साधनमिति व्यभिचारधीविरोधितया साध्यसाधनव्याप्तिग्राहकत्वापत्तिः। साध्यनिष्ठसाधनव्यभिचारसाधननिष्ठसाध्ये—इत्यधिकः पाठोऽत्रादर्शपुस्तके।

मङ्गलं विनापि प्रमत्तानुष्ठितसमाप्तेः। न च तत्र जन्मान्तरीयतत्कल्पनम्, अन्योन्याश्रयात्, लोकावगतकारणेनान्यथासिद्धेश्च।

मात्रीयतया प्रथमसाध्ये हेत्वलाभः। न हि वयं विनाऽपि मङ्गल'मित्यादिना ग्राहकाभावमाचक्ष्महे येनैकतरसाध्यमात्रविषयता हेतोः स्यात् किन्तु यदा समाप्तिस्तत्पूर्वं मङ्गलमित्येवंरूपव्याप्तिघटितकारणत्वरूपग्राह्याभावग्रहम्। स चोभयसाध्यसाधारण एव। विषयाभावग्रहस्य प्रत्यक्षमात्रे प्रतिबन्धकत्वात्। न च ग्राह्यविरहनिश्चयो नास्त्येव जन्मान्तरमङ्गलसंशयात् तत्संशयश्च न विरोधी मानमात्रोच्छेदापत्तेरिति वाच्यम्, यद्धीसामग्री यत्र प्रतिबन्धिका विशेषादर्शने सति तत्र तद्धीरपीति दशाविशेषे तस्यापि प्रतिबन्धकत्वात्। प्रकृते चान्वयव्यतिरेकव्यभिचाराभ्यां विशेषदर्शनाभावादिति भावः।

अन्योन्याश्रयादिति। सिद्धे जन्मान्तरीयमङ्गलेऽव्यभिचारे सति हेतुताग्रहः। कार्यकारणभावे च गृहीते समाप्त्या तदनुमानमित्यर्थः।

द्वितीयेति। व्यतिरेकसहचारखण्डकतयेत्याशयः। यद्यपि व्यतिरेकसहचारो यथाश्रुते न तेन खण्ड्यते नियतव्यतिरेकसहचारखण्डने तु यदा समाप्तिस्तत्पूर्वमवश्यं मङ्गलमिति नियतान्वयखण्डनमपि स्यादेव। यदि च व्यभिचाराज्ञानसहकृतो व्यतिरेकसहचारः खण्डनीयस्तदाऽन्वयसहचारोऽपि तादृशः खण्डितः स्यादेव। तथापि अभ्युपगमवादेनाह—**न हीति**। न चायमभ्युपगमवादोऽपि कथं शङ्काया एवानुक्तिसम्भवादिति वाच्यम्, मङ्गलव्यतिरेके सत्यग्रिमक्षणेऽवश्यं समाप्तिव्यतिरेक इति नियतो व्यतिरेकः मङ्गलतद्व्याप्येतरहेतुसम्पत्तौ मङ्गलतद्व्याप्ययोः सतोरग्रिमक्षणेऽवश्यं समाप्तिरिति नियतोऽन्वयो ग्राहको वाच्यः। 'अनन्यथासिद्धपूर्वोक्तनियतान्वयस्य ग्राह्यपर्य्यवसन्नत्वादि'ति **यन्मतं** तत्र द्वितीयमात्रीयता सम्भवति। न हि तदितरसकलसमवधाने मङ्गलव्यतिरेके समाप्तिव्यतिरेको मङ्गलव्यतिरेके समाप्तिसत्त्वे सम्भवतीति चरमोपक्रमाणामाद्यमेव द्वितीयमिति प्रथममात्रीयतयेत्यर्थ इति **कश्चित्**।

वस्तुतस्तु कारणत्वं नानन्यथासिद्धनियतपूर्ववर्त्तित्वम्, अयोग्यनानापदार्थघटितत्वेन तस्याप्रत्यक्षत्वापत्तेः। तथा च नैतदनुसारेण सहचारो विचार्यः, किन्तु स्वरूपसम्बन्धविशेषः कारणत्वं तद्ग्रहे च यदा समाप्तिस्तत्पूर्वमवश्यं मङ्गलम्। यदा न मङ्गलं तदा समाप्त्यभाव इत्येवंरूपयोरन्वयव्यतिरेकयोर्मिलितयोरेव ज्ञानस्य जनकत्वमन्वयव्यतिरेकाभ्यामिति यथाश्रुतावेव साध्यहेतू इति सारम्।

तस्यापि संशयस्यापि। इदञ्च मतान्तरेण प्रतिबन्धकत्वेन प्रतिबन्धनियतत्वस्य विवक्षया वा।

नापि मङ्गलं सफलम्, अविगीतशिष्टाचारविषयत्वात्, दर्शवदिति

ननु समाप्तेः कार्यतया हेतुत्वेना[२]स्तु परिशेषान्मङ्गलानुमानमित्यत आह—लोकावगतेति। तदसमवहितसामग्र्यजन्यत्वात्मकपरिशेषासिद्धेरित्यर्थः।

यद्वा कारणताशरीरप्रविष्टव्याप्त्यनन्यथासिद्धयोर्यथायथमसत्त्वं हेतुभ्यामाह—लोकेति। न चान्यथासिद्धिषु पञ्चसु तदनन्तर्भावः। अन्यत्र क्लृप्तपूर्ववर्त्तिन एवेत्यादेरवश्यकल्प्यपूर्ववर्त्तिन एव कार्यसम्भवे तत्सहभूतत्वमित्यर्थः। तथा च तत्रैवेतदन्तर्भावादिति भावः।

अनुमानमाशङ्क्य निषेधति—नापीति। सफलं बलवदनिष्टाननुबन्धीष्टसाधनम्, न त्विष्टसाधनमात्रं, हेतावविगीतपदव्यर्थतापत्तेरिति भावः। शिष्टपदञ्चाभ्रान्तपरम्। निष्फले चैत्यवन्दनजलताडनादौ वैधरागजप्रसङ्गयोरभावेन वेदानिषिद्धतया अविगीते व्यभिचारवारकम्। भ्रमश्च फलसाधनतांशे विवक्षितोऽतो न बलवदनिष्टाननुबन्धितांशभ्रममूलके परदाराभिगमनादौ व्यभिचारवारणार्थमुपात्तमविगीतपदमनर्थकमापद्यते। अभ्रान्तत्वञ्च सर्वैकवाक्यतया सुग्रहम्। तदर्थमेव प्राक् तदुत्कीर्त्तनम्।

आचारश्च यद्यपि क्रियैव तथापि विषयत्वश्रुतेः कृतिरेवात्र विवक्षिता। तद्विषयत्वञ्च यद्यपि भोगेऽपि गतमित्यनैकान्तस्तथापि साध्यत्वेन तद्विषयत्वं हेतुः, भोगस्तूद्देश्यतया कृतिविषय इति तत्त्वम्।

यद्वा तद्विषयक्रियात्वादिहेतुः।

अस्ति हि सशयस्याप्रतिबन्धकत्वेऽपि तत्सामग्र्या प्रतिबन्धनियमः। **अव्यभिचारे सति** व्यभिचारज्ञानाभावे सति।

ननु कार्यकारणभावमगृहीत्वापि प्रमत्तनास्तिकानुष्ठितसमाप्तिस्थले प्रमत्तनास्तिकानुष्ठितसमाप्तिर्न मङ्गलपूर्विका, मङ्गलासमवहितसामग्र्यजन्यत्वे सति जन्यत्वादिति मङ्गलानुमानं कर्त्तुं शक्यमतो नान्योन्याश्रय इत्याशयेन शङ्कते—**ननु समाप्ते**रिति। यदि तु मङ्गलस्य समाप्तिजनकतानुमानकृते इयं फक्किका योज्यते तदा प्रत्यक्षप्रकरणेऽनुमानोपन्यासे सन्दर्भविरोधो भवतीति ध्येयम्। **कार्यतया** सत्यन्तसहितकार्यतया। **हेतुत्वेने**ति। हेतुत्वविशेषितमङ्गलानुमानं पूर्ववर्त्तित्वविशेषितमङ्गलानुमानं मङ्गलपूर्वकेत्यनुमानमिति यावत्। **हेतुमत्त्वेने**ति पाठे समाप्तेर्विशेषणमिदम्।

अन्योन्याश्रयोपपादकत्वे चास्य ग्रन्थस्य चकारासङ्गतिरित्यरुचेराह—**यद्वे**ति। **अवश्यकल्प्ये**ति। तेन महत्त्वेनानेकद्रव्यवत्त्वस्यान्यथासिद्धिर्भवतीति भावः। यथा चैवमन्यथासिद्ध्यन्तरवैयर्थ्यं न भवति तथा वक्ष्यते।

---

२. हेतुमत्त्वेनेति पाठान्तरम्।

फलसिद्धौ प्रारिप्सितसमाप्तेस्तदानीमपेक्षितत्वेन नियमेनोपस्थितत्वात् फला-

वस्तुत शिष्टाचारविषयक्रियात्वादविगीताचारविषयक्रियात्वाद्वेति हेतुद्वयम्। अविगीतत्वञ्च बलवदनिष्टाननुबन्धित्वम्। तेन मधुविषसंपृक्तान्नभक्षणे न व्यभिचारः। तत्तद्ग्रहश्च पूर्ववत्। क्रियात्वादेव न फले द्वितीयहेतावनैकान्त.। क्रियापदस्य फला-न्यपरत्वात्। न चाफले व्यभिचार। बलवदनिष्टाननुबन्धित्वस्य फलगर्भतया हेत्व-

केचित्तु समाप्तिर्यदि मङ्गलासमवहितसामग्र्यजन्या सती मङ्गलजन्या न स्यादजन्या स्यादिति तर्केण व्यभिचारशङ्कानिरास. स्यादत आह—मूले **लोकेति**। तथा च मङ्गलासमवहित-सामग्र्यजन्यत्वात्मकविशेषणासिद्धौ नोक्ततर्कस्य मङ्गलजन्यत्वात्मकविपर्ययपर्यवसानमिति भाव इत्याहुः।

अनुमानं—मङ्गलं समाप्तिफलकं समानीतराफलकत्वे सति सफलत्वादित्याकारकहेतौ विशेष्या-सिद्धिमुद्धर्तुं मङ्गलं सफलमित्यनुमानम्। तद्व्याचष्टे—**सफलमिति**। शिष्टपद चेत्यादे-स्तद्विषयक्रियात्वादित्यन्तस्याय निर्गलितोऽर्थ.। अविगीतत्वे सति इष्टसाधनताभ्रमरहितस्य या कृति. साध्यतया तद्विषयत्वात्। साध्यतयेति स्थाने फलान्यत्वरूपक्रियात्वादिति[१] वा। अत्र दूरस्थसरो-ऽवगाहनादौ व्यभिचारवारणाय बलवदनिष्टाजनकत्वमविगीतपदेन विवक्षणीयम्[२]।

केचित्तु दूरस्थसरोऽवगाहनवारणाय लौकिकप्रमाणप्रमापितेष्टजनकत्वाभावरूपमलौकि-कत्वमधिकं देयम्, अविगीतपदं चैव श्येने व्यभिचारवारकमिति—तन्न, दैवान्मरणफलकेऽश्वमेधीय-तुरङ्गमरक्षणे व्यभिचारात्।

वस्तुत इति शिष्टपदमभ्रान्तपरम्। तेनागम्यागमनादौ न व्यभिचार.।

बलवदिति। न च स्वजन्येष्टापेक्षया यदधिकानिष्टजनकं तद्भिन्नत्वस्य बलवदनिष्टाननु-बन्धित्वस्य निष्फलकर्मण्यपि सत्त्वमिति वाच्यम्. स्वजन्यानिष्टापेक्षयाऽन्यूनफलेन यद्रहितं तद्बल-वदनिष्टानुबन्धि, तद्भिन्नत्वस्य फलवत्त्वे सत्यधिकानिष्टजनकभिन्नत्वस्य वा विवक्षितत्वात्।

विषेति—प्रमादकृत इति शेष.। दूरस्थसरोऽवगाहनादिकं वाऽत्रोदाहरणम्। अप्र-मादकृते यथाश्रुताविगीतपदेनैव व्यभिचारवारणसम्भवादिति।

द्वितीयहेतौ व्यस्तहेत्वात्मकद्वितीयराशौ। **अफल** इति। बलवदनिष्टाजनके हस्त-चालनादाविति भावः। बलवदनिष्टेत्यादौ हेतु.—**आचारेति**। **यथाश्रुतेऽपीति**। तथा चानिषिद्धकृतिविषयक्रियात्व हेतुरित्यर्थ.। यथा च बलवदनिष्टाजनकत्वभ्रमेणागम्यागमनादौ प्रसक्तिस्तथेष्टजनकत्वभ्रमेण निष्फलेऽपि प्रसक्तिरस्तीति निषेधसम्भवादिति भावः।

---

१ साध्यतयेति परित्यागे तद्विषयत्वे सति फलान्यत्वादिति पाठान्तरम्।

२. न तु वेदानिषिद्धत्वमिति तत्त्वमित्यधिकः पाठ. कस्मिंश्चित्पुस्तके।

न्तरस्यातथाभावात् 'विश्वजिन्न्यायेन' फलकल्पने गौरवात् परिशेषानुमानेन तत्कारणताग्रहः। व्यभिचारेण कारणत्वस्याभावात् उपायसहस्रेणापि ग्रहीतुमशक्यत्वात्।

भावात्। आचारविषयस्य फलाजनकस्य बलवदनिष्टजनकत्वनियमाच्च 'कष्टं कर्म्मे'ति न्यायात्। यथाश्रुतेऽपि तत्र तदभावाच्च। 'न विप्र' इत्यादिना तत्रापि वेदनिषेधात्।

वस्तुतः शिष्टपदं वेदप्रामाण्याभ्युपगन्तृपरम्। तदाचारत्वं तन्नियताचारत्वं तदनभ्युपगमासम्भाविताचारत्वमिति यावत्। तद्ग्रहश्च पूर्ववत्। अत एव दर्शो दृष्टान्तः। तथा च सति रात्रिश्राद्धादावेव व्यभिचार इत्यविगीतपदम्।

यद्वा वृथा चेष्टात्वेन निष्फलस्यापि विगीततयाऽविगीताचारविषयत्वात् शिष्टाचारविषयत्वादिति हेतुद्वयम्। शिष्टत्वञ्चाभ्रान्तत्वमित्युक्तम्। आचारविषयत्वञ्च स्वजनकचिकीर्षाविषयत्वम्। अतो भोगादौ न व्यभिचारः। यदा चेष्टसाधनताज्ञानं

यथाश्रुतेऽपीत्यत्र हेतुः—**न विप्र** इति। ननु इद प्रमादकृते सविषान्नभक्षणे दूरस्थ-सरोऽवगाहने च व्यभिचारि—न। नरकाननुबन्धीष्टसाधनत्वस्य प्रवृत्तिविषयतावच्छेदकरूपावच्छेदेन बलवदनिष्टाननुबन्धित्वे सतीष्टसाधनत्वस्य वा साध्यत्वात्।

यद्वा उक्तानुशयाग्रह—**वस्तुत** इति। क्वचित्पुस्तके **यथाश्रुतेऽपि तत्र तदभावादिति** नास्ति। तत्र बलवदनिष्टजनकत्वनियमे साध्ये **कष्टं कर्म्मे**ति, **न विप्र इति** च हेतुद्वयाभिधानात् प्रकृते त्वनिषिद्धत्वरूपहेत्वनभिधानान्नोक्तानुशय इति ध्येयम्। अत्र च वेदप्रामाण्यमिष्टसाधनतांशे विवक्षितम्। अन्यथा स्वर्गजनकत्वभ्रमेण कृते जलताडनादौ व्यभिचारात्। एवं च रात्रिश्राद्धस्य शिष्टपदेनैव वारणात्। रात्रिश्राद्धादिशब्देन श्येनादिकं विवक्षितत्वात्तद्वारणायाविगीतपदम्। बलवदनिष्टाननुबन्धित्वं च तदर्थोऽन्यथाऽश्वमेधीयतुरङ्गरक्षणे दैवान्मरणफलके व्यभिचारापत्तेः।

नन्विदमपि निष्फलकर्मणि वर्तते तज्जन्यानिष्टाभावात्। तथा हि 'न कलञ्जं भक्षयेदि'-त्यत्र विध्यर्थनिषेधे कर्तव्ये कृतिसाध्यत्वस्येष्टसाधनत्वस्य विद्यमानत्वात् बलवदनिष्टाननुबन्धित्वस्य निषेधो वाच्य इति तत्र दुरितापूर्वं कल्प्यते। निष्फलत्वे त्विष्टसाधनत्वस्यैवाभावान्न दुरितापूर्वं कल्प्यते। न चैवं विशेषणमात्रमेव सम्यक्। स्वजन्येष्टापेक्षाधिकानिष्टजनकभिन्नत्वस्य निष्फलेऽपि गतत्वादिति।

यद्वेत्यारभ्य भोगादौ न व्यभिचार इत्यन्तं क्वचित्पुस्तकेऽस्ति। तच्च यद्यपि यथाश्रुतेऽपीत्यादिना वस्तुतः शिष्टाचारेत्यादिना च गतार्थं तथाऽपि पूर्वं क्रियात्वेन फलवारणमिह तु स्वजनकचिकीर्षाविषयेत्यादिविवक्षयेति भेदः।

तथापि तथाविधशिष्टाचारानुमितश्रुतिरेव मङ्गलस्याभिमतहेतुत्वे मानम् । न च व्यभिचारः । निष्परिपन्थिश्रुत्या मङ्गलं समाप्तिसाधनमिति प्रमापिते

बलवदनिष्टानुबन्धित्वज्ञानाभावश्च प्रवृत्तिहेतुरिति मतं तदाऽविगीताभ्रान्ताचारनिश्चयत्वं हेतुरिति सम्मुख एव ग्रन्थः समीचीन इति स्मर्त्तव्यमिति सर्वमवदातम् ।

अपेक्षितत्वेनेति । प्रवृत्तपुरुषेच्छाविषयत्वेन प्रवर्त्तमानस्योपस्थितत्वादित्यर्थः ।

यदा चेति । पूर्वं प्रवृत्तिजनकभ्रमरहितपरे शिष्टपदेऽविगीतपदमनर्थकं स्यादित्युक्त्वा इष्टसाधनतांशभ्रमरहितपरत्वेन शिष्टपदं व्याख्यातम् । इदानीन्तु बलवदनिष्टाननुबन्धित्वज्ञानस्याजनकतया अगम्यागमनप्रवृत्तिजनकभ्रमरहितपरेऽपि शिष्टपदेऽगम्यागमने तदर्थसत्त्वात्तद्वारणायाविगीतपदं व्याख्यायते बलवदनिष्टाननुबन्धित्वञ्च तदर्थः, अन्यथा दूरस्थसरोऽवगाहने व्यभिचारादिति ।

अत्रायं सङ्ग्रहः—बलवदनिष्टाजनकफलांशभ्रमरहितकृतिविषयत्वादित्याद्यो हेतुः । साध्यत्वेन फलान्यत्वरूपक्रियात्वेन वा विशेषणाद्द्वितीयः । समस्ताभ्रान्ताचारविषयक्रियात्वादिति तृतीयः । बलवदनिष्टाननुबन्धिकृतिविषयक्रियात्वादिति चतुर्थः । यथाश्रुतेऽपीत्यादिनोक्तो वेदानिषिद्धकृतिविषयक्रियात्वादिति पञ्चमः । बलवदनिष्टजनकवेदप्रामाण्यानभ्युपगमासम्भावितकृतिविषयक्रियात्वादिति षष्ठः । तृतीयपञ्चमयोरेव क्रियात्वस्थाने स्वजनकचिकीर्षेत्यादिविवक्षया सप्तमाष्टमौ । बलवदनिष्टाननुबन्धित्वे सति प्रवृत्तिजनकभ्रमरहितकृतिविषयक्रियात्वादिति नवम इति ।

ननु बलवदनिष्टाननुबन्धीष्टसाधनत्वे साध्यमानेऽर्थान्तरम् । सफलत्वमात्रस्य हेतुनिविष्टतया साधनौचित्यादिति चेत्—

अत्र कश्चित् समाप्तीतरफलकमपि द्विविधम्—बलवदनिष्टानुबन्धि तदननुबन्धि च । तत्राद्यनिरासेन विशेषणांशसिद्धिप्रयोजकतया नार्थान्तरमिति—तन्न । बलवदनिष्टाननुबन्धित्वं हेतुंकृतवतो नेदं सिद्धमिति वचने व्याघातात् । तद्घटितहेतुद्वयस्य च दुष्टत्वात् ।

इह कश्चित् नत्राचार इति पूर्वं व्याख्यानात् आचारोपयोगिनी बलवदनिष्टाननुबन्धिसमाप्तिजनकताऽत्र साध्या । तत्र च बलवदनिष्टाननुबन्धिफलकत्वमेव हेतुप्रविष्टमिति नार्थान्तरमिति ।

केचित्तु एवं सत्यपि बलवदनिष्टाननुबन्धित्वभागस्य हेतुप्रविष्टस्य सिद्धतया साधनानौचित्यात् परिशेषानुमाने कृतिसाध्यत्वस्यापि साधनापत्तेश्च सफलत्वमात्रं साध्यम्, फलांशभ्रमरहिताचारविषयक्रियात्वमनिषिद्धाचारविषयक्रियात्वञ्च हेतुरित्याहुः ।

अपेक्षितत्वेनेति मूलम् । इच्छाविषयत्वेनेत्यर्थः । किमपेक्ष्येत्याकाङ्क्षायां प्रवृत्तपुरुषस्येत्यर्थः । उपस्थितत्वादिति । किन्निष्ठोपस्थितिः प्रवर्त्तमानस्येत्यर्थः ।

ननु मा भूदन्यन्नियतोपस्थितिकं स्वर्गस्तु सकलकामनाविषयत्वेन नियतोपस्थितिकः फलं भवेदत आह—विश्वजिदिति। यथा विश्वजिता यजेतेत्यत्र रात्रिसत्रन्यायेनार्थवादादनुपस्थितेऽपीष्टे विधिबोधितेष्टसाधनत्वानुपपत्त्या विशेषतः फलोपस्थितिं विना प्रवर्त्तकत्वान्यथानुपपत्त्या च विशेषतः फले कल्पनीये ग्रामपश्वादीनां गौणप्रयोजनतया स्वर्गापवर्गयोरेव तथात्वेन तयोरप्यपवर्गस्याभावरूपतया गुरूपस्थितिकत्वात् लघुः स्वर्ग एव फलं कल्प्यते तद्वदिहापीत्यर्थः।

गौरवादिति। अधिकारिद्वयकल्पनागौरवान्न त्वनुपस्थितफलकल्पनागौरवात्। ग्रामपश्वादिसाधारणतया पृथक् शङ्कानुत्थापनात्। विश्वजिद्वत् स्वर्गफलकत्वे हि प्रधानतया अधिकारिभेदोऽङ्गत्वे च प्रधानाधिकारिकर्त्तव्यत्वेनाधिकाराभेदः। तदुक्तं—महार्णवे वत्सेश्वरेण। तथाऽप्यभीष्टापूर्वकालाङ्गमङ्गलानुमाने गौरवमतो लाघवादङ्गताबोधकवेदानुमानमेवेति।

प्रवर्त्तमानस्येति। परिशेषानुमाने प्रवर्त्तमानस्येत्यर्थः। **फलान्तरस्ये**ति मूलम्। मङ्गलाचारप्रवृत्तपुरुषकामनाविषयत्वाभाववत्त्वेनोपस्थितत्वादित्यर्थः। तथा च मङ्गलं न समाप्तीतरग्रामपश्वादिफलकं तत्कामना विना क्रियमाणत्वादित्यनुमानान्तरमिहाभिमतम्। समाप्तिफलकत्वव्यतिरेकोऽपि तर्हि एतस्मादेव हेतोः स्यादित्याशङ्कायामुक्तहेतोस्तत्रासिद्धिप्रदर्शनाय **प्रारिप्सितसमाप्तेस्तदानी**मित्यादिमूलमिति ध्येयम्। यथा 'प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ती'त्यनेन बोधिते रात्रिसत्रे कामनावाचिपदाभावेन फलत्वविशिष्टाश्रवणेऽपि न स्वर्गः फलं तथा विश्वजित्यपि मास्त्वित्यत आह—**रात्री**ति। तत्र फलत्वाश्रवणेऽपि प्रतिष्ठात्मकफलस्वरूपं प्रतितिष्ठन्तीत्यर्थवादेनोपस्थितम्। अतस्तत्र फलत्वांशमात्रकल्पना। स्वर्गफलकत्वे तु धर्मिधर्मोभयकल्पनेऽतिगौरवान्न स्वर्गफलकत्वम्। विश्वजिति तु न तथा फलस्वरूपमप्युपस्थितमस्तीत्यर्थः।

विधीति। विशेषाभावे सामान्यस्यानुपपत्तेरित्यर्थः। **पृथक्शङ्के**ति। यद्यपि सामान्यतः फलेऽवगते विशेषतः फलकल्पनावसरेऽन्यत्र विश्वजिन्न्यायावतारो दृष्टः, इह तु तदवतारे किं बाधकमित्येतावन्मात्रजिज्ञासाया विश्वजिदितिग्रन्थः सङ्गच्छत एव, तथाऽपि स्वर्गकामनायाः समाप्तिकामनाप्रयोजकत्वेनानावश्यकत्वात् अनुपस्थितकल्पनागौरवादित्यस्यासिद्धिरेव मुख्यतोऽत्र दोष इति भावः।

अत्र वदन्ति—स्वर्गस्य समाप्तिकामनाप्रयोजककामनाविषयत्वेऽपि साक्षात् फलकामनाया एवाधिकारिविशेषणतयाऽधिकारिविशेषणीभूतकामनाविषयत्वाभाववतः फलत्वकल्पने गौरवादिति विवक्षितोऽर्थः। तथा च नासिद्धिरिति—तन्न। विश्वजिन्न्यायेन स्वर्गफलकत्वं वदता स्वर्गकामनाया एवाधिकारिविशेषणतया तदभावस्यासिद्धत्वादिति।

वस्तुतो मङ्गलस्य विश्वजित्साम्ये तद्वदारम्भसमयनियमो न स्यात्। न चारम्भपूर्वकालाङ्गतयैव तदुपपत्तिः तस्याधिकारिविशेषणत्वापत्तेः। तथा च पूर्वकालत्वनिश्चय. प्रवर्त्तक । स च पूर्वकालत्वस्य प्रागभावगर्भतया प्रागभावत्वग्रहस्य च भाविनि मानाभावेन अशक्यतया दु सम्भव.। अत एव दर्शपौर्णमासाभ्यामिष्ट्वा 'सोमेन यजेते -त्यत्र नेष्टौ सोमपूर्वकालत्वविधिरपि तु लक्षितलक्षणया इष्ट्युत्तरत्वविधिरेव क्त्वाप्रत्ययेन सोमे क्रियत इति प्राभाकरा अपि वदन्ति ।

अस्तु वारम्भणीयादावारब्धचिकीर्षाकालोऽधिकारिविशेषणम् । तथाऽपि तस्य सुनिश्चेयतया तत्त्वसम्भवेऽपि प्राधान्येन तत्समयान्तरविधिरित्यधिकं गौरवम्। न चाङ्गत्वेऽपि तत्तुल्यम्, प्रधानकालेनैवाकाङ्क्षाशान्ते', किन्तु क्रमाकाङ्क्षामात्रम्। साऽपि प्रतिबन्धकध्वंसद्वारकत्वेनाङ्गत्वे ज्ञाते पूर्वकाल एव प्रयोजनसत्त्वेनार्थक्रमन्यायादेव शान्तेति न तद्बोधकविधायकान्तरापेक्षेति सर्वं सुस्थम् ।

परिशेषानुमानेन इत्तराफलकत्वे सति सफलकत्वानुमानेन। न च गौरवेण सफलकत्वानुमितौ स्वर्गाविषयकत्वेऽपि न स्वर्गफलकत्वाभावः सिद्धः तत् कुतो हेतुसिद्धिरिति वाच्यम्, स्वर्गो न मङ्गलफलं समाप्त्यपेक्षया गुरुत्वादिति गौरवलिङ्गत्वे तात्पर्यात्।

वस्तुतस्तु समाप्तिमात्रफलकत्वे लाघवम् अन्यफलकत्वे गौरवमिति लाघव-

अधिकारिद्वयकल्पनागौरव विवृणोति—विश्वजिदिति । मानाभावेनेत्यनन्तर अशक्यतयेति शेषः। क्वचित्तथा पाठ एव। लक्षितेति। **गुरुमते** क्त्वाप्रत्ययस्य समानकर्तृकत्व वाच्यम्। तदधिकरणावधिकमुत्तरकालीनत्व लक्ष्यम्। **न्यायमते** तु पूर्वकालीनत्व शक्यम्। तदधिकरणावधिकमुत्तरकालीनत्व लक्ष्यमिति परम्परासम्बन्धेन लक्षणैव लक्षितलक्षणेत्यर्थः।

एव सत्यारम्भणीयादौ का गतिरित्यनुशयादाह—अस्तु वेति। **प्रधानकालेनैवेति**। प्रधानकालसन्निहितकालेनैवेत्यर्थः। **क्रमाकाङ्क्षामात्रमिति**। प्रधानकालसन्निहितः कालः पूर्व उत्तरो वेत्याकाङ्क्षामात्रमित्यर्थः। **अर्थेति**। 'अग्निहोत्र जुहोति', 'यवागू पचति' इत्यत्र यथा यवागूपाकस्य पूर्वत्व दृष्टप्रयोजनानुरोधात्तथेहापीत्यर्थः।

स्वर्ग इति। समानवित्तिवेद्यतया चात्र स्वर्गफलकत्वाभावोऽपूर्वमङ्गलगतः सिद्ध्यतीति हृदयम्। यद्यपि एवमपि ग्रामपश्वादिफलकत्वाभावः पूर्व साधित इदानीञ्च स्वर्गफलकत्वाभाव इति विशेषाभावद्वयसिद्धावपि समाप्तीतरफलकत्वसामान्याभावो न सिद्धः, तथाऽपि विशेषाभावद्वयेन सामान्याभावोऽपि साधनीयो विशेषाभावद्वयस्यैव वा हेतुप्रविष्टत्वमिति भाव.।

ननु समानवित्तिवेद्यता नात्र सम्भवति! अनुमाने व्यापकतावच्छेदकावच्छिन्नस्यैव विषयत्वादित्यनुशयादाह—**वस्तुत** इति।

प्रतिसन्धाने तत्प्रतिसन्धानोपनीतसमाप्तिमात्रफलकत्वमेव सफलत्वानुमितौ विषय इति युक्त. परिशेषः। अत एव लाघवज्ञानं लघुविषयकज्ञाने सहकारीत्युच्यते। यथा चैतत्तथा वक्ष्यते।

व्यभिचारेण व्यतिरेकव्यभिचारेण। तथा च बाध इत्यर्थः। यद्यप्यत्र व्यभिचार-निश्चयो नास्त्येव तत्संशयस्त्वविरोधी प्रत्युत सन्दिग्धे न्यायप्रवृत्तेरनुगुण एवान्यथा वेदोऽपि मूकः स्यात् अयोग्यतासंशयात् तस्य चेदनुकूलत्वमिहापि तुल्यम्। तथाप्यन्ध-परम्परामात्रभिया प्रकारान्तरोपादानम्। अत एव श्रुत्यनुमानाभ्यामित्यग्रे। तत्रापि सम्मतिमाहेति।

तथाविधेति। अलौकिकाविगीतनिर्विघ्नसमाप्तिकामशिष्टाचारानुमितेत्यर्थः। अलौकिकत्वञ्च लोकावगतबलवदनिष्टाननुबन्धीष्टसाधनताकाऽन्यत्वं न तु प्रमापि-

अत्र वदन्ति—एवं परिशेषानुमानं व्यर्थं स्यात्। समाप्तीतराफलकत्वे सति समाप्तिफल-कत्वमेव हि समाप्तिमात्रफलकत्वम्। तथा च तत्र लाघवावतारे समाप्तिफलकत्वस्य लाघवादेव सिद्धत्वादिति—मैवम्। समाप्तीतराफलकत्वांशमात्रे लाघवज्ञानदशायां परिशेषानुमानस्य साव-काशत्वादिति।

ननु लाघवोपनीतस्य न प्रकारत्वमित्यत आह—**तथा चेति**। **तथाऽपीति**। स्वतन्त्र-प्रमाणामूलकत्वेन विश्वासानास्पदत्वमेवानुमाने दोष इत्यर्थः।

प्रमत्तनास्तिकसमाप्तिस्थले मानाभावेन मङ्गलव्यतिरेकनिश्चयाद् व्यभिचारनिश्चय एवेत्य-भिमानाद् **व्यभिचारेणे**त्यादिमूलमित्येके।

अलौकिकेति। अत्र वदबाधितबलवदनिष्टाननुबन्धीष्टसाधनताकत्व साध्ये नान्धपरम्परा-शङ्कानिरासः वेदबाधितबलवदनिष्टाननुबन्धित्वसमानाधिकरणनिर्विघ्नसमाप्तिरूपेष्टसाधनताकत्व साध्ये दर्शादौ व्यभिचार इत्याशङ्क्य सामान्यरूपणापि निर्विघ्नसमाप्तिकामशिष्टाचारस्यैव हेतुत्वात् पक्षधर्मताबलान्निर्विघ्नसमाप्तिसाधनताबोधक एव वेदः सिध्यतीत्याशयेन हेतावप्रविष्टमपि **निर्विघ्ने-त्यादिविशेषणमुक्तम्**। अत्र च लोकप्रमापितबलवदनिष्टाननुबन्धीष्टसाधनताकभिन्नत्वम**लौकि-कत्वम्**। इष्टसाधनताशभ्रमरहितत्व **शिष्टत्वम्**। वेदानिषिद्धत्वम**विगीतत्वम्**। भोजनादौ जल-ताडनादावगम्यागमनादौ च व्यभिचारवारणाय। वैधरागजप्रसक्त्यभावेनाविगीततया निष्फलजल-ताडनादेः शिष्टपदं विना वारणासम्भवादिति व्याख्यानं दूषयति—**न त्विति**। सविषान्ने प्रमाद-कृतमधुविषसम्पृक्तान्नभक्षणे ज्ञानकृते विगानात्। भ्रमकृतदूरस्थसरोवगाहनादिकं वात्रोदाहार्य्यम्।

अत्र वदन्ति—नरकाननुबन्धित्वसमानाधिकरणा लोकप्रमापिता इष्टसाधनता यस्य

तत्वान्तर्भावः, सविपाकेऽनैकान्त्यात्। न चागम्यागमन एवमपि न व्यभिचार इति वाच्यम्, रात्रिश्राद्धादौ व्यभिचारवारकत्वात्। एवञ्चाविगीतपदमनर्थकं न भवति। लोकपदञ्चादृष्टार्थकवाक्यातिरिक्तमानपरम्। तेन चैत्यवन्दनाद्यपि यदि बौद्धागमप्रामाण्यनिबन्धनप्रवृत्ति तदा शिष्टपदेन यदि जलताडनादिसाधारणं तदाऽलौकिकपदेन निवार्य्यते। शिष्टपदञ्च पूर्ववन्निष्फलकर्मण्यनैकान्तिकवारकम्।

व्यभिचारवारणादगम्यागमनजलताडनयोश्चाविगीतशिष्टपदाभ्यां व्यभिचारवारणात् स्वस्थोऽयं हेतुः।

यद्वाऽविगीतपदेन बलवदनिष्टाननुबन्ध्यर्थकेनागम्यागमनमिव तदुभयमपि वार्यत इति—तन्न। प्रथमकल्पे प्रमापितत्वान्तर्भाववैयर्थ्यात्। न च तदनन्तर्भावे निष्फलस्यालौकिकपदेनैव वारणाच्छिष्टपदं व्यर्थमिति वाच्यम्, स्वर्गजनकत्वबुद्ध्या केनचित् कृते केवलेऽङ्गे व्युत्क्रमकृताश्वमेधादौ च व्यभिचारवारकत्वात् नरकाननुबन्धित्वभागोऽपि व्यर्थ एव। न चागम्यागमनवारकमविगीतपदं तद्दाने व्यर्थं स्यादिति वाच्यम्, श्येनवारकतया सार्थकत्वात्। न च वेदबोधितेष्टसाधनत्वमात्रं साध्यं तच्च श्येनेऽप्यस्तीति वाच्यम्, तथा सति बलवदनिष्टाननुबन्धित्वांशेऽन्धपरम्पराशङ्काया अनिरासात्। द्वितीयकल्पे च विगीतत्वं हि वेदनिषिद्धत्वमिति ग्रन्थविरोधः प्रमापितत्वांशवैयर्थ्यं च।

एवमपि लोकावगतत्यादिविशेषणेनापि। **न व्यभिचार** इति। तथा चाविगीतपदं व्यर्थमिति शेषः। **रात्रिश्राद्धादाविति**। अतद्गुणसंविज्ञानबहुव्रीहिणा श्येनादावित्यर्थः। रात्रिश्राद्धस्य निष्फलतया शिष्टपदेनैव वारणात्।

नन्वेवं जलताडनादेरलौकिकपदेनैव वारणात् शिष्टपदं व्यर्थमित्यत आह—**लोकपदञ्चेति**। **अदृष्टार्थकेति**। तदुपजीवीत्यपि देयमन्यथा स्वरूपासिद्ध्यापत्तेः। अदृष्टार्थकत्वं चादृष्टप्रतिपादकत्वमात्रम्[1]। अलौकिकपदेनैव चैत्यवन्दनवारणे पुनरपि शिष्टपदं व्यर्थमित्यत आह—**शिष्टपदमिति**। **निष्फलेति**। अदृष्टार्थकप्रतारकवाक्यमूलके जलताडनादौ व्युत्क्रमकृताश्वमेधादौ चेत्यर्थः।

नन्वेवं लोकावगतेष्टसाधनताकभिन्नत्वमेवालौकिकत्वमस्तु बलवदनिष्टाननुबन्धित्वांशस्य वैयर्थ्यादिति चेत्—न। लोकावगतबलवदनिष्टाननुबन्धिताकभिन्नत्वघटिते लोकावगतेष्टसाधनताकभिन्नत्वघटिते च हेतुद्वये तात्पर्यात्।

---

१ तैरपि क्षणिकोत्तरोत्तरसंस्काररूपादृष्टाङ्गीकारात्। यद्वा शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमितिविषयार्थकं यत् तद्भिन्नत्वरूपं तत्। तस्य च सार्थकत्वं वेदे निरर्थकत्वं च बौद्धागमे सत्त्वात्—इत्यधिकः पाठोऽत्र काशीपुस्तके।

UNIVERSITY LIBRARY

यद्वा अलौकिकविषयत्वे ध्रुवे प्राग्वदिहापि हेतुद्वयमेव। शिष्टपदस्याभ्रान्तपरत्वे अलौकिकत्वं, वेदप्रामाण्याभ्युपगन्तृपरत्वेऽविगीतत्वमिति विवक्षाभेदेन हेतुद्वयम्। तदर्थस्तु पूर्वोक्त एवेति वस्तुगतिः।

अत एव वेदानुमापकहेतौ शिष्टपदं वेदप्रामाण्याभ्युपगन्तृपरमिति प्रकाशः।

केचित्तु यादृशाविगीतालौकिकशिष्टाचारविषयो यत्तत्तादृशकर्त्तव्यत्वेन वेदविहितमिति सामान्यतो व्याप्त्यवधारणमित्यवश्यं शिष्टकर्त्तव्यतया वेदबोधितमिति साध्यमतो न व्यभिचार इत्याहुः।

तादृशपदस्वरसात् उक्त एव हेतुरतो वेदमूलकत्वानुमानमात्रम्, फलविशेषनिश्चयश्च परिशेषादिति तु वयं ब्रूमः।

यद्वा एतदस्वरसादेवाह—यद्वेति। हेतुद्वयमिति। अलौकिकाभ्रान्ताचारविषयत्वं अलौकिकबलवदनिष्टाननुबन्ध्याचारविषयत्वं चेत्यर्थः। शिष्टपदस्य श्येनादिवारणायाभ्रान्तपरत्वात्। अविगीतपदस्य व्युत्क्रमकृताश्वमेधादिवारणाय बलवदनिष्टाननुबन्धिपरत्वात्। अलौकिकपदं चोभयत्र लोकावगतेष्टसाधनताकभिन्नमात्रपरम्। अतो न पूर्वोक्तदोषः। शिष्टपदं ध्रुवीकृत्याविगीतालौकिकपदयोर्वैकल्पिकोपादानं मनसि कृत्याह—शिष्टपदस्येति। यद्यपि अलौकिकाभ्रान्ताचारविषयत्वरूपो हेतुः पूर्वमेव व्याख्यात इति पौनरुक्त्यं, तथाऽपि वेदप्रामाण्येत्यादिद्वितीयहेतुमादाय भेदः। अविगीतत्वञ्च बलवदनिष्टाननुबन्धित्वम्। अतो व्युत्क्रमकृतयागादौ न व्यभिचारः। तदर्थः वेदप्रामाण्येत्याद्यर्थः। पूर्ववद्भोजनादौ व्यभिचारवारणाय तदनभ्युपगमासम्भावितेत्याद्यर्थः। अत एव वेदेति। पूर्वव्याख्याने शिष्टपदस्य वेदप्रामाण्याभ्युपगन्तृपरत्वाभावात् प्रकाशविरोध इति भावः।

केचित्त्विति। तुशब्दः पक्षधर्मताबलात् साध्यविशेषलाभ इति पूर्वोक्तकल्पव्यवच्छेदाय। यादृशेति। यत्कामेत्यर्थः। तादृशेति। बलवदनिष्टाननुबन्धित्वविशिष्टतत्कामकर्त्तव्यत्वेनेत्यर्थः। अवश्यमित्यनन्तरं समाप्तिकामेति शेषः। यदि भवेद्विशिष्टेतिपाठस्तदा विशिष्टपदस्यैव समाप्तिकामार्थकत्वान्न शेषः। अत इति। सामान्यव्याप्त्यनुसरणादित्यर्थः। न व्यभिचार इति दर्शादाविति शेषः।

पक्षधर्मताबलादेव साध्यविशेषलाभ इति यत्पूर्वमुक्तं तत्र तत्प्रकारकप्रतीत्यभावादनाश्वासो नापैतीत्येषामाशयः। यत्तत्पदार्थगर्भसामान्यव्याप्तेर्व्यतिरेकपर्यवसानमेवेत्यस्वरसादाह—तादृशेति। तादृशं यत्पदं पूर्वोक्तहेतुपरामर्शकं तथाविधपदमित्यर्थः। यद्यपि तथाविधपदपरामर्शनीये पूर्वोक्तहेतावलौकिकत्वं नास्ति, तथाप्यविकमिति न्यायेन तथाविधत्वं वर्तत एवेति भावः। यद्यपि चैवं यत्कामेत्यस्य हेतौ प्रवेशेऽपि तथाविधत्वानपायस्तथाप्यणुरपीति न्यायेनेदम्, शिष्टपदं ध्रुवीकृत्यालौकिकत्वाघटितहेत्वभिप्रायेण वेदम्। अतः उक्तहेतोः।

तत्रापि तथैव लिङ्गेन जन्मान्तरीयतदनुमानात्। तच्चेदमारब्धकर्म्माङ्गं कर्म्मार्थितया शिष्टैस्तत्पूर्वं क्रियमाणत्वात् फलान्तराभावे सति फलवत्कर्म्मा-

न चेति। अयोग्यतासंशयो न विरोधी तन्निश्चयो नास्त्येवेति भावः। न चेदानीमानुपूर्वीविशेषविशिष्टवेदानुमापकलिङ्गाभावात्तद्विशेषप्रत्ययाधीनत्वाच्च शाब्दप्रत्ययस्य कथं वेदाधीनप्रत्ययादिदानीन्तनप्रवृत्तिरिति वाच्यम् इदानीमन्धपरम्परामात्रशङ्कामात्रनिवर्त्तकत्वात्तदनुमानस्य यदा स वेदः प्रत्यक्षः तदाऽऽनुपूर्वीज्ञानमासीदेवेदानीन्तद्बोधकत्वेनानुमानादिति दिक्।

तत्रापीति। इदन्त्वनुमानसौकर्य्यादुक्तम्। तदनुमानाभावेऽपि शब्देन तज्जनकताबोधने बाधकाभावात्। न च व्यभिचारज्ञानाभावार्थं तत् शब्दादेव तद्भावादिति बोध्यम्।

ननु मङ्गलमङ्गं यदि तदाधिकार्य्यैक्यलाघवं तदेव तु कुत इत्यत आह—

तच्चेदमिति। **आरब्धकर्माङ्गमारब्धकर्मसमानाधिकारिकम्।**

कर्म्मार्थितया **कर्मस्वरूपनिष्पत्त्यर्थितया कर्मफलार्थितया** वा।

नन्वेवं समाप्तित्वांशे वेदमूलकत्वाग्रहादनाश्वासो नात्यैतीति पूर्वोक्तदूषणं तदवस्थमित्यत आह—**फलेति**। समाप्तिरूपेष्टेत्यर्थः। **परिशेषादिति**। समाप्तीतराफलकत्वे सति वेदबोधितबलवदनिष्टाननुबन्धीष्टसाधनताकत्वादित्यर्थः। अन्यादृशः पाठक्रमोऽत्र प्रामादिकः।

तद्विशेषेति। आनुपूर्वीविशेषेत्यर्थः। **अनुमानसौकर्यं** यद्यपि शश्वन्मङ्गलं समाप्तिनियतपूर्ववर्त्तीति प्रमापिते सिद्धसाधनान्नानुमानसौकर्यं तथापि मङ्गलं समाप्तिनियतपूर्ववर्त्तीति निश्चयेऽपि प्रमत्तकृतमङ्गलं इति विशिष्यानिश्चयादनुमानप्रवृत्तिरिति भावः।

शब्देनेति। वेदमूलकशब्दावच्छेदकतयाऽनुमानेनेत्यर्थः। शब्दस्येदानीमबोधकत्वात्। एवमग्रेऽपि **श्रुत्यनुमानाभ्यामित्य**ग्रेतनमूलस्थश्रुतिपदमप्येतत्परमेव। अथवाऽनाश्वासवारकत्वमात्रेण सर्वबोधकत्वनिर्देशः। वस्तुतो मीमांसकमतेनेदम्। तन्मते तदर्थज्ञापकत्वस्यैव शाब्दबोधाङ्गतयाऽनुमितवेदादप्यन्वयबोधादिति।

ननु विश्वजिन्न्यायेनेत्यत्र मङ्गलं यदि फलान्तररहितं स्यादङ्गं स्यात्। यदि वाऽङ्गं स्यात् तदा एकाधिकारिकर्तृकं स्यादिति लाघवमित्युक्तम्—तच्चायुक्तम्। फलान्तररहितत्वस्य प्रधानसाधरणत्वेनाङ्गत्वानापादकत्वादित्याशङ्काया **तच्चे**त्यादिमूलमवतारयति—**ननु मङ्गलमिति**।

कुत इत्यनन्तरं प्रतिसन्धेयमिति शेषः।

आहेति। तथा च फलवत्सन्निहितत्वादिति विशेषणसहितस्याङ्गत्वप्रसञ्जकत्वान्नोक्तदोषः।

केचित्तु प्रसङ्गसङ्गत्याङ्गत्वानुमानपरं मूलमित्याहुः। **अत्रारब्धकर्माङ्गत्वं** अवान्तरवाक्यरचनादिस्वरूपं न कर्माङ्गत्वम्। **आरब्धकर्माङ्ग**मित्यनन्तरं तथा चेति शेषः। तेनारब्धकर्मसमाना-

रिप्समानेन नियमतस्तत्पूर्वं क्रियमाणत्वाच्च दर्शे प्रयाजादिवत्। आचारमूलक-

शिष्टैरभ्रान्तैः। तेन भ्रान्तैः निष्फलकर्मप्राक्कालक्रियमाणे न व्यभिचारः। प्रधानस्यापि प्रधाननिष्पत्तीच्छया क्रियमाणत्वमिति तत्पूर्वमिति विशेषणम्। तदर्थश्च तत्कालान्यकाल इति। 'तत्' शब्देन कर्मपरामर्शात्। न च कर्मैकदेशे व्यभिचारः। फलजनकतावच्छेदकावच्छिन्नस्य कर्मत्वात्। न चैकदेशे तदिति भावः।

फलान्तराभाव इति। फलान्तरवदारम्भणीयादावनैकान्तिकत्ववारणाय फलान्तराभाव इति।

चैत्यवन्दनादिनियतपूर्वक्रियमाणे व्यभिचारवारणाय फलवत्कर्मेति। तद्धि न फलवत्कर्म्मारम्भेच्छावता क्रियते। चैत्यवन्दनादीनामफलकत्वात्।

केनचित् सफलकर्म्मारम्भेच्छावता तत्पूर्वं क्रियमाणेऽनङ्गे व्यभिचारवारणाय नियमत इति। तद्धि तदारम्भेच्छावता नियमतो न क्रियते, सर्वैरकरणात्।

धिकरणमिति प्रयोजननिर्देश एव न त्वारब्धकर्माङ्गत्वस्य व्याख्यानम्। अन्यथा प्रधाने व्यभिचारवारणाय तत्पूर्वमित्यादिविशेषणं व्यर्थं स्यादित्यवधेयम्। आरम्भणीयादिवारणाय **कर्मार्थितयेति** विशेषणम्। तत्स्वरूपोपकारकत्वफलोपकारकत्वपक्षयोर्यथासख्य व्याचष्टे—**कर्मेत्यादिना**। अत्रावान्तरवाक्यरचनादिस्वरूपमेव विघ्नविघातद्वारा मङ्गलेन क्रियते यागस्वरूपमिवावघातादिद्वारा व्रीहिभिरितिस्वरूपोपकारकत्वपक्षः, चरमवर्णध्वसात्मिका समाप्तिः कीर्त्यादिफलवती विघ्नविघातद्वारा मङ्गलेन क्रियते स्वर्गफलवदिव परमापूर्वमङ्गापूर्वद्वारा प्रयाजेनेति फलोपकारकत्वपक्षः। तत्र च प्रथमकल्पे समाप्तिसाधनत्ववादो विघ्नध्वसद्वारा प्रधानकर्मजनकत्वेऽसमाप्तिप्रयोजकत्वे च पर्यवसित इति ध्येयम्। निष्पत्तिः स्वरूप सङ्कोचिकावत्प्रागभावघटितत्वाद्गौरवता परित्यज्य एकान्योन्याभावघटितत्वादल्पायासमभिप्रेत्याह—**तदर्थ** इति। न च कर्मैकदेशे व्यभिचारः। **तत्पूर्व**मित्यत्र तच्छब्देन कर्मपरामर्शात्। तथापि यत्किञ्चित्कर्मणोपि कर्मत्वात्कर्मैकदेशे व्यभिचारः कर्मपरामर्शान्न कर्मैकदेशे व्यभिचार इत्ययुक्त, तथाऽपि तत्र गतत्वादित्यत आह—**फलेति**। प्रधानतापर्याप्त्यधिकरणस्येत्यर्थ.।

चैत्येति। न च चैत्यवन्दनादेः फलाप्रसिद्ध्या प्रधानफलातिरिक्तफलाभावस्याप्रसिद्ध्या कथमियं व्यभिचारशङ्केति वाच्य, प्रयत्नफलत्वाभिमतातिरिक्तफलाभावस्य तदादित्वात्। **नियमत** इति। यद्यपि व्यक्तिविशेषे उक्तस्थलेऽपि नियमोऽस्त्येव। सामान्यनियमस्तु मङ्गलेऽपि नास्ति। न हि सर्वत्र कर्मारम्भे मङ्गल क्रियत एव तथाऽपि कामनान्तरेधितनिर्विघ्नसमाप्तेः फलतया तादृशकर्मारिप्सोः मङ्गलं नियतमेव। मङ्गल विना कर्मणस्तत्फलासिद्धेरिति।

वस्तुतः फलवत् कर्मारिप्समाणस्य नियमो निश्चयोऽङ्गत्वनिश्चयोऽङ्गत्व मर्यात्यमिति यावत्। तेन क्रियमाणत्वादिति मूलार्थः। **यथाश्रुते त्विति**।

श्रुत्यनुमानाभ्यां तदर्थितया तत्फलकर्त्तव्यत्वबोधनात् तत्फलकत्वबोधनाच्च ।

प्रधाने व्यभिचारवारणाय तत्पूर्वमिति । अत्र तच्छब्द आरब्धकर्मपरः । यदवच्छिन्नं कर्म्मारब्धमिति यावत् ।

नन्विदमसिद्धम् । नमस्कारादीनामेव मङ्गलत्वात् तेषां च बहुशः फलान्तरश्रुतेरिति चेन्—न । फलान्तराभाव इति । फलान्तरप्रतिसन्धानाभाव इत्यर्थः । तथा च नियमतस्तत्पूर्वकरणे फलान्तरप्रतिसन्धानं न यत्र हेतुरित्यर्थः पर्यवस्यति । अस्ति च तथा ग्रन्थादिपूर्वक्रियमाणप्रणामादौ । आरम्भणीयादौ च तत्कालकरणे फलान्तरप्रतिसन्धानंबीजं दर्शारम्भकालत्वेनैव फलान्तरश्रुतेः । अत एव शिखाबन्धनमङ्गं प्रधानञ्चेति सर्वसिद्धान्तः । फलान्तरप्रतिसन्धानाप्रतिसन्धानाभ्यामुभयोपपत्तेः । यथाश्रुते तु एकस्य फलान्तरसत्त्वासत्त्वयोरसम्भवेन कथमङ्गप्रधानभावो घटेतेति सर्वं सुस्थम् ।

वस्तुतो यथाश्रुत एव हेतुः, मङ्गलीभूतनत्यादिव्यक्तीनां फलान्तराभावेनासिद्धत्वाभावादिति प्रागुक्तयुक्तेरनुमानमपि अविकलमिति श्रुत्यनुमानाभ्यामित्युक्तम् । अयं च प्रतिसन्धानाकार इत्यवधेयम् । तेनायमर्थः—यदिदं फलान्तराभावे सति फलवत्कर्मारिप्समानेन नियमतस्तत्पूर्वं क्रियमाणं स्यात् तदा प्रधानसमानाधिकारिकं स्यात् । एवञ्च लाघवमन्यथा गौरवमित्युक्तमेवानेन विव्रियत इति भावः । अतो नान्योन्याश्रयः ।

ननु फलान्तरसत्त्वासत्त्वत्प्रतिसन्धानाप्रतिसन्धाने अपि विरुद्धे व्यक्तिभेदमादाय चाविरोधे प्रधानीभूतशिखाबन्धनस्थलेऽनेनैवाङ्गापवादान्निरङ्गतादोषोद्धारे च सत्त्वासत्त्वाभ्या किमपराद्धमिति चेत्—

सत्यम् । फलान्तरसत्त्वासत्त्वयोरपि प्रतिसन्धानाप्रतिसन्धाने एव प्रयोजके इत्युपजीव्यत्वादिदमेवादृतमिति । यद्वा फलान्तराप्रतिसन्धानपदेन स्वसन्निहितकर्मफलवत्त्वप्रतिसन्धानमुक्तम् । तथा च प्रधानफलवत्त्वप्रतिसन्धानं स्वतन्त्रफलवत्त्वप्रतिसन्धानञ्चाङ्गप्रधानभावनियामकमेकव्यक्तावपि अङ्गलक्षणं चात्र कल्पे प्रधानोपकारकत्वमात्रमिति ।

वस्तुत इति । यद्यपि हरिनमस्कारादावनुद्देश्यमपि फलं भवत्येव तथाप्येतादृशमेव मङ्गलं पक्षीकर्त्तव्यमित्याशयः ।

ननु फलान्तराभावगर्भितहेतुनाऽङ्गत्वे सिद्धे हेतुनिष्ठव्याप्तिः सिद्ध्येत, अन्यथा अनुकूलतर्कविरहकालीनव्यभिचारसंशयेन प्रतिबन्धाद्व्याप्तिरशक्यैव स्यात्, सिद्धाया च व्याप्तौ अनुमानादङ्गत्वसिद्धिरित्यन्योन्याश्रय इत्यत आह—**अयं चेति ।** प्रतिसन्धीयते व्यभिचारसंशयनिरासघटितव्याप्तिरनेनेति तर्कस्तदाकारस्तत्स्वरूप, तदेत्यनन्तरमङ्ग स्यात् ततश्चेति पूरणीयम् ।

नान्योन्याश्रय इति । अङ्गत्वानुमानपरतयैव यैरिदं व्याख्यातं तेषामङ्गत्वे सिद्धे फला-

दर्शारम्भसमये नियमेन क्रियमाणाया अप्यारम्भणीयायास्तदर्थितया अक्रियमाणत्वात्फलान्तरश्रवणाच्च प्रधानत्वमिति न तया व्यभिचारः।

बोधनात् प्रकृतलाघवसहकारेण बोधनसम्भवात् ।

अत्र स्वरूपासिद्धिं शङ्कते—ननु मङ्गलमिति ।

यत्तु मङ्गलं नाङ्गमलौकिकत्वादिति प्रतिरोधं अलौकिकत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकं लौकिकानङ्गत्वमुपाधिं वा शङ्कते इति—तन्न। विश्वजिन्न्यायात् स्वर्गः फलमित्युत्तरग्रन्थविरोधात्। न ह्यसिद्धेन प्रतिरोधस्तुल्यबलत्वाभावात्। न वा साधनव्यापक उपाधिः। साधनव्यापकता कथमुपाधेः? साधनस्य लौकिकाङ्गभूतलौकिककर्मान्तराभावनिश्चयः तस्मिंश्च सत्यङ्गत्वानुमानमित्यन्योन्याश्रयः। स चात्र व्याख्याने नास्तीत्यर्थः। फलान्तराभावे लाघवमेतावन्मात्र यत्र प्रतिसहित तत्राङ्गत्वनिश्चयात् पूर्वं फलान्तराभावो निश्चेतु शक्यत एवेत्यन्योन्याश्रयदोषोऽयमापाततः, किन्तु पूर्वोक्तानुगुणतयैव सङ्गतौ प्रसङ्गसङ्गतिर्नादरणीयेति प्रतिसन्धानाकारतया व्याख्यानमिति भावः।

ननु कर्मार्थितयेति विशेषणस्य फलान्तराभावविशेषणस्य च साधनायाचारेत्यादिमूल तन्न प्रतिसन्धानाकारपक्षे युक्तम्, असिद्धस्यैव प्रसञ्जकत्वादित्याशङ्क्य नेद हेतुसाधनाय मूलमपि तु लाघवप्रतिसन्धानस्य प्रमाणसहकारेण फलान्तराभावफलपर्यवसायित्वकथनपरमित्याह—बोधनादिति।

अत्र स्वरूपासिद्धिमिति। लाघवगम्यस्य फलान्तराभावस्वरूपस्य बाधितत्वादसिद्धिरित्यर्थः। प्रसञ्जनपक्षे यथाश्रुतस्वरूपासिद्धेरसङ्गतिरित्यवधेयम्।

नाङ्गमिति। न लौकिककर्माङ्गमित्यर्थः। लौकिककर्माङ्गे साध्याव्यापकत्वादाह—पक्षधर्मेति। अलौकिकत्वरूपेत्यर्थः।

न ह्यसिद्धेनेति। स्वर्गः फलमित्यनेन पूर्वानुमानस्य हीनबलत्वान्न तेन प्रतिरोध इत्यर्थः.[१]।

अत्र केचित्—अङ्गत्वसाधकहेतोरुभयसिद्धतया बलवत्त्वशङ्काया स्वमते तदसिद्धिप्रदर्शनाय विश्वजिदिति। ततश्च सत्प्रतिपक्षत्वमन्यसदुत्तरमिति वदन्ति—तन्न। अलौकिकत्वस्याप्युभयसिद्धतया पूर्वहेतोरुभयसिद्धत्वमादायाधिकबलवत्त्वशङ्काया अनुत्थानात्। प्रतिसन्धानाकारपक्षे सत्प्रतिपक्षायोगाच्च शङ्कते—साधनव्यापकतेति। तथा च साधनाव्यापकत्वाभावः[२]।

---

१. पाठोऽयं काशीपुस्तके नास्ति।

२. पाठोऽयं काशीपुस्तके नास्ति।

ननु मङ्गलमलौकिकं लौकिके नाङ्गं भवति[1], लोकावगतकारणत एव व्यपि सत्त्वादिति चेत्—न। अलौकिकत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकस्य तदवच्छिन्नसाधनाव्यापकत्वात्। यदवच्छिन्नसाध्यव्यापकस्तदवच्छिन्नसाधनाव्यापकस्योपाधित्वात्। अन्यथा महानसत्वावच्छिन्नवह्निव्यापकस्य व्यञ्जनवत्त्वादेरप्युपाधित्वापत्तेः। साध्यव्यापकनिवृत्त्या साध्यनिवृत्तिस्तया च तद्व्याप्यसाधननिवृत्तिरित्येवास्तु न किञ्चिदनुपपन्नम्। न चैवं साध्याभावस्यैव दोषत्वेऽग्रे हेत्वभावसाधनमनुचितम्, दत्तोत्तरकल्पत्वात्। समाप्तिफलकत्वव्यवस्थापनस्यात्र प्रकृतत्वेन फलान्तरविरहस्यैव मुख्यतः प्रतिपाद्यत्वात्। हेत्वभावं विना बाधासम्भवाच्च। बाधप्रयोजकव्यापकाभाववत् साध्यसाधकहेतोरपि सत्त्वात्।

ननु अङ्गं सहकारिभेदो न च मङ्गलं न तथा। तद्विना फलासिद्धेरित्यत आह— लोकेति। तथा च तद्विना फलासिद्धिरसिद्धैवेत्यर्थः।

स्वोक्तां स्वरूपासिद्धिं व्युत्पादयति—**साध्यव्यापकते**ति। लौकिककर्माङ्गत्वव्यापकं लौकिकत्वम्। तन्निवृत्त्या लौकिककर्माङ्गत्वनिवृत्तिर्वैदिककर्माङ्गत्वव्यतिरेकश्च ग्रन्थादिप्राक्क्रियमाणमङ्गले सिद्ध एवेत्यङ्गत्वसामान्याभावेन फलान्तराभावे सतीत्यादेर्व्याप्यस्य व्यतिरेकः सिद्ध्यन् विशेष्यभागस्य सत्त्वात्फलान्तराभावरूपविशेषणाभावे पर्यवस्यतीत्यर्थः। अत्र साध्यसाधनपदे आपाद्यापादकपरे। अग्रे हेतुपदमप्यापादकपरम्।

केचित्तु अलौकिकत्वावच्छिन्नसाध्यव्यापकलौकिकानङ्गत्वनिवृत्त्येत्यर्थमाहुः—तन्न। लौकिकानङ्गत्ववादिनो मङ्गले तन्निवृत्तेरसिद्धेः।

न चेति। फलान्तराभावाङ्गत्वसमानाधिकारिकत्वक्रमेण लाघवावतारे सन्निहितलाघवोपपादकस्याङ्गत्वस्यैव खण्डनं दूषणमुच्यतामिति न चेत्यर्थः।

मुख्यत इति। तथा च नन्वित्यादिपूर्वपक्षवादिनोऽपि मुख्यतः फलान्तरविरह एव बाध्य इति भावः। **बाधे**ति। यद्यपि बाधासिद्धौ तद्द्वारा हेत्वभावनिर्णयः कथम्?[2] अधिकबलवत्त्वेन तत्सिद्धौ तु साध्यसाधकेत्यादिकमलग्नकम्, तथा च यथाश्रुतमिदमनुपपन्नम्, तथाप्येवं व्याख्येयम्। हेत्वभावं फलान्तराभावरूपापादकाभावनिश्चयं विना बाधासम्भवाल्लाघवज्ञानबाधासम्भवात्। अङ्गत्वनिराकरणमुखेन लाघवज्ञानबाधप्रयोजको व्यापकस्य लौकिकत्वस्याभावो यथास्ति तथा साध्यस्य प्रतिसन्धेयस्य साधकोऽनुगुणो हेतुः फलान्तराभावस्तस्य सत्त्वात्। अयं भावः—अङ्गत्वे बाधिते तत्प्रणाल्या लाघवप्रतिसन्धानं मास्तु फलान्तराभावस्य बाधे तन्मूलकफलैक्यलाघवप्रतिसन्धानं स्यादेवेति।

तदुपपत्तेः। अत एव गृहरथादौ 'आरे भग्ने इन्द्रबाहुर्बद्धव्यः'[1], 'पायसं ब्राह्मणो भोजयितव्य'[2] इत्यत्र तदुभयं नाङ्गं किन्तु नैमित्तिकम्। तद्वदिदमप्यारम्भसमयनिमित्तकमस्तु, 'विश्वजिन्न्यायात्' स्वर्गः फलमिति चेत्—

न। तस्यापूर्वरूपोपकारजनकाङ्गविषयत्वात्। अयन्तु प्रतिबन्धकाभावरूप उपकारः। तस्य च लोकावगतकारणसहकारितेन, प्रतिबन्धके सति तस्मात्तद-

इन्द्रबाहुः आयसवायसः। आरम्भसमयनिमित्तक तत्समयनियतकर्त्तव्यताकं न तु नैमित्तिकमेव।

आरे भग्न इतिवन्निमित्तसप्तम्यश्रुतेरकरणे प्रत्यवायाश्रवणाच्च।

तस्येति। अङ्गत्वावच्छिन्नलौकिकानङ्गत्वव्यापकमपूर्वरूपोपकारजनकत्वमुपाधिरित्यर्थः। तथा च व्यापकत्वाभावे तदभावान्न साध्याभाव इति भावः।

अथ मङ्गलजन्य इत्यर्थः। उपाधेः साध्यव्यापकताग्राहकमनुकूलतर्कमाह—तस्य चेति। यद्यपि अदृष्टस्य साक्षाज्जनकत्ववत् साक्षात् प्रतिबन्धकत्वमप्यसम्भवि न हि दृष्टसम्पत्तावदृष्टप्रतिबन्धकत्वं पश्यामः, तथापि नापूर्वजनकत्वं यथाश्रुतमेव किन्त्वनपेक्षणीयजनकत्वम्। अपेक्षा च साक्षात् परम्परया वेति न कश्चित् विशेषः। तथा च परम्पराप्रतिबन्धकस्याप्यदृष्टस्याभावोऽपेक्षणीयो भवत्येवेति कथं तज्जनकमङ्गले नोपाध्यभाव इति भावः।

ननु मङ्गलमित्यादिना तत्सूत्राधिकरणविरोध शङ्कते इति केचित्।

वस्तुतो लौकिककर्मप्राक्क्रियमाणत्वावच्छिन्नाङ्गत्वव्यापक लौकिकत्वमुपाधि शङ्कते—मूले नन्विति। अङ्गत्वावच्छिन्नेति। लौकिकत्वनिवृत्त्या लौकिककर्माङ्गत्वाभावे साध्येऽपूर्वरूपोपकारजनकत्वमुपाधिरित्यर्थः। प्रधानीभूते लौकिके कर्मणि शुद्धसाध्याव्यापकत्वादाह—अङ्गत्वेति।

तथा च व्यापकत्वाभाव इति। लौकिकत्वनिवृत्ति प्रति लौकिककर्माङ्गत्वाभावस्य व्यापकत्वाभावे तदभावात् लौकिकत्वस्य निवृत्तेरङ्गत्ववादिना यत्साध्य लौकिककर्माङ्गत्व तदभावो नेत्यर्थः। यद्वा व्यतिरेके उपाधिमत्तया लौकिकत्वस्य लौकिककर्माङ्गत्व प्रति व्यापकत्वाभावे तदभावाल्लौकिकत्वाभावान्न लौकिककर्माङ्गत्वरूपसाध्याभाव इत्यर्थः। उपाधेः पक्षे साधनाव्यापकत्वप्रदर्शनाय अयं त्विति मूलम्। तद् व्याचष्टे—अयमिति। उपाधेरिति। अपूर्वरूपोपकारजनकत्वस्योपाधेरङ्गत्वावच्छिन्नलौकिककर्माङ्गत्वाभाव प्रति व्यापकताग्राहकमाहेत्यर्थः।

अयमाशयः—अङ्गस्य लौकिककर्माङ्गत्वाभावः स्यादपूर्वरूपोपकारजनकत्वाभावश्च स्यादित्यप्रयोजकत्वशङ्का न सङ्गच्छते। अङ्गस्यापूर्वरूपोपकारजनकत्वाभावे हि प्रतिबन्धकाभावरूपोपकारजनकत्वमेव वाच्यम्। प्रतिबन्धकाभावस्य च लौकिककर्मसहकारितया तज्जनकस्य लौकिककर्माङ्गतावश्यम्भावापत्तेरिति।

---

1. तन्त्रसूत्रमेतत्। 2. तन्त्रसूत्रमेतत्।

नुत्पत्तेः। अपूर्वन्तु न तथा। विघ्नध्वंसद्वारा चेदमङ्गं, न त्विड़ो यजतीत्यादिविधिबोधितप्रयाजाद्यङ्गयागवददृष्टद्वारा, मङ्गलजन्यादृष्टं विनापि स्वतः सिद्धविघ्नविरहवत आरब्धनिर्वाहात्। न चैवं विघ्नध्वंसद्वारापि नेदमङ्गं तत्रैव व्यभिचारादिति वाच्यम्, सति विघ्ने तद्ध्वंसद्वारा तस्याङ्गत्वात्। न चैवं प्रयाजादे-

अपूर्वमिन्द्रबाहुबन्धनादिजन्यम्। न तथा—न लोकावगतकारणसहकारि। साक्षात् परम्परया वाऽनपेक्षणीयत्वादित्यर्थः।

अनङ्गत्वमसहकारित्वम्, तद्विलम्बेन फलाविलम्बादवसेयम्। न च मङ्गले तदिति परमार्थः।

ननु अपूर्वाजनकत्वे मङ्गलस्यापेक्षणीयाजनकत्वमुपाधिरपक्षवृत्तिः स्यात्तदेव तु कुत इत्यत आह—विघ्नेति। यद्वा प्रसङ्गादाह—विघ्नेति।

सतीति। यद्यपि सति विघ्नेऽपूर्वद्वारेदमङ्गमिति न दुर्वचं[1], तथापि तदपूर्वं विघ्नं

ननु वैदिकाङ्गमङ्गलव्यक्तौ यथाश्रुतोपाधेः साध्याव्यापकतया लौकिककर्मासहकार्युपकारजनकत्व उपाधिर्वाच्यस्तथा च पक्षेऽप्युपाधिपरत्वेन साधनव्यापकत्वमिति शङ्कते—यद्यपीति[2]।

लौकिककर्मानपेक्षणीयोपकारजनकत्वमादाय समाधत्ते—तथाऽपीति। नापूर्वजनकत्व यथाश्रुतमेवेत्यनन्तर यत्रालौकिककर्मासहकार्युपकारजनकत्वमिति शेषः[3]।

अनपेक्षणीयेति। लौकिककर्मानपेक्षणीयेत्यर्थः। एव चोपाधिनिर्वचनेऽयं त्विति तस्येति च मूलफक्किके साधनाव्यापकत्वपरे एव। तत्र च सहकारितैवेति—अपेक्षणीयतैवेत्यर्थ इति ध्येयम्।

ननु यथाऽपेक्षणीयाजनकत्वादलौकिकमपि मङ्गलं लौकिककर्माङ्ग तथेन्द्रबाहुबन्धनादिकमपि लौकिककर्माङ्गमस्त्विति शङ्कायामपूर्वं त्वितिमूल तद्व्याचष्टे—अपूर्वमिति। यद्वा साध्याधिकरणीभूते प्रयाजादौ उपाधेः सत्त्वप्राप्त्यनिरासार्थमपूर्वं त्विति मूल तद्व्याचष्टे—अपूर्वमिति। अत्र च कल्पे इन्द्रबाहुबन्धनादीत्यतद्गुणसंविज्ञानबहुव्रीहिणा प्रयाजाद्युक्तम्। इन्द्रबाहुबन्धनस्यानङ्गतया अङ्गत्वावच्छिन्नलौकिकानङ्गत्वरूपसाध्याधिकरणत्वाभावात्।

केचित्तु तस्यापूर्वरूपोपकारजनकत्वेत्यादिमूलम् लौकिकानङ्गत्वेऽपूर्वरूपोपकारजनकत्वलक्षणप्रयोजनकोपदर्शनमुखेनालौकिकत्वहेतोरप्रयोजकपरमित्याहुः।

अपेक्षणीयाजनकत्वमिति। पूर्वोक्तमप्यनपेक्षणीयजनकत्व नञ्व्यत्यासादपेक्षणीयाजन-

---

१. सुवचमिति काशीपुस्तकपाठः।

२. अयं भावः—मङ्गल प्रतिबन्धकाभावरूप लौकिककर्मासहकारिणमुपकारं जनयति। तस्य लौकिककर्मासहकारित्वं कथमित्याकाङ्क्षायां अदृष्टस्य साक्षाज्जनकत्वात्साक्षात्प्रतिबन्धकत्वमपि न सम्भवति।

३. धर्मजनकत्वरूपं व्यापकं निवर्त्तमानं अङ्गत्वावच्छिन्नलौकिकानङ्गत्वरूपव्याप्यमादाय निवर्त्तत इति भावः।

रपि दुरितध्वंस एव द्वारम्, कल्प्यदुरितध्वंसतः अपूर्वस्य लघुत्वात्।

वस्तुतस्तु प्रायशो विघ्नसंशये तन्निश्चये वा नियमेन शिष्टानां मङ्गलाचरणे विघ्नाभाव एव द्वारत्वेनाभिमतः। निर्विघ्नं समाप्यतामिति कामनया तत्करणपक्षे श्रुतित एव द्वारत्वनिर्णयः। किञ्चापूर्व्वे द्वारत्वे लौकिकाङ्गत्वविरोधः,

निवर्त्यारब्धनिर्वाहकमनिवर्त्यं वा, नान्त्योऽसम्भवात्। न हि सति प्रतिबन्धके हेतुसहस्रमप्यलम्। उत्तेजकत्वेऽपि अदृष्टस्य विशिष्टाभावो हेतुर्वक्तव्यः, तदपेक्षया विशेष्यविरह एव लघीयान्। आद्ये तन्निवर्त्तकत्वस्यावश्यकत्वे तदेव द्वारमावश्यकत्वात्। न त्वन्तरापूर्वं जनयित्वा तद्द्वारा विघ्नध्वंसो द्वारं, गौरवादिति मनसि कृत्याह–वस्तुत इति।

श्रुतित एवेति। वेदादेव। पूर्वत्र कल्पे व्यापारः कल्पनीयोऽत्र तु शाब्द इति भेदः। तदुक्तं वत्सेश्वरेण—"वेदश्चानुमीयमानो मङ्गलं प्रारिप्सितसाधनमित्याद्याकारः। प्रकारजिज्ञासायां पारिशेष्यात् प्रतिबन्धकदुरितक्षयरूपो ज्ञायते। यद्वा तदन्तर्भावेणैव वेदानुमानमि"ति।

किञ्चेति। तथा चाधिकारिद्वयकल्पनाभियाऽपि नापूर्वं द्वारमित्यर्थः।

कत्वपरमेव। अन्यथा मङ्गलध्वसादेर्लौकिककर्मानपेक्षणीयजनकत्वेन साधनव्यापकत्व स्यात् तेन व्यत्यासोऽयमिति भावः। अत एव ध्वसाद्यनपेक्षणीयजनकत्वेन मङ्गलेऽप्युपाधिसत्त्वात् साधनव्यापकत्वमिति नाशङ्कितव्यमिति भावः। सति इत्यारभ्य गौरवादित्यन्तमेतद्व्याख्या। यद्यपि मङ्गलजन्यादृष्टस्योत्तेजकत्वपक्षे विघ्ननिवृत्ति विनापि कार्य सम्भवति, तथापि विघ्नाभावापेक्षया मङ्गलजन्यादृष्टाभावविशिष्टस्य विघ्नस्याभावो गुरुरिति न स हेतुरित्याह—उत्तेजकत्वेऽपीति। यद्यपि वर्षं देवदत्तग्रन्थो मा समाप्यतामिति सत्याया उद्देश्यत्वज्ञानाहितसंस्कारकालोपाध्योर्मङ्गलादनाशे समाप्त्यभावप्रसङ्गेन तत्रोत्तेजकत्वमवश्य वाच्यम्, तथापि विघ्नपूर्वकसमाप्तौ न तथात्वमिति[1] भावः। यद्वा सत्यया तत्रादृष्ट विघ्नरूप तन्नत, तदेव मङ्गलेन नाश्यते, न तु संस्कारकालोपाधी प्रा। मङ्गलस्योत्तेजकतेति भावः। कल्प्येति मूलम्। प्रयाजादिजन्यापूर्वं विना दर्शाद्यदर्शनात् प्रयाजादेर्दर्शादिक प्रतीति शेषः, सामान्यत एव हेतुत्वम्। तेन तत्रापूर्वस्यैव द्वारत्व लाघवादिति। मङ्गलस्य तु तन्नियतपूर्वं विनाऽपि प्रमत्तादिसमाप्तिदर्शनात्तस्य विघ्नस्थलीयसमाप्तावेव हेतुत्वम्। तत्र च विघ्नध्वसस्यैव द्वारत्वौचित्यात् नेद प्रकृते लाघवमिति भावः।

ननु मङ्गलजन्यापूर्वस्य समाप्तिसामान्यहेतुताया न व्यभिचारनिश्चयः। प्रमत्तादिस्थलेऽपि जन्मान्तरीयमङ्गलसंशयादित्यस्वरसादाह—**वस्तुत इति मूलम्।** तत्र च विघ्नाभावद्वारकत्वे प्रति-

१. अदृष्टस्यानुत्तेजकत्वमिति भाव.।

कॢप्तप्रकारणादेव तदुत्पत्तेरिन्द्रबाहुबन्धनवत् ।

ननु विघ्नसन्देहे कथं तन्नाशार्थं प्रवृत्तिः, दुरितध्वंसार्थिप्रवृत्तौ तन्निश्चयस्य हेतुत्वात् प्रायश्चित्तवदिति चेत्–

न । विघ्नसंशये निश्चये वा नियमेन शिष्टानां मङ्गलाचाराद् विघ्नज्ञानं

ननु अपूर्वद्वारकत्वं न तत्र तन्त्रं अपितु अनपेक्षितजनकत्वमित्युक्तम् । तथा चापूर्वद्वारकत्वेऽपि मङ्गलस्य तज्जन्यापूर्वविलम्बेन फलविलम्बादङ्गत्वं स्यादित्यत आह— कॢप्तेति । तद्विलम्बात्कार्यविलम्बोऽसिद्ध एवेत्यर्थः ।

इन्द्रबाहुबन्धनवदिति । षष्ठीसमर्थाद्वति ।

दुरितेति । यद्यपीदं शौचाचमनादिलक्षणदुरितध्वंसहेतुक्रियाप्रवृत्तौ व्यभिचारि, तथापि दुरितज्ञानमात्रवदनधिकारिकतदर्थक्रियात्वादिति विवक्षितम् । शौचादौ तत्संशयेऽपि बोधनात् तज्ज्ञानमात्रमधिकार इति हेत्वभावादेव न व्यभिचार इति भावः ।

पाद्यमानेऽपि नापूर्वद्वारत्वबाधो लभ्यते । अपूर्वं जनयित्वा विघ्नाभावजननसम्भवादित्यत आह— इति मनसि कृत्येति । विघ्नाभावस्यावश्यकत्वमेव मनसि निधायेत्यर्थः । कल्प इति । मङ्गलं विघ्नतत्कादाचित्कत्वाभावान्तरजनकं विघ्नवानवत्वैव क्रियमाणत्वादिति सामान्यतो ज्ञाते समाप्तिकामप्रवृत्त्यनुपपत्त्या विघ्नजनकत्वे निरस्ते प्रागभावस्याजन्यतया तज्जनकत्वे च निरस्ते विघ्नध्वंसजनकत्वे व्यवस्थिते समाप्तिकामप्रवृत्त्यनुपपत्त्यैव तस्य समाप्त्यन्यजनकत्वे बाधिते परिशेषाद्विघ्नध्वंसस्य द्वारत्वमित्यर्थः ।

शाब्द इति । यद्यपि द्वारत्वमत्रापि कल्प्यं, तथापि पूर्वं द्वारद्वारत्वयोः कल्प्यत्वमिह तु द्वारस्य शाब्दत्वमिति भेदः । मूले च द्वारत्वपदेन द्वारमेवाभिहितम् ।

केचित्तु विघ्नध्वंसविशिष्टसमाप्तिं प्रति वेदेन मङ्गलस्य कारणत्वबोधनात् विघ्नध्वंसे मङ्गलजन्यत्वं समाप्तिजनकत्वं च संसर्गमर्यादया भासत इति शब्दादेव द्वारत्वनिश्चयमाहुः ।

प्रकारेति । द्वारेत्यर्थः । न तन्त्रमिति । लौकिकानङ्गत्वे इत्यर्थः । तथा चेति । अपूर्वद्वारत्वेऽप्यङ्गत्वं स्यादेवेति भावः । लौकिकाङ्गत्वविरोध इत्यस्यान्वयार्थमाह—षष्ठीति । तथा च इन्द्रबाहुबन्धनस्येवेत्यर्थः । तज्ज्ञानमात्रमधिकार इति । प्रवृत्तिप्रयोजक इत्यर्थः । अन्यथा तन्निश्चयहेतुत्वापत्तेरित्यवधेयम् ।

केचित्तु स्वविशेषणवत्ताप्रतिसन्धानजन्यकार्यत्वज्ञानानुरोधेन परमते सर्वेषामधिकारिविशेषणानामवश्यनिश्चयत्वेऽपि नैयायिकमते न तथा । प्रवृत्तिं प्रति साक्षादनुपयोग्यधिकारिविशेषणस्यैव निश्चयापेक्षणात्, ज्ञानकामनादीनान्तु साक्षादेवोपयोगादिति यथाश्रुतमेवाहुः ।

प्रवर्त्तकम्। तादृशाचारानुमितविधिनापि विघ्नज्ञानवानारब्धसमाप्तिकामोऽधिकारी बोध्यते। प्रायश्चित्ते तु तन्निश्चयवान्, तथैव विधिबोधनात्। अत एवाधिकारिविशेषणं विघ्न इति तत्सन्देहे कथं प्रवृत्तिः, वैदिकेऽधिकारनिश्चयादेव प्रवृत्तेरित्यपास्तम्। यतः प्रधानाधिकारिण एवाङ्गेऽधिकारो न स्वतन्त्रः, अङ्गत्वभङ्गप्रसङ्गात्। न च प्रधाने प्रारिप्सिते दुरितमधिकारिविशेषणं, विरोधात्। किन्तु समाप्तिकामना, सा च[1] निश्चितैव।

यत्त्वन्यत्र निश्चिताधिकारकर्तृत्वेऽपि मङ्गलं सन्दिग्धाधिकारकर्तृकमेव, विघ्नसन्देहवतां शिष्टानामाचारानुमितवेदेन तथैव बोधनादिति—तन्न। विघ्नवत्त्वेना[2]धिकाराभावात् क्वचित्तन्निश्चयेऽपि प्रवृत्तेश्च।

विघ्नसंशयेति। तथा चात्रापि विशेषणासिद्धिरिति भावः। विरोधादिति फलहेतोरधिकारतयाऽधिकारत्वं प्रतिबन्धकत्वञ्च विरुद्धमित्यर्थः।

अपि चेति। अनिष्टतावच्छेदकरूपावच्छिन्नसंशयेऽपि प्रवृत्तिर्दृश्यते। तत्रोक्तव्याप्तेर्बाधकत्वं परोक्तमसम्भवि दुरितध्वंसत्वेनोद्देश्यत्वे तद्व्याप्तेः। इह तु प्रारब्ध[2]प्रतिबन्धकध्वंसत्वं तच्चादृष्टतदन्यसाधारणमित्यर्थः।

स्फ्याश्लिष्टेज्याधिकरणविरोधं शङ्कते—नन्विति। 'यत् स्फ्या आश्लिष्येत् तद्वोऽपमृज्यात् विष्णवे उरुविक्रमाय चरुं निर्वपे'दित्यादिना विहितस्फ्याश्लिष्टेज्यादेर्दर्शपौर्णमासप्रकृतित्वेन 'प्रकृतिवद्विकृति'रित्यतिदेशप्राप्तदर्शधर्मग्रहे तदङ्गदेवतावाहनस्य पूर्वदिनेऽननुष्ठानमित्यर्थः।

तन्न। समाप्तिकामनाऽधिकारिविशेषणम्। सा च निश्चितैवेति ग्रन्थविरोधात्। अत एवेत्यग्रिमूले वैदिकेऽधिकारिविशेषणनिश्चयस्यावश्यकतया विघ्ननिश्चय आनीयते। अत्रेति शेषः। पूर्वं तु दुरितध्वंसार्थिप्रवृत्तिं प्रति दुरितनिश्चयस्य हेतुत्वेनेति भेदः। तथा चात्रापीति। शौचाचमनादाविव दुरितज्ञानमात्रवदनाधिकारिकत्वे सतीति विशेषणासिद्धिर्मङ्गलेऽपीत्यर्थः। फलहेतुत्वमाकाशादौ व्यभिचारीत्यत आह—पुरुषेति। पुरुषविशेषणतया निश्चितस्य प्रवृत्तिद्वारा फलहेतुत्वमधिकारत्वम्। तच्च विघ्ने न सम्भवतीत्याह—फलहेतोरिति। सा च निश्चितैवेति मूलम्। यद्यपि स्वरूपसत्या कामनया प्रवृत्तिसम्भवे किमर्थं तन्निश्चयधावनं, तथाप्यधिकारिविशेषणत्वमेव प्रवृत्तिजनकनिश्चयविषयतावच्छेदकमुक्तरीत्या निश्चयघटितमेव वाधिकारिविशेषणत्वमिति भावः। निश्चितत्वफलहेतुत्वाशावपहाय पुरुषगतत्वेन ज्ञातस्य प्रवर्त्तकत्वमधिकारत्वमिति मन्वानस्य मतं यत्त्विति मूले निबद्धम्। विघ्नवत्त्वेनेति मूलम्। विरोधादिति भावः।

---

१ 'सा तु' इति पाठान्तरम्। २. विघ्नसन्देहवत्त्वेनेति भावः।

अपि च शङ्कितानिष्टवारणार्थमपि प्रवर्त्तन्ते परीक्षकाः, यथा सर्पादिदंश-जन्यविषसंशये तन्नाशाय भेषजपानादौ ।

किञ्च फलस्य संशयेऽप्युपायत्वनिश्चयाद् यथा कृष्यादौ प्रवृत्तिस्तथा मङ्गलेऽपि । यदि च वृष्ट्यादौ सति कृष्यादितोऽवश्यं फलमिति तर्कात्तत्र

यथेति । व्रीहीनवहन्तीत्यत्र व्रीहिपदस्य यवादिसाधारण्यार्थमजहत्स्वार्थ-लक्षणया नियोगसाधनीभूतद्रव्यमात्रपरत्वे 'कृष्णलं श्रपयेत्' इति श्रुत्या नियोगसाधन-त्वेन बोधितकृष्णलस्यापि तत्प्राप्तौ वैतुष्यद्वारबाधेऽवघातबाधो यथा तथेत्यर्थः ।

कृष्णलः सुवर्णमाषः । न च कृष्णलेऽवघातबाधे तद्विकृतौ नीवारेऽपि तद्बाधा-पत्तिः । कृष्णलेऽवघातबाधेऽपि तत्प्रसङ्गाबाधात् ।

वस्तुतस्तु कृष्णलविकृतित्वेऽपि नीवारस्य नावघातबाधः । तथा हि न तावत् 'प्रकृतिवद्विकृतिरित्यतिदेशः' सर्वधर्माणाम् । सर्वयागानां दर्शपौर्णमासात्मकतापत्तेः । किन्त्वनुपदिष्टयावद्धर्म्मातिदेशः । एवञ्चाजहत्स्वार्थलक्षणया व्रीहियवकृष्णलनीवारा-दिषु लाघवादेवावघातविधिरितीहापि नावघातातिदेशः, साक्षादुपदेशात् । तथा च प्रकृतावघातबाधेऽपि न विकृतौ तद्बाधः । प्रकृतिविकृतिन्यायप्राप्तस्यैव प्रकृतिबाधे विकृतिबाधात् ।

क्वचिदिति मूलम् । मङ्गल सन्दिग्धाधिकारिकर्त्तृकमेवेत्यस्मिन् कल्पे दूषणम् । यथाश्रुते ज्ञानसामान्यप्रयोजकताया विवक्षिताया पूर्वोक्तमेव विघ्नवत्त्वेनाधिकाराभावादिदमेव दूषणं द्रष्टव्यम् ।

नन्वपि चेति मूलमसङ्गतम् । दुरितध्वंसार्थिप्रवृत्तौ दुरितनिश्चयहेतुत्वस्य पूर्वपक्षितत्वा-दत आह—**अनिष्टेति** । **तत्र** दर्शने सति । **असम्भवीति**—अप्रयोजकत्वादिति भावः ।

ननु अनौपाधिकत्वमेव विपक्षबाधकं स्यादत आह—**दुरितेति** । दुरितध्वंसत्वनियतधर्म-प्रकारकेच्छापूर्वकत्वमुपाधिरित्यर्थः । प्रारब्धप्रतिबन्धकध्वंसत्वमुद्देश्यतावच्छेदकमिति शेषः । **तद्व्या-प्तेरिति** । यत्र दुरितध्वंसार्थिप्रवृत्तित्वं तत्र दुरितनिश्चयसाध्यत्वम् । अस्या व्याप्तौ दुरितध्वंसत्वे-नोद्देश्यत्वमुपाधिरित्यर्थः । साधनाव्यापकत्वं दर्शयति—**इह त्विति** ।

अदृष्टतदन्येति । अदृष्टतदन्यध्वंसेत्यर्थः । वस्तुतो ननु विघ्नसंशय इत्यादिपूर्वपक्षे विक-ल्पनीयं किं पापध्वंसार्थिप्रवृत्तौ पापनिश्चयस्य हेतुत्वमुत सामान्यत एवानिष्टध्वंसार्थिप्रवृत्तौ अनिष्टनिश्चयस्य हेतुत्वमिति । आद्ये **विघ्नसंशय** इत्यादिमूलम् । द्वितीये **अपि चेति** मूलम् ।

प्रवृत्तिस्तदा सति विघ्ने मङ्गलादवश्यं फलमिति तर्कादत्रापि प्रवृत्तिः।

ननु स्फ्यस्य भक्ताश्लेषनिमित्तेज्यायामिष्टित्वेन दर्शधर्मत्वे सत्यतिदेशागतपूर्वदिनकर्त्तव्यदेवतावाहनस्याङ्गस्य स्फ्याश्लेषद्वारसंशयेऽननुष्ठानमुक्तं यथा 'कृष्णले द्वारबाधे'। अतो विघ्नसंशयात्तद्ध्वंसद्वारसंशये कथं मङ्गलानुष्ठानमिति चेत्—

अत्र शङ्कते[1]। नियोगसाधनीभूतसतुषद्रव्यत्वेनैवाजहत्स्वार्थलक्षणाऽस्तु। तथा चाप्रसङ्ग एव न तु बाध। निषेधस्य प्रसङ्गपूर्वकत्वात्। मैवम्। व्रीहिभिर्यजेत, व्रीहीनवहन्ति, व्रीहीन् प्रोक्षतीत्यत्र यागावघातप्रोक्षणानां सामानाधिकरण्यमनुभूयते। तच्च तुल्यप्रकारोपस्थितिं विना न सम्भवति। न वा साकाङ्क्षत्वञ्चेत्येकप्रकारोपस्थितिर्वाच्या। न च प्रोक्षणादावपि सातुष्यन्तन्त्रमित्येकत्र सातुष्याप्रवेशेऽवघातेऽपि न तत् प्रवेश इति प्रसङ्गसम्भवे बाध एवेति तत्त्वमिति।

यद्यपि उदाहरणयोर्द्वयोरपि साध्यवैकल्यं, प्रथमे संशयोऽस्ति न द्वारगोचरः किन्तु निमित्तगोचरः। द्वितीयेऽस्ति द्वारगोचरो न तु संशयः किन्तु बाधः, तथापि व्यतिरेकनिश्चयः प्रतिबन्धक इत्यत्र कृष्णल उदाहरणम्। तस्य निश्चयत्वेन न प्रतिबन्धकता किन्तु ज्ञानत्वेन। यद्विरहनिश्चयो यत्प्रवृत्तिप्रतिबन्धकस्तत्र तत्संशयोऽपीति व्याप्तेस्तत्र देवतावाहनमुदाहरणमिति मन्तव्यम्। तदुक्तं—वत्सेश्वरेण—"द्वाराभावनिश्चये इवाप्रवृत्ते"रिति।

ननु फलावश्यम्भावनिश्चयः प्रवर्त्तकः विघ्नध्वंसात्मकद्वारसन्देहे च नास्तीत्याशङ्कायां मूलं- **किञ्चेति**। **नियोगोऽदृष्टम्**। **तत्प्रसङ्गाबाधादिति**। प्रकृतिप्रसङ्गमात्रेण विकृतावतिदेश इति भावः। **सर्वयागानामिति**। सर्वासामिष्टीनामित्यर्थः। तासां दर्शपूर्णमासप्रकृतिकत्वादिति भावः। **सामानाधिकरण्यमिति**। एकधर्मावच्छिन्नान्वयित्वमित्यर्थः। अनुभवे विवादादाह—**न वेति**। नियोगसाधनद्रव्येण यागः कथमित्याकाङ्क्षायां नियोगसाधनसतुषद्रव्यमवहन्तीति नाकाङ्क्षिताभिधानमित्यर्थः।

मङ्गलप्रतियोगिकप्रवृत्तिः द्वारसंशये प्रतिबन्ध्या, द्वारसंशयस्थलीयप्रवृत्तित्वात्, देवतावाहनवत्कृष्णलवदित्यत्र शङ्कते—**यद्यपीति**।

व्यतिरेकनिश्चयो द्वारव्यतिरेकनिश्चयः। कृष्णल उदाहरणं प्रदर्शनस्थलम्। देवतावाहनमुदाहरणं दृष्टान्तः। तदयमर्थः—यद्व्यतिरेकनिश्चयो यत्र प्रतिबन्धकस्तत्संशयोऽपीत्यादिव्याप्तिग्रहार्थं देवतावाहनं दृष्टान्त उक्तः। ततश्च द्वारसंशयः प्रतिबन्धकः प्रतिबन्धकीभूतव्यतिरेकनिश्चयसमानविषयकसंशयत्वादित्यनुमाने विशेषणांशसत्त्वप्रदर्शनार्थं कृष्णलप्रदर्शनमिति। **स्फ्यः** खादिरः खड्गः।

1. 'ननु' इति काशीपुस्तकपाठः।

न। नैमित्तिके हि निमित्तवानधिकारी, यथा 'भिन्ने जुहोति' इत्यत्र पात्रभेदवान् तथेहाश्लेषवानधिकारीति पूर्वदिने आश्लेषनिश्चयाभावात् युक्तमननुष्ठानम् ।

अपि चेज्याकर्त्तव्यतानिश्चये तदनुष्ठानम् । न चाश्लेषसंशये तन्निश्चयः पूर्वदिने। अतः प्रधानेऽधिकाराभावान्नाङ्गेऽधिकार इति नावाहनं पूर्वदिने। यदि च 'यदि न स्यादिति न्यायेन' कुर्यात्तदा अनधिकृतकर्तृकत्वेन निष्फलं

यद्विरहनिश्चय इत्यादिव्याप्ते कृष्यादिप्रवृत्तावेव व्यभिचाराद्भङ्ग इति निमित्तसंशयत्वेनैव प्रतिबन्धकत्वं वाच्यम। न चेह तत् सम्भवतीति मनसिकृत्य निमित्तसंशये प्रवृत्त्यभावमुपपादयति—नैमित्तिके इति ।

आश्लेषनिश्चयाभावादित्यत्र निश्चयग्रहणमधिकारनिश्चयार्थम। वस्तुनो निश्चयपदमयुक्तमधिकाराभावस्यैव सम्भवादिति ध्येयम ।

नन्वेवं त्र्याहर्निमित्तकश्राद्धादावपि नैकवारभोजनादेरङ्गस्य प्रसङ्ग इत्यस्वरसादाह—अपि चेति ।

वाकारश्च मूले प्रामादिक इत्यवधेयम्। वस्तुतस्तु—मूले ज्ञातप्रयोजकमभ्यवर्त्तिव्यतिरेकज्ञाने पूर्वकर्मणोऽनुष्ठानमित्यत्र दृष्टान्तद्वयम। तेन क्वचिदवाकारोऽपि सङ्गच्छत इति ।

नैमित्तिके हीत्यादिग्रन्थेन पूर्वोक्तव्याप्तेरबाधनादसङ्गतिमाशङ्क्याह—**यद्विरहेति** ।

निमित्तसंशयत्वेनैवेति । मङ्गलप्रतियोगिकप्रवृत्तिः दुरितध्वंसलक्षणद्वारसंशयप्रतिबध्या द्वारसंशयस्थलीयप्रवृत्तित्वादित्यत्र निमित्तसंशयत्वमुपाधिरित्यर्थः ।

प्रवृत्त्यभावमिति । तद्व्याप्तिभङ्गे नैमित्तिकेऽपि निमित्तसंशयदशायां प्रवृत्तिः स्यादित्याशङ्क्य प्रकारान्तरेण तत्र प्रवृत्त्यभावमुपपादयतीत्यर्थः। प्रधाने नैमित्तिके भक्ताश्लेषरूप निमित्तमधिकारः प्रधानाधिकारिण एव चाङ्गेऽधिकार इति देवतावाहनेऽपि भक्ताश्लेष एवाधिकारः। तस्य च पूर्वदिनेऽसत्त्वाद्देवतावाहनस्याननुष्ठानमिति **नैमित्तिके** हीतिमूलस्यार्थः ।

नन्वेवमाश्लेषाभावादित्येव वक्तव्ये निश्चयग्रहणं किमर्थमित्यत आह—**निश्चयेति** । यथाऽधिकाराभावो बाधकस्तथाऽधिकारनिश्चयाभावोऽपीति स एवोपात्त इति भावः ।

एवं सति प्रयासगौरवादाह—**वस्तुत** इति । आश्लेषाभावात्तन्निश्चयाभावादिति हेतुद्वयमिहाभिप्रेतमिति तत्त्वम् ।

नन्वेवमिति । प्रधाने त्र्याहस्य निमित्ततया तदङ्गैकभुक्तेऽपि तस्याधिकारित्वात्तदभावेऽनुष्ठानं न स्यादित्यधिकारासत्त्वप्रयुक्तोऽननुष्ठाने दोष इत्यर्थः ।

अपि चेतीति । कर्तव्यतानिश्चयविषयताभाव एवाननुष्ठाने बीजं न तु निमित्तत्वाभाव इति

स्यात्। स्वयाश्लेषे सतीज्याकर्त्तव्यतानिश्चयेऽपि नावाहनम्, पूर्वदिनस्याङ्गस्याभावादितीज्यायामावाहनबाध एव। मङ्गले तु विघ्नज्ञानवानधिकारीत्युक्तं तच्च संशयेऽप्यस्ति प्रधाने कर्त्तव्यतानिश्चयोऽस्त्येवेति द्वारसन्देहेऽपि युक्तमनुष्ठानम्। भविष्यद्विवाहादावाभ्युदयिकेऽपि तज्ज्ञानवानधिकारी तथैवाचारात्।

नन्वङ्गानां प्रधानविधिविधेयत्वम्। न च ग्रन्थादिसमाप्तौ प्रधानविधि-

वस्तुतः स्वयाश्लिष्टेज्यया समं साम्यमेव न। तथा हि—सा हि विकृतित्वेनैव प्रकृतिधर्मग्राहिणी, प्रकृतौ चावाहनं निश्चिताधिकारिकर्त्तृकर्मोपकारकं ज्ञातमिति तद्बाधे बाध एव न्याय्यो न पुनः कल्पनान्तरम्। मङ्गले त्वधिकारो न 'प्रकृतिर्विकृतिरिति' न्यायलभ्यः, किन्तु कल्पनान्तराधीन एवेति संशये सत्यपि अधिकारः कल्प्यते। कल्पान्तरस्यावश्यकत्वादाचारविरोधाच्चेति।

अङ्गानां वैदिकाङ्गानाम्। प्रधानविधिविधेयत्वम् प्रधानविधिसापेक्षविधिविधेयत्वम्।

भावः। शुद्धत्वविहितकालजीवितत्वरूपसामान्याधिकारिविशेषणवता मयाऽवश्यमिदं कर्त्तव्यमित्येवरूपनिश्चयस्य श्राद्धादौ मनसा सम्भवादिति भावः। मूलेऽधिकाराभावात्। कर्त्तव्यतानिश्चयाभावात्। मूले नाङ्गेऽधिकारो नाङ्गानुष्ठानमित्यर्थः। अन्यथा कर्त्तव्यतानिश्चयस्याधिकारत्वे तन्निश्चयस्य प्रवर्त्तकत्वापत्तेः। न च पूर्वोक्तनिमित्तरूपाधिकाराभावोपसंहारोऽयम्, युक्तमननुष्ठानमित्यादिनैव तदुपसंहारादिति। पूर्वदिनस्येति मूलम्। यद्यपि यत्किञ्चिदङ्गहानेरुभयत्र साम्ये साक्षादङ्गदेवतावाहनबाधापेक्षयाऽङ्गाङ्गपूर्वदिनबाधस्यौचित्याद्देवतावाहनमर्हत्येव तथाऽप्यधिकृतस्य किञ्चिदङ्गहानावपि कर्मनिर्वाहः कालहानौ तु नाधिकृतत्वमस्ति कालस्याधिकारिविशेषणत्वादित्यवधेयम्।

अधिकार इति मूलम्। अनुष्ठानेत्यर्थः।

ननु च इष्टौ देवतावाहनमङ्गमित्यत्र यथेष्टिपदं स्वयाश्लिष्टेज्यातिरिक्तपरं तथा पूर्वदिने देवतावाहनमित्यत्र देवतावाहनपदं स्वयाश्लिष्टेज्यादेवतावाहनातिरिक्तपरमस्तु—मैवम्। प्रथमे लाघवादिति व्यापकाभावेनाङ्गत्वबाधार्थम्।

नन्विति मूलम्। तत्र च प्रधानविधिविधेयत्वं लौकिकाङ्गेषु नास्तीत्यत आह—वैदिकेति।

प्रधानेति मूलमयुक्तम्। न हि प्रधानविधिरेवाङ्गं विधत्ते इत्याशङ्क्य तस्य शास्त्रस्य निरपेक्षत्वादिति मूलानुसारेण सापेक्षपदसहितं साध्यं व्याचष्टे—प्रधानेति।

रस्ति। न च तत्कर्त्तव्यताबोधकस्य लौकिकप्रमाणस्य शास्त्रमेकदेशो युज्यते। तस्य तन्निरपेक्षत्वादिति चेत्—

न। अपूर्वजनकाङ्गानां तथात्वात्, आचारानुमितश्रुत्या प्रधानविधिं विनापि तदङ्गत्वविधानाच्च।

अपि च प्रधानकर्त्तव्यताबोधकबोध्यकर्त्तव्यताकत्वं प्रयोजकम्, तच्चेहाप्यस्ति, प्रतिबन्धकाभावस्य सकलकार्यहेतुत्वेन लौकिकप्रमाणस्यापि तत्सापेक्षत्वात्।

ननु प्रधानबोधकसापेक्षविधिविधेयत्वे नियमो लाघवात् न तु प्रधानबोधकस्य विधित्वमित्यत आह—न चेति। एतदपि नास्तीत्यर्थः। एकदेशः सापेक्षः।

ननूक्तलाघवेनाग्रेऽपि विधित्वं त्यज्यतामित्याह—प्रधानेति।

ग्रन्थादिसमाप्ताविति मूलम्। समाप्तिस्थल इत्यर्थः।

केचित्तु प्रधानकर्त्तव्यताबोधकविध्यपेक्षणीयविधिबोध्यकर्त्तव्यताकत्वं प्रधानकर्त्तव्यताबोधकविध्येकवाक्यतापन्नविधिबोध्यकर्त्तव्यताकत्वं वा मूलार्थ इत्याहुः[1]। तत्र प्रथमे एकदेशः अपेक्ष्यः। तस्य लौकिकप्रमाणस्य कर्त्तव्यताबोधने शास्त्रनिरपेक्षत्वात्। द्वितीये एकदेशः एकवाक्यतापन्नः। तस्य शास्त्रस्य तन्निराकाङ्क्षत्वादिति वाच्यम्। मङ्गलं प्रधानबोधकविधिसापेक्षविधिबोध्यकर्त्तव्यताकं वैदिकाङ्गत्वादित्यस्मिन्ननुमाने **अपूर्वेत्यादि**नाऽप्रयोजकत्वमुपाधिर्वा **आचारेत्यादि**ना च बाधो मूले विवक्षितः।

तदङ्गत्वविधानादिति मूलम्। लाघवसहकारेणाङ्गत्वपर्यवसानादिति भावः। समाप्त्यर्थं वाक्यरचनादिव्यापारः कर्त्तव्य इति लौकिकं प्रमाणं प्रतिबन्धके सति कथं समाप्तिः स्यादित्याकाङ्क्षामुत्थापयति। ततश्च प्रतिबन्धकाभावसम्पादकोऽपि व्यापारः कर्त्तव्य इति मङ्गलविषयं प्रमाणं प्रवर्त्तमानं भवतीति तत्सापेक्षमित्याह—मूले **प्रतिबन्धकेति**।

मूले **लौकिकेति**। लौकिकाङ्गत्वाल्लौकिकस्य मङ्गले मङ्गलगोचरोक्तप्रमाणस्येत्यर्थः। व्याख्यानान्तरे तु लौकिकप्रमाणस्य वाक्यरचनादिगोचरस्य प्रवृत्तौ जन्यायां प्रतिबन्धकाभावसम्पादकगोचरप्रमाणसापेक्षत्वादिति व्याख्येयम्। **यागादिवदिति** पाठे वैदिकप्रधानकर्माङ्गभूते मङ्गले वैदिकप्रधानदेशकालान्वयः स्यादित्यर्थो वाच्यः, लौकिककर्माङ्गे उक्तनियमाभावात्। तत्र च प्रधानपदस्य वैदिकत्वविशेषणपरत्वे यागपदस्याङ्गपरत्वे च गौरवाद् वतिरहिते प्रधानीभूते यागे प्रधानदेशकालान्वयित्वाभावादिति भावः। तस्मादङ्गपरत्वमेव पाठं विनिश्चित्याह—**यागादिवदिति**। मूलकृता **असाधारण** इत्यादिना प्रधानदेशकालान्वयित्वे प्रयोजकान्तरं दर्शयता वैदिकाङ्गत्वं तत्राप्रयोजकमित्युक्तम्। समव्याप्तोपाध्यभिधानमेतदित्यन्ये।

---

१ पक्षधरमते प्रधानकर्त्तव्यताबोधको विधिरपेक्ष्यः। 'केचित्त' वादिनो मते स अपेक्षक इति भेदः।

ननु यागादिवत् प्रधानदेशकालान्वयस्तदङ्गे मङ्गले स्यादिति चेत्—न। असाधारणेऽपूर्वजनके चाङ्गे तदन्वयात्।

अत एव बद्धशिखात्वादौ न प्रधानदेशकालान्वयः। न च दुरिताभावे स्वतः सिद्धे साङ्गमङ्गलानुष्ठानं निष्फलमिति तद्वेदाप्रामाण्यम्। लोकावगतकारणे हि दुरिते सति वेदेन तस्य तद्ध्वंसजनकत्वं बोध्यते, न तु तदुल्लङ्घ्यम्। अत एव तत्त्वज्ञानवतो भोगार्थं निषिद्धानुष्ठानं दोषाभावान्नाधर्मजनकमिति न तद्वेदाप्रामाण्यम्। प्रमाणान्तरात् स्वतः सिद्धदुरिताभावावगतौ मङ्गलाकरणे नित्यवदनुष्ठानं शिष्टानां भज्येतेति चेत्— न। विघ्नज्ञानवतो नित्यवदनुष्ठानादिति सम्प्रदायः[1]।

मैवम्। मङ्गलं विनापि प्रमत्तानुष्ठितसमाप्तेः। न च तेन विनापि सिध्यतस्तदङ्गम्। न च जन्मान्तरीयं तत्, जन्मान्तरीयग्रन्थादिकमुद्दिश्य शिष्टैस्तदकरणात्।

यागादीति। यागादि यत् प्रधानं तस्य विशेषविधि विनेति पूरणीयम्। अतो देवतावाहनादौ नानैकान्तः।

असाधारण इति। अत्र बहवः। प्रत्येकनियमपक्षः साधुः। विशिष्टे व्यर्थविशेषणत्वात्। न चापूर्वजनकत्वमात्रं शिखाबन्धने व्यभिचारीति वाच्यं, 'विशिख' इति श्रवणेन 'सदेति' श्रवणेन[2] च शिखाया एवाङ्गत्वप्रतीत्या तस्याश्च प्रधानापूर्वोत्पत्तिकालस्थायितया व्यापारकल्पनायोगात्। न च प्रत्येकनियमे मङ्गलस्यासाधारणतया देशकालान्वयापत्तिः। तस्य क्रियामात्राङ्गत्वादिति व्याचक्षते।

तत्—न, अत एवेत्यग्रिमग्रन्थविरोधात्। ततो हि शिखायाः कालानन्वयः प्रतीयते। शिखायाश्चाङ्गत्वे तत्र कालान्वयनियमात्। तस्मात् शिखाबन्धनं मन्त्रविशेषविशिष्टा शिखा वाऽङ्गम्। तच्चास्थिरतयाऽपूर्वजनकं कालानन्वयि चेति युक्तो विशिष्टनियमः। न चासाधारण इत्येवास्तु, शौचादिहेतुमृद्ग्रहणादौ अनैकान्तिकत्वात्।

अत एवेति मूलम्। असाधारणत्वरूपविशेषणादेवेत्यर्थः। व्यापारकल्पनायोगादिति। तथा च हेतोरभावान्न व्यभिचार इति भावः। इदमुपलक्षणम्। साध्यसत्त्वादपि न व्यभिचार इत्यपि द्रष्टव्यम्।

ग्रन्थविरोधमपि दर्शयति—ततो हीति।

---

१. मीमांसकसम्प्रदाय.।

२. 'सदोपवीतिना भाव्यं सदा बद्धशिखेन तु' इति स्मरणात्।

ननु यथा पुत्रेष्टौ कर्मसाद्गुण्ये ऐहिकफलाभावे आमुष्मिकं फलं तथा साङ्गेऽपि मङ्गले यत्र न फलं तत्रामुष्मिकफलमिति चेत्—न। तत्र पुत्रमात्रस्य कामनाश्रवणात्। इह तु प्रारिप्सितसमाप्तिकामनया मङ्गलाचार इति तथैव वेदानुमानात् कारीरीवदासन्नसमयारब्धसमाप्तिः फलम्।

नन्वासन्नसमयस्तत्सम्बन्धो वा न मङ्गलजन्य इति समाप्तिमात्रं जन्यं, तच्चैहिकामुष्मिकसाधारणमिति चेत्—न। आसन्नसमयस्य स्ववृत्तिसमाप्त्युप-

न हि तस्य साधारणत्वं वामागमादावनन्वयात्। नापि अपूर्वजनकत्वं प्रतिबन्धकाधर्मध्वंसरूपत्वाच्छुद्धिपदार्थस्य। अपूर्वजनकत्वञ्चापूर्वद्वाराङ्गत्वमिति यावत्।

वस्तुतो योगाङ्गभूतासनप्राणायामादौ रोगपातकनाशकाङ्गेऽसाधारणत्वमात्रं व्यभिचारीति विशिष्टनियमः।

सदेति वचनात् सर्वकालीनशिखाधारण प्रधान शिखाबन्धन कर्माङ्गमिति विभागोऽन्यथा शिखाया एव द्वैरूप्यानुपपत्तेः। फलान्तरसत्त्वासत्त्वयोः प्रधानाङ्गभावप्रयोजकयोरेकत्रासम्भवादित्यन्ये। तस्माद्व्यभिचारान्न तदङ्गमिति।

ननु न व्यभिचारः, समाप्तिमात्रे तथात्वेऽपि विघ्नस्थलीयसमाप्त्यवच्छेदेनाव्यभिचारात्।

सति विघ्ने तस्याङ्गत्वादिति ग्रन्थपर्यालोचनया तथा विशेषलाभात्। न च समाप्त्या

नाप्यपूर्वजनकत्वमिति। शौचादिना शुद्धिरेवोत्पाद्यते न त्वपूर्वं जन्यते। तथा च तत्र न व्यभिचार इति भावः। ननु गङ्गाजलाचमनेन शुद्धिं जनयताऽप्यानुषङ्गिकमदृष्टं जन्यत एवेति तत्र व्यभिचारादाह—अपूर्वजनकत्वञ्चेति।

नन्वेवं शिखाबन्धने व्यभिचारतादवस्थ्यम्। तस्यापि वामागमानन्वयिनोऽसाधारण्यादिति किञ्चिद्वैदिककर्मानन्वयित्वमसाधारण्यं वाच्यम्। तच्च मृद्ग्रहणादावपि नास्तीत्यपूर्वजनकत्वपदं व्यर्थमित्यस्वरसादाह—वस्तुत इति।

प्रसङ्गादेकदेशिमतमाह—सदेति। अत्रान्य इत्यस्वरसोद्भावनम्। तद्बीजन्तु खादिरतादेरिव एकस्यापि पुरुषार्थत्वक्रत्वर्थत्वसम्भवः। फलान्तरसत्त्वासत्त्वे हि तत्र न प्रयोजके किन्तु पुरुषक्रतूपकारकत्वे। फलान्तराभावे सतीत्यादौ च यदुक्तं तदेकदेशिमतमाश्रित्येति ध्येयम्।

आसन्नसमयारब्धसमाप्तिः फलमिति मूलम् फलत्वेन वाच्यम्। तत्र न प्रमत्तादिसमाप्तौ व्यभिचार इति भावः।

जन्मान्तरीयत्वानुमानमितिग्रन्थविरोधः। विघ्नध्वंसपूर्वकत्वविशेषणनिश्चयस्यापि क्वचिद् भावात्। न चेदं समाप्यतामिति कामनया सदाचारात्तदनुमापिता श्रुतिः 'समाप्तिकामो मङ्गलमाचरे'दित्याकारिकैवेति। ततः समाप्तित्वमवच्छेदकं प्रतीतम्। न त्वन्यदिति वाच्यं, निर्विघ्नं समाप्यतामिति कामनया तदाचारान्निर्विघ्नसमाप्तिकाम इत्याद्याकारिकाया एव श्रुतेरुन्नयनात्।

अस्तु वा समाप्तिकाम इत्याद्याकारकश्रुत्यनुमानम्। न चैतावता समाप्तित्वावच्छेदकत्वलाभः, तत्र शब्दासामर्थ्यात्। स्वर्गत्वाश्वमेधजन्यत्वसामानाधिकरण्यमात्रमेव हि शब्देनान्यत्रापि प्रतीयते न तु स्वर्गत्वस्यावच्छेदकत्वमपि, असामर्थ्याद् सम्भवाच्च। स्वर्गत्वस्य तदजन्यवृत्तित्वादतिप्रसक्तत्वात्। तद्वदिहापि सामानाधिकरण्यमात्रं प्रतीत्य तत्रावान्तरजात्यवच्छेदकत्ववत् निर्विघ्नसमाप्तित्वमवच्छेदकं कल्प्यतामिति को दोषः। न च स्वर्गपदं विशेषपरम्, इहापि समाप्तिपदे तथात्वस्य सुवचत्वात्।

वस्तुतस्तस्य विशेषपरत्वेऽपि न हेतुताग्रहे तदुपयोगः। तद्ग्रहेण तत्परत्वनिश्चयात्। अगृहीतायां तस्यां जातिभेद एव न मानं क्व तत्परत्वे।

ननु कार्यतावच्छेदकेऽगृहीते अतिप्रसक्तधर्मसामानाधिकरण्येनापि कारणताग्रहो यदि शब्दादौ तदा कुत एतन्न प्रत्यक्षेऽपीति चेत्—न, ग्राहकाभावात्। अन्वयव्यतिरेकौ हि तत्र तद्ग्राहकौ, न चातिप्रसक्तेन द्रव्यत्वादिना दण्डान्वयव्यतिरेकग्रहो यत्र दण्डाभावस्तत्र द्रव्याभावाभावात्, यत्र द्रव्यं तत्र दण्ड इति नियमाभावाच्च। अत एव यत्र ग्राहकं तत्रातिप्रसक्तधर्मसामानाधिकरण्येन तृणजन्यत्वमपि वह्नौ सुग्रहम्। समानप्रकारकं हि विरोधिज्ञानं प्रतिबन्धकम्[1]। तथा च स्वर्गत्ववह्नित्वावच्छेदेन व्यभिचारग्रहात् तदवच्छेदेन नियतपूर्ववर्त्तित्वम्मा ग्राहि तदाश्रयधर्मिणि तु हेतुताग्रहे किं बाधकमिति।

उपलक्षकत्वादिति मूले कार्यतावच्छेदकप्रविष्टत्वादित्यर्थः। समाप्त्येति। समाप्तिसामान्यस्य मङ्गलाजन्यत्वे तदनुमापकत्वासम्भवादिति भावः। सामान्यशब्दस्य विशेषपरत्वमभिप्रेत्य तद्ज्ञानं परिहरति—विघ्नेति। असामर्थ्यात्—अपदार्थत्वात्, अवाक्यार्थत्वाच्चेत्यर्थः। असम्भवं व्युत्पादयति—स्वर्गत्वस्य तदजन्येति। तद्ग्रहेणेति। कार्यकारणताग्रहेणेत्यर्थः। तत्परत्वेति। विशेषपरत्वेत्यर्थः। तस्यामिति। कारणतायामित्यर्थः।

क्व तत्परत्व इति। मानमिति शेषः।

नियतान्वयव्यतिरेकयोर्ग्राहकत्वमभिप्रेत्याह—ग्राहकाभावादिति।

मा ग्राहि—मा गृह्यतामिति। किं बाधकमिति। चिन्तामणिकारमतेऽपि विघ्नध्वंसकामो

१. 'विरहज्ञानं समानप्रकारकज्ञानविरोधि' इति काशीपुस्तकपाठः।

लम्बकत्वात्। अन्यथा कारीर्य्यपि नासन्नसमयफला स्यात्। तस्माद्व्यभिचाराच्च तदङ्गमिति।

अत्राहुः—विघ्नाभावस्य तद्द्वारत्वे कामनायान्तदनुल्लेखापत्तेः। अन्यथासिद्धत्वात्, स्वर्गकामनायामपूर्ववत्। न च विघ्नाभावजन्यसमाप्तावेव मङ्गलजन्यत्वात् फलतावच्छेदकोल्लेखनियमात् कामनायास्तदुल्लेखो न द्वारतयेति वाच्यं, श्रौतधर्मावच्छेदेनैव हि वैदिके कामनानियमात्। अन्यथा स्वर्गत्वस्य फलत्वानवच्छेदकतया स्वर्गत्वेऽपि कामनोल्लेखानुपपत्तेः।

वस्तुतो विघ्नाभावः कार्यतावच्छेदक एव न, जनकत्वात्तयोर्विरोधात्। न च विघ्नपूर्वकतामात्रमवच्छेदकम्, अतिप्रसङ्गात्। नापि मङ्गलसमानकालविघ्नध्वंसजन्यसमाप्तित्ववत् स्वसमानकालमङ्गलपूर्वकसमाप्तित्वमात्रमवच्छेदकम्। प्रतिबन्धकस्य कार्यविशेषनियतत्वेन विघ्नसमानकालीनसमाप्तिद्वयेऽन्यतरप्रतिबन्धकविघ्ननिवर्त्तकमङ्ग-

देवताननतिमाचरेदित्यादिविधौ प्रथमं सामानाधिकरण्यमात्रबोधके विघ्नविशेषध्वंसत्वात्मककार्यतावच्छेदककल्पनमौत्तरकालिकमेवेति भावः।

अन्यथेति। कामनायाः फलतावच्छेदकोल्लेखनियमे। साक्षात्परम्परोदासीनं तावत्कारणत्वमात्रं तच्च स्वस्वव्यापारान्यतराऽव्यवहितपूर्वत्वगर्भितं तथा च तदुल्लेखेनैव विशिष्य विघ्नध्वंसानुल्लेखेऽपि कारणत्वोल्लेखपर्याप्तेरित्यर्थः। द्वितीयं दूषयति—न चेति।

ननु निर्विघ्नसमाप्तिकाम इति श्रुतिपक्षे निर्विघ्नत्वस्य श्रौतत्वादेव कामनावच्छेदकत्वम्। समाप्तिकाम इति श्रुतिपक्षेऽपि अधिकारविशेषणीभूतकामनायामेव श्रौतधर्मावच्छिन्नत्वनियमो न तु सर्वस्याम्। अत एवादृष्टेऽपीष्टसाधनताज्ञाने कामनाऽस्त्येव। तथा च निर्विघ्नसमाप्तिकामनायाः अधिकारिविशेषणत्वाभावेऽपि तत्स्वरूपे बाधकाभाव इत्यस्वरसादाह—वस्तुत इति।

तयोः जनकत्वकार्यतावच्छेदकत्वयोः।

अत्राप्रयोजकत्वमित्यस्वरसादाह—न चेति। इत्यारभ्य समाप्तिनिष्ठं मङ्गलजन्यतावच्छेदकं नास्तीत्यत्रअतिप्रसङ्गतादवस्थ्यादित्यन्तस्य तात्पर्यम्।

अतिप्रसङ्गादिति। विघ्नात्यन्ताभावस्थलीयसमाप्तावित्यर्थः।

नापि मङ्गलेति। मङ्गलसमानकालीनो यो विघ्नस्तद्ध्वंसपूर्वकसमाप्तित्वं यथा नावच्छेदकं तथा विघ्नसमानकालीनं यन्मङ्गलं तत्पूर्वकसमाप्तित्वमपि नावच्छेदकमित्यर्थः।

प्रतिबन्धकस्येति। स्वतः सिद्धविघ्नाभावपूर्विका एका मङ्गलजन्यविघ्ननिवृत्तिपूर्विका चापरा समाप्तिः तुल्यकालमेव यत्र भवति तत्राद्यायामुक्तधर्मद्वयमतिप्रसक्तमित्यर्थः।

तस्यापराजनकत्वेनातिप्रसङ्गतादवस्थ्यात्। अन्यथा काशीमरणादीनां तत्त्वज्ञानविशेषजन्यमोक्षहेतुत्वसम्भवे यथाश्रुतश्रुतिसमर्थने तत्त्वज्ञान एवोपक्षयं कल्पयित्वा हेतुताबोधिका श्रुतिः प्रयोजकपरतया न समर्थ्येत।

न च तत्त्वज्ञानविशेषो नोपस्थित इति वाच्यं, तर्हि तत्रापि काशीमरणाद्यहेतुतापत्तेः। उत्तरकालं कल्पना यदि तदा समानम्।

ननु ज्ञानविशेषजन्यत्वं मोक्षमात्रे दुर्ग्रहम्। मोक्षविशेषे च स्फुरिते तदवच्छेदेनैव हेतुता किमन्तर्गडुना ज्ञानेनेत्युभयथा व्यापारो नावच्छेदक इति चेत्—तुल्यम्।

ननु काशीमरणज्ञानविशेषयोर्हेतुहेतुमद्भावग्रह एव तदवच्छेदकत्वशङ्का, अन्यथा ज्ञानविशेषजन्यत्वस्यातिप्रसक्तया तद्दोषतादवस्थ्यात्। तथा च तद्ग्रहाशक्यत्वे क तदवच्छेदकत्वम्। शक्यत्वे वाऽन्यं प्रति पूर्ववर्त्तित्वग्रहाज्जनकं प्रति पूर्ववर्त्तित्वग्रहाच्चान्यथासिद्धतया हेतुतायामेव बाधादिति चेत्—इदमपि तुल्यम्।

वस्तुतः काशीमरणादौ हेतुतावबोधकश्रुत्यादेः प्रत्यक्षतया तत्र हेतुताशङ्काऽपि प्रकृते तु हेतुताबोधकमेव दुर्लभम्। सुतरां तदधीनमवच्छेदककल्पनम्। तथा हि न तावत्तद्बोधिका प्रत्यक्षा श्रुतिरस्ति किन्तु आचारेण कल्प्या। न चाचारो हेतुताग्रहाधीनो येन तद्बोधकं वेदमाक्षिपेत्। किन्तु कारणकारणेऽपि प्रवृत्तिदर्शनेन फलान्वयव्यतिरेकशालित्वज्ञानस्य तद्धेतुतया तेन विनाऽनुपपद्यमानः तज्ज्ञानजनकम्। स चोभयथा सम्भवन्न कार्यतावच्छेदकं कल्पयति। किन्तु क्लृप्तत्वात् लाघवाच्च समाप्तौ विघ्नाभावं

ननु मङ्गलजन्यविघ्नध्वंसविशेषजन्यसमाप्तित्वमवच्छेदकमस्त्वित्यत आह—अन्यथेति। तत्रापीति। तत्त्वज्ञानविशेषस्यानुपस्थितत्वादित्यर्थः। कल्पनेति। कारणताग्रहोत्तरकाले विशेषकल्पनेत्यर्थः। तदा समानमिति। काशीमरणजन्यतत्त्वज्ञानविशेषजन्यमोक्षत्वेन मोक्षं प्रति हेतुत्वे समानमित्यर्थः। तुल्यमिति। मङ्गलस्थलेऽपीत्यर्थः। तदवच्छेदकत्वशङ्केति। कार्यतावच्छेदकत्वशङ्केत्यर्थः।

अन्यथेति। हेतुहेतुमद्भावाग्रह इत्यर्थः। अन्यं प्रति जनकं प्रतीत्यन्यथासिद्धिभ्यां तत्त्वज्ञानविशेषेण काशीमरणं मोक्षं प्रति यथाऽन्यथासिद्धं तथा मङ्गलमपि समाप्तौ विघ्नध्वंसविशेषेणान्यथासिद्धमिति इदमपि तुल्यमित्यन्तस्यार्थः।

वस्तुत इति। काशीमरणे कारणताबोधकमापाततोऽप्यस्ति प्रकृते तदपि न। आचारस्य प्रयोजकत्वमात्रबोधकश्रुत्याक्षेपकत्वादिति ग्रन्थकार्थः। तद्धेतुतयेति। ज्ञाने हेतुतयेत्यर्थः। तेनेति। ज्ञानेनेत्यर्थः। तज्ज्ञानजनकमिति। वेदमाक्षिपेदित्यनुषङ्गः। कल्पयतीति। आचार इति शेषः।

क्लृप्तत्वात् लाघवाच्चेति। तथा चावश्यक्लृप्तेत्याद्यन्यथासिद्ध्याऽपि न मङ्गलं हेतुरिति

तन्मात्रे मङ्गलमित्यलं विस्तरेण । अन्यथा मणिध्वंसजन्यवह्निदाहादौ मण्यवयवविभागस्यापि हेतुतापत्तेः । अत एव कारीरीतः प्रत्यवग्रहनिवृत्तिमात्रं वृष्टिस्तु स्वहेतोरेवेति सिद्धान्तः । अन्यथा तत्राप्युक्तरीत्यापत्तेः । प्रतिबन्धकध्वंसस्य कार्यपूर्ववर्त्तिताग्रहानन्तरं तज्जनककारीरीमङ्गलयोः पूर्ववर्त्तित्वग्रहेण कुलालपितृवदन्यथासिद्धतया हेतुत्वाग्रहादिति साधूक्तं—व्यभिचारान्न तदङ्गमिति ।

भावः । पूर्वं काशीमरणदृष्टान्तेन मङ्गलस्यान्यथासिद्धिरुक्ता तामेव मण्यवयवविभागादिदृष्टान्तेन दृढीकरोति—**अन्यथेति** । विभागग्रहणञ्चैकदेशिनाऽवयवविभागस्य द्रव्यनाशकत्वस्वीकारात् ।

अत्र वदन्ति—अन्य प्रतीत्याद्यन्यथासिद्धिद्वयमसम्बद्धमेव । अवच्छेदकनिरपेक्षेण श्रुत्या कारणत्वबोधने गृहीत एवेति नियमघटिततल्लक्षणायोगात् ।

यत्तु स्वतः सिद्धविघ्नविरहस्थलेऽवश्यकल्पनीयेन विघ्नाभावेन मङ्गलमन्यथासिद्धमिति—तदपि न । श्रुत्या मङ्गलकारणता बोधयन्त्याऽनन्यथासिद्धत्व बोधितमिति तद्रक्षार्थं च स्वतःसिद्धविघ्नविरहस्थलीयसमाप्तौ सुकृतसम्पत्तेरेव हेतुत्वात् । इह च विघ्नस्थलीयसमाप्तौ तस्या असत्त्वेनावश्यकल्प्यकारणेनोपपत्त्यभावादिति ।

यच्च काशीमरणकारीरीमण्यवयवविभागवन्मङ्गलमन्यथासिद्धमिति—तन्न । काशीमरणकारीर्योः मोक्षविशेषे वृष्टिविशेषे च हेतुत्वस्यैवाभ्युपगमात् । अत एव कारीरीजनितवृष्टौ जातिभेद एवेति मूलम् ।

यच्च काशीमरणादे. कारणत्व क्वचिद्दूष्यते तत्र तत्त्वज्ञान विना स्वातन्त्र्येण हेतुत्व नास्तीत्यभिप्रायः । मण्यवयवविभागस्य च कारणत्वे प्रामाणाभावात् । इह च श्रुतेरेव प्रमाणत्वात् ।

यदपि आचारस्य प्रयोजकत्वमात्रबोधकत्वमिति श्रुत्याक्षेपकत्व तदपि न । एव सति प्रत्यक्षविधेरपि आचारजनकज्ञानविषये शक्ततयाऽश्वमेधादेरपि कारणत्वाभावप्रसङ्गात् । न च प्रयोजकत्वमात्रे श्रुत्या बोधितेऽपि अन्यथासिद्ध्यनुपलम्भात् अश्वमेधादेः कारणता पर्यवस्यतीति वाच्यम्, मङ्गलेऽप्यन्यथासिद्धिविरहस्य प्रदर्शितत्वादिति ।

अत्र ब्रूमः—अवश्यकल्प्येत्याद्यन्यथासिद्धिसत्त्वान्न मङ्गल कारणम् । विघ्नससर्गाभावकारणताया आवश्यकत्वात् । न च मङ्गलाप्रयुक्तविघ्नविरहस्थलीयसमाप्तौ सुकृतसम्पत्तेर्हेतुत्वमङ्गीकृत्य तदुद्धारः कृत एवेति वाच्यम् । न हि समाप्त्यादिरूपे कार्ये सुकृतस्य साक्षाज्जनकत्वं वन्ध्यासप्रयोगादाविव दृष्टसम्पत्तावदृष्टविलम्बेन विलम्बाभावात् । किन्तु मङ्गलस्यैव विघ्नध्वसविशेषद्वारा । तथा च विघ्नात्यन्ताभावस्थलेऽवश्यक्लृप्तादिघ्नससर्गाभावात् द्वयोरप्यन्यथासिद्धि. । किञ्चैकस्मिन् विशेषे कारणविशेषस्वीकारे तदितरविशेषे कारणान्तरमावश्यकमिति प्रमाणगुणजन्यत्वव्यवस्थापनावसरे मूलकृदेव वक्ष्यति । तथा च विघ्नात्यन्ताभावस्थलेऽपि कारणविशेषो वक्तव्यः । स च दुर्वचः । कारीर्याश्च कारणत्वोक्तिरेकदेशिमतेन ।

अन्ये[1] तु मङ्गलं प्रधानं, अदृष्टद्वारा आरब्धकर्म्मसमाप्तिः फलं, तत्कामोऽधिकारी, क्वचित्तु फलाभावः कर्म्मादिवैकल्यात्कारीरीवत्। न चान्यदापि करणम्। नियतकालीनतादृशाचारेण फलवत्कर्मारिप्समानस्तत्समाप्तिकामो मङ्गलमाचरेदिति श्रुत्या आरम्भसमयकर्त्तव्यताबोधनात्। यथा आग्नावैष्णवमेकादशकपालं चरुं निर्वपेद्दर्शपूर्णमासावारिप्समान इति श्रुत्यारम्भणीयेष्टेः प्रधानायाः दर्शारम्भसमयकर्त्तव्यत्वम्, कामनोपाधिकार्यत्वेऽप्यारम्भसमये नियतमनुष्ठानम्। आरब्धकर्मसमाप्त्यर्थिनोपायत्वेनावश्यन्तदनुष्ठानात्। न च काम्यत्वे परिसमाप्तिकामनां विना फलवत्कर्मारम्भेऽपि तदनुष्ठानं न स्यादिति वाच्यम्। समाप्तं कर्म फलायालमिति फलार्थिनः समाप्तौ कामनावश्यम्भावादिति—

यच्चोक्तं प्रयोजकत्वमात्रे विधेरर्थेऽश्वमेधादिकारणता कथमिति—तन्न। अवश्येत्याद्यन्यथासिद्धेरत्रैव तत्राभावेन कारणतायामेव विधेः पर्यवसानात्। अश्वमेधेनेतिकरणत्ववाचितृतीयायाः प्रत्यक्षत्वाच्च।

वस्तुतो भवतु कारणत्वं विधेरर्थः तथापि विघ्नध्वंसकाम इत्येव श्रुतेरुन्नयनं लाघवात्। न च कामनाविषयत्वेनोपस्थितसमाप्तेर्न विधौ त्याग इति वाच्यम्। तथा सति समाप्तेः स्वतोऽपुरुषार्थतया सुखादेरपि कामनाविषयतया तत्फलकताबोधकोऽपि विधिः कल्प्येत। तत्र चेत् गौरवमिहापि तच्च समानम्। तस्मादप्रत्यक्षे विधौ लाघवादिसहकारेण विधिं कल्पयित्वा फलावधारणम्। प्रत्यक्षे तु यथाश्रुतविधिमादायेति।

यच्च विघ्नान्यूनसंख्यात्वमवच्छेदकमादायान्वयव्यभिचारनिवारणं—तन्न। बलवत्तरैकविघ्नस्य बहुभिरपि मङ्गलैरनिराकरणात्। एकेनापि बलवता मङ्गलेन बहुविघ्ननिराकरणादिति दिक्।

अन्ये त्विति मूलम्। न च प्रधानीभूतग्रन्थादिफलसमाप्त्या फलवत्त्वमभ्युपगतमेव स्यादिति वाच्यम्, दण्डचक्रादिवत् परस्परसहकारित्वं नाङ्गीभाव इत्याशयात्।

ननु मङ्गलस्य काम्यकार्यत्वे कामनाया अनियमात् न नियतं तत्करणं स्यादित्यत आह—**कामनेति** मूलम्।

ननु समाप्तावेव न कामनानियम इत्याशङ्क्य निराकरोति—**न चेति** मूलम्। विशिष्टहेतुत्वावगमे विशेषणीभूतसमाप्तावपि इष्टसाधनतावगमनियमात्कामनावश्यम्भाव इत्यर्थः।

1. मीमांसैकदेशिनः।

तन्न। कारीरीजन्यातिशयवद्विहितप्रधानजन्यातिशयत्वात् मङ्गलजन्यापूर्वस्यापि फलसम्पादकाशेषकारणसम्पादकतया आरब्धकर्म्मसमाप्त्यवश्यम्भावापत्तेः फलावश्यम्भावनिश्चयं विना वैदिककर्मानुष्ठानात्।

न चैवं, भूयसि साङ्गेऽपि मङ्गले क्वचिदारब्धसमाप्त्यभावात्। न च तत्रामुष्मिकं फलम्, ऐहिकमात्रफलत्वात्। वैदिककर्मणः फलावश्यम्भावेनागन्तुकदुरितेनाप्यप्रतिबन्धात्।

विहितेति। अत्रातिशयत्वमदृष्टत्वम्। न च विहितपदवैयर्थ्यं, पापे व्यभिचारात् फलस्येष्टरूपत्वात्। न च तदेवास्तु न तु प्रधानपदं, अङ्गापूर्वे व्यभिचारात्।

वस्तुतस्तु तत्त्वेन जनकत्वं विवक्षितम्। अन्यथा शिखोपवीतधारणापूर्वादौ व्यभिचारात्। तस्याङ्गप्रधानोभयरूपत्वात्। अत एवोभयपदसार्थकता, अपूर्वविशेषं प्रति विहितप्रधानत्वेनैव जनकत्वादपूर्वसामान्यं प्रति तु विहितत्वेनेति भावः।

अत्रेति। अतिशयपदस्यादृष्टपरत्वाभावे ध्वंसादावनैकान्त्यादिति भावः। कलिकापूर्वभिन्नत्ववेदबोधितनाशकानाश्यत्वाप्रतिरुद्धत्वानि विशेषणान्याग्नेयजन्यस्य कीर्तननष्टस्य प्रतिकृत्या प्रतिरुद्धस्यापूर्वस्य वारणाय देयानि।

ननु साङ्गप्रधानत्वेन प्रधानजन्यातिशयस्येत्यवश्य वाच्यम्। अन्यथा शिखाबन्धनादिजन्याङ्गापूर्वे व्यभिचारात्। यत्रोत्तराङ्ग दक्षिणादि न कृत प्रधान न चातिशयो जनितस्तत्र व्यभिचारः। तथा च विहितपदमप्रसिद्धिवारकमेवास्तु। प्रधानत्वेन जनकत्वस्याप्रसिद्धेः किमिति फलपदस्य विशेषपरताक्लेश इत्यभिप्रेत्याह—वस्तुत इति।

शिखेति। शिखाबन्धनादिजन्याङ्गापूर्वादावित्यर्थः। अत्र कल्पेऽतिशयपद कार्यसामान्यपरमेव, ध्वंसादौ तत्त्वेन जनकत्वाभावादिति। वेदबोधितेत्यादिविशेषणद्वयमिहापि देयम्।

ननु मङ्गलजन्यापूर्वाप्रसिद्धौ पक्षाप्रसिद्धया कथमापादनमिति चेत्—न। मङ्गल यदि साङ्गप्रधानत्वे सति शब्दबोधितनाशकानाश्यापूर्वद्वारक स्यादावश्यकफलक स्यादित्यापादनात्। अप्रयोजकत्व निरस्यति—फलेति मूलम्।

आपत्तिमाशङ्क्याह— न चैवमिति मूलम्। आगन्तुकेति मूलम्। प्रतिकृत्यादिजनितविघ्नेनेति शेषः।

किञ्च यथा कारीर्य्यादिकमग्रिमपुरुषव्यापार विनव, फलहेतुः तथा मङ्गलमपि तेन विनव, हेतुः स्यात् ।

न चैवम् । लोकावगतकारणत्वात्तदपेक्षेति चेत्—तर्हि स एव हेतुरस्तु, किमनेन ? आरब्धकर्म्मजनकादृष्टकारणसम्पत्तौ पुत्रेष्टिवत्तत्समाप्तिसाधनत्वं श्रुत्या बोध्यते इति चेत्—न । तत्र दृष्टकारणसम्पत्तौ पुत्रानुत्पादाददृष्टद्वारा पुत्रेष्टेस्तज्जनकत्वमस्तु । न च कर्म्मनिर्वाहे दृष्टसकलहेतुसम्पत्तौ विलम्बो येन मङ्गलजन्यादृष्टापेक्षा स्यात् ।

अपि च मङ्गलं विनापि प्रमत्तनास्तिकानुष्ठितसमाप्तेर्न तत्तत्र कारणम् । जन्मान्तरीयपुण्यसम्पत्तिस्तत्र हेतुरिति चेत्—न । तथापि व्यभिचारात् । क्वचित्-पुण्यसम्पत्तिः क्वचिन्मङ्गलं हेतुरिति व्रीहियववद्विकल्प एवेति चेत् । तर्हि

मेघसंचारवदग्रिमपुरुषव्यापारमदृष्टमेव घटयेदित्यरुचेराह—किञ्चेति[1] । अत्रापि यद्यपि मङ्गलस्य समाप्तिविशेषे तदन्यविशेषे समाप्तिसामान्ये वा सुकृतसम्पत्तेर्हेतुत्वादेकविषयत्वाभावान्न वैकल्पिकता तथापि विघ्नाभावस्यानवच्छेदकतया विशेषान्तरस्य चासम्भवेन विघ्नाभावापेक्षायामपूर्वे मानाभावेन चायं प्रकारो न घटत इति भावः ।

ननु प्रतिकृत्यादिजनितविघ्नान्तरेण प्रतिरुद्धत्वात् स्वरूपासिद्धिरित्यस्वरसात्—**किञ्चेति** मूलम् । तत्रास्वरसमाह—**मेघेति** ।

तर्हि तत्सम्भावनयेति मूलम् । तत्र शङ्कते—**अत्रेति** । **एकविषयत्वाभावात्** एकधर्मावच्छिन्नोपस्थितिविषयत्वाभावात् । अतोऽग्रे व्यवस्थाप्यस्य विकल्पे भिन्नविषयत्वस्य न विरोधः । विकल्पेऽपि एकधर्मावच्छिन्न प्रत्येव द्वयोर्जनकत्वमित्येकदेशिमतेन वा शङ्केयम् ।

न वैकल्पिकतेति । तथा च वैकल्पिककारणतानभ्युपगमादेकदेशिना विकल्पपदेन भिन्नभिन्नकार्यजनकत्वमात्रस्याभिधानात् तर्हीत्यादिमूलमसङ्गतमिति शङ्कार्थः ।

अनवच्छेदकतयेति । अन्यथासिद्धिभीया समाप्तित्वेनोपस्थिता समाप्तिं प्रत्येव मङ्गलस्य प्रथम हेतुत्वग्रहो न तु विघ्नाभावपूर्वकसमाप्तित्वेनेति भावः ।

विघ्नाभावापेक्षायामिति । विघ्नध्वंसजन्यसमाप्तित्वस्यावच्छेदकत्वे आवश्यकविघ्नध्वंसस्यैव द्वारत्वेऽपूर्वे मानाभावेनापूर्ववादिनामेकदेशिना नेयं शङ्का घटत इत्यर्थः ।

---

१. 'अपि चे'ति काशीपुस्तकपाठः ।

तत्सम्भावनया नियतं मङ्गलानुष्ठानं न स्यात् । यवप्रयोगे व्रीहेरिव । विकल्पे चोभयस्याशास्त्रार्थत्वात् ।

ननु विधिवाक्यं न फलनियतपूर्वसत्त्वं बोधयति किन्तु मङ्गलात् फलावश्यम्भावमिति चेत्—न । इष्टसाधनत्वस्य विध्यर्थत्वात् । अथान्वयव्यतिरेकाभ्यां तद्ग्रहे व्यभिचारो दोषाय, न त्वागमेन तद्ग्रहे । तदुक्तं—'आगममूलत्वाच्चास्यार्थस्य व्यभिचारो न दोषाये'ति । अत एव यागादेः स्वर्गसाधनतेति चेत्—न । नियतपूर्वसत्त्वस्य ग्राह्यस्याभावादागमेनापि बोधयितुमशक्यत्वात् । यागजनितस्वर्गे कारीरीजनितवृष्टौ च जातिविशेष एवास्ति]

ननु जातिभेदकल्पनायामविशेषादश्वमेधवाजपेययोः स्वर्गजनकत्वे किन्न विकल्पः । मैवम् । वाशब्देनान्यतरकोटिप्रतिक्षेपवाचिना यत्रान्यतरसत्त्वमपरकार्योत्पत्तिप्रतिबन्धकं तत्र विकल्पो नेतरस्मिन्निति वस्तुस्थितिरिति ।

यद्यपि वाशब्दोऽत्र नास्ति तथाप्येकसाधनावरुद्धतया विकल्पमुख्या एवान्यसाधनाकाङ्क्षायाः सम्भवेन तथैव हेत्वन्तरान्वयादिति भावः ।

यद्यपि समाप्तिकामो मङ्गलमाचरेदिति मङ्गलस्य समाप्तित्वेनोपस्थितं प्रति कारणताग्रहात् मङ्गलाप्रयुक्तविघ्नविरहस्थलीयसमाप्तौ तदनुरोधेन सुकृतकारणताबोधकश्रुतिकल्पनात् शङ्का सम्भवत्येव तथाप्यवश्यकल्प्यप्रतिबन्धकसंसर्गाभावेनान्यथासिद्धेः श्रुतेः प्रयोजकत्वमात्रपरतया हेतुताग्राहकमानाभावाच्च नायं कल्प इति भावः ।

मैवमिति । परस्पराभावसहकृतयोर्द्वयोर्यत्र कार्यविशेषौ प्रति जनकत्वं परस्पराभावकालीनौ कार्यविशेषौ प्रति वा यत्र द्वयोर्जनकत्वं तत्र विकल्पः । स चायं तत्रैव यत्रैकधर्मावच्छिन्नोपस्थितिकं कार्यं प्रति एकं कारणमुक्त्वा वाशब्दप्रयुक्तमेकमेकप्रकरणाम्नातं वा कारणान्तरं विधीयते । न चैतद्वाजपेयादिषु, वाशब्दाभावादेकप्रकरणानाम्नानाच्चेति ग्रन्थार्थः ।

केचित्तु यागाकाङ्क्षाप्रवृत्तिविधिबोध्यत्वेन द्वयोरनुगतेन रूपेण एकजातीयं प्रत्येव जनकत्वं वैकल्पिककारणतामाहुः—तन्न । यवप्रयोगे व्रीह्युपादानप्रसङ्गादिति ।

ननु वैकल्पिककारणद्वयं कथमेकत्र न प्रयुज्यत इत्यत आह—**विकल्प इति मूलम् ।** तत्कारणद्वयस्य परस्परप्रतिक्षेपणैव प्राप्ततया परस्पराभाववत एव जनकत्वादित्यर्थः । **इष्टेति मूलम् ।** साधनत्वञ्च नियतप्राक्सत्त्वघटितम् । तद्ग्रहे व्यतिरेकव्यभिचारग्रहो विरोध्येवेति भावः ।

अशक्यत्वादिति मूलम् । अयोग्यतानिश्चयस्य शाब्दग्रहपरिपन्थित्वादिति भावः । **तथैवेति ।** विकल्पेनेत्यर्थः ।

अपरे तु मङ्गलस्यारब्धनिर्वाहकत्वं विघ्नसंसर्गाभावद्वारा, तथैव प्रतिबन्धकाभावस्य हेतुत्वात्। स चाभावः सतो विघ्नस्य ध्वंसोऽनागतस्यानुत्पादश्च कर्म्मनिर्वाहसमयस्थायी। विघ्नकारणविनाशद्वारा प्रागभावस्य साध्यत्वं, यस्मिन् सत्यग्रिमक्षणे यस्य सत्त्वं यद्व्यतिरेके चासत्त्वं तदेव तस्य तज्जन्यत्वं न

यस्मिन् सतीति। यदा यदवच्छिन्ने सति यदधिकरणक्षणोत्तरक्षणे यदधिकरणत्वं, यदा यदवच्छिन्नाधिकरणक्षणोत्तरक्षणे वा यदवच्छिन्नाधिकरणत्वं, तदनधिकरणक्षणोत्तरक्षणे च तदनधिकरणत्वं तदा तदेव तदवच्छिन्नस्य तदवच्छिन्नजन्यत्वमित्यर्थः। अस्ति च दण्डेतरयावद्घटहेतुसमवधानकाले दण्डजातीयाधिकरणक्षणोत्तरक्षणे घटजातीयाधिकरणत्वं तदनधिकरणक्षणोत्तरक्षणे च घटजातीयानधिकरणत्वमिति तद्वदेव यावद्विघ्नहेतुसाकल्ये मङ्गलत्वावच्छिन्नाधिकरणक्षणोत्तरक्षणे विघ्नप्रागभावत्वावच्छिन्नाधिकरणत्वं तदनधिकरणक्षणोत्तरक्षणे तत्प्रागभावानधिकरणत्वम। तथा चोभयत्र तदा तज्जन्यत्व-

यदा यदवच्छिन्ने सतीति। यस्यामवस्थाया यासु यावतीषु व्यक्तिषु सतीष्विति यावत्। यज्जातीयाधिकरणक्षणोत्तरक्षणे यज्जातीयाधिकरणत्वं तस्यामेवावस्थाया तासु तावतीषु व्यक्तिषु सतीष्विति यावत्। यज्जातीयानधिकरणक्षणोत्तरक्षणे यज्जातीयानधिकरणत्वं तज्जातीयजन्यत्वं तज्जातीयस्येत्यर्थः। अत्रान्वयव्यतिरेकमात्रोक्तौ रासभजन्यतापि घटे स्यादिति एकस्यामवस्थायामन्वयव्यतिरेकावुक्तौ। तदपि यथाश्रुतमनुपपन्नम। वेमाभावाद्युदासीनावस्थामेकामादाय रासभे उभयसत्त्वात्। अतो यासु यावतीष्वित्युक्तम्।

अत्र चासम्भववारणाय स्वस्वव्याप्यातिरिक्तास्विति विशेषण देयम्। अन्यथा यस्यामवस्थाया दण्डादिव्यक्तिषु सतीषु दण्डानन्तर घटसत्त्व तस्यामवस्थाया दण्डानधिकरणक्षणोत्तरक्षणे घटासत्त्वमप्रसिद्ध स्यात्।

वस्तुतो नेदं विशेषण देयम्। आकाशादिजन्यशब्दादिसग्रहाय व्यतिरेकभागस्यापादनरूपत्वात्। अधिकरणत्वानधिकरणत्वे च स्वस्वव्यापारान्यतरस्य विवक्षिते। अतो न यागादिजन्यस्वर्गाद्यव्याप्तिरिति। यदवच्छिन्ने यज्जातीये। सति विद्यमाने। यदधिकरणेति यत्पद तदेव तज्जन्यत्वमित्यनेन सम्बध्यते। अधिकरण चार्थाद्यज्जातीयाधिकरणमेवेति नोक्तार्थेऽक्षरविरोधः।

यदा यदवच्छिन्नाधिकरणेत्यादिपाठः तत्स्पष्टार्थ एव। अत्र चावस्थैक्यवत्क्षणैक्यमपि विवक्षितम्। तेन यस्यामवस्थाया यदधिकरण यत्क्षणोत्तरयत्क्षणे यदधिकरणत्वं तस्यामवस्थाया तदनधिकरणं तत्क्षणोत्तरतत्तत्क्षणे तदनधिकरणत्वं ध्येयम्। तेन दण्डादिस्थले दण्डाधिकरणक्षणाव्यवहितोत्तरक्षणग्रहणात् प्रकृते मङ्गलाधिकरणक्षणावधिकतृतीयक्षण ग्रहणाद्वैषम्यं न देश्यम्।

त्वसतः सत्त्वं गौरवात्। अस्ति च विघ्नकारणनाशे सति विघ्नप्रागभावस्य तथा-त्वम्। तावति समये दुरितानुत्पादश्च न साक्षान्मङ्गलजन्य इत्यदृष्टद्वारा तथा। एवं निर्विघ्नं समाप्यतामिति कामनया तदाचारोऽपि सङ्गच्छते। अत एव यत्र विघ्नाभावः स्वतः सिद्धः तत्र मङ्गलस्याकिञ्चित्करत्वेन वेदाप्रामाण्यमिति निर-स्तम्। अनागतविघ्नाभावस्य तत्रापि साध्यत्वात्। सर्वे विघ्नाः शमं यान्तीति यत्र विनायकस्तवपाठादौ श्रुतमस्ति तत्र तत एव प्रमत्तानुष्ठितसमाप्तेरनादौ संसारेऽवश्यं तदाचारात्। तथा च तेन समं मङ्गलस्य विकल्प एव। यत्र च साङ्गे मङ्गले सत्यपि न फलं तत्र विघ्नभूयस्त्वादिति।

तन्न। विघ्नानुत्पादस्य व्यापारत्वे मानाभावात्। संसर्गाभावत्वेन हेतु-

मविशिष्टम्। एतच्च यद्यन्यथासिद्धिसाधारणं तदा तदन्यत्वेनापि विशेषणीयम्। एतेन यथाश्रुतेऽसत्त्वस्य प्रागभावात्यन्ताभावविकल्पेन प्रकृताव्याप्त्याकाशातिव्याप्तिप्रसङ्गो मङ्गलपूर्वमपि विघ्नप्रागभावसत्त्वे व्यभिचार इत्यादिदूषणमलग्नकमिति दिक्।

एव निर्विघ्नमिति। निर. संसर्गाभावमात्रवचनत्वादित्यर्थः।

नन्वेव विघ्नप्रागभावस्य मङ्गलसाध्यता न स्यात्तद्व्यतिरेकेऽपि तत्यानादित्वेन पूर्वक्षणे सत्त्वादिति चेत्—न। साध्यत्वेन यदभिमतं तत्प्रतियोग्यनुयोगित्वरूपसम्बन्धाश्रयो यः प्रागभावस्त-न्नाशकस्वस्वव्याप्तेतरसकलसमवधाने सति यस्मिन् सतीत्यादि विवक्षितम्। तादृशश्च घटादिस्थले साध्यत्वाभिमतघटादिप्रतियोगिकप्रागभाव.। प्रकृते तु साध्यत्वाभिमत एव प्रागभावः। उक्तरूपेण त्वनुगमः।

नन्वेव दण्डरूपजन्यता घटे स्यादित्यत आह—एतच्चेति।

ननु मङ्गलतद्व्याप्तेतरविघ्नप्रागभावनाशकसमवधाने मङ्गलव्यतिरेके विघ्नप्रागभावव्यतिरेको भवतु तथापि तत्सत्त्वे तत्सत्त्व कथम्? भवतु, विघ्नप्रागभावनाशकसकलस्यैव विघ्नोत्पादकसामग्रीत्वेन तस्योत्पादनियमेन विघ्नप्रागभावासत्त्वात्। न च मङ्गल तत्र प्रतिबन्धकम्। मङ्गलसत्त्वे मङ्गला-भावरूपकारणाभावात्तादृशसमवधानस्यैवासिद्धिरिति चेत्—न। स्वस्वभावस्वव्याप्तेतरतन्नाशकसकल-समवधाने सतीत्यर्थः।

यथाश्रुत इति। असत्त्वस्य प्रागभावगर्भत्वे यद्व्यतिरेके प्रागभावस्य प्रागभाव एवेत्य-व्याप्तिः। अत्यन्ताभावगर्भत्वे आकाशातिव्याप्तिरिति भावः।

त्वात् तथैव व्यापारत्वम्। तच्च प्रागभावेऽप्यस्तीति चेत्—न। अत्यन्ताभावस्यापि व्यापारत्वापत्तेः। स्वतः सिद्धस्य न हेतुत्वं यदि, तदा प्रागभावेऽपि तुल्यम्।

किञ्च यत्र मङ्गलं न तत्र नियमेन विघ्नकारणमस्ति, येन तन्नाशद्वारा प्रागभावस्य साध्यत्वम्। एवमपि यत्र विघ्नानुत्पादोऽपि स्वतः सिद्धस्तत्र मङ्गलमकिञ्चित्करमेव। विघ्नध्वंसानुत्पादयोरारब्धनिर्वाहकालावस्थायिनोर्मङ्गलादेवोत्पत्तेर्न तदर्थमदृष्टद्वारता। मङ्गलस्य विकल्पेनान्वये शिष्टैर्नियमतो मङ्गलानुष्ठानं न स्यादित्युक्तम्।

किञ्च प्रधानत्वे साङ्गमङ्गलमात्रं न समाप्तिहेतुः। तस्मिन् सत्यपि तदभावात्। प्रचितं[1] तथेति चेत्—न। अप्रचितादपि फलसत्त्वात्। नोभयम्। अननुगमात्। गुरुकर्म्मारम्भे प्रचितमल्पकर्म्मारम्भेऽल्पमिति चेत्—न। क्वचित्तादृशादपि फलासत्त्वात् वैपरीत्येऽपि फलसत्त्वाच्च। एतेन बहुविघ्नशङ्कया बहुतरं अल्पविघ्नशङ्कया अल्पतरञ्च हेतुः तादृशाचारेण तादृशश्रुत्युन्नयनादिति निरस्तम्। तादृशादपि प्रारिप्सितासमाप्तेः वैपरीत्येऽपि समाप्तेश्च। बहुत्वस्य त्रिचतुरादिभावेन अल्पत्वस्य चैकद्व्यादिरूपतया अननुगमेन तादृशशिष्टाचारेण तादृशश्रुत्या बोधयितुमशक्यत्वाच्च। तस्मान्मङ्गलं नाङ्गं न वा प्रधानमिति पूर्वपक्षसंक्षेपः।

नोभयमिति[2]। यद्यपि विघ्नसमसंख्यमङ्गलत्वेनानुगमे नाननुगमो न वा व्यभिचारस्तथाऽपि एकेनाप्यनेकोत्पादात्तत्रैतत्प्रकारो न घटते कारणतावच्छेदकस्यापरिचयेनाप्रवृत्तेश्चेत्यवधेयम्। यद्वा तदपि तदा यदि समाप्तिहेतुता सैव च नोक्तयुक्तेरिति भावः।

---

१. बहुतरमिति भाव.।

२. नोभयमितीति। किञ्चेतीति क्वचित् पाठः। तदा प्रधानत्व इति प्रकरणं धृतमिति ध्येयम्।

अथ मङ्गलवादसिद्धान्तः

सिद्धान्तस्तु । आरब्धकर्मसमाप्तौ मङ्गलं नाङ्गं, न वा प्रधानम्, अहेतुत्वात्; किन्तु प्रायश्चित्तवत् प्रधानं विघ्नध्वंसः फलम् । आरब्धकर्मनिर्वाहे विघ्नो मा भूदितिकामनया तदनुष्ठानात् । विघ्नस्य संशये निश्चये वा शिष्टानां तदाचरणाद्विघ्नाभावस्याकाङ्क्षितत्वाच्च । यदि च निर्विघ्नं समाप्यतामितिकामनया तदाचरणं तदापि 'नागृहीतविशेषणन्यायेना'हं स्वर्गी स्यामित्यत्र स्वर्ग इव विघ्नाभाव एव फलम्, न समाप्तिः, उभयतो व्यभिचारात् । समाप्तिस्तु विघ्नरूपप्रतिबन्धकाभावे सति लोकावगतस्वकारणादेव । प्रचिताप्रचितदेवतास्तुत्यादिसाङ्ग-

नागृहीतेति । यद्यप्ययं लाघवमूलको न्यायः इह तु बाधो मूलमिति सविशेषणे हीति वक्तुमुचितम्, अत एव त्रिसूत्रीप्रकाशादौ तथैव लिखितम्, तथापि विघ्नाभावस्य विशेषणतोपलक्षणताविकल्पेन समाप्तिमात्रे बाधो विशिष्टायां लाघवमिति विषयभेदेनोभयसामञ्जस्यमिति भाव. । इह विघ्नो माभूदित्यत्रेदमंशस्यापि विशेषणत्वान्न्यायसाम्यमिति तु दर्पण[1]दूषणमयुक्तिसम्भवमेव । इदन्त्वस्य प्रतियोगिनि विघ्ने विशेषणत्वन्न तु तदभावे । न च विशेषणविशेषणतयापि न्यायसाम्यमिति वाच्य, व्यभिचारेण विनिगमनासम्भवादिति भावः ।

वयन्तु ब्रूम. । विघ्नध्वंसोऽपि न फलमपि तु विघ्नानुत्पादः । विघ्नो मा भूदित्युद्दिश्य प्रवृत्तेः, न तु विघ्नो निवर्त्ततामिति । अत एव दुःखं मा भूदिति कामनया क्रियमाणस्य प्रायश्चित्तस्य दुःखानुत्पाद एव फलं न तु दुःखसाधनध्वंसः । अत एव च कृतेऽपि मङ्गले समाप्त्यभाव । तदा प्रतिबन्धकाधर्मध्वंसद्वारा प्रतिबन्धानुत्पादेऽप्यग्रेतनदुरितेन प्रतिबन्धसम्भवात् । यथा च दुःखानुत्पादानुगुणतया पापनाशकत्वं प्रायश्चित्तस्य तथा दुरितनिवर्तकत्वं मङ्गलस्य । तावत्समयमनवस्थित्या यदि तदर्थमदृष्टद्वारकताऽपि कल्प्या तदा कल्प्यताम् ।

वस्तुतो मध्येऽपि मङ्गलाचरणेन मङ्गलानन्तरमपि प्रतिबन्धदर्शनेनापूर्वजनने मानाभावः । न च तदा दुरितहेतुक्रियाया एवासम्भावितत्वेन कथं तदनुत्पादाय प्रवृत्तिरिति वाच्यम् । 'विघ्नो मा भूदि'ति कामनायां हि विघ्नो न दुरितमपि तु प्रतिबन्धः । स च त्रिसामग्री । तदनुत्पादश्च सामग्रीसम्पदेव । तस्यां सत्यां कार्याभावस्य ब्रह्मणापि दुरुपपादत्वात् ।

---

१. दर्पणकारस्य मतोल्लेखस्तु कस्यचिदन्यस्य महेशठक्कुराद्भिन्नस्य पूर्ववर्त्तिनो दर्पणनामकस्य व्याख्यानस्य सम्बन्धिनः । अथवा महेशठक्कुरस्यैव दर्पणस्य टिप्पणिरियं प्रमादाल्लोके निपतिता ।

मङ्गलात् प्रत्येकं विघ्नध्वंसो भवत्येव। अतो वैदिके फलनिश्चयान्मङ्गले प्रवृत्तिः। न च वेदाप्रामाण्यम्। समाप्त्यभावश्च क्वचित् प्राचीनविघ्नभूयस्त्वात्, क्वचिन् मङ्गलानन्तरोत्पन्नविघ्नात्, क्वचिल्लोकावगतकारणाभावात्। प्रारिप्सितविघ्नध्वंसश्च न मङ्गलं विना। न च प्रायश्चित्तेन शङ्कितविघ्नविनाशः। विघ्नसंशये तदनुपदेशात्। न च कामनोपाधिकर्त्तव्यत्वे नियतमनुष्ठानं न स्यादिति वाच्यम्। आरब्धकर्म्मकारणप्रतिबन्धकाभावोपायत्वेनावश्यं तदनुष्ठानात्। तेन विना प्रतिबन्धकाभावाभावात् कर्मानुत्पत्तेः। न च प्रधानत्वेनान्यदापि तत्करणम्। नियतसमयशिष्टाचारानुमितश्रुत्या कर्मारम्भसमये तत्कर्त्तव्यत्वबोधनात् दर्शारम्भसमये आरम्भणीयवत्। विघ्नसंसर्गाभावश्च समाप्तिहेतुः। स च क्वचित् स्वतः सिद्धः क्वचिन्मङ्गलसाध्यः। अत एव मङ्गलं विनापि जन्मान्तरानुवर्त्तमानविघ्नात्यन्ताभावात् प्रमत्तनास्तिकानुष्ठितसमाप्तिः। न चानध्यवसायः। शङ्कितविघ्नवारणार्थं प्रवृत्तिरतो यावद्विघ्नशङ्कं तदाचरणात्। अत एव तच्छङ्कया मध्येऽपि तदाचरन्ति। गुर्वारम्भेऽपि बहुविघ्नशङ्कया बहुमङ्गलाचरणम्। यथा च विघ्नसंशयेऽपि प्रवृत्तिस्तथोक्तमेव।

स्यादेतत् मङ्गलमाचरेदिति विधौ किं मङ्गलत्वम्? न तावद्देवतास्तुत्यादित्वम्, अननुगमात्; नापि प्रारिप्सितप्रतिबन्धकविघ्नोपशमहेतुक्रियात्वम्, विघ्नोत्सारणासाधारणकारणत्वं वा, क्रियाविशेषस्य तदसाधारणकारणस्य वा स्तुत्यादेर्वेदाद्विशिष्टापरिचये प्रवृत्तिविषयालाभात्। नापि निर्विघ्नं समाप्यतामिति कामनया शिष्टाचारविषयत्वम्, वेदस्याचारानुपजीवकत्वात्, वेदादाद्याचारानुपपत्तेश्च, अन्योन्याश्रयात्। नापि तत्कामनया वेदविहितत्वम्, प्रारिप्सितकर्म्मनिर्वाहकत्वे सति कर्मारम्भकाले विहितवैदिककर्मत्वं वा, तादृशवेदा-

न चैवं बहुमङ्गलाचरणं किमर्थमिति वाच्यं, विघ्नस्य प्रत्येकमङ्गलविरोधितयोभयसमाधेयत्वात्। इयान् परं भेदः तव विघ्नाभाव एव फलम्। मम तु कामनानुरोधात् तद्द्वारकोऽन्यः। स च सामग्र्याः फलत्वे समाप्तिवद् व्यभिचारः। तवापि विनायकस्तवपाठादिना विघ्ननाशेन व्यभिचारात् विशेषे तद्धेतुत्वं यदि, तदा समाप्यविलम्बस्वरूपविशेषे मङ्गलस्य हेतुत्वादिति।

प्रारिप्सितेति। कर्मारम्भकालविहितत्वं तत्कालकर्त्तव्यत्वेन विहितत्वम्। तावन्मात्र-

तव विघ्नाभाव एवेति। दुरितध्वंस एवेत्यर्थः। तद्द्वारकोऽन्य इति। दुरितध्वंसद्वारा सामग्रीसम्पत्तिरित्यर्थः। समाप्यविलम्बेति। यदाप्येवमविलम्बितसमाप्तावेव हेतुत्वं मङ्गलस्यास्तु

न्तराभावात्। नापि स्मृत्यादौ मङ्गलत्वेनोत्कीर्त्तितत्वम्। वेदस्य स्मृत्यनुपजीवकत्वात्। स्मृतिकर्तुरेव वेदाद्याचारानुपपत्तेश्च।

उच्यते। मङ्गलमाचरेदिति न विधिः, किन्तु निर्विघ्नसमाप्तिकामो देवतास्तुतिमाचरेदित्यादिप्रत्येकमेव विधिः। तथैव शिष्टाचारात्। तदुपजीव्य

मारम्भणीयादौ गतमतः 'सत्य'न्तम्। तावन्मात्रं तज्जनकयागादौ गतमतः 'तत्कालात्'। प्रयाजादिवारणाय 'कर्म'पदं तस्य फलवन्नपरत्वादिति। आरम्भपदं स्वकालकर्त्तव्यत्वेन स्वस्यापि वेदबोध्यत्वादतिव्याप्तिवारणाय।

प्रत्येकमेव विधिरिति। नन्वेवमनुगतहेतुतावच्छेदकाभावे विघ्नध्वंसं प्रति कारणत्वासम्भवः। कार्ये चावान्तरधर्मो नास्त्येव येनाननुगतस्यैव कारणतेति।

अत्राहु.—नतिनाश्यविघ्नजातीयो विघ्नो नत्यादिनाश्य इति तत्तज्जातीयनाशत्वमेव कार्यतावच्छेदकम्। नतित्वादिकं हेतुतावच्छेदकम्।

वस्तुत उक्तरीत्या कार्यकारणभावमात्रे शब्दसामर्थ्यमवच्छेदककल्पना चोत्तरकालिकी। तथा च विघ्नध्वंसत्वेन कार्यता विघ्ननाशकत्वादिना वेदविहितत्वमेव हेतुतावच्छेदकमित्येवोचितम्। अपूर्वजनकतायां कालान्तरीयकार्य्यानुगुणतया वेदविहितत्ववदिति सारम्।

तथापि कामनानुरोधादेतदुदाहृतम्। किञ्च मङ्गलजन्यो विघ्नध्वंसो न साक्षात् समाप्तिं जनयति। दृष्टसम्पत्तौ दुरितकृतसमाप्तिविलम्बादर्शनादिति सामग्रीसम्पादनद्वारा समाप्तिहेतुत्वे वाच्ये सामग्र्येव लाघवात्फलमिति भावः। समाप्तिपक्षोक्तास्तु दोषा इहापि ध्येयाः।

केचित्तु विघ्नकादाचित्काभावत्वेन रूपेण दुरितप्रागभावध्वंसयोः फलत्वम्। अतो विघ्नो निवर्त्ततामिति कदाचित् विघ्नो मा भूदिति च कदाचित्कामनोपपद्यत इत्याहुः।

तत्कामनयेति मूलम्। निर्विघ्नं समाप्यतामितिकामनावत्कर्त्तव्यत्वेनेत्यर्थः। अन्यथा विधौ कामनाहेतुत्वप्रकारत्वयोरभावात्तृतीयाऽनुपपत्तेः। उक्तार्थे तु प्रकारे तृतीयेति। कर्मारम्भकालविहितत्वस्यार्थमाह—तत्कालेति। कर्मारम्भकाल[1]कर्त्तव्यत्वेन प्रमितत्व[2]मित्यर्थः।

तज्जनकयागादाविति। स्वस्य स्वनिर्वाहकत्वादिति भावः। तत्कालेतीति। स्वनिर्वाहको यो यागः तस्य कर्मारम्भकाले कर्त्तव्यत्वेन प्रमितत्वं नेत्यर्थः। प्रयाजादीति। व्रीह्यवघातादीत्यर्थः। प्रयाजादेः स्वरूपनिर्वाहकत्वात् फलनिर्वाहकत्वं वा विवक्षितम्। तस्य फलवदिति। न हि प्रयाजारम्भकालः फलवदारम्भकालो भवति प्रयाजादीनामफलत्वात्।

---

१. कथं विहितत्वमित्याकाङ्क्षायाम्। २. जन्यत्वादिभ्रमनिरासाय 'प्रमितत्व'पदमिति। अत्र 'प्रमापितत्व'मिति काशीपुस्तकपाठः।

निर्विघ्नमारब्धं परिसमाप्यतामितिकामनया तद्विघ्नोपशमहेतुत्वेन वा वेदबोधितत्वं मङ्गलत्वमित्यधिगम्य देवतास्तुतिनमस्कारादिषु मङ्गलव्यवहारः शिष्टानामिति। अत एव दुरितनाशकमपि गङ्गास्नानादि न मङ्गलम्। तथाऽविधानात्।

"मङ्गलाचारयुक्तानां नित्यञ्च प्रयतात्मनाम्।
जपतां जुह्वताञ्चैव विनिपातो[1] न विद्यते" ॥—

इत्यनेन बोधितादर्शनदर्शनादेः पृथगेव मङ्गलत्वं, न तु विघ्ननिवर्तकतया तत्र नानार्थतैव। अन्यथा ग्रन्थारम्भे नमस्कारतुल्यतया तत्करणप्रसङ्गः।

अथशब्दो विघ्ननिवर्तकत्वान्मङ्गलमेव।

"ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्त्वा तु निर्यातौ तेन माङ्गलिकावुभौ" ॥—

कामनया कामिकर्त्तव्यत्वेन, न तु विघ्ननिवर्तकयेति।

जुह्वतामिति न होमान्तरविधिः वाक्यभेदापत्तेः स्वरूपालाभाच्च, किन्तु अनुवादः। न च विधिमन्तरा स इति विनिपाताभावफलकप्राप्तहोमजिज्ञासायां नित्यताबलात् प्राप्तपापानुत्पादफलकस्याग्निहोत्रस्यैवायमनुवाद इति निश्चीयते। तथा च नञ्पदस्य तदनुरोधेन प्रागभावपरस्य ध्वंसपरत्वे वाक्यभेदापत्तिः। तत्साहचर्यात् प्रागभावपरत्वे सुष्ठूक्तम्—पृथगेवेति।

यदि चाग्निहोत्रस्यापि मानान्तरात् पापक्षयजनकत्वं ज्ञायते तदापि वाक्यभेदोऽग्निहोत्रानुरोधेन विनिपातपदस्य पापसामान्यपरत्वान्मङ्गलानुरोधेन च प्रारब्धप्रतिबन्धकविघ्नपरत्वादिति भावः।

अथशब्द इति। यद्यपि अथशब्दो ग्रन्थान्तर्गतस्तत्कथं मङ्गलम्? तस्य तज्जन्यत्वात् तथाऽपि तदुच्चारणहेतुज्ञानन्तत्र मङ्गलम्। तद्बहिर्भावेनैव वा ग्रन्थ इति वदन्ति।

लौकिकव्यापारवारणाय वैदिकपदम्। यत्कर्मप्राक्कालकर्त्तव्यत्वेन विहितत्वं तस्यैव कर्मणो निर्वाहकत्वलाभाय प्रारिप्सितपदम्। अन्यथारम्भणीयादावतिव्याप्तेरिति द्रष्टव्यम्।

अतिव्याप्तिवारणायेति। तत्कालकर्त्तव्यताकयागादावित्यर्थः।

ननु कामनयेति तृतीया न सङ्गता विधौ कामनाया हेतुत्वाभावात् प्रकारत्वाभावाच्चेत्यत आह—कामिकर्त्तव्यत्वेनेति। अत्राभिप्रायः पूर्वमुक्तः। तथा च प्रकारे तृतीयेति भावः।

वाक्यभेदेति। अन्यतः प्राप्तजपाद्यनुवादे होमस्य चापूर्वस्य विधाने विध्यनुवादवैरूप्यापत्तेरित्यर्थः। स्वरूपालाभादिति। द्रव्यदेवतयोरप्राप्तेरित्यर्थः।

इति वदन्तीति। ग्रन्थमध्येऽपि मङ्गलाचरणाद्ग्रन्थान्तर्गतस्याप्यथशब्दस्यान्यार्थं नीयमानस्योदकुम्भस्येव मङ्गलत्वसम्भवान्नैतत्कल्पनाद्वयं सम्यगित्यरुचिबीजमत्र।

---

१. दुरितमित्यर्थः।

इति स्मृतेः ।

न च शुभसूचकत्वमेव तस्य, शास्त्रारम्भे महर्षिणा तदनुपादानप्रसङ्गात् । गुणवत्तया ज्ञापनं स्तुतिः । यमुद्दिश्य यस्य स्वापकर्षबोधनानुकूलो व्यापारविशेषः स तस्य नमस्कारः । व्यापारे च कायिकवाचिकमानसिकरूपे विशेषो जातिविशेष एवानुभवसाक्षिकः करशिरःसंयोगमात्रे तदव्यवहारात्, भवतोऽहमपकृष्ट इत्यादिवचने तदव्यवहाराच्च । यद्वा । कायिकादौ प्रत्येकमेव विधिकल्पनम् । अतो नानार्थतैव ।

यत्तु[1] । बुद्धिविशेषपूर्वकत्वज्ञानं विना कायिकादौ न तद्व्यवहार इति स एव वाच्योऽन्यत्र लक्षणेति—तन्न । कायिकादिव्यापारविशेषमनवगम्य

अतः परं टिप्पणीकृता त्यक्तमूलं लेशतो व्याख्यायते । **गुणवत्तयेति** । अनात्मोत्कर्षपदवाच्यधर्मवत्ताज्ञापकः शब्दः स्तुतिः । तेन गुणानामननुगतत्वात् लक्षणाननुगमो न दोषः ।

केचित्तु चेतने उत्कृष्टपदं यद्वत्तया प्रवर्त्तते स गुणस्तद्बोधकः शब्दः स्तुतिः । तथा चाचेतनोत्कर्षकीर्त्तने स्तुतिपदं भाक्तमित्याहुः ।

यमुद्दिश्येति । स्वापकर्षबोधनानुकूलतावच्छेदकजातिमान् व्यापार इत्यर्थः । सा च जातिर्ज्ञाने मानसत्वव्याप्या एका । कायिकेऽन्यतरकर्मजत्वादिव्याप्या नाना । वाचिके च नमामि इत्यादौ पूर्वपूर्ववर्णानुभवाहितसंस्कारसचिवचरमवर्णेन्द्रियसन्निकर्षग्राह्या चरमवर्णनिष्ठा गत्वादिव्याप्या नाना । तथा च ज्ञानत्वव्याप्यजातीनां स्वापकर्षबोधनानुकूलतावच्छेदकत्वेनानुगतीकृतानां नमस्कारपदप्रवृत्तिनिमित्तत्वं न तु त्रितयसाधारण्येका जातिः ।

कायिकादाविति । न चोन्मादाद्यहेतुकत्वेन विशेषितस्यैव कायिकादिव्यापारस्य स्वस्मिन्नुक्तविशेषपूर्वकत्वेन व्याप्तिग्रहादनुमानं स्यादिति वाच्यम्, तज्ज्ञानेऽपि करशिरःसंयोगादिविशेषज्ञानादनुमितिदर्शनात् । नानार्थतैवेत्यापाततः एकार्थत्वे उक्तरीत्या सम्भवति नानार्थत्वायोगात् । किं च वाचिके गत्वादिजातिसङ्करभयेन गत्वादिव्याप्या यथा नाना तथा देवदत्तप्रभवत्वादिव्याप्या नाना जातिर्वाच्या । तथा च पुरुषानन्त्येन वाचिकनमस्कारानन्त्यात्तत्र प्रत्येकविधेरसम्भवः । तस्मात् प्रथमकल्प एव श्रेयान् । न चैवमेव स्तुतित्वं जातिरेवास्त्विति वाच्यम् । देवदत्तीयत्वादिना सङ्करापत्तेः ।

---

१. प्राभाकरमतमाह—यत्त्वित्यादिना ।

बुद्धिविशेषपूर्वकत्वाज्ञानात् । स्वीकृतवेदप्रमाणभावः शिष्टः । आचारे च वेदानिषिद्धत्वमविगीतत्वं विशेषणं देयम् । यद्वा अलौकिकविषयशिष्टाचारत्वमेव हेतुः । शिष्टाचारत्वञ्च भ्रमाजन्याचारत्वम् । आस्तिकनास्तिकयोरगम्यागमनचैत्यवन्दनादावाचारजनकज्ञानस्य भ्रमत्वात् बलवदनिष्टानुबन्धित्वादिष्टसाधनत्वाच्च । लोके च पाखण्डव्यावृत्ताशिष्टव्यवहारो वेदप्रामाण्याभ्युपगन्तृत्वे सति यो यदा वेदनिषिद्धाकर्त्ता स तदा शिष्टः तत्कर्त्ता त्वशिष्टः । अत एव वेदनिषिद्धाकर्तृत्वेऽपि बौद्धो न शिष्टः। पापजनकत्वज्ञानं विना वेदनिषिद्धकर्तृत्वं यस्य नास्ति स शिष्टः इति तु न, तैर्थिकस्यापि[1] कस्यचित् पापकनकत्वज्ञानं विना वेदनिषिद्धकर्तृत्वात् ।

यत्तु रागद्वेषहीनः शिष्टः स च सर्वज्ञत्वान्मन्वादिरेव। अविगीततदाचारादेव वेदानुमानमिति—तन्न । एवं हि मन्वाद्याचारादर्शिनामाधुनिकानां मङ्गले प्रवृत्तिर्न स्यात्। आधुनिकानामाचारेण मन्वाद्याचारमनुमाय तेन च वेदमनुमाय बालः प्रवर्त्तत इति चेत्—तर्हि यादृशाचारेण मन्वाद्याचारानुमानं स एव

स्वीकृतेति । ननु वेदस्य यावत्त्वविवक्षायां मङ्गलकर्त्तुः शिष्टत्वाभावापत्तिः । सर्वेषा वेदानामसर्वज्ञत्वेनाज्ञानात् । एकदेशविवक्षाया बौद्धेऽतिव्याप्तिः । अहिंसादिप्रतिपादकवेदभागस्य तेनापि प्रामाण्यस्वीकारादिति चेत्—न । यावत्त्वस्यैव विवक्षितत्वात् । विशेषाकारेण सर्वान् वेदानजानतामपि स्वार्थे सर्वे वेदाः प्रमाणमित्यभ्युपगमसत्त्वात् । न चाभ्युपगमस्य विशेषणतोपलक्षणताविकल्पेनाव्याप्त्यतिव्याप्ती । वेदप्रामाण्याभ्युपगमकाले यावत्संख्याकाः सम्बन्धविशेषावच्छिन्नविरोध्यभ्युपगमानाद्यभावास्तावत्सत्त्व शिष्टत्वमित्यर्थात् । न चानादिपदं व्यर्थम् । आस्तिकतानन्तरबौद्धस्यापि विरोध्यभ्युपगमध्वसमादाय[2] तावत्सख्याकाभावसत्त्वात् । सम्बन्धविशेषविवक्षया वा यत्र प्रथमं पुत्रादिद्वारकपरम्परासम्बन्धेनापि विरोध्यभ्युपगमो न स्थितः उत्तरकाले च तत्पुत्रादिबौद्धो जातः पुत्रादिद्वाराशिष्टेऽपि तद्विरोध्यभ्युपगमात्यन्ताभावस्याभावादव्याप्तिवारणमिति । एतदर्थमेव संसर्गाभावपदं कैश्चिदुक्तम् । श्येनादौ व्यभिचारादाह—तदाचाराच्चेति ।

---

१. शिष्टस्यापीत्यर्थः ।

२. यावन्तो वेदप्रामाण्याभ्युपगमाः स्थिताः तावन्तो विरोध्यभ्युपगमाः सञ्जातास्तेषाञ्च ध्वंसमादायेत्यर्थः ।

वेदानुमापकोऽस्तु । किमनुमितानुमानेन । आधुनिकानामपि शिष्टत्वेन व्यवह्रियमाणत्वाच्च । तथा च स्मृतिः—

"यस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः ।

श्रुतिस्मृत्यविरोधेन सदाचारः स उच्यते" ॥

सर्वज्ञस्य मङ्गलाचारे मानाभावाच्च । मन्वादिप्रणीतस्मृतौ मङ्गलं दृश्यते इति चेत्—तन्न । स्मृतिकर्त्तुरसर्वज्ञत्वेऽपि वेदादर्थं प्रतीत्य स्मृतिप्रणयनसम्भवात् ।

यत्तु शिष्टाचारत्वेन कर्त्तव्यतैवानुमीयतां किं वेदेनेति तत्र वक्ष्यामः ।

इति महामहोपाध्यायगङ्गेशविरचितायां तत्त्वचिन्तामणौ
प्रत्यक्षखण्डे मङ्गलवादः समाप्तः ।

अभ्रान्तं शिष्टपदार्थमादाय हेत्वन्तरमाह—यद्वेति ।

नन्वेवमभ्रान्तः शिष्ट इत्यागतम् । तथा च भ्रमविरहदशाया पाखण्डोऽपि शिष्टः स्यादित्यत आह—लोके चेति ।

नन्तु वेदानिषिद्धकर्तृत्वमात्रनिबन्धनशिष्टव्यवहारे पाखण्डोऽपि दशाविशेषे शिष्टत्वेन व्यवह्रियेतेत्यत आह—यद्वेति । वेदप्रामाण्याभ्युपगन्तृत्व च वेदप्रामाण्याभ्युपगमेत्यादिना निरुक्तम् । रागहीनो द्वेषहीनश्चेति लक्षणद्वयम् । रागहीनत्व च समानाधिकरणरागासमानकालीनरागध्वंसवत्त्वम् । एवं द्वेषहीनत्वमपि निर्वाच्यम् । न च कालोपाधिविशेषेऽतिव्याप्तमिदमीश्वरे चाव्याप्तमिदमिति वाच्यम्, हेतुप्रविष्टशिष्टत्वेऽस्य कालोपाधौ गतत्वेऽपि क्षत्यभावात् । आचारघटितहेतोस्तमादायासम्भवात् । ईश्वरासङ्ग्रहेऽपि हेतावदोषाच्च ।

ननु व्यवहारप्रयोजकमेवेदमास्तामित्यत आह—आधुनिकानामपीति । सदाचारः शिष्टाचारः । तत्र वक्ष्याम इति । स्वतन्त्रप्रमाणमूलकत्वानुमानं विना नान्धपरम्पराशङ्कानिरास इति शब्दखण्डे वक्ष्याम इत्यर्थः ।

इति महामहोपाध्यायमिथिलाराज्यसमुपार्जकमहेशठक्कुरकृते
प्रत्यक्षखण्डे मङ्गलवाददर्पणः समाप्तः ।

अथ प्रामाण्यवादः

अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीषुरष्टादशविद्या[1]स्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय। तत्र प्रेक्षावत्प्रवृत्त्यर्थं[2] प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगमः[3] इत्यादावसूत्रयत्। तेष्वपि प्रमाणाधीना सर्वेषां व्यवस्थितिरिति[4] प्रमाणतत्त्वमत्र विविच्यते।

ननु[5] प्रमाणादीनां तत्त्वं प्रतिपादयच्छास्त्रं परम्परया निःश्रेयसेन सम्बध्यते इति न युक्तं, प्रमाणतत्त्वावधारणस्याशक्यत्वात्। तद्धि प्रमातत्त्वावधारणाधीनम्। तच्च स्वतः परतो वा न सम्भवति वक्ष्यमाणदूषणगणग्रासात्। अथ किं प्रामाण्यज्ञानेन प्रवृत्तिमात्रे तस्य व्यभिचारात्। बहुवित्तव्ययायास-

अथ प्रामाण्यवादालोकः

मङ्गलप्रकरण समाप्य प्रेक्षावत्प्रवृत्त्यङ्गनिःश्रेयसफलवदान्वीक्षिकीसम्बन्धं प्रदर्शयन्नेव आनन्तर्यपरेणापि अथशब्देन मङ्गलकरणपूर्वकं तदभिधेयमाह—अथ जगदेवेति।

माध्यमिकः प्रत्यवतिष्ठते—ननु प्रमाणादीनामिति।

अथ प्रामाण्यवाददर्पणः

अवसरसङ्गत्या प्रमाणतत्त्वनिरूपण प्रतिजानीते मूले—अथेति। मूले मङ्गलनिरूपणे वृत्ते प्रतिबन्धकजिज्ञासाया अपगमे जगदिति।

मूले ननु प्रमाणादीनामिति। प्रमाणत्व शास्त्रप्रवृत्तेनावधारणीयम्। शास्त्रप्रवृत्तेश्च प्रमात्वनिश्चय[6] विनाऽसम्भवः। प्रमात्वनिश्चयश्चाशक्य इति प्रमाणतत्त्वावधारणमशक्यमित्यर्थः। तथा चाथ किमित्याशङ्का सङ्गच्छते।

---

१. अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तर.।
धर्मशास्त्र पुराणञ्च विद्या ह्येताश्चतुर्दश ॥१॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः।
अर्थशास्त्र चतुर्थं तु विद्या ह्यष्टादशैव ताः ॥२॥ 'विष्णुपुराणम्'

२. मोक्षसाधनीभूततत्त्वज्ञानचिकीर्षावतां प्रवृत्त्यर्थमिति भावः।

३. 'न्यायसूत्र' १. १. १

४. प्रमेयसिद्धिः प्रमाणादिति भावः।

५. माध्यमिको बौद्ध. प्रत्यवतिष्ठते—नन्वित्यादिना।

६. प्रवृत्ति. प्रामाण्यनिश्चयसाध्या प्रामाण्यसंशयप्रतिबध्यत्वे सति प्रामाण्यव्यतिरेकनिश्चयप्रतिबध्यत्वात्। प्रामाण्यं प्रवृत्तिजनकीभूतनिश्चयविषयः। प्रवृत्तिप्रतिबन्धकीभूतसंशयव्यतिरेकनिश्चयविषयप्रतियोगित्वात्।

साध्ये प्रवृत्तिश्चावश्यकार्थनिश्चयादेव । न च यस्य यत्संशयव्यतिरेकनिश्चयौ

ननु प्रामाण्यग्रहो न प्रवृत्तिहेतुर्व्यभिचारादन्यथासिद्धेश्चेत्याशङ्कते—अथेति ।

न च यस्येति । यद्व्यतिरेकज्ञानमात्रं यत्प्रतिबन्धकमित्यर्थः । सामान्येन नियमलाभार्थमुभयमुपात्तम् । प्रत्येकनियमे तु प्रथमे व्यभिचारसंशयमात्रप्रतिबध्ये व्याप्तिज्ञाने द्वितीये अयोग्यतानिश्चयमात्रप्रतिबध्ये शाब्दज्ञाने व्यभिचारात् निश्चयत्वेन जनकत्वस्य निश्चयाभावेऽभावस्य वा साध्यत्वमिह विवक्षितम् । अतो न दोषः । यथाश्रुते व्याप्तिज्ञानेऽप्युक्तव्यभिचारासंस्पर्शात् । अव्यभिचारग्रहेऽपि व्यभिचारनिश्चयस्य प्रतियोगिरूपत्वेन[1] हेतुत्वात् ।

वस्तुतो निश्चयत्वेन जनकत्वाविवक्षायामपि योग्यतासंशयजन्ये शाब्दज्ञानविशेषे

केचित्तु प्रमाकरणत्वं प्रमाणत्वम् । नच प्रमात्वग्रहं विना दुर्ग्रहम् । अनभिसंहितोपाधेरुपहितप्रत्ययायोगादित्यर्थं वर्णयित्वा ननु बोधकत्वरूपमेव प्रमाणतत्त्वं प्रतिपादनीयं शास्त्रेणे[2]ति परिहृत्य तथापि प्रवृत्त्यर्थं प्रमात्वग्रहोऽपेक्षणीय एवेत्याशङ्क्य—**अथ किमिति** ग्रन्थमवतारयन्ति ।

तटस्थः शङ्कते—अथेतीत्यन्ये ।

व्यभिचारादन्यथासिद्धेश्चेति । प्रवृत्तिसामान्ये व्यभिचारात् प्रवृत्तिविशेषेऽन्यथासिद्धेरित्यर्थः । **व्यतिरेकज्ञानमात्र** व्यतिरेकज्ञानत्वावच्छिन्नं व्यतिरेकत्वप्रकारक[3]ज्ञानत्वावच्छिन्नमिति यावत् ।

सामान्येन व्यतिरेकज्ञानत्वावच्छेदेन । इदमुपलक्षणम् । उभयघटितनियमलाभार्थमिति च द्रष्टव्यम् । तत्रोभयघटितो नियम इति कल्पमधिकृत्याह—**प्रत्येकेति** ।

नन्वत्र व्यभिचाराप्रसक्तिरेव दोष इत्यत आह—**निश्चयत्वेनेति** । यद्यपि निश्चयाभावेऽभाव इति पक्षे संशयस्य निश्चयपूर्वकतया दोषतादवस्थ्य तथापि निश्चयानधिकरणक्षणाव्यवहितोत्तरक्षणेऽनुत्पत्तेः साध्यत्वमिहाभिमतम् ।

यथाश्रुत इति । विवक्षाया अकरणे इत्यर्थः । **प्रतियोगिरूपत्वेनेति** । इदमुपलक्षणम् । शाब्दबोधे योग्यतानिश्चयस्य योग्यताज्ञानत्वेन जनकत्वादित्यपि द्रष्टव्यम् ।

ननु निश्चयत्वेन जनकत्व तदभावेऽभावो वा कुतो वक्तव्य इति ?

उच्यते—प्रवृत्तिजनकनिश्चयस्य क्वचित्प्रमात्वावगाहित्वेऽपि[4] प्रमात्वनिश्चयः प्रवृत्तिहेतुरित्यस्य सिद्धेः शास्त्रप्रवृत्तिपूर्वं प्रमात्वनिश्चयस्यावश्यकत्व पूर्वपक्षिणोऽभिमत न सिद्ध्येदित्यर्थान्तरवारणाय तथा विवक्षा[5] आवश्यकीति । तन्निश्चयस्तद्धेतुरित्यत्र फलोपहितत्वमर्थस्तेनोक्तार्थान्तराभावः । क्वाचित्कसमूहालम्बनरूपप्रमात्वनिश्चयस्य प्रवृत्तिसामान्ये फलोपधानात्मकहेतुत्वाभावादित्यभिसन्धाय प्रकारान्तरमाह—**वस्तुत** इति ।

---

१. प्रतियोगिज्ञानत्वेनेति आलोकपाठसत्त्वेऽपि दर्पणपाठानुरोधेन पाठे परिवर्त्तनं कृतमिति ।

२. तथा च प्रमात्वग्रहापेक्षा नास्तीति भावः ।

३. व्यतिरेकज्ञानं प्रमेयमित्याकारकमपि भवति । तस्य प्रतिबन्धकत्वाभावादित्यतो व्याचष्टे—'व्यतिरेकत्वप्रकारके'ति ।

४. उपनीतत्वेन समूहालम्बनत्वेन वेति यावत् ।

५. निश्चयत्वेन जनकत्वं निश्चयाभावेऽभाव इत्येवंरूपा ।

प्रवृत्तिप्रतिबन्धकौ तन्निश्चयस्तद्धेतुरनुमितौ व्याप्तेरिवेति वाच्यम्। तत्सन्देहे सत्यर्थसन्देहेनार्थानिश्चयादेवाप्रवृत्तेः तत्र तयोरप्रतिबन्धकत्वादिति चेत्—न।

असाधुत्वनिश्चयप्रतिबध्ये शाब्दज्ञानसामान्ये वा द्वितीयकल्पे व्यभिचारो वज्रलेप एव।

वस्तुतस्तु व्यभिचारज्ञानस्य प्रतियोगिज्ञानतया जनकत्वे तन्निश्चयस्तद्धेतुरिति प्रत्येकनियमः सम्यक् स्यादिति प्रत्येकनियमेऽव्यभिचारसंशयमात्रप्रतिबध्येऽव्यभिचारज्ञानेऽव्यभिचारनिश्चयाजन्येऽबाधव्यतिरेकनिश्चयमात्रप्रतिबद्धायान्तु तज्ज्ञानाजन्यायामनुमितौ व्यभिचारो द्रष्टव्यः। तेन सर्वं सम्यक्[१]।

अत्र च ग्राह्यभिन्नत्वेन[२] निश्चयविषयो निवेश्योऽतो न व्याप्तिव्यतिरेकज्ञानप्रतिबध्ये व्याप्तिज्ञाने व्यभिचारः।

द्वितीयकल्पे—द्वितीयभागमात्रोपादाने। इदञ्चोपलक्षणम्। अत्यन्ताभावगर्भव्यभिचारसंशयेन मणिमन्त्रवत्प्रतिरुद्धेऽन्योन्याभावगर्भव्याप्तिग्रहेऽत्यन्ताभावगर्भव्यभिचारनिश्चयस्य फलोपधानात्मकहेतुत्वाभावात् विशेष्ये विशेषणमिति न्यायेनाव्यभिचारावगाहि[३] शाब्दबोधे च व्यभिचारनिश्चयस्य[४] फलोपहितत्वभावात्[५] प्रथमभागमात्रोपादाने तु व्यभिचारो वज्रलेप इत्यपि द्रष्टव्यम्।

संशयमात्रोपादाने व्यतिरेकनिश्चयमात्रोपादाने च दोषान्तरं वक्तुं क्वचित् **वस्तुतस्त्विति** पाठः। तत्राव्यभिचारसंशयस्य व्यभिचारकोट्यवगाहितया व्याप्तिज्ञानविशेषेऽव्यभिचारज्ञाने प्रतिबन्धकत्वं ज्ञेयम्।

तज्ज्ञानाजन्यायामिति। अबाधितत्वज्ञानस्याकारणत्वपक्षेऽतद्धेतुतत्संशयजन्यानुमितिविशेषे व्यभिचारो बोध्यः।

अत्र च व्याप्तित्रयेऽपि।

ग्राह्यभिन्नत्वेनेति। ग्राह्यप्रतियोगिकभिन्नत्वेन[६] व्यतिरेको विशेषणीय इत्यर्थः। **ग्राह्याभावभिन्नत्वेनेति** तु पाठः स्पष्ट एव। **व्याप्तिव्यतिरेकेति**। अव्यभिचारव्यतिरेकेत्यर्थः। **व्याप्तिज्ञाने**ऽव्यभिचारज्ञाने।

नन्वेवं[७] संशयोपादानवैयर्थ्यम्। किञ्चानियतव्यभिचारज्ञानप्रतिबन्धकतापक्षे उदासीनव्यभिचाराभावसंशयो व्यभिचारकोटिविषयकतया तद्व्यतिरेकनिश्चयः व्यभिचारनिश्चयतया प्रतिबन्धक इति विशिष्टोऽपि हेतुर्व्यभिचारीति—

उच्यते। नियतव्यभिचारधिय एव प्रतिबन्धकत्वाश्रयणान्नान्त्यो दोषः। नाप्याद्यः यत्सं-

---

१. क्वाचित्कः। वस्तुतस्त्वित्यादिग्रन्थो नास्ति कपुस्तके। दर्पणाभिमतमपि तथैव।

२. निश्चयविषयोऽव्यभिचारव्यतिरेको व्यभिचारः। स ग्राह्यभिन्नो भवत्येवेति व्यभिचारस्तद्वारणाय ग्राह्यप्रतियोगिकभिन्नत्वेनेति।

३. वह्निप्रतियोगिकात्यन्ताभावसामानाधिकरण्याभावो धूमे एवमाकारकम्।

४. ज्ञानत्वेन व्यभिचारनिश्चयस्येति यावत्।

५. तत्रान्योन्याभावगर्भव्यभिचारनिश्चयस्य फलोपहितत्वं यतः।

६. योग्यताव्यतिरेको ग्राह्यप्रतियोगिक एव योग्यतया ग्राह्यत्वादतस्तेनैव वारणात्।

७. ग्राह्याभावभिन्नत्वेनेति पाठान्तरम्।

प्रामाण्यसंशयानन्तरं इदं इत्थमेवेत्यवधारणस्य निष्कम्पप्रवृत्त्यङ्गस्य प्रामाण्यनिश्चयाधीनत्वात् ।

वस्तुतो यद्व्यतिरेकनिश्चयो यत्र प्रतिबन्धक इत्येतावन्मात्रे कृते ग्राह्यभागे व्यभिचारोऽतो यत्संशयेति ।

तत्र ग्राह्यसंशयस्याप्रतिबन्धकत्वात् । तावन्मात्रे कृते व्यभिचारसंशयप्रतिबध्ये व्याप्तिग्रहे व्यभिचार इत्युभयमुपात्तम । तत्राव्यभिचारनिश्चयेनाप्रतिबन्धात् । न चाव्यभिचारसंशयतदभावनिश्चयप्रतिबध्याव्यभिचारनिश्चयेऽव्यभिचारनिश्चयाजन्ये व्यभिचारश्च । यत्संशय इत्यादेर्यदभावत्वप्रकारकतानियतयोः संशयविपर्यययोः प्रतिबन्धकत्वमित्यर्थात् । अन्यथा प्रमेयत्वेन तदभावावगाहिनोऽपि प्रतिबन्धकत्वापत्तेः । अस्ति च व्यभिचाराभावत्वप्रकारकताया नियमो व्याप्तिधीप्रतिबन्धकेऽव्यभिचारसंशये । प्रकृते व्यभिचाराभावाभावत्वापेक्षया व्यभिचारत्वस्य लाघवेन तत्प्रकारत्वेन प्रतिबन्धकत्वे स्थिते व्यभिचाराभावाभावत्वाप्रकारके व्याप्तिज्ञानप्रतिबन्धके व्यभिचारनिश्चये तदभावात् ।

न चाव्यभिचारात्मकतया व्याप्तेरनुमितावपि तदभावत्वप्रकारकतया प्रतिबन्धकत्वाभावान्न तथात्वमिति वाच्यम्, तत्र सामानाधिकरण्यभागस्य भावतया तदभावत्वप्रकारकत्वेनैव प्रतिबन्धकत्वादिति सारम् । प्रवृत्तिपदोपादानञ्च प्रकृताभिप्रायेण, न तु व्याप्तिनिविष्टम् । अनुमितौ व्याप्तेरिवेति विरोधादिति भावः ।

प्रामाण्यसंशयानन्तरमिति । तथा च प्रवृत्तिमात्रे व्यभिचारेऽपि विशेषेऽन्यथा-

शयपदोपादानादेव व्यतिरेके ग्राह्यप्रतियोगिकभिन्नत्वलाभात् । व्याप्तिद्वये वा तात्पर्यम् । तत्र च संशयेऽपि ग्राह्याभावाविषयकत्वं विशेषणं देयम्[1] । असाधुत्वनिश्चयश्च न प्रतिबन्धक इत्याश्रयणीयम् । वस्तुतः फलव्यतिरेकनिश्चयस्य ग्राह्याभावाविषयकस्य प्रवृत्तिप्रतिबन्धकत्वात् वारणाय संशयोपादानम् । संशयप्रतिबन्धकत्वञ्च व्यतिरेकत्वप्रकारकसंशयत्वावच्छिन्नप्रतिबन्धकत्वं विवक्षितम् । अतो न प्रतिबन्धकसंशयेन समूहालम्बनं फलसंशयमादाय व्यभिचारतादवस्थ्यम् । अत्राप्युदासीनव्यभिचारधीर्न प्रतिबन्धिकेति मतमाश्रयणीयम् । निश्चयांशमात्रे च ग्राह्याभावाविषयकत्वं विवक्षणीयमिति ।

यद्वा पूर्वास्वरसादाह—**वस्तुत** इत्यादि ।

ननु यदभावत्वप्रकारकौ संशयनिश्चयौ प्रतिबन्धकावेवेति प्रतिबन्धकौ यदभावसंशयनिश्चयौ यदभावत्वप्रकारकाविति वा नियमो विवक्षितः तदभावत्वप्रकारताकतदभावव्याप्यदर्शनात्मकसंशयेन आद्ये उक्तव्यभिचारतादवस्थ्यम् । अन्त्ये प्रतिबन्धकयदभावसंशयो यदभावत्वप्रकारक एवेत्येतावदेवास्ताम् । किञ्च तद्वत्तु एकपुरुषमात्रप्रतीत तदीयव्यतिरेकनिश्चयेन तदेवावगाहते तदभावत्वप्रकारकसंशयात्मना विरोधिज्ञानान्तरेण च प्रतिरुद्धप्रतीतिक तत्र व्यभिचार एवेति—

---

१ अन्यथा अव्यभिचारसंशयप्रतिबन्धे अव्यभिचारज्ञाने व्यभिचारः स्यात् ।

ननु[1] स्वत एवास्तु तन्निरूपणम्। तथा हि तत्र विप्रतिपत्तयः। ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं न वा। तज्ज्ञानविषयकज्ञानाजन्यज्ञानग्राह्यं न वा। परतःपक्षे[2] ज्ञात एव ज्ञाने प्रामाण्यग्रहः। स्वतस्त्वे[3] प्रामाण्यवत एव ज्ञानस्य ग्रहात्। स्वाश्रयग्राहकेण गृह्यत एवं न वा। स्वाश्रयेण गृह्यत एव न वेति प्रत्येकमेव वा।

यत्तु योगजधर्मसामान्यलक्षणप्रत्यासत्त्या स्वाश्रयप्रामाण्यं तेनैव गृह्यत इत्यंशतः सिद्धसाधनमतो योगजधर्माद्यजन्यत्वं विशेषणमिति—तन्न। परं प्रत्यसिद्धेः। प्रामाण्यमात्रपक्षत्वे प्रामाण्यं स्वाश्रयेण गृह्यत एवेत्युद्देश्यप्रतीतेरसिद्धेश्च नांशतः सिद्धसाधनम्।

सिद्धिर्न दोषाय। प्रयोजकत्वमात्रस्याभ्युपगमादिति भावः।

उच्यते—यदभावत्वप्रकारकसंशयेन यत्प्रतिबन्ध आपादयितुं शक्यते यदभावावगाहित्वप्रयुक्तप्रतिबन्धकताकस्य निश्चयस्य च यदभावत्वप्रकारकतानियमः तन्निश्चयः तन्निश्चयत्वेन तत्र हेतुरित्यर्थः। पक्षधर्मताव्यतिरेकनिश्चये किञ्चित्त्वेन व्याप्त्यभावविषयके व्याप्त्यभावत्वप्रकारकताविरहात् साधनवैकल्य मा भूदिति यदभावावगाहित्वप्रयुक्तेति विशेषणे किञ्चित्त्वेनापि तत्र दैवागतं तदभावत्वप्रकारकत्वं न तु तदभावप्रकारकतया संशयप्रतिबन्धकत्वमिति न तन्निबन्धनसंशयेन तथात्वापादनम्।

ननु यदभावसंशयेन यत्र प्रतिबन्ध इत्यादिकमस्तु कृतमभावत्वप्रकारकत्वेनेत्यत आह—अन्यथेति।

ननु यदभावत्वप्रकारकसंशयेनेत्युक्तौ व्यभिचारसंशयस्य व्याप्तिधीप्रतिबन्धकत्व नियत पूर्वोक्तं विरुध्यते। तथा च तत्र व्यभिचाराभावाद्व्यतिरेकनिश्चयपदमनर्थकमापद्येतेत्यत आह—अस्ति चेति। यदभावावगाहनेत्यादिनाऽव्यभिचारव्यतिरेकनिश्चयं वारयति—प्रकृत इति।

ननु व्यतिरेकपदेन निश्चयदिशि मुख्याभावो विवक्षितः। तथा च यद्व्यतिरेकत्वप्रकारकः संशयो यद्व्यतिरेकत्वप्रकारकमुख्याभावनिश्चयश्च यत्र प्रतिबन्धकस्तन्निश्चयत्वेन तत्र हेतुरित्युक्तौ अव्यभिचारव्यतिरेकज्ञानस्य वारणात् तदभावत्वप्रकारकताकतदभावव्याप्यदर्शनात्मकसंशयेन को दोष इति न कोऽपि। किन्तु एतद्व्याप्तिबलादाकाङ्क्षाज्ञानस्य हेतुत्वं न सिद्ध्येदिति तदन्तर्बोधान्तर्भावेण व्याप्तिर्व्यवर्णितेति। यद्व्यतिरेकत्वप्रकारकयद्व्यतिरेकज्ञानत्वावच्छिन्नं यत्र प्रतिबन्धकमिति

---

१ बौद्धमतं निराकर्तुं मीमांसकमतमाह—नन्वित्यादिना।
२. नैयायिकास्तु परतस्त्ववादिनः। ३. स्वतस्त्ववादिनो मीमांसकाः।

यद्वा घटोऽयमिति ज्ञानप्रामाण्यं एतज्ज्ञानग्राह्यं न वा । एतज्ज्ञानग्राहक-

ज्ञानप्रामाण्यमिति । **करणभ्रमनिरासार्थं** ज्ञानपदोपादानम् । ज्ञानपदस्य **भाव-व्युत्पन्नस्य सुप्रसिद्धत्वादिति** बहवः । **तन्न । प्रामाण्यपदस्य विशेषपरत्वे भ्रमा-सम्भवात् ।**

द्वितीयकल्पे तु यदभावावगाहनप्रयुक्तप्रतिबन्धकताक यद्व्यतिरेकज्ञान यद्व्यतिरेकत्वप्रकारक-मेवेति विवक्षया व्याप्तिधिय प्रत्यव्यभिचारव्यतिरेकज्ञानत्वावच्छिन्नस्य प्रतिबन्धकत्वात् यो दोषः स निरस्य इत्यभिप्रेत्य किञ्चिन्नोक्तमिति । अत्र यद्यपि **यत्संशयेत्यादि** मूले प्रतिबन्धकत्वं यदि कारणीभूताभावप्रतियोगित्वं तदा दृष्टान्तासङ्गतिः , व्याप्तिनिश्चयेन तत्संशयव्यतिरेकनिश्चयविरहयो-रन्यथासिद्धत्वात् । यदि प्रतिबन्धप्रयोजकत्व तदा तत्र तयोरिति सिद्धान्तासङ्गतिः । तथापि संश-यान्तरानियमेन सशयस्य व्यतिरेकनिश्चयस्य च प्रतिबन्धप्रयोजकत्व विवक्षितम् । प्रमात्वसशयस्यै-वार्थसशये नियमेन प्रतिबन्धकत्व व्याप्तिसशयश्च नान्तरा सशयान्तरमाधायानुमितिप्रतिबन्धक इति न दृष्टान्तासङ्गतिः । न च सशयान्तरानियमेनेति विशेषण व्यर्थमिति वाच्यम् , तेन विना प्रवृत्तौ परम्परया प्रामाण्यनिश्चये प्रामाण्यसशयस्य तद्व्यतिरेकनिश्चयस्य च प्रतिबन्धकत्वात् । प्रामाण्य-निश्चये प्रामाण्यनिश्चयस्य चाहेतुत्वात् व्यभिचारापत्तेरिति ।

अत्राय सग्रहः । यत्संशयव्यतिरेकनिश्चयौ यत्र प्रतिबन्धकौ तन्निश्चयस्तन्निश्चयत्वेन तत्र हेतुः । तन्निश्चयानधिकरणाव्यवहितोत्तरक्षणे तदनुत्पत्तिः । तन्निश्चयस्तत्र फलोपधानात्मककारणतावा-निति साध्यत्रैविध्येन तिस्रो व्याप्तयः । तासु चाव्यभिचारव्यतिरेकज्ञानमात्रस्य व्याप्तिधीप्रतिबन्धक-तया व्यभिचारे प्रसक्ते निश्चये ग्राह्याभावानवगाहित्वविशेषणेन तन्निरासे सशयपदवैयर्थ्ये प्रसक्ते सशयपदमहिम्ना ग्राह्याभावानवगाहित्वविशेषणलाभ इति ग्राह्याभावानवगाहित्व निश्चये च विशेषण व्याप्तिद्वये च तात्पर्यमिति ग्राह्याभावानवगाहिन. फलव्यतिरेकनिश्चयस्य प्रवृत्तिप्रतिबन्धकत्वात्त-द्वारणाय सशयोपादानमिति च त्रय उद्धारप्रकाराः । ग्राह्याभावानवगाहित्वविशेषणाप्रक्षेपेऽपि यद-भावत्वप्रकारकसशयेन यत्प्रतिबन्ध आपादयितु शक्यते इत्यादिना चतुर्थी व्याप्तिरुक्ता । निश्चयांशे मुख्याभावघटिता तु व्याप्तिराकाङ्क्षानिश्चयहेतुत्वाप्रयोजकत्वान्नादृता । यद्व्यतिरेकज्ञानत्वावच्छिन्न-प्रतिबन्धकमिति कल्पे तु यदभावावगाहनप्रयुक्तप्रतिबन्धकताक यद्व्यतिरेकज्ञानमित्यादिना पञ्चमी व्याप्तिरुक्तेति संक्षेपः ।

करणेति । प्रमाणत्वेत्यर्थः ।

ननु ज्ञानपदेऽपि करणव्युत्पत्तिसम्भवात् कथ तेन करणभ्रमनिरास इत्यत आह—**ज्ञानपदस्येति** । ज्ञप्तिपरत्वेऽपि ज्ञानपदस्य न करणभ्रमनिरासः । व्याप्तिज्ञानादेः करणत्वादिति दोषं स्फुटतयोपेक्ष्य दोषान्तरमाह—**प्रामाण्यपदस्येति** । **विशेषपरत्वे** तद्वति तत्प्रकारकत्वपरत्वे ।

मात्रग्राह्यं न वेति। तत्र यद्यपि विशेष्यावृत्त्यप्रकारकत्वमगृहीतग्राहित्वं वा, सर्वधीयथार्थत्वपक्षेऽनुभवत्वजातेरभावेन स्मरणान्यज्ञानत्वं विशिष्टज्ञानत्वं वा प्रामाण्यं स्वस्य न तेनैव न वा अनुव्यवसायेन ग्रहणयोग्यम्। विशेष्यावृत्त्यप्रकारकत्वादेर्विशेषणस्य प्रागनुपस्थितौ तद्वैशिष्ट्यस्य ज्ञातुमशक्यत्वात्। नापि ज्ञानातीन्द्रियत्वे ज्ञानानुमित्या तद्गृह्यते। ज्ञानमात्रलिङ्गस्य प्राकट्यादेस्तद्व्यभिचारात्। नापि प्रमाहितज्ञातताविशेषात्, तस्य प्रथमं दुर्निरूपत्वात्।

विशेष्यावृत्त्यप्रकारकत्वादिति सामान्यपरत्वे अंशतो बाधप्रसङ्गादिति।

वस्तुत प्रामाण्यपदं न प्रमाणवृत्तिधर्ममात्रपरं अंशतो बाधादनुभवत्वभागे स्वतः परतो वेति विवादाभावाच्चेति तद्वति तत्प्रकारकत्वमात्रपरम्। तच्चेच्छावृत्ति न यथोक्तसाध्यवदिति बाधवारणाय 'ज्ञान'पदम्। तेन ज्ञाननिष्ठस्य तद्वतीत्यादेर्लाभादिति।

न च घटत्ववतीत्यादे: पक्षीकृतस्य ज्ञानेच्छासाधारण्येऽपीच्छावृत्तित्वेनाग्रहेऽपि यावज्ज्ञानग्राहकग्राह्यत्वं साध्यमस्ति ज्ञानभागे पक्षीकृतप्रामाण्यग्रहनियमात् इति वाच्यं, यावज्ज्ञानग्राहकग्राह्यत्वं हि यावत्स्वाश्रयग्राहकग्राह्यत्वम्। घटपटज्ञानग्राहकाभ्यामन्योन्यप्रामाण्याग्रहे यथाश्रुते बाधात्। न चैवमग्रिमविप्रतिपत्त्यभेदः। विशेषणप्रक्षेपाप्रक्षेपाभ्यामत एव पक्षसंकोचासंकोचाभ्यां भेदसम्भवात्।

तथा च ज्ञानाविशेषणे बाध एवेति सुष्ठूक्तम्—तदर्थं ज्ञानं विशेषणमिति। यदि तु इच्छायामपि तद्ग्राहकेण तद्धर्मग्रहस्तदा ज्ञानान्तर्भावोऽप्यस्तु। तथाऽपि अगृहीतप्रामाण्यज्ञानसमानविषयेच्छाप्रामाण्ये बाध इति।

अंशत इति। विशेष्यावृत्त्यप्रकारकत्वादेः स्वतो ग्राह्यत्वाभावादित्यर्थः।

पक्षसङ्कोचेति। यथायोग्यमत्रान्वयः। तथा चेति। इच्छाग्राहकेण तन्निष्ठप्रामाण्यस्याग्रहणाद् यावत् स्वाश्रयग्राहकग्राह्यत्वस्य तं प्रति बाधात्तद्वारणाय ज्ञानपदमित्यर्थः। न च ज्ञानपदे दत्तेऽपि कथं बाधवारणं घटत्ववति घटत्वप्रकारकत्वरूपस्येच्छाप्रामाण्यस्य ज्ञानेऽपि सत्त्वादिति वाच्यम्, ज्ञानप्रामाण्यमित्यनेन ज्ञानत्वावच्छिन्नप्रामाण्यस्योक्तत्वादिच्छायास्तदाश्रयत्वाभावादिच्छाग्राहकेण तदग्रहेऽपि यावत्स्वाश्रयग्राहकग्राह्यत्वस्य सत्त्वादिति भावः।

यदि त्विति। तथा च निर्विशेष एव प्रामाण्ये यावत्स्वाश्रयग्राहकग्राह्यत्वमस्तीत्यर्थः।

परिहरति—तदेति। तदापि पक्षे ज्ञानपदमस्त्वित्यर्थः। अपिशब्दः तदाशब्देन सह योजनीयः।

तत्र हेतुमाह—तथाऽपीति। इच्छाग्राहकेण इच्छाप्रामाण्यग्रहपक्षेऽपि यत्र ज्ञानेच्छयोरु-

अन्यथा अप्रमाहितज्ञाततया अप्रामाण्यस्यापि स्वतोग्रहापत्तिरिति। तथापि तद्वति तत्प्रकारकज्ञानत्वं तद्वति तद्वैशिष्ट्यज्ञानत्वं वा प्रामाण्यम्। तन्निश्चयादेव निष्कम्पव्यवहारात् लाघवात्, नान्यद्गौरवात्। तच्च ज्ञानग्राहकसामग्रीग्राह्यमेव। तथा हि विशेष्ये[1] तद्धर्मवत्त्वं तद्धर्मप्रकारकत्वञ्च व्यवसायस्यानुव्यवसाये-

वस्तुतस्तु ज्ञानेच्छयोर्नैकं प्रामाण्यं तन्मते सिद्धासिद्धभेदेन तयोर्विषयभेदात्। तथा च ज्ञानाविशेषितस्य तद्वतीत्यादे सामान्यत इच्छासाधारणस्य पक्षत्वे तदाश्रयणेनाप्रसिद्धेरेव यावत्तदाश्रयज्ञानग्राहकग्राह्यत्वमंशतो बाधितमिति ज्ञानपदोपादानमितितत्त्वम्।

भयोरपि प्रामाण्यमगृहीत तन्निष्ठप्रामाण्ये स्वाश्रयग्राहकामत्त्वेन बाधो यत इत्यर्थ.। न च तत्र ज्ञानेच्छाग्राहकप्रसरे तेन प्रामाण्यस्य ग्रहणान्न बाधः। तदप्रसरे किमीयप्रामाण्ये अशतो बाध इति वाच्यम्। सामान्यतस्तद्ग्राहकप्रसरेऽप्यग्रे निर्वाच्यस्य प्रामाण्यग्रहोपयोगिग्राहकविशेषस्याभावादिति। न च ज्ञानपदे दत्तेऽपि कथ तद्वारणमिति वाच्यम्, ज्ञानपदस्य ज्ञायमानार्थकत्वात्।

केचित्तु यदेच्छाग्राहकेण तत्प्रामाण्यग्रहस्तदा साध्ये ज्ञानपद देयम्। तेन यावत्स्वाश्रयीभूतज्ञानग्राहकग्राह्यत्व साध्य पर्यवस्यतीति। तथा च यत्र ज्ञाने प्रामाण्यग्रहो न जातस्तत्समानविषयकेच्छाप्रामाण्यस्य ग्रहो जातस्तत्रेच्छाप्रामाण्ये बाधवारणार्थ पक्षे ज्ञानपद तच्च ज्ञानविशेषपरम्। तेन ग्राहकविशेषेण गृह्यमाणप्रामाण्यकस्य ज्ञानस्य प्रामाण्य पक्षे लभ्यते। तथापीत्यपिशब्दश्चकारार्थ इति व्याचक्षते।

इह केचिदाहुः—अत्र ज्ञानपदे दत्तेऽपि तद्वारणासम्भवात्। तत्रेच्छावृत्तिप्रामाण्यस्य ज्ञानेऽपि वृत्तेः। अगृहीतधीप्रामाण्ये अशतो बाधवारणाय पक्षसकोचस्यावश्यकत्वाच्चेति। चिन्त्यमिति क्वचित् पुस्तके पाठः। यत्र नाय पाठस्तत्रेममेवास्वरस दत्वा वस्तुत इति ग्रन्थ उत्थापनीय इति।

तन्न। ज्ञानपदस्य ज्ञायमानार्थकत्वात्। ग्राहकविशेषेण ज्ञायमानप्रामाण्यकंज्ञानपरत्वाद्वा। किन्तु प्रथमे व्याख्याने उभयोरपि प्रामाण्य यत्र न ज्ञायते तत्र कथ बाधनिरूपणम्। अधिकरणाज्ञानात्। न च सामान्यतो ज्ञायमाने तादृशप्रामाण्येऽग्रे निर्वाच्यस्य ग्राहकविशेषग्राह्यत्वस्याभावात् बाधप्रसक्तौ तद्वारणाय ज्ञानपदेन ग्राहकविशेषेण ज्ञायमानत्व प्रामाण्यविशेषण विवक्षितमिति वाच्यम्, तथापीच्छापर्यन्तधावनवैयर्थ्यात्। द्वितीये व्याख्याने साध्ये ज्ञानपद दत्वा पक्षे ज्ञानपद देयमिति सुतरा वैयर्थ्यमिति दूषण द्रष्टव्यम्।

ज्ञानपदोपादानमिति। तथा च ज्ञानपदमहिम्ना इच्छाप्रामाण्यस्य पक्षत्वभ्रमो न भवतीति भावः। नन्विद अयुक्तम। एव सति गन्धवत्त्वाद्युपाधेरप्यैक्य न स्यात्। घटकस्य गन्धस्य भेदात्। गन्धत्वेन प्रवेशादुपाधेरैक्यमिति यदि तदा घटत्वेन प्रवेशात्सिद्धासिद्धघटघटितस्याप्यैक्यमस्त्विति।

---

1 व्यवसायविशेष्य इति भाव.।

केचित्तु ज्ञानपदानुपादानेऽनुभवत्वगर्भप्रामाण्यप्राप्तौ स्मृतिव्यावृत्तपक्षलाभे स्मृतौ तन्मते परतो ग्राह्यप्रामाण्यभ्रमो मा भूदिति ज्ञानपदोपादानम्। तेन ज्ञानसामान्यप्रामाण्यं पक्षो लभ्यत इत्याहुः।

निगर्वस्तु प्रामाण्यपदं समर्थप्रवृत्तिजनकतावच्छेदकधर्मपरम्। तेन सर्वसाधारणपक्षलाभः। यावदित्यादिग्राह्यजातीयत्वञ्च साध्यम्। तेन नांशतो बाधः। अत एव करणनिष्ठतादृशधर्मे बाधवारणार्थमिति।

वस्तुतः प्रमापदप्रवृत्तिनिमित्तमेवोभयसिद्धं पक्षः। अत एवाधुनिकप्रमापदप्रवृत्तिनिमित्ते बाधात् ज्ञानपदमिति तत्त्वम्।

ननु धर्म्मिण उभयवादिसिद्धस्यैव पक्षत्वम्। न चेह धर्म्युभयसिद्ध। प्रकारगर्भत्वात् प्रामाण्यस्य, तस्य च भासमानवैशिष्ट्यप्रतियोगित्वरूपत्वात्। न च परमतेऽपि विशिष्टधियो वैशिष्ट्यं विषयः। अगृहीतासंसर्गकधर्मधर्मिविषयकैकधियस्तथात्वादिति।

किञ्च नैयायिकमते ज्ञानेच्छयोः समानविशेष्यकत्वान्नेदं सङ्गतमित्यस्वरसात् कल्पान्तरमाह—केचित्त्विति।

ज्ञानसामान्येति। तद्वति तत्प्रकारकज्ञानत्वमित्यर्थः।

समर्थेति। समर्थप्रवृत्तिप्रयोजकमात्रवृत्तिनिर्दोषेन्द्रियत्वादिकमित्यर्थः।

नांशतो बाध इति। विशेष्यावृत्त्यप्रकारकत्वादावपि तद्वति तत्प्रकारकत्वजातीयत्वसत्त्वादित्यर्थः।

नन्विदमयुक्तम्। तज्जातीयत्व हि तद्व्याप्यत्व वा तद्व्यापकत्व वा तत्समनियतत्व वा तत्समानाधिकरणत्व वा ? नाद्यः। विशेष्यावृत्त्यप्रकारकत्वस्य निर्विकल्पककोटिविद्यमानतया तद्वति तत्प्रकारकत्वाव्याप्यत्वात्। न द्वितीयः। एतज्ज्ञानत्वादौ पक्षीभूते तद्वति तत्प्रकारकत्व प्रति व्यापकत्वाभावेनाशतो बाधात्। अत एव न तृतीयः। न चतुर्थः। प्रमाकरणत्वेऽपि तद्वति तत्प्रकारकत्वसामानाधिकरण्यसत्त्वात्। व्याप्तिज्ञानादौ उभयोः सत्त्वात्। न च प्रत्यक्षप्रमाकरणत्वे साध्यबाधात् तद्वारणाय ज्ञानपदम्। एव निर्विकल्पकत्वादौ तथापि बाधादित्यस्वरसादाह—वस्तुत इति।

वस्तुतस्तु समनियतत्वमेव विवक्षितम्। प्रयोजकतावच्छेदकत्व तु स्वरूपसम्बन्धविशेषो न गुरावेतज्ज्ञानत्वे विशेष्यावृत्त्यप्रकारकत्वे वेति न तयोः पक्षतेति नाशतो बाध इति भावः।

न च घटत्ववति घटत्वप्रकारकत्वादीनामननुगमात् भ्रमभिन्नानुभवत्वं प्रमापदप्रवृत्तिनिमित्त

वम्। न हि तत्रापि धर्मधर्मिपदं वास्तवतत्परम्, व्यवच्छेद्यसमूहालम्बनाद्यवच्छेदस्य वक्ष्यमाणत्वात्, किन्त्वस्मन्मतसिद्धप्रतियोगित्वानुयोगित्वरूपस्वरूपसम्बन्धविशेषरूपधर्मत्वादिपरम्। तन्मतेऽपि विशिष्टधियो विशेषणत्वविशेष्यत्वात्मकस्वरूपसम्बन्धविशेषविषयत्वात्। तथा च तत्प्रकारकत्वं तद्धर्मत्वगोचरत्वमिति किं अनुपपन्नम्? अत्र ज्ञानप्रामाण्यपदे तत्तद्व्यक्तिपरे सामान्येनोभयोपस्थापके। तेन प्रत्येकं साध्याभिसम्बन्धो लभ्यते। अतोऽप्रामाण्यग्राहकेणापि स्वप्रामाण्यं गृह्यत इति न गुरुमतेऽप्रामाण्याग्राहकपदमनर्थकमिति ध्येयम्। इयं मीमांसकत्रयसाधारणी विधिकोटिः।

स्वीकार्यम्। तत्र च न विवाद इति वाच्यम्, समर्थप्रवृत्तिजनकतावच्छेदकत्वेनानुगतीकृतानां प्रमापदप्रवृत्तिनिमित्तत्वात्। न वाऽनुभवत्वभागे विवादाभावो दोष इति वाच्यम्, अनुभवत्वांशरहितप्रमापदप्रवृत्तिनिमित्तस्य विवक्षितत्वात्।

न हि तत्रापीति। धर्मधर्मिगोचरज्ञानमित्युक्ते ज्ञानद्वयात्मके भ्रमे गतमत एकपदम्। एतावति कृते भूतलं घटाभाववदिति ज्ञानं भूतलघटविशिष्टज्ञानं स्यादतोऽगृहीतासंसर्गपदम्। एवं सत्यपि दण्डपुरुषाविति समूहालम्बने गतम्। अतो धर्मधर्मिपदं धर्मत्वधर्मित्वरूपसम्बन्धपरमित्यर्थः।

नन्वेवमपि प्रमेयत्ववद्देवदत्तो घटश्चेति समूहालम्बनस्य घटप्रमेयत्वविशिष्टज्ञानत्वापत्तिः। देवदत्तं प्रति प्रमेयत्वस्य धर्मत्वभानात्। घटत्वं प्रति घटस्य धर्मित्वभानाच्चेति।

मैवम्। परस्परनिरूपितधर्मत्वधर्मित्वगोचरत्वस्य विवक्षितत्वात्।

न चैवं भूतलं घटाभाववदिति ज्ञानस्य ज्ञानद्वयात्मकभ्रमस्य च परस्परनिरूपितधर्मत्वधर्मित्वगोचरत्वाभावात्तद्वारणार्थमगृहीतासंसर्गपदमेकपदञ्च व्यर्थं स्यादिति वाच्यम्, परस्परप्रतियोगिकत्वलाभार्थमेतदुभयोपादानादिति। अधिकमन्यथाख्यातौ वक्ष्यते।

तत्तद्व्यक्तिपरे इति। ज्ञानपदं ज्ञानत्वेन रूपेण घटज्ञानादिपरम्। प्रामाण्यपदं च प्रामाण्यत्वेन रूपेण घटत्ववति घटत्वप्रकारकत्वादिपरम्। न तु सकलप्रमासाधारणमेकं प्रामाण्यं पक्ष इत्यर्थः। प्रामाण्यत्वं च अनुभवत्वांशरहितप्रमापदप्रवृत्तिनिमित्तत्वं समर्थप्रवृत्तिजनकत्वावच्छेदकज्ञाननिष्ठधर्मत्वं वा ज्ञेयम्।

अत इति। इदं चापाततः विषयघटितमूर्त्तिकस्य सकलप्रमासाधारणस्य तद्वति तत्प्रकारकत्वादेरेकस्यासम्भवाद्भ्रमभिन्नज्ञानत्वादिकमेकं प्रामाण्यं वाच्यम्। तस्य चाप्रामाण्यग्राहकेणापि ग्रहणमित्यसङ्गतम्। तस्माद्विषयघटिते विवादाभावाद्विषयघटितैकप्रामाण्यस्य चासम्भवादेव नाना प्रामाण्यानि प्रामाण्यत्वेन पक्षीकृतानीति ध्येयम्।

केचित्तु घटत्ववद्विशेष्यकघटत्वप्रकारकत्वादिना प्रत्येकमेव पक्षतेत्यर्थमाहुः—तन्न।

तथा सति पक्षतावच्छेदकैक्यमादाय मूलकृता कृतस्याशङ्कतः सिद्धसाधनोद्धारस्यासङ्गत्यापत्तेरिति।

गुरुनये स्वप्रकाशादिना, मुरारिनये अनुव्यवसायादिना, भट्टनये ज्ञाततालिङ्गकानुमित्यादिना यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वस्य सर्वसाधारणत्वात्। तत्प्रसिद्धिश्च तज्ज्ञानतद्विषयादावेव सुलभा। ज्ञानत्वे प्रसिद्धिरिति परमते। तन्मते स्मृत्यन्यज्ञानस्यैवानुभवत्वेनानुभवपदेन ज्ञानत्वेनैवोपस्थितेरिति। यावत्पदञ्चाशेषपरम्। तेन स्वविषयत्वनियतज्ञानग्राहकसामग्रीग्राह्यत्वं पर्यवस्यति। अतो यस्यैकैव ज्ञानग्राहकसामग्री तत्प्रामाण्ये नांशतो बाध इति ध्येयम्।

अत्र केचित्—न ज्ञानपदं यत्किञ्चिज्ज्ञानपरम्, प्रत्येकप्रामाण्यस्य पक्षीकृतस्य प्रत्येकतदनाश्रयीभूतज्ञानग्राहकसामग्र्यग्राह्यत्वेन बाधात्, किन्तु तत्तत्प्रामाण्याश्रयीभूतज्ञानपरम्। तथा च मुरारिभट्टयोर्ज्ञानस्य ज्ञेयत्वानियमेन अज्ञायमानज्ञानव्यक्तिविशेषप्रामाण्ये तदाश्रयीभूतज्ञानग्राहकसामग्र्या अप्रसिद्ध्या तद्ग्राह्यत्वसाध्याभावेनांशतो बाधापत्त्या पक्षसंकोचस्यावश्यकतया तत एव प्रकृतेऽपि सामञ्जस्यात् किं यथाश्रुतपदार्थमनादृत्योक्तकुसृष्टेरादरः? न च तज्ज्ञानव्यक्तौ प्रमाणप्रसरे सामग्री प्रसिद्धैव। तदप्रसरे धर्म्मिण एव बुद्ध्यनारोहात् क्वांशतो बाध इति उभयथापि तन्मते न पक्षसंकोच इति वाच्यं, सामान्यतोऽपि प्रमाणप्रसरेण बुद्ध्यारोहसम्भवात्। न च तावता

तज्ज्ञानेति। इदत्ववतीदत्वप्रकारकत्वादिप्रामाण्याश्रयीभूतं ईश्वरयोगिनोरनङ्गीकारादेकमेव यज्ज्ञानं प्रामाण्याश्रयीभूतज्ञाननानात्वेऽपि एकत्रैव यत्रास्मदादेर्ग्राहिका सामग्री तदिह तज्ज्ञानपदेन विवक्षितम्। अन्यथा ज्ञाने यावत्स्वाश्रयग्राहकग्राह्यत्वाभावादिति ध्येयम्।

ननु नैयायिकमते ईश्वरयोगिनोः सत्त्वादाद्यकल्पेन प्रसिद्धिरयुक्ता। घटत्ववति घटत्वप्रकारकत्वादौ पक्षे यत्साध्यं तस्य च मतद्वये विकल्पद्वयेनापि ज्ञाने प्रसिद्धिरयुक्ता। अत आह—तद्विषयेति। प्रकारीभूतेत्यर्थः। नानारूपे विशेष्ये साध्यासत्त्वादिति ध्येयम्। एकमेव वा यद्विशेष्यं तदभिप्रायेणैतत्।

ज्ञानत्वे प्रसिद्धिरिति। इदमापाततः घटत्ववति घटत्वप्रकारको गुण इति वाक्येन स्वाश्रयग्राहकेण ज्ञानत्वाग्रहणात्। स्वविषयत्वेति। प्रामाण्यग्राहकत्वमावश्यकं यस्याः तादृशी ज्ञानग्राहिका सामग्री यत्र तत्त्वं प्रामाण्ये साध्यमित्यर्थः। तथा च प्रमाविषयकत्वव्याप्यत्वं सामग्र्यामिति भावः। यस्यैकैवेति। इदं चेश्वराद्यनङ्गीकारे। तद्ग्राह्यत्वसाध्याभावेनेति। यद्यपि साध्याप्रसिद्ध्या तदभावोऽपि न वक्तुं शक्यः प्रतियोग्यप्रसिद्धेः तथापि साध्याभावेनेत्यस्य साध्याप्रसिद्ध्येत्यर्थः। एवमंशतो बाधोऽपि अंशतः साध्याप्रसिद्धिरेवेति मन्तव्येति।

तत एव पक्षसङ्कोचादेव। प्रकृतेपि एकग्राहकसामग्रीकज्ञानप्रामाण्येऽपि। उक्तकुसृष्टेरिति।

सामग्रीप्रसिद्धिः । तस्या विलक्षणाया एवानुपदं विवक्षणीयत्वादिति वदन्ति ।

तन्न । असंकोचेनोपपत्तौ तत्कल्पनानौचित्यात् । न हि एकत्र संकोच इति अपरत्रापि[1] सः । किञ्च तदनुरोधादज्ञायमानज्ञानेतरपरता । गुरुमतानुरोधादेकज्ञान-ग्राहकसामग्र्येकेतरपरतेत्येकमेव ज्ञानपदमुभयपरं स्यात् । यदि चैकत्र क्लृप्तसंकोचस्या-नुरोधाद् यत्रापि संकोचकल्पना तदाऽप्रामाण्यग्राहकादिपदमपि त्यज्यताम् । तादृश-सामग्र्यग्राह्यज्ञानप्रामाण्यमात्रपक्षत्वेनैव बाधविच्छेदसंभवात् । सामग्री च सविषयक-ज्ञानग्राहिकाभिमता ज्ञानपदजन्यज्ञानग्रहेण प्रामाण्याग्रहात् यथोक्तेर्बाधात् ।

ननु चात्र घटज्ञानपदजन्यज्ञानेनापि तद्ग्रहादुक्तविवक्षयाप्यप्रतीकारः ।

अत्र कश्चित्—तेन प्रामाण्यं गृह्यत एवेत्याह । तस्यायमाशयः—यथा घटेन जलमाहरेत्यत्रान्वयितावच्छेदकं छिद्रेतरत्वं योग्यताबलात् गुरुनये, भट्टनये च श्रुतार्था-पत्तिस्थले रात्रिभोजित्वमन्वयितावच्छेदकं शब्दादुपस्थितं शाब्दबोधे विषयस्तथेहापि ज्ञानत्वघटविषयत्वयोरतिप्रसक्तत्वात् घटत्वप्रकारकत्वघटविशेष्यकत्वयोरन्योन्यान्वयिता-वच्छेदकयोर्गुरुनये योग्यताबलात् भट्टनये शब्दादुपस्थितयोः शाब्दबोधविषयत्वमस्तु । अतो वाक्यविधया पदविधया वा न तत्र प्रामाण्यग्रह इति कस्य चिद्दूषणं निरवकाशं वेदितव्यम् । न च भट्टमते मुरारिमते चान्यथाख्यात्यभ्युपगमात् घटाविशेष्यकस्यापि

स्वविषयत्वनियतेत्यादिकुसृष्टेरित्यर्थः । **विलक्षणाया** इति । तज्ज्ञानप्रकारकेत्याद्युक्ताया इत्यर्थः । **एकत्रेति** । अज्ञायमानज्ञानप्रामाण्ये । **अपरत्रेति** । एकसामग्रीग्राह्यप्रामाण्ये ।

तदनुरोधादिति । भट्टमुरारिमतेऽज्ञायमानातिरिक्तपरम् । त्रितयमते च एकग्राहकसाम-ग्रीकेतरपरम् ज्ञानपदमित्यनुगतपक्षालाभ इत्यर्थः । **गुर्विति** । गुर्वादीत्यर्थः । इदमुपलक्षणम् । न्यायमते ज्ञानसामान्यपरमित्यपि ज्ञेयम् । यद्यपि नानासामग्रीग्राह्यज्ञानपरतायामनुगमः सम्भवत्येव । न च न्यायमते नानेतिविशेषणमयुक्तं प्रयोजनाभावादितिवाच्यम् । उपरञ्जकस्यापि पक्षे दानात् । यद्वा विशेषणं न देयं किन्तु वस्तुगत्या यत्तादृशं ज्ञानं तत्प्रामाण्यमेव पक्षीकार्यमिति तथाप्यसंकोचेनो-पन्यासादित्युक्तयुक्त्यैव तात्पर्यम् ।

ननु चेति । अस्य च पूर्वपक्षस्य यस्मात् सविषयकत्वं दुर्वचमित्यत्र पर्यवसानम् ।

ज्ञानत्वेति । घटज्ञानमित्यत्र षष्ठ्यर्थस्य यः सम्बन्धी घटविषयक इति यावत् स लक्ष्यस्तस्य च ज्ञानेनाऽभेदान्वयः । घटज्ञानमित्यत्र घटविषयकं ज्ञानमित्यर्थः । तत्र च घटविषयकाभेदे ज्ञानत्वं नावच्छेदकं पटज्ञानेऽतिप्रसक्तत्वात् । नापि ज्ञानाभेदे घटविषयकत्वं इच्छादावतिप्रसक्तत्वादतो ज्ञाने घटत्वप्रकारकज्ञानत्वं घटविषयकांशे घटविशेष्यकज्ञानत्वमभेदान्वयितावच्छेदकमित्यर्थः । न

1. अन्यत्रापीति पाठान्तरम् ।

घटत्वप्रकारकज्ञानस्य सम्भवान्न घटविशेष्यकत्वमन्वयितावच्छेदकमिति वाच्यं, अन्वय-नियतं हि अन्वयितावच्छेदकम् ।

नियमश्च द्विविधो बाधकैकापोह्यरूपोऽसम्भवद्बाधकश्च । तत्राद्यो नियमो भट्ट-मिश्रयोः, अन्त्यो गुरोरभिमतः । अत एवौत्सर्गिकं धियां प्रामाण्यमिति वदन्ति । तदत्र यदि बाधकाभावस्तदा गुरुवत्तयोरपि तदेवान्वयितावच्छेदकम् । अथ बाधकसम्भव' तदाप्रामाण्याग्राहकत्वमेव सामग्र्या असिद्धमिति तादृशशब्दात् सर्वमते प्रामाण्यग्रह इति न बाध इत्युन्नीयते ।

न चैवं सम्भवति । तथा हि—भवतु उक्तनियमद्वयं मतभेदेन तथापि यत्रै-तन्नियमावधारणन्नास्ति तत्र तादृशशब्दादुक्तरीत्याऽपि प्रामाण्याग्रहे बाधतादवस्थ्यात् । किञ्चैककोटिबाधे अन्यतरकोटिप्रकारकतानियमः । न तु संशये । प्रशस्तरूपवान् मैत्र इत्यादौ गौरत्वादिप्रकारकत्वापत्तेः । तथा च यत्र बाधसम्भवस्तत्र तादृशशब्दात् प्रामा-ण्याग्रहे का गतिः ? अपि चानुमानेन घटज्ञानवत्त्वग्रहे प्रामाण्याग्रहस्य तेनापि स्वीकारः प्रकारान्तराभावात् । तथा च तत्र बाध एवेति दिक् ।

अपरे तूक्तातिप्रसङ्गवारणाय तज्ज्ञानप्रकारप्रकारकतया तज्ज्ञानविशेष्यविशेष्यकतया या ज्ञानग्राहिका सामग्री सा सविषयकज्ञानग्राहिकेति विवक्षिता । तद्ग्राह्यत्वं च साध्य-मिति वदन्ति ।

तदपि न सम्यगिव । तथाहि—तज्ज्ञानविशेष्यविशेष्यकत्वं तज्ज्ञान

घटविशेष्यकत्वमन्वयितावच्छेदकमिति । न घटविशेष्यकत्वं प्रति घटत्वप्रकारकज्ञानत्वमन्वयिता-वच्छेदकमित्यर्थः । यथाश्रुतेऽवच्छेद्यातिप्रसक्तिर्लभ्यते । सा च न दोषाय । इदमुपलक्षणम् । द्रव्यत्वप्रकारकघटविशेष्यकज्ञाने घटत्वप्रकारकज्ञानत्वाभावाद्घटविशेष्यकज्ञानत्वमपि नावच्छेदक-मित्यपि द्रष्टव्यम् ।

अन्त्यो गुरोरिति । घटत्वप्रकारकज्ञानत्वस्य घटविशेष्यकज्ञानत्वेन सहासम्भवद्बाधको नियम इत्यर्थः । तदिति । घटविशेष्यकत्वघटत्वप्रकारकत्वयोर्नियमोऽन्वयिनियमोऽन्वयितावच्छेदकत्व-मिति यावत् । तथा च यत्र तयोरन्वयिनावच्छेदकत्वेन ग्रहो नास्तीत्यर्थः । विपरीतनियमस्तु गुरुमतेऽपि द्रव्यत्वप्रकारकघटविशेष्यकज्ञाने घटत्वप्रकारकज्ञानासम्भवात् गुरोरप्यौत्सर्गिक एवेति ध्येयम् । औत्सर्गिकमन्वयितावच्छेदकमिति च व्यतिरेककोटिनिर्णये भासते नतु तत्संशय इत्यभि-प्रेत्याह—किञ्चेति । बाधेति । अप्रमात्वव्यतिरेकनिर्णयासत्त्वमित्यर्थः ।

घटविषयकज्ञानत्वघटत्वप्रकारकज्ञानत्वयोरेव येनौत्सर्गिको नियमो गृहीतो न तु विशेष्य-त्वान्तर्भावेन तं प्रत्येतादृशशब्दात् कथं घटत्ववद्विशेष्यकत्वलाभः कथं च द्रव्यत्वप्रकारकघट-विशेष्यकज्ञाने घटत्वप्रकारकबाधावतारोऽतादृशशब्दात् घटत्वप्रकारकत्वलाभ इति दिगर्थः ।

ज्ञानत्वतप्रकारावाशष्टधर्म्मिविशेष्यकत्वं यत्किञ्चिद्धर्मविशिष्टतज्ज्ञानविशेष्यविशेष्यकत्वं वा। आद्ये सिद्धसाधनम्। नहि नो दर्शने तादृशसामग्र्या प्रामाण्याग्रहः। परन्तु अनुव्यवसायादिसामग्री तादृश्येव नेति विवदामहे। अन्त्ये प्रमेयविशेष्यकं घटत्वप्रकारकं ज्ञानमिति शब्देन वस्तुतो घटविशेष्यके घटविशेष्यकत्वं घटत्वप्रकारकत्वञ्च गृह्णता प्रामाण्याग्रहेण पूर्ववद्बाधतादवस्थ्यम्। तस्मात् सविषयकत्वं दुर्वचमिति।

उच्यते—कस्यांचिन् सामग्र्यां विषयग्रहनियमः कस्यांचिन्न तथेति सर्वजनसिद्धम्। तत्र कस्यापि स्वप्रकाशत्वादितन्त्रम्। कस्याप्यनुव्यवसायात्मकप्रत्यक्षत्वादीत्यन्यदेतत्। तथा च या सामग्री विषयविनिर्मुक्तज्ञानग्रहे न समर्था विषयाङ्कितमेव ज्ञानं गृह्णाति। विषयमविषयीकुर्वती ज्ञानधर्मिग्रह एव न समर्थेति यावत्। तद्ग्राह्यत्वं साध्यम्। शब्दे तु तादृशी सामग्री एव नास्ति। न हि तत्र घ-ज्ञानपदात्मिका सामग्री

बाधतादवस्थ्यमिति। अत्र कश्चित् प्रमेयविशेष्यक घटत्वप्रकारक ज्ञानमित्येवरूपापि सामग्री प्रामाण्य गृह्णात्येव, ज्ञानस्य तद्विषयधर्मधर्मिवैशिष्ट्यावगाहित्वनियमेन विशेष्ये घटत्ववत्त्वस्यानयापि ग्रहात्। अन्यथा प्रकारत्वादिग्रहानुपपत्तेः। तस्य तद्घटितशरीरत्वात्।

न चैवं अनुव्यवसायादिनोक्तयुक्त्याऽवश्य धर्मधर्मिवैशिष्ट्यविषयीकरणे न्यायमतेऽपि कथ न तेन प्रामाण्यग्रहणमिति वाच्यम्, वैशिष्ट्यग्रहणेऽपि तदंशे सत्तानिश्चयरूपत्वाभावात्।

यच्चात्र प्रगल्भेनोक्त तज्ज्ञानविशेष्यविशेष्यकत्वेन तज्ज्ञानप्रकारप्रकारकत्वेन या सामग्री ज्ञान गृह्णाति सा चेदवश्यं धर्मिणि तद्गृह्णाति तदा तदभाववत्त्वघटिताप्रामाण्यस्य तस्मिन्नवसरे ग्रहशङ्कैव न, विरोधादित्यप्रामाण्याग्राहकपदवैयर्थ्यमिति—तन्न। ज्ञानपारतन्त्र्येण तद्वत्त्वग्रहदशाया तद्दशाया तदभाववत्त्वसत्तानिश्चये बाधकाभावात्तद्वत्तानिश्चयस्यैव प्रतिबन्धकत्वात्।

यद्वा अप्रामाण्याग्राहकत्व नञ्व्यत्यासेन प्रामाण्याभावाग्राहकत्वम्। तच्च प्रामाण्यग्राहकत्वमेव विवक्षितम्। तथा च तद्वति तत्प्रकारकत्वरूपप्रामाण्यग्राहिका सामग्री मूले विवक्षिता। न चानुव्यवसायादिसामग्री तादृश्येव न भवतीति वाच्यम्, स्वातन्त्र्येण तद्वत्त्वाविषयत्वेऽपि ज्ञानपारतन्त्र्येण तद्वत्त्वस्य तयापि ग्रहणादित्याह—तन्न। तादृशसामग्र्या प्रामाण्य गृह्यत इत्यत्र यथाश्रुतमेव वा साध्यं विवक्षितं प्रामाण्यसत्तानिश्चयो भवतीति वा। आद्ये अनुव्यवसायादिना प्रामाण्यग्रहो ज्ञानपारतन्त्र्येण **नैयायिकमते**ऽपीति त्वयैवोक्तत्वात् सिद्धसाधनम्। द्वितीये घटत्ववत्त्वेन ज्ञायमानविशेष्यक घटत्वप्रकारकज्ञानमित्यत्र प्रामाण्यसत्तानिश्चयाभावाद्बाधः। न च तत्रापि प्रामाण्यसत्तानिश्चये इष्टापत्तिरेव कर्त्तव्या। तदैव घटत्ववान्न वेति संशयानुभवात्। ज्ञानपारतन्त्र्येण तद्वत्त्वग्रहेऽपि तद्वत्त्वसत्तानिश्चयाभावादप्रामाण्यग्रहः सम्भवत्येवेति स्वोक्तविरोधाच्च।

घटपदं विनापि ज्ञानपदमात्रस्य ज्ञानोपस्थापकत्वेन तावन्मात्रस्य सामग्रीत्वात्। तत्फलोपधाननियतहेतोरेव सामग्रीत्वात्। इदमेव च सामग्रीपदोपादानफलम्। तथा च घटपदसमभिव्याहारेण तस्य विषयग्राहकत्वं न तु ज्ञानग्राहकसामग्रीत्वेन, ज्ञानपदाज्ज्ञानमात्रोपस्थितौ विषयाप्रकाशात्। अनुव्यवसायस्वप्रकाशादौ तु ज्ञानग्राहकसामग्रीत्वप्रयुक्तमेव विषयग्राहकत्वम्। यद्येन विना न भासते तद्बोधकस्य तद्बोधकत्वनियमात्। तथा च यत्र ज्ञानग्राहिकैव विषयग्राहिका न तु विषयग्रहार्थमन्यापेक्षा यस्यामिति पर्यवस्यति। तादृशी च प्रायशः स्ववृत्तिवर्तमानज्ञानग्राहिकैव सामग्री भवति। तद्ग्राह्यत्वं शब्देनानुमानविशेषेणाग्रहेऽपि तिष्ठति। यथा च ज्ञाततालिङ्गकानुमानस्य ज्ञानग्राहकत्वेनैव विषयग्राहकत्वं तथा वक्ष्यामः। ज्ञानरूपप्रत्यासत्तेस्तुल्यत्वादित्यग्रे स्वयमेव वक्ष्यति। तेनाप्ययमेवाशय उन्नीयते। सहकार्यन्तरप्रवेशेन विषयग्रहे तदुपन्यासानर्हत्वादिति सर्वं सुस्थम्।

नन्वेवं यावत्पदं व्यर्थं प्रामाण्यानुमितेर्ज्ञानग्राहकत्वप्रयुक्तविषयग्राहकत्वाभावात्। तदनन्तर्भावेनैव सामञ्जस्यात्। अन्यथा घटज्ञानवानयं तदिच्छावत्त्वात् इत्यस्यापि सविषयज्ञानग्राहकसामग्रीत्वेन तद्ग्राह्यत्वेन प्रामाण्यस्येत्थमपि बाधानिरासादिति चेत्—न। इदं ज्ञानं प्रमेत्येवमाकारिकायाः प्रामाण्यानुमितेः पक्षीकृतज्ञानग्राहिकायास्तद्ग्राहकत्वप्रयुक्ततद्विषयघटादिग्राहकत्वायाः प्रामाण्यग्राहकत्वेन यावदनन्तर्भावे सिद्धसाधनात्। किञ्च पृथिवीज्ञाने तदनुव्यवसायानन्तरं पुनस्तत्रैव विषये पृथिवीज्ञाने जाते तदनुव्यवसायानन्तरमित्यादिवक्ष्यमाणप्रामाण्यग्रहस्यापि ज्ञानग्राहकत्वप्रयुक्तविषयग्राहकत्वसत्त्वात् सिद्धसाधनं यदि न यावत्पदोपादानम्।

वस्तुतः प्रमाशब्देन प्रामाण्यग्राहिणा यावदनन्तर्भावे सिद्धसाधनम्। तुल्यसामग्र्या प्रामाण्यतदाश्रयज्ञानयोः शब्दात् प्रतीतेः। न च घटज्ञानवानयमित्यनुमित्या तद्ग्रहेण बाधस्तत्र तुल्यसामग्र्या उभयोर्विषयत्वाभावात्। ज्ञानस्य विषयत्वे व्याप्तेर्घटस्य विषयत्वे व्यापकतावच्छेदकत्वस्य तन्त्रत्वात्। न हि प्रमाशब्दे प्रमात्वतदाश्रयसाधारणैकशक्तिवत् घटेच्छादौ व्याप्ते ज्ञानघटसाधारणी व्याप्तिरेकाऽस्ति। व्यापकतावच्छेदकेन समं व्याप्तेरसम्भवादिति किमनुपपन्नम्? इदं घटज्ञानं न प्रमेति विपर्ययस्य सविषयकघटज्ञानग्राहिणस्तत्प्रामाण्याग्राहकत्वेन बाधः स्यादत उक्तम्—अप्रामाण्याग्राहकेति। तत्र ज्ञानग्राहिकायास्तस्या अप्रामाण्यग्राहकत्वादित्यर्थः।

न च गुरुमतेऽप्रामाण्याप्रसिद्ध्या तद्ग्राहकत्वमप्रसिद्धम्। अप्रामाण्यस्य व्यधिकरणप्रकारकत्वस्येच्छायां तन्मते प्रसिद्धेः। ततः स्मर्यमाणस्य तस्य भ्रमसम्भवात्।

किमनुपपन्नमिति । अत्र वदन्ति । ज्ञानग्राहकत्वप्रयुक्तविषयग्राहकसामग्री इत्यस्य कोऽर्थः ? ज्ञानग्राहकत्वव्यापकं विषयग्राहकत्वं यस्या इति वा ? विषयग्रहार्थे ज्ञानग्रहहेत्वतिरिक्तानपेक्षेति वा ? विषयग्रहार्थे ज्ञानग्रहहेत्वतिरिक्तकारणानपेक्षेति वा ? ज्ञानग्राहकसामग्रीत्वावच्छेदकधर्मावच्छेदेनैव पर्याप्तं विषयग्राहकत्वं यस्या इति वा ?

नाद्यः । प्रमापदेऽपि वर्त्तमानं ज्ञानग्राहकत्वं न विषयग्राहकत्वव्याप्यं ज्ञानपदे व्यभिचारात् । तत्र ज्ञानग्राहकत्वसत्त्वेऽपि विषयग्राहकत्वाभावात् । प्रमापदावच्छिन्नं ज्ञानग्राहकत्वं व्याप्यमिति चेत्—तर्हि घटज्ञानवाक्यावच्छिन्नज्ञानग्राहकत्वमपि तथेत्यतिप्रसङ्गादवस्थ्यम् । न द्वितीयः । प्रमानुमितौ व्यापकतावच्छेदकत्वस्य प्रमापदे च विशेषणशक्तत्वस्य विषयग्रहार्थमतिरिक्तस्यापेक्षणात् । न तृतीयः । घटज्ञाने बुद्धिस्थे शक्तस्य सर्वनामतत्पदादेरेकयैव शक्त्या विषयज्ञानोभयबोधकतयाऽतिप्रसङ्गतादवस्थ्यात् । न चतुर्थः । तत्रैवातिप्रसङ्गादिति ।

उच्यते । यद्धि येन विना न भासते तद्धी हेतुत्वमपि बोधयतीति सर्वसिद्धम् । तथा च विषयनिरपेक्षज्ञानानवगाहिज्ञानग्राहकत्वरूपेण विषयग्रहं प्रति हेतुता यस्याः सा सामग्री विवक्षिता । घटज्ञानादिशब्दात्मिका सामग्री यद्यपि विषयनिरपेक्षं ज्ञानं न गृह्णाति तथापि विषयग्रहं प्रति तेन रूपेण न हेतुता, समानाधिकरणाव्यवहितकालवृत्तिज्ञानग्रह एव तथानियमात् । तदिदमुक्तं—**स्ववृत्तिवर्तमाने**त्यादि ।

न चैवं यावत्पदं व्यर्थम्, प्रमापदादौ निरुक्तसामग्रीत्वविरहादिति वाच्यम्, उपनीतप्रामाण्यानुव्यवसायमादाय यावत्पदादाने सिद्धसाधनात् । न च ज्ञाततालिङ्गकानुमितेस्तथा सामग्रीत्वमसिद्धम्, प्रत्यक्षस्थानाभिषिक्तायास्तस्याः परैस्तथात्वाङ्गीकारात् । न च न्यायमते न तथात्वं सिद्धम् । एवं सति स्वप्रकाशज्ञाततालिङ्गकानुमित्योर्नैयायिकैरस्वीकारात्, तदुभयमादाय **गुरुभट्टयोः** कथं स्वतस्त्वम् ? स्वमतसिद्धज्ञानग्राहकत्वमादायेति यदि तदा निरुक्तसामग्रीत्वमपि स्वमतसिद्धमेवास्त्विति ।

यद्वा शब्दव्याप्त्यनुपनीतं विशेष्ये प्रकारीभूतधर्मवैशिष्ट्यं गृह्णन्ति स्वसमानाधिकरणवर्त्तमानज्ञानञ्च विषयीकुर्वन्ति यावन्ति ज्ञानानि तद्विषयत्वं स्वतस्त्वम् । यावत्पदं च पूर्वोक्तसिद्धसाधनवारणाय । घटोऽस्ति ज्ञानवान् देवदत्त इति वाक्येन जनितं देवदत्तज्ञानमनुमित्साजनितैतादृशदेवदत्तानुमितिं च वारयितुं शब्देत्यादिविशेषणम् । ज्ञानोल्लिखितप्रकारावच्छिन्नविशेष्यग्राहकता ज्ञानग्राहकतापर्याप्त्यधिकरणावच्छेदेन पर्यवसिता वा सामग्री विवक्षिता । तेन विकल्पसंशयादिपदवारणं सर्वनामभिन्नत्वं च विशेषणमिति सङ्क्षेपः ।

अस्तु उभयवादिसिद्धं प्रामाण्याग्राहकत्वं यस्यास्तद्भिन्ना यावती ज्ञानग्राहिका सामग्री तद्ग्राह्यत्वं स्वतस्त्वमित्याह—**अतः परं मूलं योजयति** । अत्र च सामग्रीपदेन यदि ज्ञानग्रहरूपफलोपहितं कारणचक्रमुच्यते तदा तद्ग्राह्यत्वं तज्जन्यग्रहविषयत्वम् । यदि तु सामग्रीपदेन लक्षणया ग्रह एवानुव्यवसायादिरुच्यते तदा सविषयकज्ञानग्राहकसामग्रीजन्या ये स्वतोग्रहास्तद्विषयत्वं साध्यम् । तेन क्वचिच्छब्दादेः क्वचिदनुव्यवसायादेर्ग्राहकत्वनिर्देशो न विरुध्यत इति ध्येयम् ।

भ्रमस्तु तन्मते असंसर्गाग्रहः, अन्यमते अन्यथाख्यातिरित्यन्यदेतत्। इदञ्च[1] सर्वसाधारणं यदारोपे आरोपविषयासाधारणधर्मो न गृह्यते स च धर्म इह प्रामाण्यमेवेति युक्तमप्रामाण्यासंसर्गाग्रहे प्रामाण्याग्रह इति।

अत्र चाप्रामाण्याग्राहकत्वमप्रामाण्यग्राहकसामग्र्यसमवहितत्वम्। यथाश्रुते ज्ञानानुभवस्याप्रामाण्यस्मृत्यन्यत्वेनाप्रामाण्यग्राहकत्वस्यासम्भवादिदं ज्ञानं प्रमा न इत्यत्रापि प्रामाण्याग्रहेण बाधतादवस्थ्यात्। तत्पदन्तु यत्राप्रामाण्यज्ञाने प्रामाण्यग्रहस्तत्र तादृशग्रहस्याप्रामाण्याग्राहकत्वमप्रसिद्धमिति तद्वारणाय। तेन तत्राप्रामाण्याग्राहकत्वमर्थो लभ्यते। इदन्तु यत्र प्रामाण्यं गृह्णाति न तत्राप्रामाण्यं किन्तु तद्विषये। तस्येति षष्ठीतत्पुरुषस्तु नादरणीयः।

गुरुमते ज्ञाने व्यधिकरणप्रकारकत्वाभावेन षष्ठ्यर्थस्य बाधितत्वात्। न च तन्मतेऽन्यथाख्यात्यभावेन सप्तमीसमासादरेऽपि यत्राप्रामाण्यासंसर्गाग्रहस्तत्राप्यप्रामाण्याग्रहेण तद्दोषतादवस्थ्यम्।

तत्रेति हि सप्तम्यर्थो न विषयविषयिभावः किन्त्वसंसर्गाग्रहः। तथा च तेना-

ननु यदाऽप्रामाण्यारोपस्तदा विरोधाभावात् अप्रामाण्यारोपे प्रामाण्य गृह्यत एवेति बाधाभावेन व्यर्थमप्रामाण्याग्राहकेति विशेषणमित्यत आह—इदं चेति।

सर्वसाधारणं प्राभाकरमतसाधारणम्।

ननु अप्रामाण्याग्राहकेति विशेषणे दत्तेऽपि बाध एव। तथा हि—इदं रजतमिति प्रमानन्तरं नेद रजतमिति बाधभ्रमे इद ज्ञानं न प्रमेति यज्ज्ञानमुत्पद्यते तच्च **प्राभाकर**मते नान्यथाख्यातिरूप, तैरन्यथाख्यात्यनङ्गीकारात्। यदि शुक्ताविद रजतमितिवत् स्मृत्यनुभवात्मक ज्ञानद्वयमेवेदं ज्ञानमिति ज्ञानस्य मानसोऽनुभवोऽप्रमेत्यप्रामाण्यस्मरणम्, तथा चेदं ज्ञानमिति ज्ञानेन मानसानुभवेनाप्रामाण्याग्राहिणा प्रामाण्य न गृह्यत इति बाधतादवस्थ्यमत आह—**अत्र चेति**। अप्रामाण्यग्राहकसामग्र्यसमवधानमप्रामाण्याग्राहकशब्देन विवक्षितम्। मानसे तु ज्ञानानुभवेऽप्रामाण्यस्मृतिरूपाप्रामाण्यग्रहजनकसामग्रीसमवधानान्नाप्रामाण्याग्राहकत्वमस्तीति न तेन बाधो **गुरुमत** इति।

तद्दोषतादवस्थ्यमिति। इदं ज्ञानमप्रामाण्यवदित्यनेन प्राभाकरमतेऽप्रामाण्यस्याससर्गाग्रहादप्रामाण्यं न गृह्यते प्रामाण्यं च न गृह्यते इति बाधतादवस्थ्यमित्यर्थः। अत्र यद्यपि न बाधः अप्रामाण्यग्राहकस्मृत्यसमवहितस्य विवक्षितत्वात् तथापि विषयसप्तम्या ज्ञाने योऽप्रामाण्यग्रहः तज्जनकसामग्र्यसमवधानमित्यर्थो लभ्यते। स चानुपपन्नः। ज्ञाने व्यधिकरणप्रकारत्वाभावात् **प्राभाकरमते**। तथा च विशिष्टा सामग्री वर्त्तते प्रामाण्यं च न गृह्यत इति बाधो युक्त एवेत्यर्थः।

तत्रेति[2] **हीति**। इदं च प्रतियोग्यन्वयमादाय ग्राहकत्वाभावेन तत्रेत्यस्यान्वये दोषाभावा-

---

१. इदन्त्विति पाठान्तरम्।

२. तत्रेत्यस्याभावविशेषणत्वे तत्राप्रामाण्यग्राहकस्मृतिसमवधानाभाववती या ज्ञानग्राहिका सामग्री तद्ग्राह्यत्वं तस्य चेदमप्रामाण्यवदित्यत्र नास्त्येव कुतश्चित्समवधानम्। प्रतियोगिप्रसिद्धिरिच्छायामिति भावः।

नानुमित्या स्वप्रकाशेन वा गृह्यते। विषयनिरूप्यं हि ज्ञानमतो ज्ञानवित्तिवेद्यो विषय इति व्यवसाये भासमाने धर्मधर्मिवत्तद्वैशिष्ट्यमपि विषयः। व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात्, सम्बन्धितावच्छेदकरूपवत्तया ज्ञायमाने सम्बन्धिनि ससम्बन्धिकपदार्थनिरूपणमित्यनुव्यवसायस्य रजतत्वावच्छिन्नत्वेन पुरोवर्त्तिविषयत्वाच्च। अन्यथा पुरोवर्त्तिनं रजतञ्च जानामीति तदाकारः स्यान्न तु रजतत्वेन पुरोवर्तिनमिति। अत एवाप्रमापि प्रमेत्येव[1] गृह्यते। अनुव्यवसायस्य भ्रमविषयवैशिष्ट्यविषयत्वात्।

गृहीतासंसर्गाप्रामाण्याग्राहकत्वं पर्यवस्यतीति। न चाग्रेतनसंशयानुपपत्तिदोषानुपपत्ति· प्रागप्रामाण्यास्मरणे धर्मिज्ञाने सति संशयानुपपत्तेर्वक्ष्यमाणत्वात्।

वस्तुतस्तु विषयीभूताप्रामाण्यग्राहकत्वेनाप्रसिद्धिर्मा भूदिति तदुपादानं न घटते। प्रामाण्यस्येवाप्रामाण्यस्यापि प्रतिज्ञानमन्यान्यत्वेनाप्रामाण्यगोचरज्ञानप्रामाण्यस्य पक्षीकृतस्याप्रामाण्यग्राहकसामग्र्यसमवहितसामग्रीग्राह्यत्वस्य सत्त्वात्। अप्रामाण्यपदस्य प्रकृतप्रामाण्यविरोधिमात्रपरत्वात्। न चाप्रामाण्यवत्यप्रामाण्यप्रकारकत्वस्य ग्राह्यप्रामाण्यस्य विषयीभूतमप्रामाण्यं विरोधि। अन्यथा यत्र भावस्वरूपमप्रामाण्यन्नारोपितमपि तु प्रामाण्याभाव एव। यत्र वा प्रकार एव व्यधिकरणत्वमारोपितं तत्रापि प्रामाण्याग्रहेण बाधतादवस्थ्यात्। तस्माद्यत्र घटवह्नी इति समूहालम्बनस्यैकांशेऽप्रामाण्यारोपोऽपरांशे प्रामाण्यग्रहस्तत्र प्रामाण्यग्राहकस्याप्रामाण्याग्राहकत्वमसिद्धम्। तद्वारणाय तदिति। तथा च तत्र तदंशेऽप्रामाण्यग्राहकसामग्र्यसमवधानमर्थो लभ्यते।

वयन्तु षष्ठीसमास एव श्रेयान्। तेनाप्रामाण्यपदस्य प्रामाण्यविरोधिवचनतया तस्याप्रामाण्यं तत्प्रामाण्यविरोधीत्यर्थ इत्युन्नयाम इति संक्षेपः।

दिति। अग्रेतनेति। संशयस्थले हि धर्मिज्ञानमप्रामाण्यस्मृत्यात्मकेनाप्रामाण्यग्राहकेण समवहितमेवेति तस्य प्रामाण्यानिश्चायकत्वात् संशयः सम्भवत्येवेति भावः। प्रथमं धर्मिज्ञान तदनन्तरमप्रामाण्यस्मरणं ततश्च संशय इति क्रमेण संशयोत्पत्तौ प्राथमिकधर्मिज्ञानस्याप्रामाण्यस्मृत्यसमवहितत्वेन प्रामाण्यनिश्चयस्य जातत्वान्न संशयः स्यादित्याह—प्रागिति। तत्प्रामाण्यविरोधीति। तद्रूपस्य प्रामाण्यस्य विरोधीत्यर्थः। तथा चाप्रामाण्यपदं विरोधिमात्रपरमन्यथाऽनन्वयादिति ध्येयम्। न तु तस्य यत्प्रामाण्यं तद्विरोधीत्यर्थः। शब्दार्थयोरसाधुत्वापत्तेः। नञा व्यवधानात्। अयं

१. प्रमात्वप्रकारेणेति यावत्।

न च न प्रामाण्यं प्रथमतो ज्ञातमिति न तदारोपः स्यादिति वाच्यम्, प्रामाण्यस्य ज्ञानग्राहकसामग्रीग्राह्यत्वेन ज्ञानवित्तिवेद्यत्वात्। अभावप्रतीतौ प्रतियोगित्वाभावत्वयोरिव। तदभाववति तत्प्रकारकज्ञानत्वमप्रामाण्यं, परतो ज्ञायते, तदभाववत्त्वस्य प्रमानुल्लिखितत्वेनानुव्यवसायाविषयत्वात्।

न च प्रामाण्यसंशयाद्विषयसंशयवत्[1] प्रामाण्यज्ञाने प्रामाण्यसंशयात् प्रामाण्यसंशय इति वाच्यम्, प्रामाण्यज्ञानेऽपि स्वतः प्रामाण्यग्रहे तत्संशयानुपपत्तेः।

तज्ज्ञानविषयकेति। तज्ज्ञानविषयकज्ञानव्यतिरेकाप्रयुक्तव्यतिरेकप्रतियोगिज्ञानप्रकारो न वेत्यर्थ.। तेन तद्विषयकेश्वरज्ञानजन्यत्वात्तदनुमितितदनुव्यवसायादीनां तन्मतविधिकोटेरस्मन्मते बाधः। तादृशेश्वरज्ञानज्ञेयत्वेनाभिधेयत्वसामान्यप्रत्यासत्तिजप्रत्यक्षविषयत्वेन च सिद्धसाधनञ्चेति दूषणद्वयमलग्नकम्भवति। ईश्वरज्ञानस्य प्रागभावाप्रतियोगित्वेन कार्याभावप्रयोजकाभावाप्रतियोगित्वात्तदप्रयुक्तव्यतिरेकाप्रतियोगि-

वह्निरिति ज्ञानस्य इदत्ववतीदत्वप्रकारकत्वरूपप्रामाण्यग्रहकाले तस्य वह्नित्ववति वह्नित्वप्रकारकत्वरूप यत्प्रामाण्यं तद्विरोधिनो वह्नित्वाभाववतीत्यादेरप्रामाण्यस्य ग्रहणाच्च घटवह्नी इति समूहालम्बनस्येत्याद्युक्तयुक्त्यनुरोधेन चांशभेदविवक्षा इहापि कार्येति स्मर्त्तव्यम्। वस्तुतो नांशभेदविवक्षाप्रयोजन घटवह्नी इति समूहालम्बने अंशान्तरावच्छिन्नस्य वह्नित्वाभाववति वह्नित्वप्रकारकत्वस्यांशान्तरावच्छिन्न वह्नित्ववति वह्नित्वप्रकारकत्व प्रति विरोधाभावादिति।

तज्ज्ञानविषयकेति। अत्र तज्ज्ञानपदेन पक्षीकृतप्रामाण्याश्रयीभूत ज्ञान, व्यतिरेकपदेन प्रागभावः। अप्रयुक्तपदेन तदन्वयाद्यनुविधाय्युत्तरसमयसम्बन्धिभिन्नः। द्वितीयव्यतिरेकपदेनापि प्रागभावः। प्रकारपदेन भासमानधर्मत्वाख्यसम्बन्धक उच्यते। तेनेत्यादिदूषणमलग्नक भवतीति सम्बन्धः। दूषणमाह—तद्विषयकेत्यादिना। अत्र प्रथम ईश्वरज्ञानमादाय विधिकोटौ सिद्धसाधनं योज्यम्। न च मीमांसकैरीश्वरानङ्गीकारान्न तत्तत्सिद्धसाधनमिति वाच्यम्, यत्रात्मन्यनुमितिस्तत्रत्यसिद्धेः प्रतिबन्धकत्वात्। अनुमातरि च नैयायिके सिद्धिरस्त्येव। तद्वारणायाजन्यपदानन्तरं जन्यपददानेऽप्रसिद्धि'। तज्ज्ञानविषयकेन ईश्वरज्ञानेन जनितस्यान्यज्ञानस्याप्रसिद्धेः। बाधपदेन च प्रसिद्धिबाध एव विवक्षित इति ध्येयम्। अप्रसिद्धिमुद्धरति—ईश्वरज्ञानस्येति। सिद्धसाधनमुद्धरति—तदप्रयुक्तेति।

1. घटवद्भूतलमित्यादिनिश्चये प्रामाण्यसंशयाद्भूतल घटवन्न वेत्यादिसंशयवदित्यर्थः।

ननु ज्ञानमात्रं न विरोधिबुद्धिनिवर्त्तकं भ्रमोत्तरं बाधकज्ञानोदयात्, किन्त्वनन्यथासिद्धम्। अत एव तेन विनापि तज्ज्ञानं सम्भवतीति अन्यथासिद्धतया[1] शङ्कितं तन्निश्चयं परिभूय ज्ञानविषयत्वादिविषये यथा संशयस्तथा प्रामाण्ये तन्निश्चयस्यान्यथासिद्धिशङ्कया[2] तं परिभूय भवति संशयः।

न च व्यवसायस्य ज्ञानत्वे घटविषयकत्वे च यथानुव्यवसायविषयत्वान्न संशयस्तथा प्रामाण्येऽपि न स्यात्, अनुव्यवसायस्य प्रमात्वनियमादिति वाच्यम्, अज्ञाने अविषये च ज्ञानत्वविषयत्वयोरनुव्यवसायेनाग्रहणनियमात्।

त्वाच्च। न च समानाधिकरणपदजन्यपदाद्युपादानमेव तदर्थं क्रियतामिति वाच्यम्. परमते व्यर्थविशेषणत्वात्। यथा च प्रयुक्तत्वं तदन्वयाद्यनुविधाय्युत्तरसमयसम्बन्धित्वरूपमजन्यस्यापि प्रागभावस्य तथा वक्ष्यते। न च प्रकारत्वविवक्षयाऽभिधेयत्वसामान्यप्रत्यासत्तिनिबन्धनसिद्धसाधनवारणेऽपि प्रमेतिसामान्यलक्षणाजन्यज्ञानविषयत्वेन सिद्धसाधनमिति वाच्यम्। प्रमात्वं हि नाज्ञातमासन्ति. संशयानुपपत्तेः, किन्तु ज्ञातम्।

समानाधिकरणेति। तज्ज्ञानविषयकसमानाधिकरणज्ञानाजन्यसामान्यप्रत्यासत्त्यजन्यसमानाधिकरणज्ञानग्राह्यत्व तज्ज्ञानविषयकजन्यज्ञानाजन्यसामान्यप्रत्यासत्त्यजन्यजन्यज्ञानग्राह्यत्व विधिकोट्यर्थौ विवक्ष्यतामित्यर्थः।

व्यर्थेति। यद्यपि सिद्धसाधनवारकत्वेन सार्थकत्व भवत्येव, व्याप्तिग्रहोपयिकविशेषणस्यैव सार्थक्यनियमस्य तैरनङ्गीकारात्, तथापि सामान्येत्यादिविशेषणस्याप्रसिद्धया वैयर्थ्यमिति।

ननु विवक्षिते तव साध्येऽप्यनुमित्या सिद्धसाधनम्। तथा हि—तज्ज्ञानविषयक यज्ज्ञानं पक्षज्ञानं तेन यद्यपि अनुमित्यादिर्जन्यते तथापि तज्जनकीभूतज्ञानव्यतिरेकाप्रयुक्तव्यतिरेकप्रयोज्य च भवति। प्रयुक्तत्वं जन्यत्वम्। न चानुमित्यादेर्व्यतिरेकः प्रागभावलक्षणः ज्ञानविषयज्ञानव्यतिरेकजन्यः प्रागभावस्याजन्यत्वादित्यत आह—यथा चेति।

प्रमेतीति। घटत्ववति घटत्वप्रकारकत्वरूपसामान्यप्रत्यासत्तिजन्यज्ञानमादाय सिद्धसाधनमित्यर्थः। संशयानुपपत्तेरिति। सामान्यप्रत्यासत्तेः स्वजन्यज्ञाने प्रकारत्वनियमादज्ञातस्य सामान्यस्य प्रत्यासत्तित्वेऽज्ञातस्य प्रकारत्वमेवेष्टव्यम्। तथा च धर्मिणि गृह्यमाणे पूर्वाज्ञाता अपि धर्माः प्रकारीभूय भासेरन्निति तत्कोटिकसंशयो न स्यादित्यर्थः। इद चापाततः। इदत्वाद्यवच्छेदेन प्रकारीभूतो हि धर्मः संशयविरोधी। न च सामान्यप्रत्यासत्तिजज्ञाने सामान्य तथा प्रकारः।

१. भ्रमतयेति भावः। २. भ्रमत्वशङ्कयेति यावत्।

तद्विषयत्वमनन्यथासिद्धं प्रामाण्यविषयत्वञ्च तेन विनापि सम्भवतीति तत्र संशय इति चेत्—मैवम्। भ्रमत्वमन्यथासिद्धत्वम्। ततश्च प्रामाण्यनिश्चये भ्रमत्वसंशयेन तद्विषये प्रामाण्यसंशय इति फलितोऽर्थः। भ्रमत्वसंशयश्च तज्ज्ञानाज्ञानाभ्यां न अन्वेतीत्युक्तत्वात्। एवमन्यत्रापि[1] भ्रमत्वसंशयात् न विषये[2] संशयः, स्वतः प्रामाण्यग्रहे भ्रमत्वसंशयाभावात्।

तज्ज्ञानञ्च प्रमात्वाश्रयज्ञानम्विनाऽसम्भवि, तस्य क्वचित् पक्षत्वात्। क्वचित् सामान्यप्रत्यासत्तिक्रोडीकृतत्वात्। न च प्रमात्वाश्रयज्ञाने अवश्यापेक्षितेऽपि न तज्ज्ञानं प्रमात्वसामान्यजज्ञाने हेतुरितिवाच्यं, इतोऽपि जन्यपदस्य तदन्वयाद्यनुविधायिमात्रपरतया व्याख्यातत्वात् तच्च प्रयोजकमात्रपरं न तु कारणमात्रपरम्। न च यत्पक्षकानुमितिगृहीतं प्रमात्वं प्रत्यासत्तिस्तत्रैवं सिद्धसाधनपरिहारेऽपि प्रामाण्यान्तरे तत् स्यात्। प्रामाण्यमात्रस्य सामान्यजन्यज्ञानगोचरत्वात् न हि सकलतदाश्रयज्ञानाभावप्रयुक्तः सामान्यज्ञानाभाव इति साम्प्रतम्। ग्राह्यप्रामाण्याश्रयविषयकज्ञानसामान्यजन्यत्वाभा-

तस्माद् विशेषणज्ञानकारणताग्राहकयुक्त्यैव नाज्ञातस्य सामान्यस्य प्रत्यासत्तित्वम्। तस्याग्रिमज्ञाने विशेषणत्वनियमादिति तत्त्वम्। फलीभूतज्ञाने प्रकारस्य सामान्यस्याज्ञातस्य जनकत्वमिति सशयोप्यनुपपन्न इत्यर्थ इति केचित्।

तज्ज्ञानं चेति। न चेच्छाया गृहीत प्रमात्व यत्र प्रत्यासत्तिस्तत्र सिद्धसाधनोद्धारः कथमिति वाच्यम्, तज्ज्ञानपदेन प्रमात्वाश्रयमात्रस्याभिप्रेतत्वात्।

क्वचित्सामान्येति। प्रमापदेन यत्र प्रमात्व सत्सामान्यमुपस्थाप्यते तत्र सामान्यप्रत्यासत्त्या प्रमात्वेन धर्म्मिणः क्रोडीकृतत्वात् स्वज्ञान एव विषयता प्रापितत्वादित्यर्थः।

न च यत्पक्षकेति। न च साम्प्रतमित्यन्वयः। यस्या घटज्ञानव्यक्तौ घटत्ववति घटत्वप्रकारकत्वमनुमित तद्रूप यत्तज्ज्ञान तद्विषयकज्ञानाप्रयुक्तत्व सामान्यप्रत्यासत्तिजन्यबोधस्यास्त्येवेति सिद्धसाधनमिति न चेत्यर्थः।

तत्रेति। तस्मिन् सतीत्यर्थः। तथा च तत्प्रयुक्त यत् सिद्धसाधन तत्परिहारेऽपीत्यर्थः।

प्रामाण्यान्तर इति। मध्यमपदलोपिसमासेन प्रामाण्याश्रयान्तर इत्यर्थः। तथा च प्रामाण्याश्रयीभूतं यद्घटज्ञानान्तर तत्प्रयुक्त सिद्धसाधन स्यादित्यर्थः।

प्रामाण्यमात्रस्य ज्ञाताज्ञातसाधारणस्य। तज्ज्ञानविषयकज्ञानाजन्येत्यत्र सामान्याभाव-

१. घटवद्भूतलमित्यादौ प्रामाण्यनिश्चयातिरिक्तस्थलेऽपीति भावः।
२. घटादाविति यावत्।

न चैवमनुव्यवसायस्य यावद्व्यवसायविषयविषयिकत्वे भ्रान्तभ्रान्तिज्ञसङ्कर इति वाच्यम्, बाधानवतारदशायां तस्येष्टत्वात्, तदवतारे तस्यैव प्रतिबन्धकत्वात्, उपनायकभ्रान्तेरभावाच्च। अत एवान्यभ्रान्तिज्ञस्य न भ्रमः।

अथ तद्वत्त्वं न धर्मधर्मिवैशिष्ट्यमात्रं किन्तु तस्य विशेषणताविशेषः। स च व्यवसाये भासते नानुव्यवसाये, मनसो बहिरस्वातन्त्र्यादिति चेत्—न। व्यवसायोपनीतत्वेन विशेषणविशेष्ययोरिव विशेषणताविशेषस्यापि तद्विषयत्वात् विशेषणताया निराकरिष्यमाणत्वाच्च। एतेनास्वप्रकाशे न स्वतः प्रामाण्यग्रहः धर्म्यग्रहे तद्धर्माग्रहात्। शब्दगन्धवत् योग्यत्वात् तद्ग्रहेऽपि ज्ञानं प्रमाणमिति

वस्य विवक्षितार्थस्य यत्किञ्चिद्ग्राह्यप्रामाण्याश्रयविषयकज्ञानजन्यत्वेनैव बाधात्। अत एव योगिज्ञानेनापि न सिद्धसाधनम्। तज्ज्ञानस्यातीतानागतसकलज्ञानादिप्रामाण्यादिगोचरस्य स्वग्राह्यप्रामाण्याश्रयीभूते ज्ञानगोचरनिदिध्यासनादिजन्यत्वात्। ज्ञानप्रत्यासत्तिस्थलेऽपि विषयीभूतप्रामाण्यविशिष्टधीजन्यत्वादनुव्यवसायस्य तदजन्यज्ञानग्राह्यताशङ्कैव नास्तीति किमनुपपन्नम्। अत्र च घटज्ञानविषयकज्ञानाजन्यपटज्ञानाग्राह्यतया प्रामाण्यस्य यत्किञ्चित्तादृशज्ञानग्राह्यत्वं साध्यम्। तथा च प्रभावानयं

गर्भतामभिप्रेत्याह—ग्राह्येति। अत एव योगीति। अत्र यद्यपि योगिप्रत्यक्षं तत्तद्विषयध्यानजन्यमित्यङ्गीकारे[1] योगजधर्मः प्रत्यासत्तिर्न स्यात्। ज्ञानस्यैवासत्तित्वसम्भवात्। तस्मादात्मध्यानजन्यः संस्कारो धर्मो वा प्रत्यासत्तिर्विश्वगोचरं योगिना प्रत्यक्षं जनयतीति स्वीकार्यम्। ततश्चासङ्गतमेतत्, तथापि व्यवहितं विप्रकृष्टं च योग्यं योगी गृह्णाति। न त्वयोग्यमपि।

"यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्।
दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता" ॥

इति मतेन प्रामाण्यस्यायोग्यतया योगजप्रत्यक्षाविषयत्वेन सिद्धसाधनपरिहारे उपनीतभानात्मकं योगिप्रत्यक्षमादाय ग्रन्थोऽयं योज्य इति। यद्वा ज्ञातस्यैव प्रकारत्वानुरोधेन योगिनोऽपि तज्ज्ञानविषयकज्ञानापेक्षा, प्रकारत्वाभावे तु साध्यासत्त्वादेव न सिद्धसाधनमिति भावः।

ज्ञानेति। उपनीतभानात्मकमित्यादिकल्पेनोक्तज्ञानेत्यर्थः। अतो न पौनरुक्त्यम्। अनुव्यवसायस्येति। सुरभिचन्दनमितिवत्प्रमात्वविशिष्टा प्रमेति ज्ञानप्रत्यासत्तिजन्यप्रामाण्यज्ञान-

1. अनङ्गीकारे सिद्धसाधनं स्यादेव।

धीर्न स्यात्। स्वप्रकाशेऽपि स्वमात्रसाक्षिणः स्वधर्मग्रहेऽसामर्थ्यात्। सामर्थ्ये वा अप्रामाण्यमपि गृह्णीयात्। परप्रकाशे[1] लिङ्गेन मनसा वा जायमानं ज्ञानं न भ्रमव्यावृत्तं प्रामाण्यं गृह्णीयात् व्यभिचारात्। न च यत्र यदस्ति तत्र तद्गृह्यते। अप्रामाण्यस्यापि स्वतोग्रहापत्तेः। अनुव्यवसायस्यानुमितेर्वा विषयाजन्यत्वाच्चेति निरस्तम्। तद्वति तत्प्रकारकज्ञानत्वं तद्वति तद्वैशिष्ट्यज्ञानत्वं वा प्रामाण्यं व्यवसायस्येति स्वेनानुव्यवसायेनानुमित्या वा तद्ग्रहात्। तद्विषयत्वस्य तत्प्रकारत्वस्य च ज्ञानग्राहकसामग्रीग्राह्यत्वात्।

समर्थप्रवृत्तिमत्त्वात् इत्यादिनैव सिद्धसाधनम्। तन्मते सामान्यप्रत्यासत्त्यभावेन ग्राह्यप्रमाव्यक्तेरनुमितिजनकज्ञानागोचरत्वादिति वदन्ति। तत्र प्रतीकारस्तु तत्पक्षबहिर्भाव एवेत्युक्तप्रायम्। न हि सर्वप्रामाण्यानामेवम्विधानुमितिविषयतानियमो येन पक्ष एव न लभ्येत। एवमन्यत्रापि यत्र सिद्धसाधनमाभाति तत्पक्षबहिर्भूतमेवेत्यवधेयम्। पक्षसंकोचस्य सर्वं ज्ञानं गुण इति शाब्दज्ञानानुव्यवसायस्य तज्ज्ञानविषयकज्ञानजन्यत्वनियमेनावश्यवाच्यत्वात्। न तु तद्भिन्नमेव तज्ज्ञानविषयकत्वेन विवक्षणीयम्। स्वप्रकाशनये सर्वत्र स्वप्रकाशात्मकपक्षज्ञानजन्यत्वात्। प्रामाण्यानुमितेस्तद्भिन्नतज्ज्ञानविषयकज्ञानाजन्यत्वात्तयैव सिद्धसाधनतापत्तेः।

वस्तुतस्तु उद्देश्यासिद्धया न सिद्धसाधनमित्यनुपदमेवाकर इत्यंशतस्तथात्वेऽपि सर्वत्रैवंप्रकाराभावान्न तदिति तत्त्वम्।

अत्र प्रथमज्ञानपदं तत्पदस्य केवलस्य प्रामाण्यप्रत्यवमर्शकतया प्रामाण्यविषयकज्ञानाजन्यज्ञानग्राह्यत्वम्। तन्मते ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वादित्यनुमित्यापि ग्रहे

स्येत्यर्थः। इत्यादिनेति। इदं ज्ञानं प्रमेति प्रमात्वमप्रमाया पूर्वाज्ञातमेव गृह्णन्ती **भट्टमते**ऽनुमितिरादिपदार्थः। **सिद्धसाधनम्।** अर्थान्तरम्। **नैयायिकै**रीदृशानुमित्यनङ्गीकारादिति। **एवमन्यत्रेति।** प्रमावानयमिति शाब्दबोधादौ तत्रापि पदार्थज्ञानस्य तन्मतेऽहेतुत्वादिति। **सिद्धसाधनतापत्तेरिति।** अर्थान्तरापत्तेरित्यर्थः। अत्र दूषणोद्धारे दूषणमिदम्। न च पक्षधर्मताज्ञानं न स्वप्रकाशात्मकमिति तदर्थं तद्भिन्नज्ञानापेक्षणं ज्ञान[2]स्वरूपधर्मवत्तायाः स्वप्रकाशेन भानेऽपि ज्ञानत्वत्वस्याग्रहणात् व्याप्यतावच्छेदकप्रकारकज्ञानस्य चापेक्षितत्वादिति वाच्यम्. विषयताख्येन सम्बन्धेन घट एव यत्र प्रमात्वानुमितौ लिङ्गं तत्र स्वप्रकाशेनैव सकलनिर्वाहः सम्भवतीति सामान्यप्रत्यासत्त्यनङ्गीकर्तृणा साध्यप्रसिद्धेरनपेक्षितत्वादिति भावः।

---

१. परप्रकाशमते कुमारिलमुरारिमते इति यावत्। २. ज्ञानं प्रमा ज्ञानत्वादिति।

सम्भवति । तथा च प्रामाण्यघटकत्वे न विवादः किन्तु सामान्यप्रत्यासत्तौ । तथा च सिद्धसाधनवारणार्थम् ।

द्वितीयज्ञानपदं तु अप्रसिद्धिवारणाय । व्यापारानुबन्धितज्ज्ञानविषयतायाः आत्मादिभिन्नस्यापि जननात् । ज्ञानपदसन्निधौ तु प्रतियोग्यनुबन्धिविषयता लभ्यते ।

तृतीयज्ञानपदं तु मन्मते प्रकारत्वस्य विशेषणत्वस्यैवान्वयितया व्यापारानुबन्धिविषयतायैव तैः मन्मते ज्ञानत्वावच्छिन्नविषयताभावेन तथा सिद्धसाधनवारणाय वस्तुतस्तु उद्देश्यप्रतीत्या (प्रतीत्यसिद्ध्यर्थं न) सिद्धसाधनं व्यक्तमनुपदमेवाग्रे[1] इति. अंशे च तथात्वेऽपि सर्वत्रैव प्रकाराभावान्न तदिति तत्त्वम् । अत्र विधिप्रसिद्धिः प्रागिव व्यतिरेक[2]प्रसिद्धिस्तु तत्तदन्य ग्राह्यत्वाभिमतविशेष्यज्ञानत्वेऽप्रामाण्याश्रयविषयकज्ञानजन्यानुमितिमात्रग्राह्यतयाऽप्रामाण्ये. प्रामाण्याश्रयमात्रपरत्वे तद्वतीत्यादिनियतातीन्द्रियविशेष्यावृत्त्यप्रकारकत्वात् ।

सिद्धेति अर्थान्तरवारणार्थमित्यर्थः । ज्ञानपदसमभिव्याहारात् तदाश्रये लब्धे तद्विषयं ज्ञानं फलज्ञानत्वेनापेक्षितमेवेति भावः ।

आत्मादिभिरिति । अतद्गुणसंविज्ञानो बहुव्रीहिः । तेन शरीरादिभिरित्यर्थः । आत्मादेः प्रागभावाप्रतियोगित्वादिति ।

ननु व्यापारानुबन्धिविषयताकेन व्यवसायादिना[3] अनुव्यवसायादेर्जननात् ज्ञानपदे दत्तेऽपि अप्रसिद्धितादवस्थ्यमित्यत आह—**ज्ञानपदेति** । तैः शरीरादिभिरित्यर्थः । **परेति** । प्रमान्तरगोचरेण ज्ञानेन जनितायाः प्रमान्तरगोचरेच्छायाः तत्प्रकारत्वेन प्रामाण्ये यदर्थान्तरं तद्वारणार्थं चेत्यर्थः ।

अंशतः सिद्धसाधनं दशतोऽर्थान्तरस्याप्यदोषत्वमभिप्रेत्याह—**वस्तुत** इति । प्रमापदप्रवृत्तिनिमित्तत्वादिनाऽनुगतेन रूपेण घटत्ववति घटत्वप्रकारकत्वादीनां फलत्वात्तदंशे इच्छामादाय यदर्थान्तरम्, यच्च पूर्वं प्रमावानित्यनुमितिमादायार्थान्तरमुक्तं तन्न भवतीत्यर्थः । न चैव चरमज्ञानपदवैयर्थ्यं स्यादिति वाच्यम्, प्रथमव्यावर्त्त्येनैव सार्थकत्वात् । इदं च **नवीनमतानुसारेण, प्राचीन**मते अंशतः सिद्धसाधनांशतोऽर्थान्तरवारकयोः सार्थकत्वात् । अत एव प्रथमज्ञानपदस्य अंशतोऽर्थान्तरवारकस्य सार्थकतेति ध्येयम् ।

प्रागिवेति । तज्ज्ञानविषययोरित्यर्थः । पूर्वं यावद्गर्भसाध्यसत्त्वेन तज्ज्ञानविशेष्ययोः स्थलविशेषे प्रसिद्धिः प्रकारीभूते च सर्वस्मिन् प्रसिद्धिरित्युक्तम् । अत्र तु सम्भवमात्रस्य साध्यतया सर्वत्र तज्ज्ञानविशेष्ययोः प्रसिद्धिरिति विशेषः ।

---

१. ०मित्यनुपदमेवाकारे इति राजकीयपुस्तकपाठः ।

२. निषेधप्र० इति रा० पु० पाठः ।

३. व्यवसायोऽपि व्यवसायविषयक एव । स्वजन्यज्ञाने विषयत्वात् ।

न चायं विशेष्यावृत्त्यप्रकारकज्ञानवानित्याद्यनुमितिविषयत्वात्तस्येत्युक्तक्रमेण तत्रापि न व्यतिरेकप्रसिद्धिरिति वाच्यम्, तदनुमित्यविषय एव प्रसिद्धेरुक्तत्वात्।

नन्वेवं समभिव्याहृतपरत्वपक्षे विधिप्रसिद्धिर्दुर्लभा विषयज्ञानादौ, तदाश्रयज्ञानाप्रसिद्धेरिति न, ज्ञानत्वघटत्वविषयत्वादावेव तत्सौलभ्यात्। न चैवं सति प्रामाण्याप्रामाण्ययोस्तज्ज्ञानविषयकज्ञानजन्यज्ञानग्राह्यत्वतदजन्यज्ञानग्राह्यत्वयोरविशेषात् कथमेकत्र स्वतस्त्वं अपरत्र परतस्त्वमिति विभाग इति वाच्यम्, गृह्यमाणप्रामाण्यव्यापकमीदृशं स्वतस्त्वं न तु[1] गृह्यमाणप्रामाण्यव्यापकमिति विवादशरीरत्वात्।

यत्तु सर्वमते[2] तज्ज्ञाननिरूपणाधीननिरूपणे तज्ज्ञानसादृश्यतज्ज्ञानवैशिष्ट्यादौ तज्ज्ञानाभावेऽपि व्यतिरेकप्रसिद्धिः तस्य तज्ज्ञानविषयकज्ञानजन्यज्ञानग्राह्यत्वनियमादिति मतं—तन्न बुद्ध्यामहे। इयमिच्छा ज्ञानसदृशीत्यनुमानेन ज्ञानान्तरसादृश्यबाधेन पक्षधर्मताबलेनापूर्वज्ञानसादृश्यविषयीकरणात्। न च ज्ञानान्तरसादृश्ये तादृशानुमित्यविषये तत्प्रसिद्धिः। प्रामाण्यस्य प्रतिज्ञानव्यक्तिभिन्नभिन्नात्मकस्य सामान्येन रूपेण पक्षतायां तत्तज्ज्ञानविषयकज्ञानाजन्यज्ञानग्राह्यत्वे पर्यवसितसाध्ये तद्व्यतिरेकस्यापि तत्त[3]ज्ज्ञानविषयकज्ञानजन्यज्ञानग्राह्यत्वात्मकस्य[4] तज्ज्ञानविषयकज्ञानातिरिक्तज्ञानग्राह्ये[5] सादृश्यान्तरे प्रसिद्धेः शङ्कितुमशक्यत्वात्। न चोक्तप्रकारेण सादृश्यग्रह एव मानाभावः, बाधकाभावात्। संशयेऽपि समीहितासिद्धेश्च। न च यस्य ज्ञानस्य सादृश्यमीदृशानुमितिगोचरस्तदन्यज्ञानप्रामाण्यमेव पक्ष इति वाच्यं, तस्य[6] स्वतस्त्वासिद्धिप्रसङ्गात्। उक्तक्रमेण सामान्यपक्षतायां सम्भवन्त्यां सङ्कोचस्यानौचित्यात्।

उक्तक्रमेणेति। साध्यप्रसिद्धेः परमतेऽनुमित्यनङ्गत्वेनेत्यर्थः। तत्रापि विधेः प्रसिद्धेः। एवमप्रामाण्यस्यापि साध्यप्रसिद्धिनिरपेक्षानुमितिविषयतायाः।

गृह्यमाणप्रामाण्यव्यापकमिति। गृह्यमाणसकलप्रामाण्यनिष्ठमित्यर्थः।

संशयेऽपीति। निश्चयस्यापेक्षितत्वादिति भावः।

संकोचस्येति। इदं च समाधिसौकर्यादुक्तम्। ईदृशानुमित्यगोचरतायाः अनिश्चयेन सङ्कोचस्यासम्भावितत्वादिति।

---

१. न चेति रा० पु० पाठः। २. 'सर्वमते' इति ग्रन्थो नास्ति पुस्तकान्तरे।

३. तज्ज्ञानेति रा० पु० पाठः। ४. ज्ञानाजन्यज्ञानग्राह्यत्वाभावात्मकस्येति रा० पु० पाठः।

५. 'ज्ञानजन्ये ज्ञानग्राह्ये' इति पाठान्तरम्।

६. तस्येत्यादिप्रसङ्गादित्यन्तः पाठो रा०पु० नास्ति।

वयं तु ब्रूमः—सामान्यप्रत्यासत्तिजन्यप्रत्यक्षनिबन्धनसिद्धसाधनापनुत्तये ग्राह्यत्वस्य प्रकारत्वपर्यन्तपर्यवसाने धर्मिण्येव व्यतिरेकप्रसिद्धिः सुलभा। धर्मस्यैव प्रकारत्वादिति संक्षेपः।

नन्वेव तदनुमित्यविषय एव प्रसिद्धेरुक्तत्वादिति पूर्वोक्तमसङ्गतम्। तादृशानुमित्यविषयताया निश्चेतुमशक्यत्वादित्यरुचेराह—**वयं त्विति**। **धर्मिणीति**। ज्ञानस्वरूप इत्यर्थः। **धर्मस्यैव** ज्ञानत्वस्यैव।

ननु घटत्व बुद्धिस्थीकृत्य घटत्ववति घटत्वप्रकारकत्वपरतया प्रयुक्तेन तद्वति तत्प्रकारकत्वमिति वाक्येन पटत्व बुद्धिस्थीकृतवति श्रोतरि पटत्ववति पटत्वप्रकारकत्व बोध्यते। तत्र प्रकृतप्रामाण्याश्रयीभूतपटज्ञानविषयकज्ञानानपेक्षितत्वात् सिद्धसाधनम्। किञ्च पटत्ववति पटत्वप्रकारकमिद ज्ञानमिति विसंवादिशुकादिवाक्यजज्ञान तज्जन्यसामान्यप्रत्यासत्तिजज्ञान चादाय सिद्धसाधनम्। किञ्च प्रामाण्यघटकान् घटत्वादिपदार्थान् विशकलितानेव जानतो विशेष्ये विशेषणमिति ज्ञानेनोत्पन्नं मानसज्ञानमादाय सिद्धसाधनम्।

किञ्च विषयत्व विहाय प्रकारत्वपर्यन्तधावनं अभिधेयत्वसामान्यजज्ञानमादाय सिद्धसाधनवारणाय तत्र च व्यावर्त्याप्रसिद्धिः। अर्थान्तरवारकत्वेन सप्रयोजनत्वेऽभिधेयमस्तीत्यादिशब्दजज्ञानप्रयुक्तसिद्धसाधनवारकत्वेन व्यावर्त्यप्रसिद्धौ च सत्यामपि प्रकारत्वस्यानिरुक्तिः। तथा हि न तावज्जनकीभूतज्ञानविषयत्वं तत्। परमते बाधात्। नापि भासमानधर्मत्वरूपसम्बन्धकत्वं अभिधेयवानित्यादिबोधमादाय सिद्धसाधनतादवस्थ्यात्। अथ साधारणधर्मानवच्छिन्नस्य प्रकारत्वं विवक्षितम् अत्र चाभिधेयत्वाद्यवच्छिन्नस्य प्रकारत्वमिति चेत्—न। एवं सति साधारणधर्मानवच्छिन्नविषयत्वमेवोच्यता कृत प्रकारत्वपर्यन्तधावनेन। यच्च 'प्रमावानय', 'इद ज्ञान प्रमे'त्येवंरूपामनुमिति प्रमापदादिजन्यशाब्दज्ञान चादायार्थान्तरमाशङ्कित—तदपि न मनोहरम्[1]। निरधिकरणकस्य प्रमात्वस्य प्रमात्वत्वस्य वा ग्रहाभावेनार्थान्तरानवकाशात्। पक्षबहिर्भावस्य च तादृशानुमित्याद्यविषयतानिश्चयत्वाभावेन दुष्टत्वात्। यच्च प्रथमज्ञानपदप्रयोजनमुक्त ज्ञानं प्रमेत्यनुमितिमादायार्थान्तरवारणं—तदपि न। तत्रापि साध्यतावच्छेदकप्रमात्वत्वग्रहावश्यकत्वेनार्थान्तरानवकाशात् यच्च ज्ञानरूपे धर्मिणि व्यतिरेकप्रसिद्धिः—साऽपि न परमते सम्भवति। तन्मते पूर्वज्ञातस्य प्रकारत्वादिति।

अत्रोच्यते—शब्दाप्रयोज्येति चरमज्ञाने विशेषणादाद्यदोषत्रयोद्धारः। वैशिष्ट्यं च प्रकारत्वेनाभिमतम्। न च विशेष्ये विशेषणमितिरीत्या जायमानं मानसज्ञानं विशिष्टं प्रकारी-

1. तत्र पक्षतये इति वा पाठः।

तत्रापि तद्बहिर्भावापत्तेः। साध्ये च न व्यर्थविशेषणता, बीजाभावात्। किञ्च स्वाश्रयग्राहकत्वस्य स्वाश्रयादन्यत्रापि सत्त्वेन नेह व्यर्थविशेषणता। लघ्ववच्छेदकव्याप्यस्यैव गुर्ववच्छेदकस्यैव व्यर्थविशेषणताबीजत्वात्। अन्यथा प्रमात्वमात्रेण व्याप्तिग्रहे प्रमेयत्वेऽपि तदापत्तेरिति समाधेरपि समानत्वादिति।

न त्रिभिरेकदा विवादोऽत आह—स्वाश्रयेणेति। न च स्वाश्रयेणैवेत्येवकारवैयर्थ्यम्। ईश्वरज्ञानग्राह्यत्वेन[1] सिद्धसाधनवारकत्वादिति भावः।

ननु प्रत्येकपक्षे भट्टनये किमनुमितिग्राह्यत्वं साध्यं यावदनुमितिग्राह्यत्वं वा ज्ञाततालिङ्गकानुमितिग्राह्यत्वं वा। आद्ये सिद्धसाधनम्। द्वितीयेऽसम्भवः। तृतीयेऽप्रसिद्धिरिति चेत्—न। ज्ञानानुमितिग्राह्यत्न वेति भट्टैः समं विप्रतिपत्तेः। सा च मतद्वये प्रसिद्धैव। न च प्रमावान् इत्यनुमितिग्राह्यत्वेन सिद्धसाधनम्। ज्ञानत्वावच्छिन्नव्यापकताकलिङ्गकानुमितिग्राह्यत्वस्य तदर्थत्वात्। न च प्रमावान् इत्यनुमितौ तथा। तत्र प्रमात्वस्यैव व्यापकतावच्छेदकत्वात्। यथा च ज्ञानत्वावच्छिन्नायामपि व्यापकतायां तन्मते विशेषलाभः तथाऽनुपदमेव प्रतिपादयिष्यामः।

अंशत इति। यद्यपि यथाविवक्षितसाध्ये प्रामाण्याश्रयीभूतास्मदादिज्ञानाग्राह्यत्वान्न यावद्धर्मसाध्यसम्भवो यथाश्रुते त्वीश्वरज्ञानमादाय प्रामाण्यमात्र एव साध्यमित्युभयथाऽपि नांशतः सिद्धसाधनं, तथापि विवक्षितसाध्यस्य सर्वविषयत्ववति तत्प्रकारकत्वप्रामाण्यादौ सत्त्वेनांशत इत्युक्तमिति भावः। विशेषणं पक्षीकृतप्रामाण्याश्रयज्ञानस्येति

प्रामाण्याश्रयास्मदादिज्ञानमेव गुरूणां सामान्याकारेणाभिमतम्। तथा च विविच्य तदेवोच्यतां कृतमितरविशेषणप्रयासैरिति।

सिद्धसाधनवारकत्वादिति। यावदर्थकत्वादिति भावः। ईश्वर इत्युपलक्षणम्। सर्वविषयकसर्वप्रकारकयोगिज्ञानस्य सर्वप्रामाण्याश्रयतया तद्ग्राह्यत्वेन सिद्धसाधनमित्यपि द्रष्टव्यम्।

ननु व्यावर्त्याप्रसिद्धेर्वैयर्थ्यमिति सर्वं प्रमेयमिति शाब्दज्ञानप्रामाण्यवारणायोपात्तं तदपि वारयतीति।

अत्रेदं चिन्त्यम्। तत्तद्व्यक्तिपरतायां स्वपदस्य कथमीश्वरज्ञानमादाय सिद्धसाधनम्? घटज्ञानादिवृत्तिप्रामाण्यव्यक्तिविशेषानाश्रयत्वात्तस्येति। यथाविवक्षितसाध्ये यावत्स्वाश्रयग्राह्यत्वरूपे। प्रामाण्यमात्रे सर्वस्मिन् प्रामाण्ये। तथापीति। सर्वविशेष्यकत्वे सति सर्वत्वप्रकारकत्व-

1. ग्राह्यत्वे इति रा० पु० पाठः।

शेषः। इदञ्चोपलक्षणम्। जन्यत्वमपि विशेषणम्। ईश्वरज्ञानप्रामाण्ये सिद्धसाधनतादवस्थ्यात्।

पुरमिति। योगजादिजन्यत्वरूपप्रतियोग्यप्रसिद्ध्या तदजन्यत्वाप्रसिद्धेरित्यर्थः।

ननु नेदं विशेषणमुपादेयं, किन्तु यद्वस्तुतस्तदजन्यमुभयानुमतं तत्प्रामाण्यमेव पक्षः। विशेषणत्वेऽपि योगजाद्यजन्यत्वस्य षोढाप्रत्यासत्तिजन्यपरोक्षान्यतरत्वमर्थः कल्प्यतामित्यरुचेराह—प्रामाण्यनात्रेति। पक्षतावच्छेदकभेद एवांशतः सिद्धसाधनं दोष इति किमर्थं पक्षसंकोचो वा विशेषणं वेति भावः।

एतज्ज्ञानग्राहकेति। अत्रापि ग्राहके सविषयकविशेषणोपादानं पूर्ववदेवेत्यवगन्तव्यम्[1]।

विशिष्टेति। अगृहीतासंसर्गकधर्मधर्मिगोचरैकज्ञानत्वमित्यर्थोऽत एव नाग्रिमलाघवासम्भवो न च विशेषणज्ञानं विनेत्यादि अग्रिमदूषणमलग्नकमित्यर्थः।

नापि प्रमाहितेति। ननु ज्ञातताविशेषस्य प्रथममप्रतीतौ वक्ष्यमाणमपि प्रामाण्यं कथं तन्मते ग्रहीतव्यम्। न च घटत्वविशिष्टोऽयं घटत्वप्रकारकधीविशेष्यो घटत्व-

रूपप्रामाण्यस्य ईश्वरज्ञानादावेव वृत्त्या यावत्स्वाश्रयग्राह्यत्वादशतः सिद्धसाधनमित्यर्थः। जन्यत्वमपीति। अत्र च सर्वत्ववति सर्वत्वप्रकारकज्ञानजनक सर्वशब्दादिकमादिपदेन सगृहीतमित्यपि द्रष्टव्यम्। तेन तादृशशाब्दज्ञानादिकमादाय नाशतः सिद्धसाधनम्।

षोढा[2]प्रत्यासत्तीति। उभयसिद्धप्रमात्वविषयताकभिन्न परोक्षमत्र विवक्षितम्। अतो न सर्वशब्दादिजज्ञानमादाय दोषः। तादृशशाब्दज्ञानादिप्रसिद्धौ नैयायिकसिद्धप्रामाण्यविषयताकभिन्नत्वमपि विशेषण ज्ञाने दातु शक्यत एवेत्यप्यरुचिर्द्रष्टव्या। अत्रापीति। अप्रामाण्याग्राहकेति विशेषणादाने पक्षसकोचः पक्षासंकोचे तद्विशेषणदानमित्यन्ततस्तत्र स्वाच्छन्द्यमित्यर्थः। ज्ञानपदादिन प्रामाण्याग्रहणाच्च विषयत्व विशेषण देयमित्यपि ज्ञेयम्।

अगृहीतेति मूलम्। यथार्थत्वे सतीति विशेषणमत्र देयम्। अत एवेति। विशिष्टज्ञानत्वमित्यस्य वैशिष्ट्यविषयकत्वपरत्वाभावादेवेत्यर्थः। यद्यपि अगृहीतेत्यादेरपि परस्परनिरूपितधर्मत्वधर्मित्वावगाहित्वमर्थ इति वैशिष्ट्यविषयकत्व एव पर्यवसानमित्यग्रिमग्रन्थालग्नकत्व तदवस्थमेव, तथापि परस्परनिरूपितत्वभागमादायाग्रिमग्रन्थो योज्य इति भावः।

---

१. अत्रापि ग्राहकविशेषणोपादाने पक्षसंकोचे च पूर्ववत् स्वाच्छन्द्यमित्यवगन्तव्यमिति पाठान्तरम्।

२. षोढेति। यद्यपि भट्टस्य समवायाभावादभावस्यानुपलब्धत्वाद्गुरुमतेऽतिरिक्ताभावाभावाच्चेदमुभयसिद्धं तथापि स्वजनकेन्द्रिययोग्यवर्त्तमानविशेष्यकापरोक्षोभयसिद्धप्रमात्वविषयताकभिन्नपरोक्षान्यतरत्वं विवक्षितमिति।

प्रकारकज्ञानताश्रयत्वादिति पक्षधर्मताबलाद्विशिष्टसिद्धिर्न तु विशिष्टमनुमेयं येन विशिष्टाहितज्ञातताविशेषज्ञानं प्राङ्नियमतोऽपेक्षेतेति वाच्यम्। एवं स्वतः प्रामाण्यग्रहेऽप्रामाण्यस्याप्येवं स्वतोग्रहप्रसङ्गात्। अघटोऽयं घटत्वप्रकारकधीविशेष्यः[1] तथाभूतज्ञातताविशेषवत्त्वादित्यनुमानसाङ्कर्यात्। किञ्चैवमस्माभिरपि समं पर्यवसितं विवादेन। एवं घटत्वप्रकारकज्ञानविशेष्यत्वानुमानसम्भवात्। इयांस्तु विशेषो यदस्मन्मतेऽतिरिक्तज्ञातताभावात्तदनुमापकं लिङ्गान्तरं, तन्मते तु सैव लिङ्गमिति। अपि च ज्ञानातीन्द्रियत्वे साध्यप्रसिद्धिर्जन्मान्तरसंस्कारद्वारैवाद्यानुमानस्य वाच्या। तथा च विशेष्यावृत्त्यप्रकारकज्ञानत्वमेव ततः स्मृत्वाऽनुमीयताम्। न च विशिष्टस्मरणेऽपि तल्लिङ्गपक्षधर्मतानवगम। घटत्वसमानाधिकरणघटत्वप्रकारकज्ञाततावत्त्वस्य तल्लिङ्गस्य ग्रहसम्भवादिति।

अत्राहु—न प्रथमं प्रमाहितज्ञातताविशेषो नियमतः शक्यज्ञानः, प्राग्भवीयसंस्कारस्य विशिष्टस्मारकत्वे मानाभावाच्च विशिष्टज्ञानोपायान्तरस्य वक्ष्यमाणत्वात्, किन्तु ज्ञाततामात्रं शक्य[2]ज्ञानं तज्जन्यानुमितावेव च प्रामाण्यं विषय इति तत्त्वम्। तथा हि–घटमहं जानामीति ज्ञानज्ञानाकार इति सर्वसिद्धम्। स स्वप्रकाशतयाऽन्यथा वेति[3] विवादो, नाकारे, तदाकारधीविषयः प्रामाण्यं न वेत्यत्र तु विवादस्तत्र चाहं ज्ञानवान् ज्ञाततावत्त्वादिति वा घटत्वप्रकारकज्ञानवान् घटत्वप्रकारकज्ञाततावत्त्वादिति वा जायमानानुमितिर्ज्ञानविषया भवन्ती ज्ञानविषयमप्यवगाहमाना धर्मधर्मिवत्तदुभयवैशिष्ट्यमपि विषयीकरोति, ज्ञानविषयत्वाविशेषात्तदाह—व्यवसायरूपेत्यादि।

तथा च घटत्वप्रकारकत्वघटत्ववैशिष्ट्यवद्विषयकत्वे ज्ञानस्यानुमित्या विषयीकृते किमन्यदवशिष्यते प्रामाण्ये ज्ञातुमिति तेषामाशयः। न च प्रत्यक्षेणैव ज्ञानस्य ग्रहे विषयस्य ज्ञानवित्तिवेद्यतेति वाच्यम्। तन्मते तदनभ्युपगमेन तत्स्थानाभिषिक्तानुमितेरेव तथात्वनियमात्। स्ववृत्तिवर्त्तमानज्ञानग्रह एव सर्वमते तथात्वनियमात्। न चानु-

न तु विशिष्टमिति न तु प्रमात्वावच्छिन्नव्यापकमनुमेयमित्यर्थः। ज्ञातताविशेषेति। प्रमापिततेत्यर्थः। तथेति। घटत्वप्रकारकधीविशेष्य इत्यर्थः। तथाभूतेति। घटत्वप्रकारकेत्यर्थः।

घटत्ववैशिष्ट्यवद्विषयकत्व इति। घटत्ववद्विशेष्यकत्व इत्यर्थः। प्रकारत्ववद्विशेष्यत्वस्यापि समानवित्तिवेद्यत्वादिति भावः।

१. घटत्वप्रकारकधीविशेष्यः इति रा० पुस्तके नास्ति।
२. शक्यज्ञानम् इति नास्ति रा० पुस्तके। ३. वेति प्रकारे इति रा० पुस्तके।

मितेर्व्यापकतावच्छेदकप्रकारकतानियमान्नैवमिति वाच्यम्। ईश्वरानुमाने ज्ञाननित्यत्ववदतथाभूतस्यापि तद्विषयत्वात्। यद्धि येन विना न भासते तद्धीहेतोस्तद्बोधकत्वनियमात्। अत एव गुरूणामशक्याऽपि व्यक्तिः शाब्दज्ञाने भासते। अन्यथाऽस्माकमपि ज्ञानप्रत्यासत्त्यादिकमशक्यकल्पनं स्यात्। न च ज्ञाततावत्त्वं समवायेनाप्रसिद्धं जनकतया च व्यभिचारीति वाच्यं, तदायतानियामकस्य सम्बन्धान्तरस्यैवाभ्युपगमादन्यथा[1] नियताधिकरणज्ञानासिद्धिप्रसङ्गादित्यलमननात दिक्।

प्रामाण्यं प्रकृते विचारणीयमिति शेषः। तन्निश्चयादेव तद्विशेष्यकत्वनिश्चयादेवेत्यर्थः।

विशेष्य इति। यद्यपि गुरुमते न वैशिष्ट्यविषयकत्वं प्रामाण्यं तथाप्यस्मदभिमतमपि प्रामाण्यं सुग्रहमेवेत्यभिसन्धायैतदभिधानादित्यन्ये।

वस्तुतस्तु धर्मधर्मिभावात्मकं वैशिष्ट्यं तन्मतेऽपि विशिष्टज्ञानविषय इत्युक्तं विप्रतिपत्तौ, तन्मते तु यथार्थत्वं प्रामाण्यं यथा स्वग्राह्यं तथा अग्रे वक्ष्यते। न चैवं तन्मते ज्ञानत्वमेव तत्। तस्य लक्षणत्वेऽप्यस्वरूपत्वात्। स्वन्नयवद्व्यवहाराप्रयोजकत्वात्।

ज्ञाननित्यत्ववदिति। यद्यपि सर्गादिकालीनद्व्यणुकादिपक्षतया तत्पूर्ववर्तित्वलक्षणानित्यत्वस्य पर्वतीयत्वस्येव पक्षधर्मताबललभ्यत्वेऽपि न व्यापकतावच्छेदकप्रकारकत्वनियमहानिस्तथापि लाघवबलभ्यस्य ध्वंसाप्रतियोगित्वरूपनित्यत्वादेः प्रकारतयेदं द्रष्टव्यम्।

ननु तत्र लाघवमिव नेह तद्बोधकमस्तीत्यत आह—अन्यथेति। यदि विषयं विनापि ज्ञानग्रह इत्युपेय[2] तदा विषयांशे व्यवसायरूपज्ञानस्य प्रत्यासत्तिता प्रकारकत्वांशे च समानवित्तिवेद्यता न कल्प्येतेत्यर्थः। समवायेनेति[3]। तादात्म्येनेत्यर्थः। व्यभिचारीति। ज्ञानादाविति शेषः। आत्मना सह ज्ञाततायास्तदायतानियामकसम्बन्धविशेषानङ्गीकारे नियताधिकरणकं ज्ञानं न सिद्ध्येदित्याह—नियतेति। तद्वति तत्प्रकारकज्ञानत्वादि न प्रमापदप्रवृत्तिनिमित्तं, स्मृतावपि गतत्वात्, तत्र च प्रामाण्यव्यवहाराभावादित्यत आह—प्रकृत[4] इति। तन्निश्चयादेवेत्यत्र सन्निहितत्वेन तद्वैशिष्ट्यज्ञानत्वस्य तत्पदेन परामर्शशङ्कां निराकरोति—तद्वद्विशेष्यकत्वादिति। ज्ञानत्वमेव तदिति। ज्ञानत्वमेव यथार्थत्वनियतमिति तदेव प्रामाण्यमस्त्वित्यर्थः। तस्येति। ज्ञानत्वस्येतरव्यावर्त्तकत्वेऽपि निष्कम्पप्रवृत्त्युपयोगित्वाभावेन प्रकृते विचारणीयत्वाभावादित्यर्थः। ननु

---

१. अन्यथा इति नास्ति रा० पुस्तके।

२. यदि विषयं विनापि ज्ञानग्रहोऽनुव्यवसाये तदा न विषयग्रहाय प्रत्यासत्तिः कल्प्येत्यर्थः।

३. 'समवायेनासिद्धमि'ति। ज्ञाततायास्तैर्विषय एव घटादौ समवायस्वीकारान्नात्मनीत्यर्थः।

४. 'प्रकृत' इति। तथा च प्रवर्त्तकज्ञानप्रकारनिर्वचनमिदं न लक्षणनिर्वचनमिति न दोष इत्यर्थः।

विषयनिरूप्यमिति । **विषयाविषयकज्ञानाविषय इत्यर्थः ।**

व्यवसायेति । **व्यवसायविषयताया नियामिकायास्तुल्यत्वादित्यर्थः ।**

ननु विषयनिरूप्यं ज्ञानं न तु यावद्विषयनिरूप्यमित्यग्रे वक्ष्यते । तथा च वैशिष्ट्यविषयकत्वावश्यकत्वे मानाभाव । व्यवसायेत्यादेस्तत्रैवानैकान्तादित्यरुचेर्नियामकान्तर[1]**माह**—सम्बन्धिनेति । **तन्निर्विकल्पकात्तत्सम्बन्धानवगमे तद्विशिष्टधीनिरूप्यत्वे**

विषयनिरूप्यमिति[2] मूले वैयधिकरण्य विषयनिरूप्यत्वस्य हेतोर्ज्ञाननिष्ठत्वात् साध्यस्य च विषयगतत्वात् । न च ज्ञानवित्तिवेद्यो विषय इत्यस्य विषयवित्तिवेद्य ज्ञानमित्यर्थः तथा च सामानाधिकरण्यमक्षुण्णमिति वाच्यम् ।

साध्याविशेषापत्तेरित्यत आह—**विषयाविषयकेति**[3] । तथा च विषयाविषयकज्ञानाविषयत्वं हेतुः विषयविषयकतानियतस्वविषयकज्ञानवत्त्व साध्यमिति नोक्तदोषद्वयावकाश इति भावः । ननु विषयाविषयकज्ञानाविषय इत्यत्र ज्ञानपदेन प्रत्यक्ष वक्तव्यम्, ज्ञानपदादिना विषयनिरपेक्षेण ज्ञानज्ञापनात् । तथा च **भट्टमते**ऽनुमितिग्राह्यत्वान्नेय युक्तिरित्यस्वरसात् **टीकाकृद्वक्ष्यमाण**स्वरसाद्वा **व्यवसायेति** मूलम् । तदप्यसङ्गतम् । अनुमितौ स्वप्रकाशे च ज्ञानप्रत्यासत्त्युपवर्णनविरोधादित्यत आह—**व्यवसायविषयताया** इति ।

प्रथमा युक्ति दूषयति—**नन्विति** । द्वितीया दूषयति—**व्यवसायेति** । **तत्रैवेति** । ज्ञानग्रहणकाले यावद्विषयग्रहानियमेन य एव विषयो न भासते तत्रैवेत्यर्थः ।

ननु सम्बन्धितावच्छेदकेत्यादिना घटज्ञानग्रहणकाले घटस्य घटत्वेन रूपेण ज्ञायमानताऽस्तीत्येतावन्मात्रमायाति[6] न तु ज्ञानग्रहणे घटत्वेन रूपेण घटो विषय इत्यपीत्यत आह—**तन्निर्विकल्पकादिति** । सम्बन्धिनिर्विकल्पकात्तदीयसम्बन्धानवगमे सम्बन्धज्ञानं प्रति सम्बन्धितावच्छेदकप्रकारकसम्बन्धिज्ञानस्य जनकत्वे कल्प्यमाने सम्बन्धज्ञानत्वापेक्षया ससम्बन्धिकज्ञानत्वस्य सामान्यतया विभागादिज्ञानसाधारणतया च तदवच्छिन्न प्रत्येव तज्जनकत्वकल्पनात् ससम्बन्धिकपदार्थस्य सम्बन्धितावच्छेदकावच्छिन्ननिरूप्यत्वे यद्यन्निरूप्यमिति व्याप्तिबलात्तद्वित्तिवेद्यत्वमित्यर्थः ।

---

१ नियमो(मे) मानान्तर इति रा० पु० पाठ ।

२. ननु विशेष्ये तद्धर्मवत्त्वादिकं बहिरर्थं कथं मानसानुव्यवसायगम्य इत्यत आह—'विषयनिरूप्यमि'ति मूलम् ।

३. ननु विषयनिरूप्यत्वेन ज्ञाननिरूपणे विषयः कारणमायाति न तु ज्ञाननिरूपणे विषयविषयकत्वमित्यन्यथार्थमाह—'विषयाविषयके'ति ।

४. तावता ज्ञानवित्तिवेद्यत्वं नागतमिति भावः ।

यद्यन्निरूप्यं तत्तद्वित्तिवेद्यमिति व्याप्तेरिति भावः। अत एवेत्यादि गुरुमतमपहाय वादित्रये समुपस्थिते यथासुखं क्वचित् कस्यचिन्मतन्नाशङ्कितमिति[1] न नानाग्रिमग्रन्थविरोधः।

प्रामाण्यन्येति। समानवित्तिवेद्यभिन्न एव तथानियमादिति भावः।

अभावेति। नहि अभावे अभावत्वं प्रतियोगिनि वा प्रतियोगित्वमवगम्य तद्विशिष्टधीरपि त्वारोपानारोपयोरेकदैवोभयधीरित्यर्थः।

नन्विदमयुक्तम्। तथा हि प्रतियोगित्वं तत्स्वरूपमस्तु भासतामभावत्वन्तु द्रव्यादिषट्कान्योन्याभाववत्त्वरूपं कथं पूर्वानुपस्थितं भासेत द्रव्यत्वाद्यभाने तदप्रतीतेरित्यभावांशे निर्विकल्पकमेव प्रथमं यदा त्वभावत्वं स्मर्यते तदा तद्विशिष्टधीरिति चेत्—मैवम्। प्रतियोगित्ववदभावत्वस्याप्यभावरूपतया पूर्वाप्रतीतस्य भानसम्भवात्। न ह्यभावत्वबुद्धावुक्ताभावत्वविषयत्वसम्भवः। तस्य विभाजकोपाधिरूपाभावत्वरूपत्वान्न त्वभावत्वधीविषयाभावत्वसपत्नम्, अन्यथा तत्राप्यभावत्वस्योक्तस्यैव वाच्यतया प्रतीतावनवस्थापत्तेः। न च स्मरणं गतिरननुभवेन तदसम्भवात्। न च जन्मान्तरानुस्मरणान्निस्तारः, घटाभावे तदभावत्वस्मरणेऽपि द्रव्याद्यभावादावप्यभावत्वस्योक्तस्यैव स्मरणे एवं तत्राप्युक्ताभावत्वविशेषणे तन्निष्ठस्यापि तस्य स्मरणे तस्य विषयनिष्ठाभावेन विषयानवस्थाप्रसङ्गात्। न चाभावरूपस्यैवाभावत्वात्मकत्वे प्राग्ध्वंसाभावयोस्तद्बुद्ध्यनुदयापत्तिस्तयोः स्वावृत्तित्वादिति वाच्यं प्रागभावत्वादिनाऽतथात्वेऽपि अभावत्वेन तयोः स्ववृत्तित्वात्, अन्यथा घटात्यन्ताभावधीरपि तत्र न स्यादन्यस्य तस्याभावादिति दिक्।

यद्यपि प्रत्यक्षे तद्वित्तिवेद्यत्वं नान्यत्र संयोगे गुण इत्यादौ शाब्दादिसंयोगप्रतीतौ सम्बन्धिनो विषयत्वाभावात्तथापि व्यवसायेत्यादिमध्यमयुक्तावेव तात्पर्यम्। न च तत्रापि दोषो दत्त एवेति वाच्यम्। यावद्विषयनिरूप्यत्वस्य विनिगमनाविरहेणार्थात् सिद्धेः। अत एवाह मूले—**तुल्यत्वादिति**।

गुरुमते व्यधिकरणप्रकारकज्ञानासत्त्वादाह—**अत एवेत्यादीति**।

अथ तद्वत्त्वमित्यग्रिमग्रन्थो न **भट्टमते** सङ्गच्छते। तन्मते अनुमितिवेद्यत्वादित्यत आह—**वादित्रय** इति।

समानेति। समानवित्तिवेद्यातिरिक्तविशेषणस्यैव विशिष्टबुद्धौ पूर्वज्ञानापेक्षा न तु सर्वस्येत्यर्थः। **तथात्वेऽपीति**। स्वावृत्तित्वेऽपीत्यर्थः। **तत्रेति**। प्रागभावे ध्वंसे चेत्यर्थः।

इति दिगिति। यद्यपि द्रव्यादिषट्कान्योन्याभावव्यतिरेकाऽभावत्वमित्युच्यते, तत्र

---

१ मतमाशङ्कित० इति रा० पु०।

तदवतारे तत्प्रतिबन्धकत्वमयुक्तं सङ्करापादनस्य तत्प्रवृत्त्यापादनरूपतया जनकज्ञाने विद्यमाने तदसम्भवादित्यत आह—उपनायकेति। तद्विषयत्वमात्रग्रहेऽपि तद्विशेष्यकत्वोपनयनाभावादित्यर्थः। तथा च बाधेन स्वातन्त्र्येण तद्वैशिष्ट्यधीरेव धर्मिणि प्रतिबध्यत इति जनकधीविघटनमेवेति भावः। न तु बाधेन भ्रान्तिविनाशादेव नोपनय इत्यर्थः। श्वैत्यानुमित्यनन्तरं भ्रान्तिप्रामाण्यग्रहापत्त्या सङ्करापत्तेर्दुर्वारत्वादिति।

शब्दगन्धवदिति। दोषसौकर्यादुक्तम्। वस्तुतो ज्ञानानुपनीतस्य मनसा स्वातन्त्र्येण ग्रहे शंकैव नोदेति मनसो बहिरस्वातन्त्र्यादिति ध्येयम्।

स्वधर्मग्रहे विषयविशेषाङ्कितस्वधर्मग्रहे।

परप्रकाश इति। वस्तुगत्या यद्भ्रमव्यावृत्तं प्रामाण्यं तल्लिङ्गेन मनसा वा जायमानं ज्ञानं न गृह्णीयात्। प्रमायामेव तद्ग्रहो न भ्रम इति न स्यात्। सामग्रीसाम्यादिति भावः।

जायमानमिति पाठे न गृह्णीयान्न ग्राहयेत्।

व्यभिचाराद्व्यभिचारप्रसङ्गात्। बाधावतारेऽपि गृह्णीयादिति यावत्।

चाभावत्व सदपि प्रतीतौ न विषयः। व्यक्त्यैक्येनैवाननुगमनिरासे तत्प्रवेशे मानाभावात्। स्वात्मकस्यैव प्रवेशाद्वा। तथा च क्वानवस्था? नापि प्रतियोगिज्ञानापेक्षा। अत एव नाभावे निर्विकल्पकमिति मतेनेदम्। वस्तुतः तत्प्रकारककिञ्चित्प्रतियोगिज्ञानस्यापेक्षितस्य सत्त्वात्। समाधिसौकर्येणैवेदमुक्तम्।

ननु तथापि प्रतियोगित्व स्वरूपसम्बन्धात्मकमिति न युक्तम्, तथा सति पूर्वज्ञातस्यैव प्रकारतापत्तेरिति चेत्—न। अभावविरहात्मकत्व हि प्रतियोगित्वम्। तत्र विरहत्वभागः स्वरूपात्मकः अभावांशश्च पूर्वज्ञात इत्यादाय पूर्वज्ञातत्वस्वरूपात्मकत्वयोरुपपत्तिरिति। **तद्विशेष्यकत्वेति**। वस्तुगत्या तद्वत्त्व वा न तत्र विशेष्य इति ग्रहाभावादित्यर्थः। **श्वैत्येति**। यत्र प्रथमत एव बाधस्तत्र बाधेन भ्रान्तिविनाशासम्भवादिति भावः।

मूलेऽस्वप्रकाश इत्यादिक **परप्रकाशे** इत्यतः पूर्वं **प्राभाकरमते** बोद्धव्यम्। तत्र च **प्राचीनप्राभाकरमते** स्वयमविषयीभावेऽपि स्वस्मिन् व्यवहारप्रवर्त्तनमेव स्वप्रकाशत्वम्। **अर्वाचीनप्राभाकरमते** च स्वविषयकत्वमेव तदित्युभयमाशङ्कितम्। **ज्ञानेति**। ज्ञानमनुपनीतमभात यत्र तादृशस्य तद्वति तत्प्रकारत्वस्य स्वातन्त्र्येण ज्ञाननिरपेक्षेण शङ्कैव न भवति। स्वरूपसम्बन्धात्मकविशेष्यत्वादेर्ज्ञानस्वरूपपर्यवसायितया ज्ञानाग्रहे ग्रहासम्भवादित्यर्थः। **मनसेति** च मानसज्ञानस्थलाभिप्रायेण। यद्वा मनःपदेन ज्ञान लक्ष्यते। तथा च मनसो ज्ञानस्य बहिर्ज्ञाननैरपेक्ष्येणास्वातन्त्र्यात्तद्वद्विशेष्यकत्वादिग्रहासामर्थ्यात्। स्वप्रकाशे ज्ञानत्व भासत एवेत्यत आह—**विषयेति**। **भ्रमव्यावृत्त**मितिमूलस्य क्रियाविशेषणपरतेति परमार्थः। तेन भ्रमव्यावृत्त यथा स्यात् तथा न गृह्णीयादित्यर्थः। **व्यभिचारादिति**। ग्राहकसामग्र्या भ्रमेऽपि गतत्वादित्यर्थो मूलस्येति तत्त्वम्।

यदि[1] च प्रामाण्यं परतो ज्ञायेत[2] तदा प्रामाण्यज्ञानेऽपि तदनुमापकलिङ्ग-पक्षव्याप्त्यादिज्ञानेषु च स्वविषयनिश्चयार्थं प्रामाण्यस्य परतो ज्ञेयत्वे फल-मुखी कारणमुखी चानवस्था स्यादिति प्रामाण्यं न[3] ज्ञायेतैवेति[4] परिशेषादपि स्वतः प्रामाण्यग्रह इति पूर्वपक्षः।

सिद्धान्तस्तु प्रामाण्यस्य स्वतो ग्रहेऽनभ्यासदशोत्पन्नज्ञाने तत्संशयो न स्यात्। ज्ञानग्रहे प्रामाण्यनिश्चयात्। अनिश्चये वा न स्वतः प्रामाण्यग्रहः। ज्ञानाग्रहे धर्मिज्ञानाभावात् न संशयः।

ननु[5] कोटिस्मरणादिना संशयपूर्वक्षणे व्यवसायस्य विनाशान्न तद्विशेष्यको मानसः संशय इति चेत्—न। ज्ञानोपनीते व्यवसाये प्रामाण्यसंशयात्।

ननु धर्मिज्ञानं न संशयहेतुः। कोटिज्ञानविशेषादर्शनधर्मीन्द्रियसन्नि-कर्षात् प्रामाण्यसंशयरूप एव ज्ञानग्रह उत्पद्यत इति चेत्—न। ज्ञानातीन्द्रियत्वेन तज्ज्ञानं विना तद्धर्मिकमानससंशयानुपपत्तेः। लिङ्गञ्च न संशयजनकं

अनुव्यवसायेति। विषयाभावाज्ज्ञानाभावे विषयजन्यत्वमभिमतम्, न चैत-त्सम्भवति, अनुव्यवसायस्य ज्ञानानुमितेश्च स्वविषयीभूतज्ञानविषयाजन्यत्वात् प्रामा-ण्यादीनां तद्घटितत्वादित्यर्थः।

तद्वतीति। प्रागुक्तयुक्तेर्बाधावतारानवतारयोस्तन्त्रत्वादिति भावः।

ज्ञानातीन्द्रियत्वेनेति। सन्निकर्षस्य योग्यव्यक्तीयस्य ज्ञानजनकत्वेनायोग्ये ज्ञानो-पनयं विना तद्धर्मिकसंशयाभावादित्यर्थः।

ननु प्रत्यक्षरूपे संशये सन्निकर्षो न तु ज्ञाततारूपलिङ्गजेऽपीत्यतो लिङ्गञ्चेति मूलम्। यद्यपि लैङ्गिकसंशयपक्षेऽपि पक्षज्ञानापेक्षाऽस्त्येव तथापि वस्तुस्थित्यनुरोधात् तस्येत्याद्युक्तम्। यद्वा धर्मिसन्निकर्षस्य धर्मिज्ञापकत्वेन रूपेण संशयजनकतया प्रकृते धर्मिज्ञापकं ज्ञातताख्यलिङ्गमेव संशय-जनकमस्त्वित्याशङ्काया लिङ्गञ्चेत्यादि।

---

१. न्यायमते बाधकमाह–यदीत्यादिना। २. न स्वतो ज्ञायेत इति शेषः।
३. न' इत्यतोऽग्रे परत इत्यधिकः पाठो राजकीयपुस्तके।
४ तेतिवेति पाठो राजकीयपुस्तके।
५. न्यायमतेऽपि संशयासम्भवमाशङ्कते–नन्वित्यादिना।

तस्य निश्चायकत्वात्। ज्ञानस्य[1] मानसत्वे[2] च प्रामाण्यज्ञानवत्तत्सामग्रयपि

तस्य निश्चितस्य। तदनिश्चये तज्ज्ञानधर्मिकनिश्चयोऽपि न स्यात्, तस्यानुमेयत्वात्। तथा च ज्ञानं प्रमा नवेति सुतरां न संशय इति भावः।

मिश्रमुद्दिश्याह—ज्ञानस्येति। तन्मते ज्ञानेन्द्रियसन्निधेरेव प्रामाण्यग्रहसामग्रीत्वेन तत्प्रतिबन्धादेव संशयानुत्पत्तिरित्यर्थः। न च स्थाणुपुरुषसंशयोऽपि कथमेवमिति वाच्यं, सामग्री न कारणमात्रमतिप्रसङ्गात्, किन्तु फलायोगव्यवच्छिन्नम्। यथा चैतत् तथा हेत्वाभासे कथयिष्यते। न च स्थाण्विन्द्रियसन्निकर्षादिस्तथा, दोषप्रवेशादग्रहोपपत्तेः। न चेह तथा कश्चिदस्ति दोष इत्यपि वक्ष्यते।

ननु अप्रामाण्यग्राहकसामग्रीसमवधानमेव दोषोऽत एव तदसमवहितज्ञानग्राहकसामग्र्येव प्रामाण्यग्रहसामग्रीत्वेन विप्रतिपत्तौ दर्शितेति चेत्—मैवम्। पूर्वमप्रामाण्यस्मरणाभावेऽपि ज्ञानेऽनभ्यासदशापन्नतया संशयदर्शनात्।

किञ्च तेन सहागृहीतासंसर्गाप्रामाण्यग्रहसामग्रीसमवधानं दोषो वाच्यः। अन्यथाऽतिप्रसङ्गात्। तथा चासंसर्गग्रहविरहेऽपि तस्य नियामकत्वादित्यलमनेनेति भावः।

ननु सन्दिग्धस्य लिङ्गस्य सशयजनकत्वमस्त्येवेत्यत आह—**निश्चितस्येति**। **पूर्वमप्रामाण्येति**। यद्यपि धर्मिज्ञानानन्तर अप्रामाण्यस्मरणेऽपि तदव्यवसितत्वमेव तत्समवधान अन्यथा इद ज्ञानमप्रमेत्यत्रापि ग्रहणस्मरणात्मकक्रमिकज्ञानद्वयसत्त्वादाद्येन ग्रहणेन प्रामाण्यग्रहणापत्तेः, तथापि स्वानुव्यवसायात्मकधर्मिज्ञाने प्रथमतो वृत्ते चिरकालेन स्मृते तत्र धर्मिणि प्रामाण्यसंशयो मूलकारेणोक्तो न स्यात्। तत्र प्राथमिकधर्मिज्ञानस्य प्रामाण्यग्राहकसामग्र्यसमवहितत्वेन प्रामाण्यविषयकत्वेन तन्मूलकधर्मिस्मरणस्यापि प्रामाण्यविषयकत्वप्रसङ्गादिति भावः।

गुरुमतेऽप्येवं शङ्कासमाधाने ध्येये। यद्वा एतदस्वरसादेवाह—**किञ्चेति**। **असंसर्गेति**। प्रमात्वतदभावकोटिकसंशये प्रमाण्याभावासंसर्गाग्रहः प्रमात्वाग्रहपर्यवसितो दोषान्तरं विना कथमित्यर्थः।

---

१. मुरारिमते दोषमुद्घाटयति—ज्ञानस्येत्यनेन।

२. ज्ञानस्य लौकिकमानसप्रत्यक्षत्वमते चेति भावः।

संशयप्रतिबन्धिका तन्निश्चायकत्वात्। अन्यथा विशेषदर्शनकालेऽपि संशया-

अन्यथेति। विशेषदर्शनकाले व्याप्यदर्शनकाले संशयापत्तेरित्यर्थः। तस्यैव पुरुषत्वादिज्ञानसामग्रीत्वात्।

नतु व्याप्यदर्शनं साक्षादेव संशयविरोधि, न त्वन्यतरकोटिनिश्चयसामग्रीत्वेन। प्रतिबन्धकसामग्र्याः प्रतिबन्धकत्वेऽपि मणिपूर्वमपि दाहानापत्तेः। तथा च कथं ज्ञानेन्द्रियसन्निधानात्संशय इति चेत्—नैवम्। तत्सामग्रीत्वस्याननुगतत्वात्। न तु व्याप्यदर्शनत्वेन विरोधिता। एवं सति गन्धादिज्ञानस्यापि पृथग्विरोधित्वेऽननुगमापत्तेः। न हि गन्धादिव्यञ्जकाग्रहे पृथिवीत्वादिसन्देहो गन्धादिग्रहमात्रान्न निवर्त्तते, अपि तु तद्व्याप्यत्वनिश्चयादित्यत्र मानं किञ्चिदस्ति। यदेव हि व्यञ्जकसत्त्वेऽपि दोषप्रतिबन्धान्न प्रथते तत्संशयोत्तरनिर्णय एव व्याप्यदर्शनस्य हेतुत्वात्। अत एवान्धकारे घटो न वेत्यादिसंशयः सत्यालोकसमवधान एव निवर्त्तते, न तु व्याप्यदर्शनं विना विलम्बत इति सर्वसिद्धम्।

नन्वेवमालोकसमवधानकालेऽपि संशयो न स्यात् व्याप्यदर्शनकाल इव सामग्रीकालत्वस्योभयतुल्यत्वादिति चेत्—न। संशयविरोधिनिश्चयसामग्र्या एव तद्विरोधित्वात्। संशयविरोधी च निर्णय समानप्रकारकः घटो गेहनिष्ठो गेहं घटवदित्यादिः। न चालोकसमवधानं तदातनं तत्सामग्री। तस्य विशिष्टज्ञानतया विशेषणज्ञानादिसापेक्षत्वादन्तरा निर्विकल्पकादिसम्भवात्। मणिस्थले तु तत्सामग्री न प्रतिबन्धिकेति न दोषः। प्रतिबन्धकसामग्रीमात्रस्याप्रतिबन्धकत्वात् फलबलेन ज्ञानात्मकप्रतिबन्धकसामग्र्या एव तथात्वकल्पनात्।

ननु यदि व्याप्यदर्शनस्य निर्णयसामग्रीत्वेन विरोधिता, न तु स्वातन्त्र्येण, तदा

व्याप्यदर्शनकाले व्याप्यदर्शनोत्पत्तिकाले, विरोधिदर्शनस्य संशयप्रतिबन्धकत्वेऽपि तत्सामग्र्या विशेषदर्शनस्याप्रतिबन्धकत्वादित्यर्थः। न चैतावता संशयं प्रति व्याप्यदर्शनस्य प्रतिबन्धकत्वमायातु न तु विरोधिनिश्चयसामग्र्या इत्यत आह—**तस्येति**। **साक्षादेव** व्याप्यदर्शनत्वेनैव।

ननु संशयविपर्ययोत्तरप्रत्यक्षे व्याप्यत्वप्रकारकज्ञानस्य कारणत्वमेव तत्र मानमित्यत आह—**यदेव हीति**। तथा च संशयविपर्ययोत्तरप्रत्यक्षमात्रे व्याप्यत्वप्रकारकं ज्ञानं न कारणमिति भावः। तत्रैवोपोद्बलकमाह—**अत एवेति**। **आलोकसमवधानकाले** आलोकसमवधानोत्पत्तिकाले। **प्रतिबन्धकसामग्र्या** इत्यादिकमुक्तं निराकरोति—**मणीति**। **ज्ञानात्मकेति**। विपरीतनिश्चयेत्यर्थः।

आलोकः

व्याप्यदर्शने सत्यपि नान्धकारे घटसंशयो निवर्त्तेत, आलोकं विना घटाद्यनिश्चयेन तद्-व्याप्यदर्शनस्य घटनिर्णयसामग्रीत्वादिति चेत्—न। तदातनस्य व्याप्यदर्शनस्यानुमितिरूपनिर्णयसामग्रीत्वात् संशयविरोधिता प्रत्यक्षवदनुमितावपि तुल्या।

नन्वेवं पर्वते वह्निव्याप्य इति धीर्न संशयविरोधिनी स्यात्, तस्या अनिर्णयसामग्रीत्वात्, तत्प्रत्यक्षस्यासम्भवात्, अनुमितौ च पक्षविशेष्यकपरामर्शस्य हेतुत्वादिति चेत्-न। पर्वते वह्निरित्यनुमितिं प्रति तत्सामग्रीत्वसम्भवात्। जनकज्ञानोपसर्जनीभूतस्य जन्यज्ञानेऽपि प्रत्यक्षेतरे तथात्वमिति नियमस्यैवमप्यभङ्गात्। न चैवं व्यापकत्वपरामर्श एव हेतुः स्यात्। तथा सति कदाप्यग्निमान् इत्यनुमितिर्न स्यादिति वक्ष्यमाणत्वादिति दिक्।

यत्तु व्याप्यदर्शनोत्तरकाले विपरीतदर्शनकाले वेति व्याख्यातं-तन्न। तत्कालानुत्पत्त्या तत्सामग्रीप्रतिबन्धकत्वाप्राप्तेः। प्रतिबन्धकाभावस्य कार्यसहभूतत्वेन[1] हेतुतया प्रतिबन्धकसत्त्वकाले कार्यानुत्पादस्य तत्सत्त्वनिबन्धनतयाऽन्यानपेक्षणात्। न च तस्य तथाहेतुत्वमेव नेति वाच्यं, आकर एवेश्वरवादे तस्य स्फुटत्वात्। न च सामग्रीप्रतिबन्धकत्वादेव मण्युत्पत्तिकाले दाहाभावेन स पक्षो नेति वाच्यं, तथा सत्युभयप्रतिबन्ध-

दर्पणः

ज्ञानान्तरकेति। विपरीतनिश्चयेत्यर्थः। अत एव **ग्राह्याभावनिश्चयसामग्र्या** इति स्वयमेवाग्रे वर्णयिष्यति। भूतले घटाभाव इतिज्ञानानन्तरं घटाभाववद्भूतलमिति प्रत्यक्षस्थले व्यभिचारादाह-**प्रत्यक्षेतर** इति। प्रत्यक्षमितरद्यस्मादिति बहुव्रीहिः। तेन सर्वनामकार्याभावः। एवं पक्षविशेषणकानुमितिस्वीकारे व्यापकपरामर्शस्यानुमितिजनकत्वे पक्षविशेषणकानुमितिः स्यादित्येव बाधकम्। तच्च पक्षविशेषणकानुमितिस्वीकर्त्तुर्नानिष्टमिति भावः। व्यापकपरामर्श एव हेतुरितिनियमे पक्षविशेष्यिका कदाप्यनुमितिर्न स्यादिति तत्र बाधकमित्याह-**कदापी**ति। **दिगर्थ**स्तु अन्वयव्यतिरेकाभ्यामनुमितौ व्याप्यव्यापकसामानाधिकरण्यधीर्हेतुस्तथा च तदनुरोधेन व्यापकत्वमपि सामानाधिकरण्यघटितमेव निर्वाच्यमिति व्याप्यापेक्षया व्यापकत्वे लाघवाभावात् व्यापकपरामर्श एव हेतुरित्यवधारणमसङ्गतमिति।

व्याप्यदर्शनोत्तरकाले इत्यस्य विवरणं विपरीतदर्शनकाल एवेति। **विपरीतदर्शनकाले वेति** क्वचित्पाठः। तदा स एव क्षणः व्याप्यदर्शनोत्तरकालत्वेन विपरीतनिश्चयाधिकरणत्वेन वा विवक्षित इत्युपाधिभेदमात्रेण वाशब्दः।

आकर इति प्रतिबन्धकाभावस्य कार्यसहभूतत्वेन जनकत्वाभावे मण्युत्पत्तिकाले दाहापत्तिरित्यस्य मूले व्यक्तत्वादित्यर्थः। ननु प्रकृतेऽपि विपरीतनिश्चयतत्साम समवधानयोः

१. दर्पणपाठानुरोधेन 'सहभावेन' इत्यस्य स्थाने 'सहभूतत्वेन' इतिपाठः स्वीकृतः।

कत्वादुभयाभावहेतुत्वकल्पनागौरवात्। प्रकृते च व्याप्यदर्शनकाले संशयाभावेनागत्या तत्कल्पनात्। न च तदप्यसिद्धं, अनुभवविरोधात्, करादिमति पुरुषत्वज्ञानत्वादिप्रामाण्यव्याप्यग्रहे प्रामाण्यसंशयाभावादित्याद्यग्रिमग्रन्थविरोधाच्च[1]।

किञ्चाभ्यासदशापन्ने न प्रामाण्यसंशय इति सर्वसिद्धम्, अन्यथाऽतिप्रसङ्गात्, प्रामाण्यग्रहणोपायानुसरणायासवैयर्थ्याच्च। तत्र संशयानुत्पत्तौ च न तज्जातीयत्वग्रहादन्यत्प्रयोजकम्। न च त्वन्मते तत्प्रतिबन्धकं, व्याप्यग्रहेऽपि संशयाभ्युपगमात्। न चात्रेव तत्रापि निर्णयसामग्रीत्वं, प्रामाण्यानुमित्यनावश्यकत्वात्। न च त्वन्मतेऽप्येष तुल्यो दोषः, यदवच्छेदेन विपरीतनिश्चयः तद्ग्रहस्यापि पृथगेव संशयविरोधित्वाभ्युपगमात्। अत एव धूमत्वेन व्याप्तिं परिच्छिन्दतस्तव पक्षधर्मधूमे धूमत्वग्रहे न व्यभिचारसंशय इति वक्ष्यते। न च ममापि तुल्यः परीहारः। न तुल्यः, तज्जातीयत्वज्ञानकाले संशयाभावाय तत्सामग्रीप्रतिबन्धकत्वस्य त्वया वाच्यत्वात्। तथा चातिगौरवम्, तज्जातीयत्वग्रहोत्तरसंशयापत्तिश्च, तत्सामग्र्यानन्तत्वात्। न च व्याप्य-

शङ्कयाह—प्रकृते चेति। व्याप्यदर्शनकाले व्याप्यदर्शनोत्पत्तिकाले। तथा च प्रामाणिक गौरवमिति भावः। तदपीति। व्याप्यदर्शनोत्पत्तिकाले संशयो नोत्पद्यत इत्यपीत्यर्थः। अग्रिमग्रन्थेति। तद्ग्रन्थस्योत्पत्तिस्थितिक्षणसाधारणत्वादिति भावः।

किञ्चेति। तज्जातीयत्वग्रहकाले न संशय इति सामान्याकारेण तज्जातीयत्वग्रहोत्पत्तिकालेऽपि संशयानुत्पत्तिः सकलसिद्धा। न चैतत्तव सङ्गच्छते, व्याप्यदर्शनोत्पत्तिकाले इव तज्जातीयत्वग्रहोत्पत्तिकालेऽपि संशयसम्भवादित्यर्थः। निर्णयसामग्रीत्वावच्छेदेन संशयविरोधिनः सर्वस्य उत्तरक्षणे संशयविरोधित्वं न तूत्पत्तिक्षणे। तथा च निर्णयसामग्रीभूतायास्तज्जातीयत्वधियोऽपि उत्पत्तिक्षणे संशयाप्रतिबन्धकत्वं ममेष्टमेव कथमनिष्टत्वेनापादितमित्याशङ्क्याह—न चात्रेवेति।

ननु तज्जातीयत्वग्रहस्य निर्णयाजनकत्वे निर्णयसामग्रीत्वेन व्याप्यग्रहसाधारणी तस्य प्रतिबन्धकता न स्यादित्याशङ्क्याह—न चेति। ननु निर्णयसामग्र्या उत्तरक्षणे संशयप्रतिबन्धकत्वं यथा तथा पृथगेव तज्जातीयत्वग्रहस्यापि उत्तरक्षण एव प्रतिबन्धकत्वं ममेष्टमित्याशङ्क्याह—न चेति। तज्जातीयत्वग्रहस्यापि उत्तरक्षणे संशयप्रतिबन्धकत्वं सकललोकसिद्धस्य तदुत्पत्तिक्षणे संशयानुत्पादस्य त्वया वचनमात्रेण त्यक्तुमशक्यतया तन्निर्वाहाय तत्सामग्रीप्रतिबन्धकत्वे कल्पनीये अभावद्वयकारणताया गौरवमित्याह—न तुल्य इति। तदेव दर्शयति—तज्जातीयत्वेति। तज्जातीयत्वज्ञानकाले तज्जातीयत्वज्ञानोत्पत्तिकाले तत्सामग्रीमात्रस्य प्रतिबन्धकत्वान्न गौरवमिति यदि तत्राह—तज्जातीयत्वेति।

प्रतिबन्धकसामग्र्याः प्रतिबन्धकत्वादिति यथाश्रुते पूर्वोक्ते दोषमाशङ्क्य निराकरोति—न

---

१. बहुग्रन्थविरोधाच्चेति पाठान्तरम्।

दर्शनस्य स्वकालप्रतिबन्धकत्वे तत्सामग्रय्प्येवमिति वाच्यं, विरोधि
प्रतिबन्धकत्वात्। प्रतिबन्धकस्येव स्वकालप्रतिबन्धजनकत्वात्। न च
विरोधि, साक्षाद्विरोधाभावात्। किन्तु विपरीतदर्शनमेवेत्यलमधिकेनेति

चेति। तथा च तस्यापि विरोधिनिर्णयतया तत्सामग्रय्पि विरोधिनिर्णयसामग्रीति त
केति भवदुक्तोक्तरीत्या विशेषदर्शने पूर्वमपि सशयो न स्यादित्यर्थः। साक्षादिति
गाहित्वप्रयुक्तविरोधाभावादित्यर्थः।

अत्र वदन्ति—विशेषदर्शनघटितसामग्री यदि न प्रतिबन्धिका तदा पुरुषत्व
क्षणे सशयापत्तिरित्येवार्थः साधुः। तथा हि—यत्तत्र दूषणमुक्त प्रतिबन्धकाभावस्य
जनकतया तत्कालीनानुत्पत्तिः पुरुषत्वनिश्चयप्रयुक्तैवेति—तन्न। मण्यादिप्रतिबन्ध
सहभूतत्वेन जनकत्वेऽपि विपरीतनिश्चयाभावस्य तथा जनकत्वे मानाभावात्। न
बन्धकाभावानामेकेन रूपेण जनकता, येन सामान्यकारणतायां सहभूतत्वप्रवेशः

किञ्च सिसाधयिषाविरहसहकृतसिद्ध्यभावात्मकप्रतिबन्धकाभावस्य नानुमिति
सहभूतत्ववादिनाऽपि ज्ञानातिरिक्तप्रतिबन्धकाभावस्यैव तथात्वनियमो वाच्यः। तथा च
प्रतिबन्धकत्वादयुक्तमेतत्। यच्च विशेषदर्शनोत्पत्तिकाले सशयस्वीकारेऽनुभवविरो
वनम्, तत्र पूर्वक्षणे संशयस्वीकारे तस्मिन् क्षणे संशयानुत्पादस्यास्मदाद्यनवधार
दुर्लक्ष्यत्वात् ग्रन्थस्य च व्याप्यग्रहे संशयो न। तज्जातीयत्वग्रहसामग्रय्भावस्य कार
मुक्त तदयुक्तम्। तज्जातीयत्वग्रहोत्पत्तिकाले सशयोत्पत्तिमिच्छतस्तदप्रसक्तेरिति।
प्रतिबन्धकाभावस्य कार्यसहभूतत्वेन हेतुत्वमित्यस्य सहभूतत्वं स्वरूपयोग्यतालक्षण
दकमिति न, तथा सति किञ्चिद्दाहसमानकालीनस्य मणिप्रागभावस्य दाहान्तरे
तत्तद्व्यक्तिसमानकालीनत्वेन कारणत्वेऽनन्तकारणतापत्तेः, किन्तु फलोपधानावच्छे
वत्वावच्छिन्नकारणताकाना फलसमानकालत्वे सत्येव फलोपधानमिति सामान्यत
स्वरूपयोग्यतावच्छेदकत्वपक्षेऽपि प्रत्येकं तत्तत्कार्यं प्रति तत्तत्प्रतिबन्धकाभावस्य
मण्युत्पत्तिकाले ऊपधोत्पत्तिकाले च दाहाभावेन सहभूतत्वेन विशेषकारणतानामव
सामग्रय्भावो वा कारणमिति द्वयमपि गौरवाद्विहाय सामान्यत एव अभावत्वगर्भध
ताककार्ये स्वसहभूतस्य सिद्ध्यभावादकस्य स्वकारणाभावसमुदायस्य जनकत्वमिति व
कारणतायाः कारणान्तरावच्छेदकत्वोत्पत्त्यभावादिति। किञ्च निरन्तरपरामर्शात
द्वितीयेन प्रथमपरामर्शस्य कार्यं कदा प्रतिबध्यम्? न तावद्द्वीतीयोत्पादक्षणे, तदा
ङ्गीकारात्। नाग्रिमक्षणे, तदा सिद्धसाधनादिति तद्ग्रन्थपर्यालोचनया कार्यसह
मिति।

वस्तुतो यदि प्रतिबन्धकविरोधिज्ञानसामग्रया न प्रतिबन्धकत्वं तदा विशे
बन्धकत्वेऽपि तत्सामग्री न तथेति विशेषदर्शनोत्पत्तिकाले सशयापत्तेरिति मूलार्थः
लक्षणप्रतिबन्धकाभावस्य कार्यसहभूतत्वेन जनकत्वाभाव एवाभिमतः। न च विशे
ज्ञानात्मिकेत्यनवस्थापत्तिरिति वाच्यम्। न हि तत्र ज्ञानमात्रे पर्याप्तसामग्रीत्व
इति दिक्।

पत्तेः । अथ धर्मिणि विशेषादर्शनदशायां एककोटिस्मरणे तदारोपः कोटिद्वयस्मरणे संशय इति निश्चयसामग्रीतः संशयसामग्री बलवतीति[1] कोटिद्वयस्मरणे संशय एव स्यात् न तु निश्चय इति चेत्—न। विरुद्धोभयारोप[2]सामग्रीद्वयसमाजादुभयारोप एक एव भवति स एव संशयः, न त्वेकारोपसामग्र्या अपरारोपसामग्रीप्रतिबन्धः, अविरोधात् ।

न चोभयारोपसामग्र्या एकनिश्चयसामग्रीप्रतिबन्ध इति वाच्यम् , प्रत्येकारोपसामग्र्यतिरिक्तायास्तस्या[3] अभावात् । न च सामग्रीद्वयात् कार्यद्वयं

विरुद्धोभयारोपेति । विरुद्धनिर्णयसामग्रीद्वयेत्यर्थ. । संशयस्योभयकोटावारोपत्वानियमात् । आरोपपदोपादानञ्च विशेषादर्शनसंग्रहार्थम् । तेनेदं दर्शितम्—आरोपसामग्रीविशेषादर्शने सति धर्मिज्ञानविशेषणज्ञानादि, तथा चेदृशी यदि युगपद्विरुद्धयोः कोट्योः सामग्री तदा संशयः, न चेह प्रामाण्यग्रहे धर्मिग्रहः। त्वन्नये तुल्यसामग्रीकत्वान्न हि निश्चयेऽप्यर्थे कोटिद्वयस्मृत्या स इति भाव. ।

अथेति मूलम् । धर्मेन्द्रियसन्निकर्षस्य विरोधिनिर्णयसामग्रीत्वेन प्रतिबन्धकत्व न घटते, संशयसामग्र्यभावस्य निर्णयसामग्र्यन्तर्गतस्य तदा असत्त्वादित्यर्थ. । विरुद्धेति । तव मते धर्मिज्ञानमेव प्रामाण्यग्रहात्मकमिति धर्मिज्ञानाज्ञानयो. संशयसामग्री न सम्भवति, प्रतिबन्धकसत्त्वात् , कारणाभावाच्च । तथा च तत्प्रयुक्तो धर्मेन्द्रियसन्निकर्षस्य न निर्णयसामग्रीत्वाभाव इति त्वां प्रति दूषणमिति ग्रन्थकार्थः । अत्र च विरुद्धारोपसामग्रीद्वयसमाजादेवेति योज्यम् ।

ननूभयसामग्रीत उभयारोप एको भवतीत्ययुक्तम् । सत्प्रतिपक्षवत्परस्परप्रतिबन्धेन सामग्र्योरजनकत्वापत्तेरित्याशंक्याह मूलं न त्विति । अविरोधादिति मूलम् । संशयलक्षणफलदर्शनादिति भावः । नन्वतिरिक्तैव संशयसामग्री धर्मिज्ञानाघटिता सैव धर्मेन्द्रियसन्निकर्षस्य निर्णयसामग्रीत्वं विहन्यादित्याशङ्क्य मूल–न चोभयेति । न च सामग्रीद्वयादिति मूलम् । यद्यारोपसामग्रीद्वयमेव न तु संशयसामग्री ततो भिन्ना तदा कार्यद्वय स्यान्न त्वेकः संशय इत्यर्थः । उभयारोपसामग्रीपदेन धर्मिज्ञानाघटिता संशयसामग्री विवक्षिता । एतच्च टिप्पण्यनुरोधेन व्याख्यानम् ।

वस्तुतस्तु विरुद्धोभयारोपसामग्रीद्वयमेव संशयसामग्री । तत्र स्वजन्यनिर्णये स्वांशस्य प्रतिबन्धकत्वमभेदादसंभावितमित्याह—विरुद्धेति । अपरांशसामग्र्याः प्रतिबन्धकत्व परिहरति—अ-

१. तथा चेति रा० पु० पाठः । २. विरुद्धभावाभावोभयविषयकारोप इति यावत् ।
३. सामग्रीद्वयभिन्नायास्तस्या इति रा० पु० पाठः ।

समूहालम्बनवदुपपन्नम्। तस्मात् प्रामाण्यनिश्चयसामग्रीसत्त्वात् न तत्संशयः[1] स्यात्। धर्म्मिज्ञानं च संशयहेतुः, अन्यथा[2] संशये धर्मिनियमः कोट्युत्कट-

ननु कोटिद्वयस्मृतिर्विशेषादर्शनमित्येव लाघवात् कारणम्। न हि रजतारोपेऽपि धर्मिधीर्हेतुः, यत्र हि सादृश्यज्ञानमारोप्यस्मारकं तत्र तज्ज्ञानजनकत्वेन धर्मिज्ञानमन्यथा सिद्धमित्याक्षेपे विरुद्धारोपेत्यादिना धर्मिधियोऽपि सिद्धवद्धेतुत्वाभिधानं न युज्यत इत्यत आह—धर्मिज्ञानं चेति।

अन्यथेति। तुरगादौ वेगेन गच्छतस्तत्तद्धर्मीन्द्रियसन्निकर्षे यत्रैव ज्ञानं तत्रैव संशय इति नियमो न स्यादित्यर्थः। अत एवारोपान्तरेऽपि धर्मिधीर्हेतुरिति भावः।

ननु यदेव तत्र धर्मिधीनियामकं तदेव संशयनियामकमस्तु "तद्धेतोरेवे"ति न्यायात्। न च विषयमाहात्म्यादिरूपतया तेषामननुगमेनानुगतधर्मिधीरेव तथेति वाच्यं, धर्मिधीसामग्रीत्वेनैवानुगमात्। किं च विशेषणधीः विशेष्ये तदसंसर्गाग्रहो विशेष्यभानसामग्रीति विशिष्टज्ञानसामान्यहेतोरेव तत्सम्भवे विशेषसामग्र्यकल्पनमन्यथा तत्राप्यनुगततया विशेष्यभानहेतुतापत्तिरित्यरुचेर्मानान्तरमाह—कोट्युत्कटत्वमिति। यन्निष्ठधर्मस्य यया कोट्या सह भूयः सहचारोपलम्भो यत्र धर्मिणि यद्धर्मसहचरितानेकधर्मोपलम्भो वा तत्कोटावुत्कटत्वं संशयस्य तदुभयमपि धर्मिज्ञानसाध्यमिति तदभावे

विरोधादिति[3]। समूहालम्बन एकनिर्णयसामग्र्या अपराशनिर्णयाविरोधादित्यर्थः। मिलितप्रतिबन्धकत्वं निराकरोति—**न चोभयेति**[4]। प्रत्येकेति[5]। तथा चाशतोऽभेद इत्यर्थः। यद्वा अतिरिक्तैव संशयसामग्रीति निराकरणार्थं न चोभयेत्यादिपूर्वं च योज्यम्। **इत्यत आहेति**। इदञ्च प्रथमव्याख्यायाम्। द्वितीयव्याख्याया तु एकाशनिश्चयसामग्री विरोध्यपराशनिश्चयविरोधिनी सम्भवत्येव। समूहालम्बने तु परस्परविरोधाशयोः मिलितप्रतिबन्धकत्वमपि सम्भवत्येव। रूपान्तरेण प्रतिबन्धकस्य रूपान्तरेण जनकत्वसम्भवादित्यस्वरसादाह—**धर्मिज्ञानञ्चेति**। **आरोपान्तरेऽपि** संशयभिन्नेऽपि। विशेषगोचरान्वयव्यतिरेकयोरेव बाधकाभावे सामान्यतः कार्यकारणभावग्राहकत्वादिति भावः।

उपाध्यायमतमपास्यति—**न चेति**[6]। धर्मिधीसामग्रीत्वेनानुगमे प्रथमोपस्थितधर्मिधिय एव कारणत्वं स्यादित्यस्वरसादाह—**किञ्चेति**। **तन्निष्ठेति**। सहचारग्रहस्य वा भूयस्त्वं सहचरितधर्मिणा वा भूयस्त्वमित्यर्थः। भूयः सहचारो भूयान् सहचारग्रहः। इदमुपलक्षणम्। भूयस्त्वाधिकरणेषु

---

१. तच्छब्दो नास्ति रा० पुस्तके। २. धर्मिज्ञानस्य भ्रमहेतुत्वे युक्तिमाह—अन्यथेति।
३–६. अत्र प्रतीकत्रयघृतमूलग्रन्थः 'आलोकात्' परिभ्रष्ट इत्यनुमीयते।

त्वञ्च न स्यात्। अथ पीतः शङ्ख आदर्शे मुखमित्यादिभ्रमो विशेषदर्शनेऽपि यथा दोषान्तरात् तथा निश्चितेऽपि प्रामाण्ये दोषान्तरात् तत्संशय इति चेत्—न। तद्वदेवात्रापि प्रवृत्तिप्रसङ्गात्। साक्षात्कारिभ्रमे साक्षात्कारिविशेषदर्शनं

न स्यादित्यर्थः। यद्यपि एतावता तादृशसंशये तादृशग्रहहेतुतायामपि सामान्यहेतुता नायाति, तथापि "यद्विशेषयोरि"ति न्यायात्[1] संशयसामान्य एव धर्मिज्ञानहेतुता आयाति, संशयमात्रमपि न तदुभयारोपमात्रं मन्तव्यम्।

यद्वा अत्र धर्मिनियमवदारोपनियम एव विपर्ययेऽपि धर्मिज्ञानहेतुताकल्पकः, यद्धर्मसहचरितधर्मोपलम्भो यत्र धर्मिणि तत्रैव तदारोपात्। अत एव सादृश्यतत्त्वाग्रहादित्यादिप्राचीननानानिबन्धे सादृश्यापेक्षानियमो दृश्यत इति। उत्कटत्वञ्चाव्याप्यवृत्ति संशये जातिर्वा तादृशधर्मविषयत्वमुपाधिरेव वा कश्चिदित्यन्यदेतत्।

दोषान्तरादनभ्यासदशारोपात्। साक्षात्कारीति। प्रत्यक्षरूपे भ्रमे तादृशमेव विपरीतदर्शनं विरोधि, शङ्खे चापीतत्वधीः पित्तप्रतिबन्धकान्न साक्षात्काररूपा भवति, किन्तु आनुमानिकीति भवति पीतभ्रमः। इह च, मानसे प्रामाण्यग्रहे विद्यमाने साक्षात्कारिविशेषदर्शनसत्त्वात् कथं प्रामाण्याभावसंशयात्मा भ्रम इति न व्याख्यानम्। तथापि हि ज्ञानमप्रमा न वेति संशयस्यानभ्यासदशापन्नज्ञानविषयस्यानुच्छेदात्। तथा हि—विपरीतदर्शनं विरोधीति प्रामाण्ये गृहीते तदभावसंशयो मा भूदप्रामाण्याभावानिश्चयेऽप्रामाण्यसंशये बाधकाभावात्। न ह्यपीतत्वग्रहकाले श्वैत्यग्रहनियमाद्यथाऽश्वेतसंशयो निवर्तते तथा प्रामाण्यग्रहकालेऽप्रामाण्याभावग्रहनियमात्तत्संशयोऽपि न स्यादिति सम्भवति, ग्रहसामग्रीभेदात्। अप्रामाण्यस्य तदभाववतीत्यादिगर्भतयैव

सहचारग्रह इत्यपि द्रष्टव्यम्। तादृशसंशय इति। उत्कटकोटिकसंशय इत्यर्थः। आरोपनियमः आरोपविषयनियमः। निरंशे ज्ञानेऽव्याप्यवृत्तिधर्मासम्भवादाह—तादृशेति। भूयः सहचरितधर्मककोटिविषयकत्वमित्यर्थः। ननु च शङ्खे पीतत्वासंसर्गाग्रहो यथा दोषं विनैव तथा प्रकृतेऽपि स्यादित्यत आह—शङ्ख इति। तत्रापि पित्तलक्षणदोषप्रयुक्तत्वात् असंसर्गाग्रहस्येत्यर्थः। परव्याख्यान्त[2]मनूद्य निराकरोति—प्रत्यक्षरूप इति। अप्रामाण्यस्येति। ननु प्रामाण्य घटत्ववत्त्वघटितमप्रामाण्यं च घटत्वाभावघटितमिति तज्ज्ञानयोः परस्पराभावविषयकत्वमस्त्येव। न

१. यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोरपीति न्यायादित्यर्थः।

२ न व्याख्यानं उपाध्यायानामिति शेषः।

विरोधि दिङ्मोहादौ तथादर्शनात्[1] । तच्च न, पित्तादिना प्रतिबन्धात् । न च जात्यैव कश्चिद्दोषोऽस्ति ।

न च प्रामाण्यसंशयाद्विषयसंशयवत् प्रामाण्यज्ञाने प्रामाण्यसंशयात्

प्रामाण्याभावानात्मकत्वात् । तस्मादिदमत्राभिमतं–साक्षात्कारिणि भ्रमे निश्चये तादृशस्तद्विपरीतनिश्चयो विरोधी, न तु संशयेऽपि विपरीतविषयत्वं साक्षात्कारित्वं वा विरोधे बीजम्, व्याप्यदर्शनेनानुमित्यादिनापि संशयापगमात्, तथा च पीतः शङ्ख इत्यादिनिश्चयोऽपीतत्वानुमित्या शङ्खत्वप्रत्यक्षेण च मा निवर्त्तताम् । अयन्तु प्रामाण्यसंशयोऽप्रामाण्यसंशयो वा तद्विरुद्धप्रामाण्यनिश्चयादवश्यं निवर्त्ततेत्यर्थः ।

ननु यथा तत्र पित्तादिप्रतिबन्धात् श्वैत्याप्रत्यक्षे भ्रमसम्भवः तथा दोषवशात् कदाचित् प्रामाण्यग्रहे संशयः स्यात्, दोषस्य फलैकोन्नेयतया अन्ततः तद्दशाजन्मैव दोषः स्यादित्यत आह—न च जात्यैवेति । न हि जात्या जन्मनेत्यर्थः । अनभ्यासदशाजन्म न दोषः, अनभ्यासस्य प्रामाण्याग्रहरूपतया प्रामाण्याग्रहकालीनजन्मन एव प्रामाण्याग्रहप्रयोजकत्वादात्माश्रयत्वापत्तावननुगततत्तत्कालजन्म तथा वाच्यं, न च तत्सम्भवति । प्रतिव्यक्तिप्रतिबन्धकत्वस्य जनकत्ववत् दुर्ग्रहत्वादिति भावः ।

न हि दोषत्वजातिमान् अतीन्द्रियः कश्चित्तथेति शङ्कास्पदमपीत्याह—न चेति ।

चैकावच्छेदेन घटत्वं घटत्वाभाववत्त्व च न गृहीतम् तादृशयोश्च ग्रहयोर्विरोधः । अन्यथा[2] कुत्रचित् घटत्वं कुत्रचित् घटत्वाभाव इति ज्ञानयोरपि विरोधापत्तिः । न चैकावच्छेदोऽप्यत्र तयोर्गृह्यत इति वाच्यम् । घटत्ववद्विशेष्यकत्व घटत्वाभाववद्विशेष्यकत्व च गृह्णतोर्ज्ञानयोरेतज्ज्ञानविशेष्यत्वावच्छेदेन घटत्वतदभावविषयकत्वसम्भवादिति चेत्—उच्यते । एवमपि नानयोर्विरोधः । विशेष्यत्वस्यावच्छेदकत्वापरिस्फुरणात् । तत्सामानाधिकरण्यमात्रस्य च विशेष्यभेदेऽपि उपपत्त्या द्रव्ये घटत्वं द्रव्ये घटत्वाभाव इति वदविरोधात् । न चैव घटत्ववद्विशेष्यकत्वतदभाववद्विशेष्यकत्वविशेष्यैकाग्रहे विरोधाभावात् संशयकोटित्व कथमिति वाच्यम्, विरुद्धत्वभ्रमेण एकमात्रविशेष्यकत्वे सति घटत्ववद्विशेष्यकत्वम् तथात्वे सति घटत्वाभाववद्विशेष्यकत्वं च कोटिद्वयमादाय वा संशयसम्भवादिति संक्षेपः । तद्विरुद्धेति । तद्विरुद्धतया प्रतीतेत्यर्थः । दुर्ग्रहत्वादिति । अद्यपि

---

१. दोषविशेषजन्ये इयं दिगुदीचीत्यादिदिग्भ्रमादौ नेयं दिगुदीचीत्याद्यानुमानिकादिविपरीतनिश्चयस्य प्रतिबन्धकत्वाभावदर्शनादिति भावः ।

२. अन्यथेतीत्यत्र यत्तत्राशुद्धमस्तीत्यत्र लिख्यते । विशिष्टशुद्धौ व्यभिचाराच्च । प्रतियोगिरूपविशेषणधीजन्यत्वेन च न तत्र व्यभिचारः । न च प्रतियोग्यपि विशेष्य एवेति कथं तत्र व्यभिचारः । अनुयोगित्वमेव विशेष्यत्वम् । तथा च यस्यानुयोगित्वं तज्ज्ञानं व्यभिचारि । इदं तत्रत्यं ज्ञातव्यम् ।

प्रामाण्यसंशय इति वाच्यम्, प्रामाण्यज्ञानेऽपि स्वतः प्रामाण्यग्रहे तत्संशयानुपपत्तेः ।

ननु ज्ञानमात्रं न विरोधिबुद्धिनिवर्त्तकं भ्रमोत्तर बाधकज्ञानोदयात्, किन्त्वनन्यथासिद्धम् । अत एव तेन विनापि तज्ज्ञानं सम्भवतीति अन्यथासिद्धतया शङ्कितं तन्निश्चयं परिभूय ज्ञानविषयत्वाद्विषये यथा संशयस्तथा प्रामाण्ये तन्निश्चयस्यान्यथासिद्धिशङ्कया तं परिभूय भवति संशयः ।

न च व्यवसायस्य ज्ञानत्वे घटविषयकत्वे च यथानुव्यवसायविषयत्वान्न संशयस्तथा प्रामाण्येऽपि न स्यात्, अनुव्यवसायस्य प्रमात्वनियमादिति वाच्यम्, अज्ञाने अविषये च ज्ञानत्वविषयत्वयोरनुव्यवसायेनाग्रहणनियमात् तद्विषयत्वमनन्यथासिद्धं प्रामाण्यविषयत्वञ्च तेन विनापि सम्भवतीति तत्र संशय इति चेत्—

प्रामाण्यविषयत्वमिति । ननु घटविषयत्वमपि घटेन विनाऽपि सम्भवतीति तुल्यम् । अत्राहुः—अनुव्यवसायस्य प्रमात्वनियतत्वेन यदनुव्यवसायविषयस्तत्र न संशयस्तद्विषयश्च घटविषयकत्ववैशिष्ट्यं ज्ञानत्ववैशिष्ट्यञ्च । अतस्तदुभयत्र मास्तु संशयो घटत्ववत्त्वं विषयस्य तु न तद्विषय इति विषये घटो न वेति संशये वि

दुर्ग्रहत्वेऽपि वस्त्वस्त्येव, तथाप्येतादृशप्रतिबन्धकल्पने क्वाप्यन्वयव्यभिचारो न स्यादित्यत्र तात्पर्यम्

ननु अननुगतमनुगतं वा दोषस्वरूपमावश्यक संशयानुरोधेन, तथा च किं विशेषदोषेणे[illegible] चेत्—न । अननुगतदोषापेक्षया निश्चयसामग्री दृष्टा तद्विरह एव तत्र प्रयोजकमिति दृष्टादेवानुगता[illegible] पपत्तेरिति । न चानुव्यवसायरूपनिश्चयसामग्री व्यवसायरूपा प्रत्यासत्तिरस्त्येवेति वाच्यम्, तद्वत्त्वांशे तन्त्रेण ज्ञातस्यासत्तित्वाकल्पनादिति । **शङ्कास्पदमपीति** । अप्रतीतिशङ्कानुदयादिति भाव. ।

नन्विति । घटत्ववद्विषयकत्वविषयकत्व व्यवसायगतेन घटत्ववद्विषयकत्वेन विनापि सम्भवति । घटत्वससर्गारोपात्मकव्यवसायेऽनुव्यवसायगृहीतघटत्ववद्विषयकत्वाभावात् । तद्विषये घटत्व भावादित्यर्थः । यदि च घटत्वारोपे घटारोप आवश्यकस्तदा गन्धादिससर्गारोप उदाहार्यः । **यद व्यवसायविषयः** स्वातन्त्र्येणेति शेषः । **घटविषयकत्ववैशिष्ट्यमिति** । घटत्वोपलक्षितधर्मि विषयकत्ववैशिष्ट्यमित्यर्थः । **न तद्विषय** इति । अत्रापि उपनयनैरपेक्ष्येणेति शेषः । **विष घटो न वेति** । इद ज्ञान घटविषयक न वेत्यर्थः । तथा च घटत्वोपलक्षितधर्मिविषयकत्वमात्रेऽन्यथासिद्धत्वं मूलेऽभिप्रेतमिति भावः[1] ।

---

१. यद्यपि घटत्वसंसर्गारोपात्मकव्यवसाये घटत्ववद्विषयकत्वविषयकत्वं घटत्ववद्विषयकत्वेन विन[illegible] सम्भवति तत्र तद्विषयत्वाभावात्तथापि घटत्वोपलक्षितधर्मिविषयकत्वव्यतिरेकेण न सम्भवतीति भा

मैवम् । भ्रमत्वमन्यथासिद्धत्वम् । ततश्च प्रामाण्यनिश्चये भ्रमत्वसंशयेन तद्विषये प्रामाण्यसंशय इति फलितोऽर्थः । भ्रमत्वसंशयश्च तज्ज्ञानाज्ञानाभ्यां न सम्भवतीत्युक्तत्वात् । एवमन्यत्रापि भ्रमत्वसंशयात् न विषये संशयः; स्वतः प्रामाण्यग्रहे भ्रमत्वसंशयाभावात् ।

न च वाच्यं प्रामाण्यसंशयान्न विषये संशयो मानाभावात्, ज्ञानविषयत्वात् समानधर्मादेव तदुपपत्तेः[1] । न चैवं सर्वत्र विषयसंशये तन्निश्चयोच्छेदः, प्रामाण्यसंशयेऽपि तुल्यत्वादिति । तस्यासार्वत्रिकत्वात् । भ्रमत्वसंशयं विना निश्चिते विषये संशयानुत्पत्तेरानुभविकत्वाच्च ।

अथ तद्वति तत्प्रकारकज्ञानत्वं प्रामाण्यम् । तच्च ज्ञानग्राहकेण गृहीतमेवेति न तत्संशयः ।

न चास्मिन् निश्चितेऽपि प्रामाण्यसंशयात् न तत्प्रामाण्यमिति वाच्यम् । एतन्निश्चयादेव निष्कम्पव्यवहारादिति चेत्—अस्तु तावदिदं प्रामाण्यम् । तथाप्यनुव्यवसायानन्तरं व्यवसायस्य प्रामाण्येऽर्थस्य तद्वत्त्वे च संशयस्यानुभवसिद्धत्वान्नार्थे तद्वत्त्वं तस्य विषयः ।

ननु व्यवसायस्येदन्त्वरजतत्वविशिष्टेदंविषयत्वे अनुव्यवसाय एव

बाधकम्, इह ज्ञानप्रामाण्यस्यानुव्यवसायगम्यत्वेऽप्यनुव्यवसायेन गृहीतेऽपि प्रामाण्ये संशयः, प्रामाण्यविषयकज्ञानस्य प्रामाण्यं विनापि दर्शनादनुव्यवसायत्वस्यापि ज्ञानत्वघटविषयत्ववैशिष्ट्ययोरेव प्रामाण्यनियतत्वावधारणादिति ।

ननु प्रामाण्यसंशयो विषयसंशयान्यथानुपपत्त्या कल्पनीयः, न चेह सा, समानधर्मदर्शनादेवोपपत्तेरित्याशङ्क्य निषेधति—न च वाच्यमिति ।

नन्वन्वयव्यतिरेकाभ्यां प्रामाण्यसंशयहेतुताग्रहो न च विशेषदर्शने सति संशय इत्यन्वयासम्भव इत्याशंकते—अथेति ।

अस्त्विति । अनुभवसिद्धतया दुरपह्नवे संशये विशेषदर्शनमेव न जातमित्यर्थः ।

ननु सामग्रीसत्त्वे विशेषदर्शनमप्यशक्यापह्नवमित्याशङ्कते—नन्विति ।

इहेति । यद्यपि प्रामाण्यं विनाऽपि दर्शनादित्यस्य विषयगतघटत्वं विनाऽपि सम्भवादिति पर्यवसितोऽर्थः, तथा च ननु घटविषयत्वमित्यादिशङ्कापि प्रत्युत एव पर्यवसन्ना, तथापि एकत्र घटविषयकत्वमादाय शङ्कितमपरत्र घटविशेष्यत्वमादायेति भेदः । विषयसंशयान्यथानुपपत्त्या स्वीकर्त्तव्य इति शेषः । साऽनुपपत्तिः । विशेषेति । विपरीतदर्शने सतीत्यर्थः । एवमग्रेऽपि विशेष

१. तदुत्पत्तेः इति रा० पुस्तकपाठः ।

मानम्। तथा च यावदनुव्यवसायोल्लिखितप्रकारविशिष्ट एव धर्म्यनुव्यवसाये भासते। अन्यथा विषयांशे तस्य निर्विकल्पकत्वे इदं रजतं जानामीति तदाकारो न स्यात्। अतो धर्मिणीदन्त्वरजतत्ववैशिष्ट्यमनुव्यवसायेन गृहीतमिति धर्मिणि स्वतः प्रामाण्यग्रहवद्रजतत्ववैशिष्ट्येऽपि स्वतः प्रामाण्यज्ञानमवर्जनीयम्। अत एव धर्म्यंशे न कदापि प्रामाण्यसंशय इति चेत्—मैवम्, इदं रजतश्च जानामीति नानुव्यवसायः, बहिर्विशेष्यके मनसोऽस्वातन्त्र्यात्। किन्त्विदमिदन्त्वेन रजतत्वेन च जानामीति। तत्रेदन्त्वरजतत्वे प्रकारत्वेन भासेते तत्प्रकारकज्ञानवत्त्वञ्चात्मनि भासते। अन्यथा प्रकारवाचितृतीयार्थासम्भवः।

यत्त्वनुव्यवसायपदमग्रिमग्रन्थाविरोधाय[1] ज्ञानविषयक[2]ज्ञानानन्तरतृतीयज्ञानपरमिति तन्न। तन्मतेऽन्तराज्ञाने मानाभावेन ज्ञानानन्तरात्मविशेष्यकज्ञानस्यैवोत्पत्तेः। विशेषणज्ञानापेक्षानियमस्तु विशिष्टज्ञाने तन्मते नास्त्येव, अन्यथा सामान्यलक्षणास्वीकारापत्तेः। नहि तां विनाऽनुमितेर्विशेषणधीजन्यत्वं सम्भवतीति।

धर्मिणीति। तत्र प्रामाण्यसंशयाभावेन प्रामाण्यज्ञाने बाधकाभाव इति प्रसाध्याङ्गतया दृष्टान्त इत्याशयः। अत एवाह—अत एवेति।

बहिर्विशेष्यक इति। न च ज्ञानोपनीतस्य ग्रहेऽस्वातन्त्र्यं कुत इति वाच्यं, न हि तद्विशिष्टविषयकत्वादन्यदुपनयेनापि शक्यग्रहं, न च तावन्मात्रं प्रामाण्यं, भ्रमसाधारणत्वात्। कि नाम रजतत्वविशिष्टमिदन्तद्विशेष्यकं च रजतत्वप्रकारकमिदं ज्ञानमिति। न च तदनुव्यवसायग्राह्यम्। स्वातन्त्र्येण तत्र मनसोऽप्रवृत्तेः। तदुक्तम्—बहिर्विशेष्यक इति। अन्यथा तज्ज्ञानविशेषणतया घटग्रहे प्रकृतहेतोरलग्नकत्वादित्यर्थः[3]।

पद विपरीतपरम्। अग्रिमग्रन्थाविरोधायेति। रजतमहं जानामीत्यग्रिमग्रन्थे विशिष्टवैशिष्ट्यावगाह्यात्मविशेष्यकज्ञानोल्लेखात् घटविषयक ज्ञानमित्याकारकं द्वितीय ज्ञानमत्र नानुव्यवसायपदेन ग्राह्यमित्यर्थः। विशेषणेति। यद्यपि विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकज्ञानत्वग्रहापेक्षाऽस्त्येव, तन्मतेऽपि ज्ञानत्वग्रहस्य स्मरणादिरूपस्य सम्भवात्, तथापिनानुव्यवसायो मध्ये नियमतोऽपेक्ष्येत इति भावः। अत एवाहेति। प्रसाधनार्थमेवाहेत्यर्थ.। तद्विशिष्टेति। सत्त्वासत्त्वसाधारणतद्विशिष्टेत्यर्थः। स्वातन्त्र्येण सत्तानिश्चयजनकतया। बहिर्विशेष्यक इति। बहिः सत्तानिश्चय इत्यर्थः। ज्ञानानुव्यवसाये ज्ञानस्यात्मनो वा विशेष्यत्वात् यथाश्रुतस्यानुपपत्तिरिति। तदेतदाह—अन्यथेति।

---

१. ग्रन्थविरोधादिति क्वचित्पाठः। २. ज्ञानविशेष्यकेति नपुस्तके।

३. अलग्नकतापत्तेरिति कपुस्तके।

रजतत्ववैशिष्टयस्य तदर्थत्वे व्यवसायेऽपि तृतीयार्थोल्लेखापत्तिः। तथा च धर्मिणीदन्त्वरजतत्वप्रकारकज्ञानविषयत्वे तादृशज्ञानवत्त्वे चात्मनोऽनुव्यवसाय एव मानमिति न विषये तस्य निर्विकल्पकत्वम्। अत इदन्त्वरजतत्ववैशिष्ट्यं पुरोवर्त्तिनि नानुव्यवसायविषय इति न स्वतः प्रामाण्यग्रहः। तस्मादनभ्यासदशापन्नज्ञानप्रामाण्यं परतो ज्ञायते सांशयिकत्वादप्रामाण्यवदित्याचार्याः।

ननु स्वग्राह्यत्वेऽपि कदाचित्परग्राह्यत्वात् स्वस्याप्यन्यापेक्षया परत्वात्[१] भट्टमते च परग्राह्यत्वात् सिद्धसाधनम्। न च ग्राह्यप्रामाण्यापेक्षया परत्वं, ग्राहकस्यापि[२] ग्राह्यप्रामाण्यत्वेन तदपेक्षया[३] परत्वाभावात्[४], स्वग्राह्यप्रामाण्यापेक्षया परत्वे अप्रामाण्यप्रसङ्गात्—

अत इति। इदन्त्वरजतत्ववैशिष्ट्यं स्वातन्त्र्येणेति शेषः[५]। यथाश्रुतस्यासम्भवात्। वैशिष्ट्याभाने तद्गर्भप्रकारत्वाग्रहोऽपि। तथा सति ज्ञानग्रह एव दुर्लभः कुतः प्रामाण्यग्रहवार्त्तापि येन स्वतः परतो वेति विवादः। अत एवान्यथाख्यातिसिद्धान्ते वैशिष्ट्यस्य ज्ञानवित्तिवेद्यतया शीघ्रोपस्थितिकत्वं वक्ष्यते।

अनभ्यासदशापन्नेति। एवं संशयविषयत्वन्तु सर्वत्र दुर्लभमिति भागासिद्धिपरीहाराय ईश्वरज्ञाने चांशतो बाधवारणाय विशेषणमित्याशयः।

ग्राह्यप्रामाण्यापेक्षयेति मूलम्। ग्राह्यं प्रामाण्य यस्य तदपेक्षयेत्यर्थः। तथा च स्वस्याप्यन्यापेक्षयेति दोषो नास्तीति भावः। अग्राह्येति मूलम्। अग्राह्यं प्रामाण्य यस्याप्रमारूपज्ञानस्य तदपेक्षयेत्यर्थः। तथा च ग्राहकस्यापि ग्राह्यप्रामाण्यत्वेनेत्यादिदोषो नास्तीति भावः। अप्रामाण्येति मूलम्। अप्रमारूपज्ञानापेक्षया परत्व प्रमारूपव्यवसायस्यापीति तद्ग्राह्यत्वेन सिद्धसाधनापत्त्या व्यवसायस्याप्रामाण्यमङ्गीकार्यं[६] स्यादित्यर्थः। तस्य चाप्रामाण्ये तत्प्रामाण्यावगाह्यनुमित्यादेरप्यप्रामाण्यप्रसङ्गः। तथा चाप्रमारूपज्ञानापेक्षया न परत्वमिति भावः। स्वग्राह्येति क्वचित्पाठः। स्वेन ग्राह्यं प्रामाण्यं यस्य तदपेक्षयेत्यर्थः। तन्मते सर्वासा प्रमाणा स्वग्राह्यप्रामाण्यतया ततः परत्वे ग्राहकस्याप्रामाण्यं स्यात्, ततश्च व्यवसायस्याप्यप्रामाण्यं स्यात्ततश्च तदेव[७] परमिति सिद्धसाधनमिति भावः।

संशयविषयत्वमिति। तथा च स्वाश्रयक्षणोत्तरतृतीयक्षणवर्त्तिसंशयविषयत्वं अप्रामाण्यसंशयाजन्यसंशयविषयत्वं च सुतरां सर्वत्र दुर्लभमिति भावः। ईश्वरज्ञाने ईश्वरज्ञाननिष्ठे सर्वत्ववति सर्वत्वप्रकारकत्वे। विशेषणम् अनभ्यासेत्यादि। संशयविषयत्वे पक्षतावच्छेदके संशयविशेषविषयत्व-

१. स्वस्य ''परत्वादिति पाठो नास्ति रा०पुस्तके। २. ग्राहकत्वेन नैयायिकाभिमतस्यापीत्यर्थः।
३. ग्राह्यप्रामाण्यापेक्षयेति भावः। ४. भिन्नत्वाभावादिति।
५. इदन्त्वरजतत्ववैशिष्ट्यं नानुव्यवसायविषय. स्वातन्त्र्येणेति नपुस्तके।
६. नैयायिकेन। ७. प्रमारूपव्यवसायस्य।

नन्वनभ्यासदशापन्नेऽपि सर्वत्र न संशय इति भागासिद्धितादवस्थ्यम्। न च संशयविषयत्वमेवानेनोपलक्षितं प्रामाण्यविशेषितस्य तस्य पक्षतावच्छेदकत्वान्न हेतु-पक्षतावच्छेदकाभेदनिबन्धनसिद्धसाधनमिति वाच्यं, प्रामाण्यसंशयाहितसंशयविषय-प्रामाण्ये एवमपि भागासिद्ध्यपरीहारात्। न च हेत्वोरेवान्यतरोपलक्षणपरमनभ्यास-दशापन्नपदं हेतुकृतान्यस्य पक्षतावच्छेदकत्वान्न सिद्धसाधनमिति वाच्यं, ज्ञानप्रामाण्य-पदवैयर्थ्यापातादिति—मैवम्। अव्यावर्त्तकस्यापीश्वरानुमाने कृतिविशेषणजन्यपद-स्येवोपरञ्जकतयाऽव्यर्थत्वात्।

वस्तुतः हेतुपक्षतावच्छेदकैक्येऽप्यंशतः सिद्धसाधनमिति प्राचीनमतानुसारितयाऽ-प्रामाण्यव्यावर्त्तनाय ज्ञानप्रामाण्यपदोपादानम्। अनभ्यासदशापन्नेत्यादिना तत्संशय-सामग्री लक्षितेति परमार्थः।

रूपहेतुसाध्यसामानाधिकरण्यग्रहकाले सुतरां पक्षतावच्छेदकसाध्यसामानाधिकरण्यं भातमित्याशयेन सिद्धसाधनमाशङ्क्य निराकरोति—**प्रामाण्यविशेषितस्येति**। **भागासिद्ध्यपरीहारादिति**। तत्र चतुर्थादिक्षणवर्त्तित्वादप्रामाण्यसंशयजन्यत्वाच्च संशयस्य यथोक्तहेतुद्वयाभावादिति भावः।

प्रामाण्यस्याधिकस्य प्रवेशाद्धेतोः पक्षतावच्छेदकत्वेऽपि सिद्धसाधनोद्धारो यद्यपि कर्त्तुं शक्यते तथापि सौकर्यात् समाधानान्तरमाह—**हेतुकृतान्यस्येति**। **ज्ञानेति**। पक्षतावच्छेदकहेत्वभेदनि-बन्धनसिद्धसाधनपरीहारस्य प्रकारान्तरेण जातत्वादिति भावः।

हेतुमेव पक्षतावच्छेदकीकृत्य सिद्धसाधनं प्रसज्य तद्वारणाय ज्ञानप्रामाण्यमिति समाधानं स्फुटत्वादुपेक्ष्यान्यदाह—**अव्यावर्त्तकस्यापीति**। यद्यपि जन्यपदमव्यावर्त्तकमित्युचितमजन्यकृत्य-प्रसिद्धेः, इह तु ज्ञानप्रामाण्यपदस्य तृतीयक्षणवर्त्तिसंशयविषया अप्रामाण्यादयो वारणीया इति व्यावर्त्तकत्वं सम्भवत्येव, तथापि पक्षतावच्छेदकहेत्वैक्येऽशतः सिद्धसाधनस्यादोषतया तद्वारणे प्रयो-जनाभावात् प्रयोजनव्यावर्त्तकत्वस्याभावोऽत्र विवक्षितः।

प्राचीनमतेति। पक्षतावच्छेदकसाध्यसामानाधिकरण्यावगाहित्वादनुमितेरिति प्राचां भावः। **संशयसामग्रीति**। तृतीयक्षणवर्त्तिसंशयसामग्रीविशिष्टज्ञानप्रामाण्यं पक्ष इत्यर्थः। एवं च न भागा-सिद्धिः, संशयतत्सामग्र्योरविनाभावादिति भावः। ज्ञानप्रामाण्यपदं चात्रापि कल्पे उपरञ्जक-

उच्यते । अनभ्यासदशापन्नज्ञानप्रामाण्यं न स्वाश्रयग्राह्यं स्वाश्रयातिरिक्त-

स्वाश्रयेति । स्वाश्रयातिरिक्तमात्रग्राह्यमित्यर्थः । अत्र यद्यपि स्वपदस्य समभिव्याहृततत्तत्परत्वेऽप्यप्रामाण्यदृष्टान्ते तदाश्रयाग्राह्यत्वसाध्यसम्भवेन स एव कल्पोऽनुसर्त्तुमुचितः, न चैवमर्थेऽपि साध्यसम्भवेन तत्र व्यभिचारवारणार्थं विशेषणोपादानमयुक्तमिति वाच्यं,' प्रमावान् इत्यनुमितिप्रामाण्यसंशयाहितसंशयविषयप्रमायाः स्वाश्रयात्मग्राह्यतया व्यभिचारेण सार्थकत्वं स्यात्, तथापि स्वाश्रयग्राह्यत्वस्य स्वाश्रयजन्यज्ञानविषयत्वार्थकत्वे प्रकृते सिद्धसाधनापत्त्या स्वाश्रयविषयत्वमर्थः । न च प्रमारूपेऽर्थे तदस्ति, आत्मनो निर्विषयत्वात्, प्रतिपत्तिव्यापारमात्रसाधारणैकविषयत्वाभावादिति स कल्पो न युक्त इति स्वपदस्य पक्षीकृतमात्रपरत्वं मन्तव्यम् ।

मशतः सिद्धसाधनवारक चेति ध्येयम् । अत्र विप्रतिपत्तावनुमानप्रयोगे च पक्षतावच्छेदकभेदेऽपि नार्थान्तरमुद्देश्यसिद्ध्यविरोधादिति भावः ।

चतुर्थीं विप्रतिपत्तिमधिकृत्याह—**न स्वाश्रयग्राह्यमिति** मूलम् । न यावत्स्वाश्रयग्राह्यमित्यर्थः । अन्यथेश्वरज्ञानादिरूपेण स्वाश्रयेण सर्वेषा प्रामाण्याना ग्राह्यतया बाधापत्तेः । एतावता परपक्षनिराकरणेऽपि **परतो ग्राह्यत्वरूपस्वमतसिद्धिर्न जातेति** मूले स्वाश्रयातिरिक्तेत्यादि द्वितीय साध्यम्, तच्च यथाश्रुत सिद्धसाधनग्रस्तम् । अतो व्याचष्टे—**स्वाश्रयातिरिक्तमात्रेति** । यावत्स्वाश्रयाग्राह्यत्वे सति स्वाश्रयातिरिक्तग्राह्यमित्यर्थः ।

तदाश्रयेति । अप्रामाण्याश्रयेत्यर्थः । **अर्थेऽपि साध्यसम्भवेनेति** । घटत्वाद्याश्रययावद्भिर्ग्राह्यत्वस्य ग्रहणोपहितत्वस्य घटत्वादौ यावद्गुरुत्वाद्याश्रयग्राह्यत्वस्य ग्रहणयोग्यत्वस्य च गुरुत्वादावभावादित्याशयः । **प्रमावानिति** । तत्र चतुर्थादिक्षणे सशयात्तद्वारणाय तृतीयेत्यादिविशेषणस्य सार्थकत्वादित्यर्थः । इदञ्चोपलक्षणम् । प्रामाण्यसशयाहितसशयविषये एतद्घटरूपादौ घटद्वयसयोगादौ[1] च उक्तरीत्या साध्यासत्त्वेन तद्व्यभिचारवारणायापि विशेषणसार्थकत्व द्रष्टव्यम् । **सिद्धसाधनापत्त्येति** । प्रामाण्याश्रयीभूत यद्घटादिज्ञान यावत्तज्जन्यग्रहणविषयत्वाभावस्य **प्राभाकरै**रपि स्वीकृतत्वादिति भावः । **पक्षीकृतमात्रपरत्वमिति** । अत्र यद्यप्येतत्क्षणवर्त्तिदेवदत्तज्ञानमिति वाक्येन जनिते एतत्क्षणवर्त्तिदेवदत्तज्ञानज्ञाने एतत्क्षणवर्त्तिदेवदत्तज्ञानत्वं विषयः तस्य च प्रामाण्यसंशयाहितसंशयविषयस्य यावत्स्वाश्रयग्राह्यतया व्यभिचारेण तद्वारणाय समभिव्याहृतपरत्वेऽपि स्वपदस्य तृतीयक्षणवर्त्यादिपदं सार्थकं भवत्येव तथापि समभिव्याहृतपरत्वपक्षे शब्दसाम्येऽ-

१. व्यापारानुबन्धिनीं विषयतामादाय ।

ग्राह्यं वा। स्वाश्रये सत्यपि तदुत्तरतृतीयक्षणवृत्तिसंशयविषयत्वात् अप्रा-

स्वाश्रय इति। अत्र संशयसमये स्वाश्रयाविद्यमानतया माभूदसिद्धिरिति स्वाश्रये सति इत्यस्य स्वाश्रये जात इत्यर्थः, तेन स्वाश्रयाधिकरणक्षणोत्तरतृतीयक्षणवर्त्तिसंशयविषयत्वं पर्यवस्यति, तच्चोभयमतसाधारणम्, ज्ञानस्य क्षणद्वयावस्थायितयाऽस्मन्मते तदधिकरणीभूतजन्मोत्तरक्षणावधिकतृतीयक्षणे जन्मावधिकद्वितीयक्षणजातधर्मिज्ञानतृतीयक्षणजातकोटिस्मृतिभ्यां संशयजननात्, तन्मते तत्तदधिकरणजन्मक्षणोत्तरतृतीयक्षण एव स्वप्रकाशात्मकधर्मिधीकोटिस्मृतिभ्यां संशयजननात्।

अपिस्तु न समुच्चयवचनः किंतु विरोधप्रदर्शनार्थः। एतेन स्वाश्रयनिश्चयपरत्वे स्वाश्रयपदस्य परमतेऽसिद्धिः, यथाश्रुते च स्वमतेऽसिद्धिः स्वाश्रयोत्पत्तिक्षणावधिक-

प्यर्थसाम्याभावेनानुमाना[1]प्रवृत्तिमभिप्रेत्यैतदुक्तम्। अत एवाचार्यचरणैः सर्वनाम्ना वक्तोऽयमन्वय इत्युक्तम्।

नन्वत्र स्वपदं पक्षतावच्छेदकरूपावच्छिन्नमात्रपरं वा घटत्ववति घटत्वप्रकारकत्वादिप्रत्येकपरं वा। आद्ये सिद्धसाधनम्, तादृशप्रामाण्याश्रयैर्यावद्भिः पक्षीकृतस्य कस्यापि प्रामाण्यस्य ग्रहणाभावात्। द्वितीयेंऽशतः सिद्धसाधनम्, घटत्ववतीत्यादिप्रामाण्याश्रयैर्यावद्भिः घटत्ववतीत्यादिप्रामाण्यस्य ग्रहणाभावात्। न च पक्षतावच्छेदकावच्छिन्नं साध्यमनुमितिविषय इति नांशतः सिद्धसाधनं दोष इति वाच्यम्, अत्र सर्वशब्दादिजन्यज्ञाननिष्ठे सर्वत्ववति सर्वत्वप्रकारकत्वे पक्षतावच्छेदकस्यातिप्रसक्तत्वात् तत्सामानाधिकरण्यावगाहिन्या एवानुमितेः स्वीकर्त्तव्यत्वादिति।

अत्रेदं तत्त्वम्। तृतीयक्षणवर्त्तिसंशयविषयीभूतं यद् घटत्ववति घटत्वप्रकारकत्वादि तदेव पक्षीकर्त्तव्यम्, न त्वनभ्यासेत्यादि पक्षे विशेषणं देयम्। तथा च घटत्ववति घटत्वप्रकारकत्वं तदाश्रययावद्ग्राह्यं न। तदाश्रये सति तदुत्तरतृतीयक्षणवर्त्तिसंशयविषयत्वात् घटत्वाभाववति घटत्वप्रकारकत्ववदित्यादिप्रयोगः पर्यवस्यति, विप्रतिपत्तावपि एवमेव पक्षसाध्ये निर्वाच्ये। अत एव च विप्रतिपत्तिप्रयोगयोः पक्षतावच्छेदकभेदनिबन्धनार्थान्तरशङ्काऽपि न। न चैव विप्रतिपत्तिव्याख्यानावसरे मूलोक्तपक्षतावच्छेदकहेत्वैक्यनिबन्धनांशतः सिद्धसाधनोद्धार उक्तः कथं समाधेय इति वाच्यम्। सामान्यतः प्रामाण्यपक्षतापक्षमाश्रित्य तन्मूलावतारः। अत एवालोककृत्स्वरसस्वाश्रयव्युत्पादनावसरे वक्ष्यति—स्वपदं च तत्तत्प्रामाण्यपरमिति। यद्वा सर्वपदादिजन्यसकलविषयकज्ञानभिन्नज्ञानप्रामाण्यस्य पक्षतया पक्षतावच्छेदकावच्छिन्नसाध्यकानुमित्याश्रयणात्, प्रत्येकप्रामाण्यपरत्वे स्वपदस्यांशतः सिद्धसाधनोद्धारोऽत्र विधेयः, तदभिप्रेत्यैव स्वपदं चेत्यादि वक्ष्यति, वक्ष्यमाणप्रकारगर्भसाध्ये तु यथाश्रुतमेव सम्यगिति।

विरोधप्रदर्शनार्थ इति। साध्यासत्त्वे हेतोरुपपत्तिरित्येवंरूपतच्छङ्काप्रदर्शनार्थ इत्यर्थः। **एतेनेति**। स्वाश्रयाधिकरणक्षणस्य सामान्यतो विवक्षितत्वेनेत्यर्थः। **परमतेऽसिद्धिरिति**। यद्यपि स्वप्रकाशपक्षे प्रथमक्षण एव स्वाश्रयनिश्चयान्नासिद्धिस्तथाऽपि **स्वाश्रयनिश्चयपरत्वे** स्वाश्रयानुव्यवसायपरत्व इत्यर्थः, तथा चानुव्यवसायस्य परैरनङ्गीकारादप्रसिद्धिर्द्रष्टव्या। **यथाश्रुते** स्वाश्रयोत्पत्ति-

१. अननुगमात्।

चतुर्थक्षणे संशयदर्शनादितिदूषणमलग्नकं वेदितव्यम् । न चैवमप्यसिद्धिरेव परमते तन्मते संशयस्य ग्रहणस्मरणात्मकत्वेन स्वप्रकाशात्मकधर्मिग्रहानन्तरकोटिद्वयस्मृतेरग्रिमक्षण एव सम्भवेन द्वितीयक्षणे एव संशयसम्भवादिति वाच्यं, तादृशधर्मिधीजनितसंस्कारेण स्मृतिरूपधर्मिज्ञानस्य तृतीयक्षणे सम्भवात् । तथा च द्वितीयक्षण इव तृतीयक्षणेऽपि संशयस्तदापि कोटिस्मृतिसत्त्वात् ।

नन्वेवं तन्मते द्वितीयक्षणेऽपि संशयसम्भवेनाग्रिमक्षणेऽर्थसंशयात् तृतीयक्षणवर्त्तिसंशयविषयत्वमर्थे व्यभिचारीति चेत्—न । न ह्यस्मन्मत इव तन्मतेऽपि प्रामाण्याप्रामाण्यकोट्युपस्थितिरेवार्थतद्वत्त्वातद्वत्त्वकोट्युपस्थितिः, तन्मते स्वतन्त्रकोट्युपस्थितेरेव संशयत्वेन प्रामाण्याप्रामाण्यकोट्युपस्थितेः स्वातन्त्र्येण तद्वत्त्वाद्यविषयत्वात् । अस्मन्मते तु सा विशेषणधीत्वेन जनिका । तत्र च स्वातन्त्र्यमतन्त्रम्, गौरवात् । तथा च द्वितीयक्षणे तन्मते प्रामाण्यसंशयेऽपि नाव्यवहिताग्रिमसमयेऽर्थसंशयः, तत्क्षणे स्वतन्त्रकोटिस्मरणात्[1] । न च तन्मते सैव स्मृतिः संशय इति वाच्यं, धर्मिधीसहिताया एव स्मृतेस्तथात्वात् । न च सा धर्मिधीसहिता तदा, धर्मिज्ञानसामग्रीविरहात् । अस्माकं तु आत्मन्यर्थेऽनुभवरूपाया अन्यत्र स्मृतिरूपाया धर्मिधियः सम्भवाद्भवति चतुर्थेऽर्थसंशयः । यत्र तु न तदुभयसम्भवस्तदानीं तत्र पञ्चमादौ संशयेऽपि न कापि क्षतिः । न चैवं प्रकारस्तस्यापि, तन्मतेऽगृहीतासंसर्गधर्मधर्मिधिय एव विशिष्टज्ञानतया तद्वत्त्वादिकोटिस्मृतेः स्मृतिरूपधर्मिज्ञानतायामन्यथाख्यात्यापत्त्या तदनन्तरमेव धर्मिधीसम्भवादिति सर्वं सुस्थम् ।

परत्वे । धर्मिधीसहितेति । स्वतन्त्रधर्मिधीसहितेत्यर्थः, अन्यथा प्रामाण्यादिशरीरनिविष्टधर्मिधीसत्त्वादिति । आत्मनीति मनोग्राह्योपलक्षणम् । अनुभवरूपायाः संशयेन सह समूहालम्बनात्मकानुभवरूपायाः । अन्यत्र मनोऽयोग्ये । स्मृतिरूपायाः प्रामाण्याप्रामाण्यकोटिस्मृत्या सह समूहालम्बनात्मकस्मृतिरूपायाः । एवं प्रकार[2] इति । प्रामाण्याप्रामाण्यस्मृत्युत्पत्तिक्षण एव धर्मिणोऽर्थस्य तद्वत्त्वातद्वत्त्वयोश्च स्मृतिरित्यर्थः ।

अगृहीतासंसर्गेति । यद्यपि परस्परनिरूपितधर्मत्वधर्मित्वानवगाहनान्न विशिष्टज्ञानत्वमुभयावगाहनमात्रेणेति प्रागुक्तं तथापि असंसर्गाग्रहे धर्मस्यान्यधर्मितयाऽनुपस्थितौ च धर्मधर्मिणोः

---

१. स्मरणाभावादिति कपुस्तके ।

२. प्रामाण्याप्रामाण्यकोटिस्मृतिरेव हि आत्मानात्मधर्मिज्ञानं नैयायिकमते तथा मीमांसकमतेऽपि तद्वत्त्वातद्वत्त्वकोटिस्मृतिरेवार्थधर्मिज्ञानमिति प्रकार इत्यर्थः ।

माण्यसंशयाजन्यसंशयविषयत्वाद्वा अप्रामाण्यवत्। अर्थे निश्चितेऽपि न तन्निश्चयानन्तरतृतीयक्षणेऽर्थसंशयो न वा प्रामाण्यसंशयं विनेति नार्थे व्यभि-

विषयत्व कोटित्वम्। यद्वा धर्म्यंशे संशयत्वाभावेन विषयत्वं यथाश्रुतमेवानतिप्रसङ्गात्। स्वाश्रयस्योत्तरत्वपरिचायकतया अप्रसिद्धिवारकतया यत्किञ्चिद्वधिकोत्तरतृतीयक्षणवर्त्तिसंशयविषयेऽर्थे व्यभिचारवारकतया वा सार्थकत्वात्। इदञ्च ज्ञानस्याभाववत् सविकल्पकैकवेद्यतापक्षे, अन्यथा जन्मोत्तरक्षणावधिकतृतीयक्षणेऽपि सशयो दुर्लभः, निर्विकल्पकविशिष्टज्ञानात्मकधर्मिधीकोटिस्मृतिभ्यश्चतुर्थक्षणे प्रामाण्यसंशयादित्यवधातव्यम्।

वस्तुतस्तु धर्मिज्ञानं कोट्युपस्थिति' संशय इति प्रणालिकया तृतीयक्षणे संशयः सामग्रीसत्त्वात्। संशयसाधारणकारणोत्पत्तिमपेक्ष्य कार्योत्पत्तिक्रमेण तदनन्तरतृतीयक्षण एव अपेक्षणीयाभावात्। अर्थसंशयस्तु न तावन्मात्रहेतुक', तावन्मात्रसत्त्वेऽपि तस्य प्रामाण्यसंशयविलम्बेनानुत्पादात्। तथा च न तदवधिकतृतीयक्षण इति वस्तु-

परस्परनिरूपितधर्मधर्मिभावो गृह्यत एवेति नियमादेवमुक्तम्। तृतीयक्षणवर्त्तिसंशयविषयत्वघटविषयकत्वे धर्मितावच्छेदके **गुरुमते** व्यभिचारि, घटविषयक प्रमा नवेति संशयात्। एतत्क्षणवर्त्ति देवदत्तज्ञानमिति वाक्येन जनित एतत्क्षणवर्त्तिनि देवदत्तज्ञाने च धर्मिणि तृतीयक्षणवर्त्तिसंशयविषये तादृशदेवदत्तज्ञानत्ववद्विशेष्यकतादृशदेवदत्तज्ञानत्वप्रकारकयावत्स्वाश्रयग्राह्ये उभयमते व्यभिचारीत्यत आह—**विषयत्वमिति**। ननु प्रथमे न्यायनये व्यर्थता, द्वितीये घटज्ञानप्रामाण्यपक्षताया व्यर्थेत्यस्वरसादाह—**यद्वेति**। यद्यपि धर्म्यपि सशयविषयो भवत्येव, तथापि संशयत्वनिरूपकतापर्याप्त्यधिकरणत्व विषयत्वपदेन विवक्षितम्, न च धर्मी सशयत्वनिरूपकोऽपि तु कोटिरेवेत्यर्थः। निरूपकत्व च निरूपकतापर्याप्त्यधिकरणत्वमतो नोक्तरीत्याऽर्थे व्यभिचार इति द्रष्टव्यम्।

धर्म्यंशे इति। धर्मितावच्छेदकधर्मिरूपेंशे धर्म्यंशे च इत्यर्थः। वस्तुतस्तु घटत्वादिकमपि प्रामाण्यशरीरनिविष्टतया सशयकोटिरेवेत्यर्थे व्यभिचारवारणाय कोटितापर्याप्त्यधिकरणत्व विवक्षितमिति ध्येयम्। ननूत्तरतृतीयक्षणवर्त्तिसंशयविषयत्वमेव हेतुरस्तु किमिति स्वाश्रयाधिकरणक्षणेति विशेषणमित्यत आह—**स्वाश्रयस्येति**। स्वाश्रयाधिकरणस्येत्यर्थः। **अप्रसिद्धीति**। अवधिज्ञान विना सावधिपदार्थाज्ञानादिति भावः। परिचायकस्य हेतौ प्रवेशो न युक्त इत्यत आह—**यत्किञ्चिदिति**। चतुर्थक्षणे स्वाश्रयस्थितिक्षणापेक्षया अग्रे वक्तव्यदोषेण प्रथमकल्प विहाय कल्पान्तरमाह—**वस्तुतस्त्विति**।

रीतिः। तथा च प्रामाण्यसंशयः संशयसामान्यहेतुतोऽर्थसंशयस्तु संशयविशेषसामग्रीमपेक्षते। एवञ्च तृतीयक्षणस्योपलक्षणतया संशयसामान्यसामग्र्यव्यवहितोत्तरक्षणवर्त्तिसंशयविषयत्वं हेतुः पर्यवस्यति। तथा च सत्यर्थे विशेषसामग्र्यपेक्षया सामान्यसामग्र्यव्यवहितोत्तरक्षणवर्त्तिसंशयाविषये क्व व्यभिचारवार्त्ता क्व वा क्षणगणनया असिद्धिप्रसङ्गपक्ष इति। यथाश्रुते तु हेतोरसिद्धिपरीहाराय सविकल्पकैकवेद्यतापक्षोऽनुसरणीयः। तथा च घटविषयत्वादिकं समानधर्मो वाच्यः। ज्ञानत्वस्य समानधर्मस्यापि व्यवसायोत्पत्तिद्वितीयक्षणे वैशिष्ट्यभानात्। तथा च ज्ञानं प्रमा न वेत्याकारः सशयो न स्यात्। स्याच्च घटविषयकं प्रमा न वेति, स्वहेतुसमानधर्मवद्धर्मिविषयत्वनियमात् संशयस्य।

किञ्च ग्रहणस्मरणात्मकसंशयवादिनो द्वितीयक्षणे संशयादसिद्धिस्तथा च तृतीयक्षणवर्त्तिसंशयविषयेऽर्थे[1] व्यभिचारः। न चोक्तप्रकारादुभयसमर्थनम्। घटज्ञानस्य घटज्ञानोभयविषयस्य कोटिस्मृतिसमयजन्मना संस्कारेणाग्रिमक्षणे जनितया घटज्ञानोभयविषयस्मृत्या तृतीयक्षणे प्रामाण्यसंशयसमर्थनेऽर्थव्यभिचारस्य वज्रलेपत्वात्।

यथा च[2] सा स्मृतिधर्मि[3]धीरिति पूर्वोत्पन्नकोट्युपस्थितितृतीयक्षणेऽपि संशयस्तथा सा घटरूपधर्मिधीरपीति तत्सहिततदनन्तरोत्पन्नार्थतथात्वादिकोटिस्मृतिरपि संशयः। भवति च तस्यास्मन्मत इव ज्ञानोत्पत्तिद्वितीयक्षणावधिकतृतीयक्षणवर्त्तित्वं, स्वाधिकरणत्वमात्रस्य त्वदभिमतत्वात्, तस्य द्वितीयप्रथमसाधारण्यात्। न हि तन्मते

संशयसामान्येति। आश्रये विद्यमाने सशयसामान्यसामग्रीमात्राव्यवहितोत्तरक्षणवर्तिसंशयविषयत्वं हेतुरित्यर्थः। प्रथमकल्पे दोषमाह—**यथाश्रुत** इति। **स्वहेत्विति**। स्वहेतुज्ञानविषय इत्यर्थः। तथा च स्वहेतुज्ञानविषयो यः समानधर्मस्तद्विशिष्टधर्मिविषयत्वनियमादित्यर्थः। भवतु घटविषयक प्रमा न वेत्याकारकः सशयस्तथाप्यनुमाने न किञ्चिद्दूषणमित्यस्वरसादाह—**किञ्चेति**। **उक्तप्रकारादिति**। स्मृतिरूपधर्मिधियः तृतीयक्षणे उत्पादात् स्वतन्त्रकोटिस्मृतिधर्मिज्ञानात्मकार्थसशयस्य स्वाश्रयोत्पत्तिक्षणावधिकतृतीयक्षणेऽसत्त्वाच्चेत्यर्थः। असिद्ध्युद्धारेऽपि अर्थे व्यभिचारतादवस्थ्यमाह—**घटज्ञानस्येत्यादि**। तृतीयक्षणे यथा ज्ञानरूपस्य धर्मिणः स्मृतिः तथाऽर्थरूपस्यापि धर्मिणः स्मृतिः स्यादेव। तथा च ज्ञानरूपधर्मिस्मृतिसहितायाः प्रथमोत्पन्नप्रामाण्याप्रामाण्यकोटिस्मृतेर्यथा तृतीयक्षणे प्रामाण्यसशयरूपत्व तथाऽर्थरूपधर्मिस्मृतिसहितायाः चतुर्थक्षणोत्पन्नार्थतद्वत्त्वातद्वत्त्वकोटिस्मृतेरपि अर्थसशयत्व[4]मित्याह—**यथा च सेति**। इदमुपलक्षणम्। **गुरुमते** द्वितीयक्षणोपजाततद्वत्त्वातद्वत्त्वस्मृति-

१. विषयत्वेनार्थे इति नपुस्तके। २. हीति कपुस्तके। ३. 'ज्ञानरूपाधर्मि' इति नपुस्तके।
४ तथा सति स्थितिरूपस्वाश्रयाधिकरणक्षणोत्तरतृतीयक्षणवर्त्तिसंशयविषयत्वमर्थे व्यभिचारीत्याहेत्यर्थः।

:जन्मक्षणो मन्मते स्थितिक्षण एव स्वाश्रयक्षण इति साधारणहेतुशब्देन:वक्तुं शक्यमित्यापातचमत्कार एवायमुक्तप्रकारो न विचारसहः। तदुक्तं सोन्द(डो)लोपाध्यायै[1]स्तृतीयत्वमविवक्षितमव्यवधानमात्रस्यैवोपलक्षितत्वादिति। अव्यवधानञ्च सामान्यसामग्र्यनन्तरत्वमिति नासिद्धिः।

ननु तथापि हेतुरसिद्धः। स्वाश्रयस्य तदानीं धर्मिज्ञानादिना विनाशे उपनयद्वारा मानससंशयाभ्युपगमात् कथंचित्सम्भवेऽपि किन्तदुपादानेन तद्विनाकृतहेतोरेवाव्यभिचारभावादिति।

अत्र ब्रूमः—तद्वति तत्प्रकारकत्वमात्रमिह पक्षो न त्वनुभवत्वगर्भमित्युक्तम्। न च तत्प्रतिज्ञानमन्यत्, समानविषयकसमानप्रकारकज्ञानानां तद्वतीत्यादेरभेदात्। स्वपदञ्च तत्तत्परम्; समभिव्याहाराद्व्युत्पत्तेः। तथा च घटज्ञानादीनां तत्तदनुव्यवसायेन विनाशेऽपि तत्तत्समयजन्मना व्यवसायजनितसंस्कारेण कोटिस्मृतिसमकालजनितघटस्मृतेः पक्षीकृतघटत्ववतीत्यादिप्रामाण्याश्रयस्य प्रामाण्यसंशयविनाश्यत्वेन तत्समये विद्यमानत्वम्। न चैवंप्रकारस्यासार्वत्रिकता। हेतोरेव फलत उक्तक्रमेण पक्षतावच्छेदकतया यत्रैवं सम्भवः तस्यैव पक्षत्वात्। न च तद्विनाकृतहेतोरेव गमकत्वमित्यपि। अन्येन व्यभिचारात्। तत्र सामान्यसामग्रीजन्यसंशयस्यापि भावात्। न च स्मृतिरूपेऽपि घटनिश्चये तत्संशयः प्रामाण्यसंशयं विना। तथा च प्रामाण्यसंशयजन्यसंशयविषये विशेष्यस्याभावात्, तदविषये विशेषणाभावात् विशिष्टहेत्वभाव उभयत्राविशिष्ट इति नार्थे व्यभिचारलेशः। न चैवं कोटिस्मृतिसमकालीनघटस्मृतेः स्वाश्रयस्य प्रामाण्यसंशयानन्तरभाव्यर्थसंशयकालेऽसत्त्वनियमेन स्वाश्रये

तृतीयक्षणोपजातार्थरूपधर्मिस्मृत्यात्मकोऽर्थसंशयः स्वाश्रयोत्पत्तिक्षणावधिकतृतीयक्षणेऽपि संभवत्येवेत्यपि ध्येयम्। स्वाश्रये विद्यमाने इति विशेषणासिद्धिं शङ्कते—**नन्विति**। **धर्मिज्ञानादिना** सविकल्पकरूपधर्मिज्ञानस्यादिना कारणेन निर्विकल्पकेन। **कथञ्चिदिति**। आत्मन्यर्थे अनुभवरूपाया इत्याद्युक्तप्रकारेणेत्यर्थः। **घटस्मृतेरित्युपलक्षणम्**। मनोयोग्येऽर्थप्रामाण्यसंशयकाले तदनुभवोऽपि बोद्धव्यः। **फलत** इति। हेतुकृतसंशयसामग्र्याः पक्षतावच्छेदकत्वादिति भावः।

स्वरूपासिद्धिं निराकृत्य वैयर्थ्यदोषं निराकरोति—**न चेति**।

सामान्यसामग्रीजन्येति। सामान्यसामग्रीमात्रजन्येत्यर्थः। स्वाश्रये सतीति विशेषणे दत्तेऽर्थे व्यभिचारो नास्तीत्याह—**न च स्मृतिरूपेति**। प्रामाण्यसंशयाव्यवहितोत्तरक्षणे घटस्मरणं ततो

1. व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावोऽस्तीतिमतप्रवर्त्तकैरिति।

विद्यमाने संशयविषयत्वादित्येव समञ्जसमिति वाच्यं, संशयानुभवरूपतया[1] तत्काले घटस्मृत्यनुत्पत्तिनियमेन तदनन्तरमप्युक्तन्यायेन घटस्मृतिसम्भवात्। तस्यार्थसंशयपर्यन्तमवस्थानस्यापि प्रायशो भावात्। न चानुभवसामग्र्यपेक्षया स्मृतिसामग्रीदौर्बल्येन प्रामाण्यसंशयानन्तरमर्थसंशय एव न घटस्मृतिरिति वाच्यं, धर्मिज्ञानादिविलम्बेन प्रामाण्यसंशयाव्यवधानेनार्थसंशयानियमात्। प्रत्युतार्थसंशयानुरोधेन धर्मिधियः स्मृतिरूपाया. प्रायेण सम्भवेन तत्काले घटस्मरणावश्यकत्वस्यैव प्राप्तेः। न च घटस्मरणस्यार्थसंशयहेतुधर्मिधीत्वे घटोऽयं घटो न वेतिसंशयाकारापत्तिः। घटत्वस्योच्चत्वस्येव संशयाप्रयोजकत्वात्। तस्यैव च संशयविषयत्वनियमात्। घटत्वस्य विरो-

घटो न वेति सशय इत्याह—संशयानुभवरूपतयेति। धर्मिज्ञानादिविलम्बेनेति। धर्मिज्ञानमेवादिः कारण तद्विलम्बेनेत्यर्थः। न च प्रामाण्यस्मरणकालीनघटस्मरणस्योक्तत्वात्तस्य च प्रामाण्यसशयकाले विद्यमानत्वादग्रिमक्षणेऽर्थे सशयोत्पत्तौ कथ विलम्ब इति वाच्यम्, यत्रैव प्रामाण्याप्रामाण्यस्मरणकाले न घटस्मरण तत्रैवोक्तरीत्या प्रामाण्यसशयाग्रिमक्षणे घटस्मरणस्वीकारात् व्यभिचारेण सशयसामान्येत्यादिविशेषणस्य सार्थकत्वादिति भावः। न च तथा सति पक्षे हेत्वसिद्धिः प्रामाण्यसंशयोत्पत्तिकाले स्वाश्रयासत्त्वादिति वाच्यम्, स्थलान्तरमादाय तस्मिन्नेव प्रामाण्ये हेतुसत्त्वादिति। अत एवोक्त—प्रायश इति। वक्ष्यति च प्रायेणेति। प्रायिकत्वं च घटस्मरणान्वितमुभयत्रेति ध्येयम्।

वस्तुतस्तु प्रामाण्यस्मृतिकाले स्मृतस्य घटस्य प्रामाण्यसंशये उपनीतभानमादाय स्वाश्रयेविद्यमानताऽस्ति। यद्वा स्वाश्रये विद्यमाने इत्यस्य संशयोत्पत्त्यव्यवहितपूर्वक्षणे स्वाश्रयविद्यमानत्वमर्थः। तथा च प्रामाण्याप्रामाण्यकोटिस्मृतिकालीनघटस्मृतिमादायैव प्रामाण्येऽर्थे च स्वाश्रये विद्यमान इति विशेषणस्य संगतिरिति ध्येयम्।

फलाशयोर्विरोधमाशङ्क्य निषेधति—न चेति। घटोऽयमिति। घटः स इत्यर्थः, अयमिति यदा नास्ति तदा सम्यगेव। उच्चत्वस्येवेति। (तथा च साधारणधर्मतया यथोच्चत्वं प्रकृते सशयप्रयोजकं तथा न घटत्वमित्यर्थः)[2] व्यतिरेके दृष्टान्तः, तथा च सशयप्रयोजकतया धर्म्यंशे घटत्वं न विषय इति स घटो न वेति सशये फलाशयोर्न विरोध इति भावः। ननु तथापि कोटिनिश्चयात्मकधर्मिज्ञाने कोटिद्वयज्ञानयोः सशयसामग्र्यशयोर्विरोधः स्यात्। कोटिनिश्चयस्य सशय-

१. सशयस्यार्थिभवतयेति पाठान्तरम्।

२. इत्यधिकः पाठः काशीस्थसरस्वतीभवनपुस्तके।

चारः। विवादपदं न यावत्स्वाश्रयग्राहकग्राह्यं स्वाश्रयनिश्चये सति तदुत्तर-धित्वेन संशयाप्रयोजकत्वात्[1]। सामग्र्योरपि विरोधो नेहेत्यग्रे दर्शयिष्यमाणत्व-मेवेत्यलमधिकेनेति।

वस्तुतस्तु नायमुभयमतासिद्धो हेतुः पक्षीकृतस्य तद्व्यक्तिविशेष्यकत्वस्य गुरुमते संशया-संस्पर्शात्। इदं ज्ञानद्वयमेकं वेति तन्मते प्रामाण्यसंशयात्। तथा च स्वाश्रये जाते तदुत्तरावधिकस्तृतीयो यः क्षणस्तद्वृत्तिसंशयविषयत्वादिति विवक्षितो हेतुर्न तु तदु-त्तरतृतीयक्षणं, तदुत्तरत्वस्य व्यर्थत्वात्। तदवधिकपूर्वोत्तरसाधारणतृतीयक्षणवृत्ति-संशयविषयत्वस्याव्यभिचारात्। उत्तरात् तृतीय इत्यर्थे चतुर्थक्षणपर्यवसायिनि उत्तरत्वस्य तृतीयत्वपरिचायकतया स्वाश्रये सतीत्यस्योत्तरत्वपरिचायकतयाऽप्रसिद्धि-वारकत्वेन व्याप्तिग्रहौपयिकतया स्वाश्रयपदस्य यत्किञ्चिदुत्तरावधिकतृतीयक्षणवृत्ति-संशयविषयार्थव्यभिचारवारकतया वा सार्थकत्वमिति न काचिदनुपपत्तिरिति वयम्।

स्वाश्रये सति **स्वाश्रयनिश्चये सति** इत्यन्ये।

स्वाश्रये सति संशयविषयत्वादिति परन्ते,

स्वमते तु तदुत्तरतृतीयेत्यादिहेतुद्वयमेवेत्यपि कश्चित्।

प्रतिबन्धकत्वादित्यत आह—**सामग्र्योरपीति**। नानुव्यवसाययोरपीत्यर्थः। अप्रामाण्यशङ्काशून्य-जातीयकोटिनिश्चयस्यैव संशयप्रतिबन्धकत्वं नान्यस्येत्यर्थादग्रे ननु मैवं पृच्छेत्यत्र दर्शयिष्यत इत्यर्थः। **तदवधिकेति**। स्वाश्रयजन्यक्षणेनासमानकालीनोऽव्यवहितश्च यः क्षणः तेनासमानकालीनोऽव्यव-हितः स्वाश्रयजन्मक्षणासमकालीनश्च यः क्षणः तद्वृत्तिसंशयविषयत्वस्येत्यर्थः। यद्यप्यर्थसंशयानन्तरं विशेषदर्शनजनितघटनिश्चयस्य स्वाश्रयतया तज्जन्मक्षणावधिकपूर्वतृतीयक्षणवृत्तिसंशयविषयत्वमर्थे व्यभिचार्येव, तथापि स घटनिश्चयो न स्वाश्रयः तृतीयक्षणवृत्तिसंशयविषयप्रामाण्याश्रयस्य तत्त्वात्, तत्र च विशेषदर्शनमूलकतया तृतीयक्षणे प्रामाण्यसंशयाभावादिति भावः।

केचित्तु न तु तदुत्तरेत्यनेन मूलस्योत्तरशब्दार्थो न दूष्यते किन्तू**त्तरादिति** यत्स्वयमुक्तं तत्र तदुत्तर इति तृतीयक्षणे विशेषणं व्यर्थतया दूष्यते। तथा च ज्ञानत्वविशिष्टज्ञानग्रहरूपं धर्मिज्ञान-माश्रित्य स्वाश्रयोत्तरादित्यनेन स्वाश्रयस्थितिक्षणादुत्तरोऽभिमतः, न च तत्पूर्वतृतीयक्षणेऽर्थसंश-यस्तदा स्वाश्रयस्य सत्त्वादित्यर्थमाहुः। **चतुर्थेति**। निर्विकल्पकानङ्गीकारे स्वाश्रयजन्मक्षणात् तदङ्गीकारे स्वाश्रयस्थितिक्षणाच्चतुर्थत्वमिति भावः।

निश्चये सतीति। स्वप्रकाशमादाय प्रथमः क्षणः **प्राभाकराणां** अनुव्यवसायमादाय

---

१. घटत्वस्य विरोधादित्येव कनपुस्तकयोः।

द्वितीयः[1] क्षणश्च **नैयायिकानां** स्वाश्रयनिश्चयः क्षणः, तथा च स्वाश्रयनिश्चयोत्पत्तिक्षणोत्तरतृतीयक्षणवर्त्तिसंशयविषयत्वमुभयमतसाधारणो हेतुरित्यर्थः। तृतीयक्षणे स्मरणरूपे स्वाश्रयनिश्चयोत्पत्तौ तदनन्तरं स्वतन्त्रधर्मिज्ञानकोटिज्ञानात्मकसंशयस्य **प्राभाकरमते** प्रागुक्तत्वादुक्तहेतुरर्थे व्यभिचार्येव, घटत्ववति घटत्वप्रकारकत्वस्य च तन्मते संशयास्पर्शश्चेत्यरुचेरुक्तम्—**अन्ये** इति। तदुत्तरतृतीयेत्यादिस्वाश्रयाधिकरणक्षणोत्तरतृतीयक्षणवर्त्तिसंशयविषयत्वमर्थः, **गुरुमते** उक्तप्रामाण्यस्य संशयास्पर्शः **न्यायनये**ऽपि सविकल्पकैकवेद्यतादिदोष[2] उक्त एवेत्यरुचेरुक्तम्—**कश्चिदिति**।

अत्रेदं निर्गलितम्। स्वाश्रयाधिकरणक्षणोत्तरतृतीयक्षणवर्त्तिसंशयकोटितापर्याप्त्यधिकरणत्वमुभयमतसाधारणो हेतुः। तत्र **न्यायनये** प्रथमक्षणेऽयं घट इति ज्ञानं तदेव स्वाश्रयः, ततो ज्ञानत्वांशे निर्विकल्पकरूपो घटविषयकत्वांशे च सविकल्पकरूपोऽनुव्यवसायः, स एव धर्मिग्रहः, ततः कोटिस्मृतिः, ततो घटविषयकं प्रमा न वेति संशयः, स च स्वाश्रयाधिकरणादनुव्यवसायक्षणादुत्तरतृतीयक्षणवर्त्ती भवति। **गुरुमते**ऽयं घट इति ज्ञानं स्वाश्रयस्तदेव धर्मिज्ञानम्, ततः कोटिस्मरणम्, ततः पुनरपि स्मृतिरूपं धर्मिज्ञानम्, तदेव पूर्वोत्पन्नकोटिद्वयसहितं संशयः, स च स्वाश्रयाधिकरणादाद्यक्षणादुत्तरतृतीयक्षणवर्त्ती भवति। तत्र दूषणं दत्तमपरमपि किञ्चिदुच्यते—जन्मक्षणापेक्षया तृतीयक्षणेऽप्यर्थे **गुरुमते** संशयः सम्भवतीति व्यभिचारः, प्रामाण्याप्रामाण्यकोटिस्मृतिकाले घटस्मृतेः सम्भवात्। न च विशिष्टज्ञानापत्तिः घटत्वाभावघटयोरेकज्ञाने विषयत्वे स्यादित्युक्तमिति वाच्यम्, स्वतन्त्रयोर्धर्मधर्मिणोरेकज्ञानविषयत्वे परस्परनिरूपितधर्मत्वधर्मित्वावगाहने वा विशिष्टज्ञानस्वीकारात्, प्रकृते च तदभावात्। किञ्च स्वाश्रयाधिकरणक्षणोत्तरतृतीयक्षणवर्त्तिसंशयविषयत्वं **न्यायनये**ऽप्यर्थे व्यभिचारि, यत्र प्रामाण्याप्रामाण्यकोटिद्वयं घटज्ञानं घटं च विषयीकृत्य समूहालम्बनमुत्पन्नं तत्र तदग्रिमक्षणे प्रामाण्यसंशये तदग्रिमक्षणेऽर्थसंशये च बाधकाभावात्। घटानुभवेन प्रामाण्याप्रामाण्यकोट्योरुपनीतयोरवगाहने तदग्रिमक्षणे धर्मिज्ञाने तदग्रिमक्षणे प्रामाण्यसंशये तदग्रिमक्षणेऽर्थसंशये च बाधकाभावात्। किञ्च स्वाश्रयस्थितिक्षणावधिकोत्तरतृतीयक्षणे प्रामाण्यसंशयश्च प्रामाण्यस्य यावत्स्वाश्रयग्राह्यत्वेऽप्युपपन्नः, घटज्ञानेन प्रामाण्यावगाहनेऽपि तस्य तृतीयक्षणे नाशाच्चतुर्थक्षणवर्त्तिप्रामाण्यसंशये बाधकाभावादित्यप्रयोजको हेतुः। किञ्च स्वाश्रये विद्यमाने संशयसामान्यसामग्रीत्यादिहेतुरपि व्यभिचारी, अयं घटो न वेति स्वारसिकसंशयस्य स्वाश्रयतया तमादाय तदग्रिमक्षणोत्पन्नतादृशसंशयान्तरमादाय हेतोरर्थे सत्त्वात्। न च निश्चयरूपस्वाश्रये सतीति विवक्षितमतो नोक्तदोष इति वाच्यम्, पुरुषान्तरीय स्वाश्रयमादाय[3] तथापि व्यभिचारात्। असिद्धेश्च[4] संशयसामान्यसामग्रीमात्रजन्यत्वं हि विशेषकारणाजन्यत्वपर्यवसितम्, तच्चा-

---

१. तृतीयक्षण इति तालपत्रपुस्तके। २. वेद्यतानिर्दोष इति तालपत्रपुस्तके पाठः।

३. संशयमादायेति तालपत्रपुस्तके पाठः। ४. असिद्धश्चेति तालपत्रपुस्तके।

सम्भवि, सर्वत्र कार्ये विशेषकारणसत्त्वात् । न च प्रामाण्यसंशयरूपविशेषकारणाजन्यत्वं तदर्थः, संशयसामान्यकारणजन्यत्वस्य वैयर्थ्यात् । न च तत्त्याज्यमेवेति वाच्यम्, अग्रिमहेत्वभेदापत्तेः । स्वाश्रये सतीति विशेषणं विना[1] चाग्रिमो हेतुर्व्याख्यास्यत इति चेत्—तथापि पुरुषान्तरीयं स्वीयञ्च भिन्नधर्म्यादिकं स्वाश्रयमादाय व्यभिचारस्यानुद्धारादिति ।

अत्र ब्रूमः । अगृहीताप्रामाण्यं समानाधिकरणं निश्चयरूपं यत्पक्षीकृतप्रामाण्याश्रयो ज्ञानं तदधिकरणक्षणाव्यवहितोत्तरक्षणे तद्धर्मिणि तद्धर्मितावच्छेदकावच्छेदेन सन्देहकोटितापर्याप्त्यधिकरणत्वं हेतुः । तद्धर्मिणि तद्धर्मितावच्छेदकावच्छेदेन यावत्सु पक्षीकृतप्रामाण्याश्रयज्ञानेषु प्रकारो नेति साध्यम् । यद्वा अगृहीताप्रामाण्या समानाधिकरणा निश्चयरूपा या ज्ञानव्यक्तिः तदधिकरणक्षणाव्यवहितोत्तरक्षणे तद्धर्मिणि तद्धर्मितावच्छेदकावच्छेदेन कोटितापर्याप्त्यधिकरणत्वं हेतुः । तद्धर्मिणि तद्धर्मितावच्छेदकावच्छेदेन तस्या ज्ञानव्यक्तौ प्रकारो नेति साध्यम् ।

ननु प्रथमे कल्पे घटत्ववति घटत्वप्रकारकत्वादीना यत्र ज्ञाने धर्मिणि यदवच्छेदेन स्वाश्रयाधिकरणक्षणाव्यवहितोत्तरक्षणवर्त्तिसंशयकोटितापर्याप्त्यधिकरणत्वं तत्र तदवच्छेदेन यावत्सु पक्षीकृतप्रामाण्याश्रयज्ञानेषु प्रकारत्वाभावस्य **गुरुमते**ऽपि सत्त्वात् सिद्धसाधनमिति चेत्—

न । तत्र धर्मिणि तदवच्छेदेन स्वाप्रकारकयावत्तादृशस्वाश्रयकत्वस्य साध्यत्वात् यावत्स्वाश्रयाप्रकारकत्वस्य चार्थाल्लाभात् । द्वितीयकल्पेऽपि यस्मिन् धर्मिणि यदवच्छेदेन यत्स्वाश्रयव्यक्तिप्रकारत्वं सम्भावितं तस्मिन् तदवच्छेदेन तत्प्रकारत्वनिषेधेऽर्थात् यावत्स्वाश्रयाप्रकारत्वलाभादिति । मूलोक्तं तृतीयत्वमुक्ताव्यवधानपरमेव, अव्यवधानमात्रस्येति **सोन्दलोपाध्याय**वचनमप्युक्ताव्यवधानपरमेव । अत्र च तस्मिन् धर्मिणि तदवच्छेदेन यावता स्वाश्रयाणां स्वप्रकारकत्वे तस्मिन् धर्मिणि तदवच्छेदेन तस्या ज्ञानव्यक्तौ स्वस्य प्रकारकत्वे वा हेत्वसम्भवः, सति प्रतिबन्धके कार्यानुत्पत्तेरिति विपक्षबाधकस्तर्कः सुदृढः । न चाग्रिमहेत्वभेदः, स्वाश्रये विद्यमाने सतीत्यस्याप्रवेशात् । प्रवेशेऽप्यत्र स्वाश्रयोत्तरतायाः प्रवेशात् । तत्र अप्रामाण्यसंशयाजन्यत्वस्य संशयविशेषणत्वादिहागृहीताप्रामाण्यत्वस्य स्वाश्रयविशेषणत्वात् ।

अत्र रूपं गुण इदं च ज्ञानं प्रमा न वेति समूहालम्बनात्मकस्वाश्रयाधिकरणक्षणाव्यवहितोत्तरक्षणे रूपं गुणो न वेति संशयमादाय गुणत्वे व्यभिचारादगृहीताप्रामाण्यमिति । रूपं गुण इति देवदत्तीयनिश्चयाधिकरणक्षणाव्यवहितोत्तरक्षणे यज्ञदत्तीय रूपं गुणो न वेतिसंशयमादाय गुणत्वे व्यभिचारात् समानाधिकरणमिति । इदं रूपं न वेति स्वारसिकसंशयस्य स्वाश्रयतया तदग्रिमक्षणोत्पन्नतादृशसंशयमादाय तत्र व्यभिचारात् निश्चयरूपमिति[2] । घटनिश्चयाधिकरणक्षणाव्यवहितोत्तरक्षणे तादृश[3]संशयमादाय तत्र व्यभिचारात् पक्षीकृतप्रामाण्याश्रय[4] इति । रूपं गुण इति निश्चया-

---

१ विनैवेति तालपत्रपुस्तके ।

२. तादृशसंशयात्मकस्वाश्रयाधिकरणक्षणाव्यवहितोत्तरक्षणे तादृशसंशयमादाय तत्र व्यभिचारान्निश्चयरूपमितीति गपुस्तके पाठः । ३. रूपं गुणो न वेति ।

४. यं धर्मिणं विशेष्यीकृत्य सन्देहः स पक्षीकृतप्रामाण्याश्रयपदेन विवक्षितः ।

ननु घटं घटत्वेन पटञ्च किञ्चित्त्वेन समूहालम्बनात्मना ज्ञानेन ज्ञात्वा पटे घटोऽयं न वेति भवति तृतीयक्षणे संशयस्तत्कोटित्वमप्यस्ति घटत्वस्य न स्वाश्रयाग्राह्यत्वमिति व्यभिचार इति चेत्—न। स्वपदस्य पक्षीकृतसंशयसामग्रीविशिष्टप्रामाण्यपरतया तत्र प्रामाण्यसंशयाभावेन विशिष्टाभावरूपसाध्यसत्त्वेनाव्यभिचारात्। न हि तादृग् संशयः प्रामाण्यसंशयजन्मेति सम्भवतीति दिक्।

धिकरणक्षणाव्यवहितोत्तरक्षणे तादृश[1]संशयमादाय तत्र व्यभिचाराद्‌त्तरेति। रूप गुण इतिनिश्चयाधिकरणक्षणाव्यवहितोत्तरक्षणे ज्ञानं गुणो न वेति सशयमादाय तत्र व्यभिचारात् तद्धर्मिणीति। नीलो गुण इति निश्चयाधिकरणक्षणाव्यवहितोत्तरक्षणे नीले धर्मिणि तादृशसशयमादाय तत्र व्यभिचाराद्धर्मितावच्छेदकावच्छेदेनेति। रूप गुण इतिनिश्चयाधिकरणक्षणाव्यवहितोत्तरक्षणे रूपं गुण इतिनिश्चये कोटित्व धर्मितावच्छेदकान्यप्रकारत्वात्मकमादाय तत्र व्यभिचारात्सन्देहेति। रूप गुण इतिनिश्चयोत्तर रूप गुणो वायुवृत्तिर्न वेतिसशयमादाय धर्मितावच्छेदके तत्र व्यभिचारात् कोटितेति। रूप गुण इतिनिश्चयोत्तरं ज्ञानं प्रमा न वेतिसंशयमादाय तत्कोटिषट्के[2] तत्र व्यभिचारात् पर्यासीति एकादश हेतुविशेषणानि। रूपं गुण इतिनिश्चयोत्तरं ज्ञानं गुणो नवेतिसंशयमादाय तत्र हेतुसत्त्वात् ज्ञानं गुण इतिज्ञाने स्वाश्रये संशयधर्मिणि संशयधर्मितावच्छेदकावच्छेदेन प्रकारत्वाद्यव्यभिचारात् यथाश्रुतसाध्ये यावत्स्विति। स्वाप्रकारकयावत्तादृशस्वाश्रयकत्वे साध्ये पर्यवसिते रूपं गुण इतिनिश्चयोत्तरमिदं ज्ञानं गुणो न वेतिसंशयमादाय हेतुसत्त्वादिदं ज्ञानं गुण इतिगृहीताप्रामाण्यादिज्ञानप्रकारतया व्यभिचारात्तादृशेति। अगृहीताप्रामाण्यसमानाधिकरणनिश्चयात्मकाव्यवहितपूर्वक्षणवर्त्तीत्यर्थः। सिद्धसाधनवारणाय यावदिति। उद्देश्यसिद्ध्यर्थं स्वाश्रयेति। ज्ञानं प्रमेयवदितिनिश्चयोत्तरमिदं ज्ञान प्रमा न वेतिसंशयकोटौ प्रमात्वे व्यभिचारात् प्रकार इति विशेषणचतुष्टयमिति सर्वं रमणीयम्।

यथाश्रुते शङ्कते—**ननु घटमिति**। **विशिष्टाभावेति**। ननु तादृश[3]संशयविशेष्या यावन्तः स्वाश्रयास्तावद्ग्राह्यत्वाभावः साध्यः, यज्ज्ञानव्यक्त्यधिकरणक्षणोत्तरतृतीयक्षणवर्त्तिसशयकोटित्व प्रामाण्यसशयविशेष्यतज्ज्ञानव्यक्तिग्राह्यत्वाभावो वा। आद्ये घटज्ञानात्मकाः प्रामाण्यसशयविशेष्या यावन्तोऽन्ये स्वाश्रयास्तावद्ग्राह्यत्व घटत्वेऽस्त्येवेति कथ तदभावरूप साध्यम्। अन्त्ये प्रामाण्यसशयविशेष्यत्व तज्ज्ञानव्यक्तौ नास्तीति विशिष्टाप्रसिद्ध्या कथ विशिष्टाभाव इति चेत्—उच्यते। प्रामाण्यसशयविशेष्यत्वस्वग्राहक वोभयाभाववत्तद्व्यक्तिकत्वमिह[4] साध्यम्। स्वपद च यत्र यद्यत्साध्यं योज्यते तत्पर विशिष्टाभावशब्देन चोभयाभाव एव विवक्षितमिति। **सम्भवतीत्यनन्तर** येन तदनुरोधेन तृतीयक्षणे प्रामाण्यसशयः तत्र स्यादिति शेषः। तादृक् स्वाश्रयोत्पत्तौ तृतीयक्षणवर्त्तीत्यर्थः। नाप्यनुभवसिद्धस्तत्र घटज्ञाने प्रामाण्यसशय इति दिगर्थः।

---

१. पूर्वक्षणवर्त्ति रूपं गुणो न वेति।

२. गुणत्ववति गुणत्वप्रकारकत्वरूपप्रमात्वकोटिषट्के गुणत्वे। ३. प्रामाण्यमिति भावः।

४. प्रकृते प्रामाण्यसंशयविशेष्यत्ववत्तद्व्यक्तिकत्वं नास्तीति भावः।

ननु रूपं गुण इति ज्ञानानन्तरं ज्ञानानुव्यवसायकोटिस्मृतिभ्यां तृतीयक्षणे तत्र ज्ञाने गुणो न वेति यदा सन्देहस्तदा स्वाश्रयोद्भवतृतीयक्षणवर्त्तिसंशयविषयत्वं अप्रामाण्यसंशयाजन्यसंशयविषयत्वं च गुणत्वे गतं न च स्वाश्रयाग्राह्यत्वमिति व्यभिचारः। न च स्वपदस्य तृतीयक्षणवर्त्तिसंशयविषयप्रामाण्यादिपरतया प्रकृते च तथा संशयाभावेन तादृशसंशयविषयप्रामाण्याश्रयाग्राह्यत्वरूपविशिष्टाभावसत्त्वेन साध्यसत्त्वान्नैवमिति वाच्यं गुणत्वप्रामाण्ययोः समूहालम्बनसंशयस्यापि भावात्। न च संशयविशेष्य इति साध्ये पूरणीयम्। कदाचित्तस्यापि संशयविशेष्यत्वात्। न च तृतीयक्षणवर्त्तिसंशयविशेष्ये इति साध्ये पूरणीयम्, तथा च रूपे गुणत्वग्राहिणोऽपि ज्ञानस्य प्रकृतसंशयविशेष्यज्ञानधर्मिकगुणत्वाग्राहिणः साध्यसत्त्वान्नोक्तदोष इति वाच्यं, अर्थव्यभिचारवारणार्थं विशेषणोपादानानुपपत्तेः, विवक्षितसाध्यस्य तत्र सत्त्वात्।

यथाश्रुत एव शङ्कते—ननु रूपमिति। यद्यनेनाशङ्कितमपि तथाऽपि अधिकाशङ्कार्थमुत्थापितम्, अप्रामाण्येति यथाश्रुतहेत्वभिप्रायेण, अग्रे निवर्गीयस्य स्वरूपायोग्यत्वघटितहेतोः प्रकृतेऽभावात्। इदमुपलक्षणम्। संशयमानान्दलानर्ग्रीत्वादिहेतुरपि तत्र गत इति ध्येयम्। तादृशेति। स्वाश्रयाधिकरणक्षणोत्तरतृतीयक्षणवृत्तीत्यर्थः। अत्रापि तादृशप्रामाण्यसंशयविशेष्यत्वस्वग्राहकत्वोभयाभाववत्तज्ज्ञानव्यक्तिकत्वं साध्यमिति भावः।

गुणत्वप्रामाण्ययोरिति। तथा चोभयोः सत्त्वान्नोभयाभाव इति भावः। तस्यापि रूपस्यापि। तृतीयक्षणवर्त्तिसंशयविशेष्य इति। स्वाश्रययद्व्यक्त्यधिकरणक्षणोत्तरतृतीयक्षणवर्त्तिसंशयकोटित्वं तद्व्यक्त्यधिकरणक्षणोत्तरतृतीयक्षणवर्त्तिप्रामाण्याप्रामाण्यकोटिकसंशयविशेष्ये तया व्यक्त्या न गृह्यत इति साध्यसत्त्वादित्यर्थः। देवदत्तज्ञानं प्रमा गुणश्चेति निश्चये तृतीयक्षणे प्रमात्वगुणत्वसंशये तदुत्तरक्षणे देवदत्तज्ञाने प्रमात्वसंशये गुणत्वे व्यभिचारात् तद्व्यक्त्यधिकरणक्षणोत्तरतृतीयक्षणवर्त्तीत्युक्तम्। रूपं वायुवृत्ति न वेत्यादिसंशयमादाय दोषतादवस्थ्यात् प्रामाण्याप्रामाण्येत्युक्तम्। सर्वं ज्ञानं गुण इत्याकारकेण स्वाश्रयतृतीयक्षणवर्त्तिप्रामाण्यसंशयविशेष्ये यस्मिन् गुणत्वग्रहणात्तयेत्युक्तम्—विवक्षितेति। स्वाश्रययद्व्यक्त्यधिकरणक्षणोत्तरतृतीयक्षणवर्त्तिसंशयकोटित्वं तया व्यक्त्या तादृशप्रामाण्याप्रामाण्यसंशयविशेष्ये ज्ञानेऽर्थस्य घटत्वादे[1]र्ग्रहणादिति भावः। इदमुपलक्षणम्। व्यभिचारोऽपि द्रष्टव्यः। सर्वं ज्ञानं गुण इति ज्ञाने इदं ज्ञानं प्रमा न वा रूपं गुणो न वेति समूहालम्बनसंशयविषयगुणत्वे साध्यासत्त्वादिति। न तु हेतुकृतसंशयविशेष्ये न स्वाश्रयग्राह्यत्वमिति साध्यमभिप्रेतम्, न च संशयान्तरमपि हेतुः कदाचित् क्रियत एवेति वाच्यम्, समभिव्याहारात् प्रकृतहेतोरेव हेतुपदेन लाभात्। तथा च तृतीयेत्यादिहेतुविशेषणं सार्थकमित्या-

१. ज्ञानं घटे घटत्वं गृह्णाति न तु ज्ञाने इति हृदयम्।

न च समभिव्याहारव्युत्पत्त्या हेतोरेव स्वपदवाच्यत्वेन तत्रार्थव्यभिचारवारकतृतीयक्षणादिरूपविशेषणानुपादाने संशयविशेष्ये संशयविषयप्रामाण्याश्रयाग्राह्यत्वं साध्यं पर्यवसितमर्थे व्यभिचार्येव स्यादिति साध्ये ताद्रूप्यलाभार्थं हेतावपि तद्विशेषणमर्थे व्यभिचारवारणपर्य्यवसन्नमुपादेयमेवेति वाच्यं, स्वपदपरित्यागेन तृतीयक्षणवर्त्तिसंशयविशेष्ये न स्वाश्रयग्राह्यमिति[1] विशिष्यापि साध्यनिर्देशसम्भवात्। न चैवं प्रयोगान्तरसम्भवेऽपि प्रकृतप्रयोग उक्तगतिरेवेति वाच्यं, स्वपदं तु हि[2] नानुमानोपयोगि किन्त्वर्थ इति हेतुव्यर्थविशेषणताया दुरुद्धरत्वादिति।

अत्र ब्रूमः। स्वाश्रयानिवर्त्तनीयसंशयविशेष्ये न स्वाश्रयग्राह्यमिति साध्यम्।

शङ्क्य निराचष्टे—न चेति। हेतोः प्रकृतहेतोः। **स्वपदेति।** स्वस्य हेतोः पदं स्वपदं हेतुपदमिति यावत्। एवमग्रिमस्वपदयोरपि।

यत्तु स्वविशेष्ये न स्वाश्रयग्राह्यमितिसाध्यमभिमतं तत्र च हेतुप्रविष्टसंशय एव स्वपदेनोच्यत इति व्याख्यानं, तत्—न। तृतीयेत्यादिहेतुविशेषणं विनापि पक्षतावच्छेदकताद्दशसंशयस्य स्वपदेन लाभसम्भवे शङ्काया अनुक्तिसम्भवत्वादिति। **स्वपदं त्विति। इदमुपलक्षणम्। सर्वं ज्ञानं गुण** इत्यादिनोक्तो गुणत्वे व्यभिचारोऽपि द्रष्टव्यः।

अत्र ब्रूम इति। ननु ज्ञानं प्रमा न वेति संशयानन्तरं रूपं गुणो न वेति स्वाश्रयानिवर्त्तनीयस्य संशयस्य विशेष्यमेव रूपमिति कथं व्यभिचारनिरासः। **न च स्वाश्रयोत्पत्तिक्षणे तृतीयक्षणवर्त्ती** स्वाश्रयानिवर्त्तनीयः संशयो विवक्षित इति वाच्यम् ज्ञानं गुण इति **निश्चयानन्तरं तृतीयक्षणे** रूपं गुणो न वा इदं ज्ञानं प्रमा न वेतिसमूहालम्बनसंशयताद्दशस्वाश्रयानिवर्त्तनीयप्रमात्वसंशयविशेष्यज्ञाने गुणत्वस्य स्वाश्रयेणावगाहनाद्व्यभिचारानिरासादिति।

अत्र ब्रूमः। **स्वाश्रयानिवर्त्तनीयसंशयविशेष्य इति** विशेषणं ददतो हेतुनिविष्टस्य संशयस्य स्वाश्रयानिवर्त्तनीयत्वं विवक्षितम्। तथा चागृहीताप्रामाण्यस्वाश्रयोत्पत्तिक्षणोत्तरतृतीयक्षणवर्त्तिस्वाश्रयानिवर्त्तनीयसंशयकोटित्वं हेतुः। न तु साध्ये विशेषणमिदम्। तथा च यः स्वाश्रयानिवर्त्तनीयः स न तृतीयक्षणवर्त्ती, यश्च तृतीयक्षणवर्त्ती स तस्मिन्नंशे न स्वाश्रयानिवर्त्तनीय इति प्रामाण्यसंशयाहितस्य स्वारसिकस्य चार्थसंशयस्य वारणेषु क्व व्यभिचारः। रूपं गुण इदं च ज्ञानं प्रमा न वेति समूहालम्बने सति अप्रामाण्यसंशयाहिततृतीयक्षणवर्त्तिसंशयकोटौ गुणत्वे व्यभिचारादगृहीताप्रामाण्येति स्वाश्रयविशेषणम्। **धर्मिभेदात्** धर्मितावच्छेदकभेदात्। स्वाश्रयस्य व्यधिकरणत्वात्

---

१. ताद्दशसंशयविषयप्रामाण्याश्रयाग्राह्यत्वमिति क पुस्तके। प्रामाण्याश्रयाग्राह्यमिति न पुस्तके।

२. कुत्रचित् 'हि' इति पाठः।

अस्ति च स्वाश्रयानिवर्त्तनीयः स्वाश्रयगोचरः प्रामाण्यसंशयः, तदाहितार्थसंशयश्च। तथा च रूपे गुणत्वग्राहिणा ज्ञानेन ,ज्ञाने गुणत्वाग्राहिणा व्यभिचाराभावेऽपि तदनिवर्त्यप्रामाण्यसंशयाहितार्थसंशयविशेष्येऽर्थे तु घटत्वादिग्राहिणा मा भूद् व्यभिचार इति तद्वारणार्थं तृतीयक्षण इत्यादि हेतुद्वये विशेषणमवश्यं प्रवेश्यम्, अन्यथा व्यभिचारानुद्धारादिति दिक्।

वयन्तु पक्षे प्रामाण्याप्रामाण्यमात्रकोटिक एव संशयः संशयपदेन विवक्षणीय इति, अतः तादृशसंशयविषयप्रामाण्यस्यैव साध्ये स्वपदार्थत्वात् उक्तरीत्या व्यभिचारनिरासादलं विशेषणदानायासेनेत्यनुमन्यामहे।

स्वाश्रयस्य संशयरूपत्वात्। तृतीयक्षणे संशयमादाय गुणत्वे व्यभिचारात् स्वाश्रयानिवर्त्तनीयेति संशयविशेषणम्। धर्मितावच्छेदके व्यभिचारात् कोटित्वमुक्तम्। अप्रामाण्यसंशयाजन्यसंशयस्वरूपायोग्यत्वं वा हेतुः। अतो न गुणत्वादौ व्यभिचारः। साध्यञ्चात्र यावत्स्वाश्रयाग्राह्यत्वम्।

वस्तुतस्तु सर्वं ज्ञानमभिधेयवदिति शाब्दज्ञाने सति तृतीयक्षणवर्तिसंशयकोटौ तत्प्रमात्वे व्यभिचारात् यावत्स्वाश्रयाप्रकारत्वं तज्ज्ञानव्यक्त्यप्रकारत्वं वा साध्यम्।

यद्वा हेतुनिविष्टसंशय एव स्वाश्रयानिवर्त्तनीयसंशयशब्देन विवक्षितः। स्वाश्रयाधिकरणक्षणाव्यवहितोत्तरक्षणे जायमानस्य तस्य स्वाश्रयानिवर्त्तनीयत्वात्। द्वयोरेव संशययोः स्वाश्रयानिवर्त्तनीयत्वकथनं तूपलक्षणम्। तथा चागृहीताप्रामाण्यसमानाधिकरणनिश्चयत्वरूपयत्स्वाश्रयव्यक्त्युत्पत्तिक्षणाव्यवहितोत्तरक्षणवर्त्तियत्संशयकोटिर्यः स तत्संशयस्य यो धर्मी यच्च धर्मितावच्छेदकं तत्र तदवच्छेदेन तया स्वाश्रयव्यक्त्या न प्रकारीक्रियत इति साध्यविशेषणमहिम्नैव व्यभिचारनिरास इति। इदञ्च प्रकारद्वयं पूर्वोक्तपर्यवसितमेवास्माभिरुन्नीतमिति संक्षेपः।

हेतौ तृतीयक्षणवर्त्तिविशेषणकृत्यमाह—**तथा चे**ति।

केचित्तु द्विमात्रकोटिकत्वं हेतुनिविष्टसंशये विशेषणमाहुः। तेषामिदं तात्पर्यं यज्ज्ञानव्यक्त्युत्पत्तिक्षणोत्तरतृतीयक्षणवर्त्तिद्विमात्रकोटिकसंशयकोटित्वं यस्य तस्य तज्ज्ञानव्यक्त्युत्पत्तिक्षणोत्तरतृतीयक्षणवर्त्तिप्रामाण्यसंशयविशेष्यत्वस्वग्राहकत्वोभयाभाववत्तद्व्यक्तिकत्वमिति।

तन्न। प्रमात्वगुणत्वयोर्विरोधं जानतो ज्ञानं प्रमा गुणो वेति संशयमादाय गुणत्वे व्यभिचारात्। किञ्च अयं घटः प्राचीनघटज्ञानञ्च प्रमेति समूहालम्बनोत्तरतृतीयक्षणेऽयं घट इत्यंशे प्रमा न वेति संशयमादाय प्रमात्वे हेतुरस्ति न तूभयाभाववत्तद्व्यक्तिकत्वमिति व्यभिचारः। न च यदवच्छेदेन तादृशसंशयकोटित्वं तदवच्छेदेनोभयाभाववत्तद्व्यक्तिकत्व साध्यमिति वाच्यम्। द्विमात्रकोटिकत्ववैयर्थ्यापत्तेः। किञ्च यत्र गुणज्ञाने द्वितीयक्षणे एव प्रमात्वसंशयात्तृतीयक्षणे गुणत्वे संशयस्तत्र यत्र च रूपं गुण इति ज्ञाने पुरुषान्तरस्य तृतीयक्षणे प्रामाण्यसन्देहस्तत्र ज्ञानं गुणो न वेति संशयमादाय गुणत्वे व्यभिचारतादवस्थ्यमिति कृतं विस्तरेण।

तृतीयक्षणेऽप्रामाण्यसंशयं विना वा सन्दिह्यमानत्वात् अप्रामाण्यवत् ।

अप्रामाण्येति । यद्यप्यप्रामाण्यसंशयाजन्येऽपि विषये संशय इत्यर्थे व्यभिचारस्तथाऽपि नञ्व्यत्यासेनाप्रामाण्यसंशयजन्यसंशयाविषयत्वं विवक्षितम् । संशयाविषयत्वं तु संशयायोग्यत्वम् अतोऽसंशयविषयीभूतार्थविशेषे न व्यभिचारः । अप्रामाण्यं तु प्रामाण्यविरोधि, तदपि पक्षीकृतप्रामाण्यविरोधीति । स्वसंशयस्य स्वसंशयाहेतुत्वेन प्रामाण्येऽपि प्रामाण्यान्तरसंशयहेतुकसंशयविषयतया नासिद्धिरिति । न च फलानुपधानस्थले तादृशसंशयाप्रसिद्धौ योग्यताया अपि विरहः, तज्ज्ञानान्तरे प्रसिद्धेस्तस्यैकत्वात् । योग्यता च तत्तत्प्रामाण्याश्रयविषयत्वेनैवेति ध्येयम् । न चैवं पक्षविशेषणमनादेयमेव । अत्र हेताविष्टापत्तेः । अयमेव हि पूर्वहेतोर्विशेष इत्यस्वरसो वेत्यनेन दर्शितः ।

स्वाश्रये सतीति पूर्वहेतुतोऽनुषङ्गः । तत्र च स्वाश्रयशब्देन समानाधिकरणनिश्चयरूपस्वाश्रयविवक्षा । ततश्च समानाधिकरणे निश्चयरूपे स्वाश्रयेऽव्यवहितपूर्वक्षणवर्त्तिनि तस्मिन् धर्मिणि तदवच्छेदेनाप्रामाण्यसंशयाजन्यसंशयकोटित्व हेतुः स्फुटत्वादुपेक्ष्यानुषङ्गं विनैव व्याख्यातुमारभते—**यद्यपीति** । तथापीत्यादेरयं निर्गलितार्थः । घटत्ववति घटत्वप्रकारकत्वं घटत्ववति घटत्वप्रकारकत्वाश्रययावद्ग्राह्यं न, घटत्ववति घटत्वप्रकारकत्वविरोधिसंशयजन्यसंशयस्वरूपायोग्यत्वात् । तथा च प्रमाण्याभाववति प्रामाण्यप्रकारकत्वं प्रामाण्यवति प्रामाण्यप्रकारकत्वाभावरूपं च यत्प्रामाण्यविरोधिद्वयं तत्संशयाहितसंशयविषयेऽपि पक्षे न हेत्वसिद्धिः ।

स्वसंशयस्येति । स्वविरोधिसंशयस्येत्यर्थः । यद्यप्युत्तरोत्तरसंशये विशेषणज्ञानत्वादिना पूर्वपूर्वस्याप्रामाण्यसंशयस्य जनकत्वमस्त्येवेत्यसिद्धितादवस्थ्यं, तथाप्यप्रामाण्यसंशयत्वेन रूपेण जन्यत्वस्य विवक्षितत्वात् प्रकृते च तदभावान्न दोषः । इदञ्च निश्चितार्थगोचरसंशयं प्रत्यप्रामाण्यसंशयस्य तत्त्वेन कारणतामात्रस्योक्तम्, अन्यथाऽप्रामाण्यसंशयस्योत्तेजकतया कारणत्वाभावादिति ध्येयम् । **विरहोऽप्रसिद्धिः** । **तज्ज्ञानेति** । धर्म्यन्तरविशेष्यकघटत्वादिज्ञानेऽप्रामाण्यसंशयस्य तज्जन्यसंशयस्य च प्रसिद्धेरित्यर्थः । न च धर्मिविशेषावच्छेदेन तादृशसंशयविषयत्वाभावेऽपि तादृशसंशयविषयत्वसामान्याभावस्य हेतोर्घटत्वादावसत्त्वात्स्वरूपयोग्यत्वधावनं व्यर्थमिति वाच्यम्, सामान्याभावलाभार्थमेव तद्धावनादिति । न चैकपुरुषमात्रप्रतीतवस्तुगोचरज्ञानेऽप्रामाण्यसंशयस्यैवमप्यप्रसिद्धिरेवेति वाच्यम्, तत्प्रामाण्यस्यापक्षत्वादिति भावः ।

एवमिति । अप्रामाण्यसंशयजन्यसंशयस्वरूपायोग्यत्वस्य हेतुत्वे इत्यर्थः । तस्य सकलप्रामाण्यनिष्ठत्वेन भागासिद्ध्यभावादिति भावः ।

वस्तुतः प्रथमकल्पेऽपि न भागासिद्धिपरीहाराय पक्षविशेषणम्, घटत्ववति घटत्वप्रकारकत्वादीनां घटज्ञानादिमात्रसाधारणतया अनभ्यासदशापन्नघटज्ञाने संशयविषयतया प्रामाण्यमात्रे संशयात्। नहि अनभ्यासाभ्यासयोर्घटज्ञाने प्रामाण्यभेदः, किन्तु प्रामाण्यमात्रपक्षत्वे बाधवारणाय विशिष्टाभावोपपत्तये पक्षविशेषणम्। तच्च द्वितीयहेतावप्यविशिष्टमिति सारम्। अत एव मकरन्देऽ'नभ्यासदशे'ति न पक्षविशेषणतया व्याख्यातमिति। एवं चात एव सामञ्जस्येनार्थविशेषे व्यभिचारवारणाय संशयपूर्वतृतीयक्षण इत्यादि साध्ये विशेषणं प्रक्षिप्य यथाश्रुतहेत्वादरो नोचित इति।

न यावदिति। विप्रतिपत्तौ यथासाध्यमुपवर्णितन्तदभाव इह साध्य इत्यर्थः।

वस्तुत इति। इदञ्चापाततः सकलप्रामाण्यपक्षताया संशयाविषयीभूतप्रामाण्यविशेषे वक्ष्यमाणद्वितीयबाधस्थले च भागासिद्धिसम्भवादिति।

बाधेति। सर्वत्ववति सर्वत्वप्रकारकत्वे अंशतो बाधेत्यर्थः। इदञ्च यावत्स्वाश्रयाग्राह्यत्वे यथाश्रुते साध्ये सर्वत्ववतीत्यादिप्रामाण्येऽपि सर्वशब्दजज्ञानाप्रकारे यावत्स्वाश्रयाप्रकारत्वस्य विवक्षितसाध्यस्य सत्त्वादिति।

वस्तुतस्तु अयं घट एतद्रूपवान् इदञ्च ज्ञानं प्रमेति एकपुरुषमात्रप्रतीतौ एतद्रूपवतीत्यादियत्प्रामाण्यं तदीश्वरयोगितत्पुरुषज्ञानेषु यावत्स्वाश्रयेषु प्रकार इति तत्रांशतो बाधो ज्ञेयः। विप्रतिपत्त्यवसर उक्तमंशतः सिद्धसाधनमपि तत्रैव ज्ञेयम्।

विशिष्टाभावेति। तृतीयक्षणवर्त्तिसंशयविषयत्वे प्रामाण्यविशेषणे दत्ते तदाश्रयस्य स्वानाश्रयतया स्वाश्रयत्वरूपविशेषणाभावाद्विशिष्टाभावोपपत्तिरित्यर्थः। विशिष्टाभावश्च तत्स्वाश्रयव्यक्त्यबाधकतृतीयक्षणवर्त्तिसंशयसमानाधिकरणत्ववत्संशयकोटिप्रामाण्याश्रयत्वस्वग्राहकत्वानां त्रयाणामभावः, न तु पूर्ववदुभयाभावोऽप्रसिद्धेरिति ध्येयम्। तथा च साध्यविशेषणमेव तन्न तु पक्षविशेषणमिति भावः।

अत एवेति। साध्यविशेषणत्वस्यैवाभिप्रेतत्वादित्यर्थः। विशिष्टे तृतीयक्षणवर्त्तिसंशयविषयत्वेन व्यावर्त्तितपक्षेऽभावरूपस्य साध्यस्योपपत्तये इत्यर्थ इति **कश्चित्**। तन्न। **अत एवे**त्यादेरसङ्गतत्वापातादिति।

अप्रामाण्यवदिति मूलम्। पक्षीकृतप्रामाण्यविरोधिकोटिवदित्यर्थः।

गुरुमतं निराकृत्य त्रितयसाधारणीं तृतीयां विप्रतिपत्तिमधिकृत्य स्वतोग्राह्यत्वं निराकर्तुं **न यावदिति** मूलम्। तच्च ज्ञानपदादिना प्रामाण्याग्रहणात् सिद्धसाधनग्रस्तमित्यत आह—**विप्रतिपत्तौ यथेति**। सविषयकज्ञानग्राहकघटितमित्यर्थः। यत्र चाप्रामाण्यग्राहकमवतरति तज्ज्ञानप्रामाण्यं न पक्ष इति भावः।

यद्वा अनभ्यासदशापन्नैतज्ज्ञानप्रामाण्यम् एतत्प्रामाण्यसंशयपूर्वकालीनै-तज्ज्ञाननिश्चयाविषयः, एतज्ज्ञाननिश्चयानन्तरं सन्दिह्यमानत्वात्, अप्रामाण्यवत् । न च स्वपदस्य प्रामाण्यमात्रपरत्वात्तदाश्रयाग्राह्यत्वेन बाधः[1], स्वपदस्य सम्बन्धिपरत्वेन समभिव्याहृतपरत्वात् । अन्यथा स्वस्य परत्वात् परस्य च स्वत्वात् तदेतदन्यत्वस्य च स्वपरसाधारणत्वात् स्वतः परतो वेति संशयो न स्यात् ।

प्रामाण्यस्य स्वग्राह्यत्वे बाधात् परिशेषेणान्यथाग्राह्यत्वं परतो ग्राह्यत्वमिति कश्चित् । प्रथमं च प्रामाण्यज्ञानं व्यतिरेकिणा ।

पूर्वकालीनेत्यत्र पूर्वकालस्तृतीयक्षणः । निश्चयानन्तरं तृतीयक्षण इति शेषः ।

ननु तत्त्वं स्वत्वं तदन्यत्वं परत्वमिति कोट्योर्विरोधात् अस्तु संशय इत्यत आह—तदिति । कश्चिदित्यनेन प्रामाण्यं परतो वेद्यं सांशयिकत्वात् इत्युक्तकल्पापेक्षया

स्वाश्रयनिश्चय इति मूलम् । सविषयकस्वाश्रयग्राहकोऽगृहीताप्रामाण्यः समानाधिकरणो यः स्वाश्रयनिश्चयः तद्धर्मिणि तद्धर्मितावच्छेदकावच्छेदेन तदव्यवहितोत्तरक्षणे संशयकोटित्वादित्यर्थः ।

प्रामाण्येति मूलम् । समानाधिकरणस्य सविषयस्वाश्रयनिश्चयस्य सत्त्वे प्रामाण्यसंशयं विना तद्धर्मिणि तद्धर्मितावच्छेदकावच्छेदेन सन्दिह्यमानत्वादित्यर्थः ।

षष्ठीं विप्रतिपत्तिमधिकृत्य अनभ्यासेत्यादि मूलम् । एतत्पदार्थपरिचयार्थमेवानभ्यासेत्यादि न तु व्यावर्त्तनार्थम्, एतत्पदेनैव घटज्ञानादिरूपविशेषलाभादित्यवधेयम् । घटज्ञान प्रमेत्युत्तरकालीननिश्चयविषयतया बाध इति मूले पूर्वकालीनेति विशेषणम् । तत्र व्यवहितपूर्वकालीननिश्चयविषयतया दोषतादवस्थ्यादाह— तृतीयक्षण इति । संशयाव्यवहितपूर्वकाल इत्यर्थः । एवमपि पुरुषान्तरीयनिश्चयविषयतयाऽप्रामाण्यसंशयाक्रान्तस्वीयनिश्चयविषयतया च बाधात् समानाधिकरणत्वमप्रामाण्यसंशयानाक्रान्तत्वञ्च साध्यगतनिश्चये विशेषणं ज्ञेयम् ।

तदयं निर्गलितार्थः । तद्धर्मिकतद्धर्मितावच्छेदककतत्संशयकोटित्वं हेतुः, तस्मिन् धर्मिणि तदवच्छेदेन तत्संशयाव्यवहितपूर्वकाले समानाधिकरणस्याप्रामाण्यसंशयानाक्रान्तस्य कस्यापि निश्चयस्य प्रकारो नेति साध्यम् ।

यद्वा अप्रामाण्याग्राहकसविषयकज्ञानग्राहकयावद्घटज्ञाननिश्चये स्वप्रकारो नेति साध्यम् । समानाधिकरणप्रामाण्यसंशयानाक्रान्तसविषयकज्ञानग्राहकाप्रामाण्याग्राहकघटज्ञाननिश्चयाव्यवहितोत्तरक्षणे तन्निश्चयधर्मिणि तद्धर्मितावच्छेदकावच्छेदेन संशयप्रकारत्वादिति हेतुः । एन पक्षमधिकृत्यैव

१. अप्रसिद्धिरित्यर्थः ।

प्रामाण्यं न स्वतो वेद्यं सांशयिकत्वात्। तथा च परतो वेद्यं स्वतोऽवेद्यत्वे सति वेद्यत्वादित्यनुमानद्वयकल्पनागौरवमित्यस्वरसो दर्शित.।

निश्चयानन्तरमिति मूले विशेषणम्। तत्र व्यवहितसंशयप्रकारे घटज्ञाननिश्चयविषये व्यभिचारादाह – **तृतीयक्षण** इति। अव्यवहितोत्तरक्षण इत्यर्थः।

वस्तुतो धर्मिभेदादिकमादाय यत्र संशयो नास्ति तादृशनिश्चयविशेष एव एतत्पदेन विवक्षितः। तथा च घटत्ववति घटत्वप्रकारकत्व निश्चयविशेषाविषयः। निश्चयविशेष व्यवहितोत्तरकाले समानाधिकरणसंशयकोटित्वादिति विशिष्टस्यैवानुमानम्। अतो न विशेषणबाहुल्यगौरवमिति।

मूले **प्रामाण्यमात्रे**ति। प्रामाण्यसामान्येत्यर्थः। मूले **बाध** इति। प्रामाण्याश्रययावद् ग्राह्यत्वस्य क्वचिदप्यप्रसिद्धया तदभावाप्रसिद्धेरनुमित्यनुत्पत्तिरित्यर्थः। मूले **समभिव्याहृते**ति; पक्षीकृतप्रामाण्येत्यर्थः।

ननु तत्त्वं परत्वन्तदः परोक्षवाचित्वात्, एतत्त्वं स्वत्वं एतदः समीपतरवाचित्वात्। अतएव तदन्यत्वं स्वत्वमेतदन्यत्वं परत्वमिति वाक्त्विन्यत आह— मूले **तदि**ति। **टिप्पण्यां** च तत्त्वं परत्वं तदन्यत्वं स्वत्वमित्यन्वयः। अन्यथा अनुक्तिसम्भवादिति मूलेऽन्यथा**ग्राह्यत्वमि**त्यस्य विवरणं **परतो ग्राह्यत्वमि**ति। **इत्यस्वरस** इति। व्यावर्त्याभावेन वेद्यत्व व्यर्थमित्यप्यस्वरसो द्रष्टव्यः।

अत्र **केचित्**। संशयस्थले ज्ञानग्राहकेण प्रमात्वस्याग्रहेऽपि न स्वतस्त्वहानिः। यथा ह्यप्रमात्वारोपस्थले प्रमात्वाग्रहो दोषादिति **मीमांसकै**रुपेतं तथा संशयस्थलेऽपि दोषादेव प्रमात्वाग्रह इत्युपेयम्। अत एवाप्रामाण्यग्रहजनकदोषासमवहितत्वरूपमप्रामाण्याग्राहकत्व सामान्यत एव स्वतस्त्वे निवेशितं, न तु विशिष्याप्रामाण्यानिश्चायकत्वमिति। न च संशयस्थले दोष एव दुर्वच इति वाच्यम्, भ्रमस्येव संशयस्यापि दोषजत्वेन फलबलेन कस्यचिद्दोषस्य कल्पनात्। तस्मान्न स्वतस्त्वे संशयानुपपत्तिः। नापि ग्राहकाभावादेव प्रमात्वाग्रहो मनसो बहिरस्वातन्त्र्यादिति वाच्यम्, उपनयसहकारेण बहिः प्रवृत्तौ मनसः पारतन्त्र्याविरोधात्। **मनसा चैवमित्यादौ** स्वयमेव तथाभिधानादिति।

अत्रोच्यते—सविषयके ज्ञाने प्रकारान्तरानुपस्थितविषयसत्ताके भासमाने विषयवैशिष्ट्यांशे सत्तानिश्चयो न भवतीत्यन्वयव्यतिरेकाभ्यामवधारितम्। तथा हि घटविषयकज्ञानवान् देवदत्तो घटाभिलापवत्त्वादित्यनुमाय घटार्थी निष्कम्प न प्रवर्त्तते, तत्रैव च घटविषयकप्रमावानित्यनुमाय निष्कम्पं प्रवर्त्तते। तत्र प्रमात्वस्य विषयसत्ताघटितस्य प्रकारान्तरोपस्थितत्वात् सत्तानिश्चयाभावश्च ज्ञानविशेषणत्वावच्छेदेन विवक्षितः, तेन सुरभि चन्दन सुरभिविषयकञ्च ज्ञानमित्यादौ न व्यभिचार इति ध्येयम्। अत एव शब्दखण्डे स्मारितपदार्थसंसर्गज्ञानपूर्वकाणीति साध्ये विषयसत्तानिश्चयो न स्यादित्याशङ्क्य ज्ञानपदं प्रमापरतया व्याख्यायते। तदिह पुरोवर्त्तिनि घटत्वादि-

ननु प्रामाण्यप्रसिद्धिं विना व्याप्त्यग्रहात् कथमनुमानम् ? अथ व्याघात-

अथ व्याघातेति । **विशेष्यावृत्त्यप्रकारकं ज्ञानं नास्तीति परप्रतिषेधो व्याघातः,**

वैशिष्ट्यसत्तायाः प्रकारान्तरेणानिश्चये ज्ञानविषयतया च ततः कृत्तौ कथं निश्चयः स्यादिति प्रामाण्यनिश्चायकसामग्र्यभावादेव प्रामाण्यस्य स्वतस्त्वाभावः । सत्तानिश्चयत्वञ्च स्वरूपसम्बन्ध-विशेष उत्तरकालीनसंशयाद्यभावकल्प्य इति सर्वजनीनम् । स च सम्बन्धविशेषो यथा प्रामाण्य-सन्देहस्थले संशयान्यथानुपपत्त्या नास्ति तथा सन्देहाभावस्थलेऽपि नास्ति सत्तानिश्चयत्वा-भावनियामकस्योक्तस्य तुल्यत्त्वादित्ति प्रतिपादयितुं संशयानुपपत्तिप्रदर्शनम् ।

आलोककृतस्तु घटत्ववद्विशेष्यकत्व मनसा ग्रहीतुं न शक्यते, घटनिष्ठस्य विशेष्यत्वस्य ज्ञानानुपनीतस्य मनसो ग्रहणे सामर्थ्याभावादिति वक्ष्यन्ति । तन्न । एवं सति घटत्वप्रकारकत्वमपि कथ ग्राह्यम्, घटत्वनिष्ठस्य ज्ञानानुपनीतस्य तस्यापि ग्रहे मनसोऽसामर्थ्यात् । भासमानवैशिष्ट्य-प्रतियोगित्वं प्रकारत्वम्, तच्च स्वरूपसम्बन्धात्मकं पूर्वाज्ञातमपि प्रकारो भवतीति कल्पनीयम्, संसर्गमर्यादया वा तद्भानमिति यदि तदा भासमानवैशिष्ट्यानुयोगित्वे विशेष्यत्वेऽपि तुल्यम् । वह्निगुञ्जयोर्गुञ्जावह्नी इति समूहालम्बनेऽतिव्याप्त्या वह्नित्ववद्विशेष्यकत्वे सति वह्नित्वप्रकारकत्वं न प्रमात्वमपि तु वह्नित्ववद्विशेष्यकत्वावच्छेदेन वह्नित्वप्रकारकत्वं वह्नित्ववद्विशेष्यकत्वे सति स्वरूप-सम्बन्धित्वावच्छेदेन वह्नित्वप्रकारकत्व वा । तथा च वह्नित्ववद्विशेष्यकत्वस्य वह्नित्वस्य वाऽवच्छे-दकत्वाग्रहान्न स्वतस्त्वमिति, तथा सति वह्नित्ववन्निरूपितभासमानसम्बन्धप्रतियोगिवह्नित्वकत्वं प्रामाण्यम् । तच्च विशेष्ये वह्नित्ववत्तानिर्वाहकसम्बन्धस्य प्रकारतानिर्वाहकसम्बन्धस्य चाभेदघटितम्, अन्यथाऽतिप्रसङ्गात् । तत्र चानुव्यवसायेन स्वरूपसम्बन्धात्मकप्रकारत्वस्य पूर्वाज्ञातस्य ग्रहणेऽपि पूर्वाज्ञातस्य सम्बन्धत्वादेः कथ ग्रहणम् ? एतेनात्मसुखादिस्थले तद्वत्त्वांशे मनसः स्वातन्त्र्यात्सत्ता निश्चयो मनसा सम्भवत्येवेति कथं न स्वतः प्रामाण्यमिति निरस्तम् । तत्राप्युक्तविशेषणानां पूर्वा ज्ञातत्वेनानुव्यवसाये प्रकारत्वासम्भवादिति तत्त्वम् ।

व्याघातेति मूलम् । व्याघात एव दण्डो व्याघातदण्डः । **परप्रतिषेध** इति । परोक्तम-भावबोधकं वाक्यमित्यन्वयः । व्याघातो विरोध इत्यादि व्याख्यानन्त्वयुक्तम् । प्रामाण्यनिषेध-रूपस्य **परकीयव्याघातस्येत्याद्यग्रिममूले** कुसृष्टिकल्पनापत्तेः ।

दण्डभयेन प्रमातद्विषयसिद्धौ तद्दृष्टान्तेन ज्ञेयत्वादिना वह्नेः प्रमाविषयत्वमनुमेयम्, ततश्च सामान्यतस्तत्सिद्धौ न साध्याप्रसिद्धिः, विशिष्या-

तस्य भयं प्रतियोग्यज्ञानेऽभावज्ञानासम्भवरूपम। तेन प्रामाण्योपस्थितिस्तदन्यथानुपपत्त्या तत्सिद्धिः, विषयसिद्धिश्च ज्ञानान्यथानुपपत्त्या, ततो वह्निरयं विशेष्यावृत्तिप्रकारानवच्छिन्नज्ञानविषयो ज्ञेयत्वात् सामान्यतः सिद्धज्ञानविषयवदिति वह्नेः प्रमाविषयत्वमनुमेयम्। प्रमेयत्वस्यानुमेयतया साध्याविशेषभयादप्रसिद्धेश्च ज्ञेयत्वादिनेत्युक्तम्।

आदिपदन्तु समान्यतः सिद्धप्रमाविषयवृत्तिधर्मपरम्।

ततश्चेति। व्याघातभिया सामान्यतः तत्प्रसिद्ध्या नात्रान्वयिनि साध्याप्रसिद्धिरित्यर्थः। न चैवं सामान्यतः साध्यप्रसिद्ध्यापि कुत्र व्याप्तिग्रह इति वाच्यं, निश्चितहेतुमति व्यभिचार[1]संशयस्यादोषतया साध्याभावनिश्चयस्य क्वचिदप्यसम्भवेन व्यभिचारज्ञानाभावेन समान्यतः सिद्धप्रमाविषये सहचारज्ञानेन प्रसिद्धानुमाने महानस इति

अभावज्ञानेति। स्वजनकाभावज्ञानस्यासम्भवरूपमित्यर्थः। **तेनेति**। विपक्षबाधकेनेत्यर्थः। प्रयोगस्त्वेवम्। इद वाक्य प्रतियोगिज्ञानपूर्वकं, अभावज्ञानपूर्वकत्वात्। प्रतियोगिज्ञानाभावेऽभावज्ञानासम्भवादिति तर्कः। प्रामाण्योपस्थितिः प्रामाण्याश्रयज्ञानस्य ज्ञानानुमितिः।

तदन्यथाऽनुपपत्त्येति। अनुमितस्य ज्ञानस्य विषय विनाऽनुपपत्त्येत्यर्थः। **तत्सिद्धिः** प्रमासिद्धिः। तस्याः प्रमाया विषय विनाऽनुपपत्त्या विषयानुमितिरित्याह—**विषयसिद्धिश्चेति**। इयञ्च प्रणाली स्वातन्त्र्येण प्रमादिसिद्ध्यर्थम्। अन्यथा प्रमानुमित्यैवावच्छेदकतया प्रमादेर्विषयीकरणादिति ध्येयम्।

वस्तुतस्तु गूढाशय आह मूले—सामान्यत इति। सामान्यरूपेण वह्निर्विशेष्यावृत्तिप्रकारानवच्छिन्नज्ञानविषय इत्यन्वयिना साध्यसिद्धावपि वह्निज्ञानं प्रमेतिव्यतिरेकिणि न साध्याप्रसिद्धिरित्यर्थः।

ततश्चेति। स्वरसात् अन्वयिनो विशेषविषयत्वस्य **टीकाकृतैव** वक्ष्यमाणत्वाच्च।

अत्रान्वयिनीति। वह्निरयमित्यादावित्यर्थः।

कुत्रेति। साधनसाध्याधिकरणस्य विशिष्टोपस्थितिर्व्याप्तिग्रहे तन्त्र तदभावात्, सन्देहरूपव्यभिचारज्ञानाच्च न व्याप्तिग्रह इति भावः।

विशिष्याधिकरणोपस्थितिर्न तन्त्र साध्याभावांशे सन्देहरूपं व्यभिचारज्ञानञ्च न प्रतिबन्धकमित्याह—**निश्चितेति**।

---

१. साध्याभावेति कनपुस्तकयोः।

निर्णयान्नान्वयित्वासाधारण्ये । न च प्रामाण्यं नानुगतं, किन्तु प्रतिज्ञानं विषयप्रकारभेदाद्भिन्नम्, तथा च वह्निज्ञानस्य वह्न्यवृत्तिप्रकारानवच्छिन्नत्वादिकं साध्यं तच्चाप्रसिद्धमिति वाच्यम् ।

व्याप्तिग्रहसम्भवात् । न चालीके ज्ञेये विशेष्यावृत्तिप्रकारानवच्छिन्नज्ञानाविषये व्यभिचारः । तादृशज्ञानाविषयत्वस्याप्रामाण्यपर्यवसायितया तस्याप्यनुमेयतया तदानीं साध्याभावानवधारणात् । अलीकस्य ज्ञानाविषयत्वेन ज्ञेयत्वहेत्वसत्त्वाच्च । शुक्तिरजततादात्म्यादीनां परमार्थिकत्वनियमात् ।

वस्तुतस्तु अलीके ज्ञानविषयत्वेऽपि न विशेष्यावृत्तिप्रकारानवच्छिन्नज्ञानविषयत्वतदभावयोरन्यतरस्यापि ज्ञानम् । तदिदमुक्तम्—अत्र सचेतसां मूकतैवोचितेति । न हि तत्र विधिनिषेधयोरन्यतरस्याप्यवधारणमिति न व्यभिचारधीः । अतो व्यभिचारधीविरहसहकृतसहचारधीसत्त्वान्न व्याप्तिग्रहप्रत्यूह इति तत्त्वम् ।

नान्वयित्वेति । ततो वह्निज्ञानमिदं वह्न्यवृत्तिप्रकारानवच्छिन्नम्, दाहसमर्थविषयकप्रवर्त्तकज्ञानत्वात् । यन्नैवं तन्नैवमितिव्यतिरेकिणि क्वचिदपि विशिष्य साध्यनिश्चयाभावेन साध्यनिश्चयवतो हेतुतदभावयोरन्यतरस्याप्यनिश्चयेन साध्यनिश्चयवति हेतुनिश्चयाधीनमन्वयित्वं हेत्वभावनिश्चयाधीनमसाधारण्यं न भवतीत्यर्थः । हेतुनिश्चयस्यान्वयव्याप्तिनिश्चायकत्वात्, हेत्वभावनिश्चयस्य च साध्याभावसिद्धिपर्यवसायिनः सत्प्रतिपक्षतया दोषत्वं विरुद्धव्याप्त्युपनायकत्वात्, न च सन्देहस्तथेति ।

असदेव वैशिष्ट्य भ्रमविषय इति मतेन व्यभिचारमाशंक्य निराकरोति—**न चेति** ।

ज्ञेयत्वेन गृहीते प्रमाविषयत्वाभावस्तावन्न गृहीतुं शक्यते यावत् तस्मिन्नप्रमाविषयत्वं न गृह्यते इत्याशयेन व्यभिचारज्ञानाभावमाह—**तादृशेति** । एतादृशनियमस्याप्रामाणिकत्वात्सदेव भ्रमविषय इति **नवीनमतमनुसृत्याह—अलीकस्येति** । यथा चैतत्तथाऽन्यथाख्यातिशेषे उपपादयिष्यते ।

असद्वैशिष्ट्यज्ञानवादिनोऽपि संसर्गमर्यादयैव तद्भानं, न तु विधिनिषेधाधिकरणतया । तथा च तन्मताऽभ्युपगमेऽपि न व्यभिचारधीरित्यभिप्रायेणाभ्युपेत्याह—**वस्तुतस्त्विति** । **विरुद्धव्याप्त्युपनायकत्वादिति** । साध्यविरोधिप्रतियोगिकव्याप्त्युपस्थापकत्वादित्यर्थः । सन्देहेत्युपलक्षणम् । विरोधिव्याप्तिद्वयनिश्चायकसामग्रीसत्त्ववदसाधारणस्य व्याप्तिनिश्चयप्रतिबन्धकतया दोषत्वपक्षेऽपि तुल्यबलत्वाभावे दोषत्व नास्तीति द्रष्टव्यम् ।

आशयमविदुषः शङ्का निषेधति मूले- **न चेति** ।

वह्निज्ञानस्य हि विशेष्यावृत्तिप्रकारानवच्छिन्नत्वादिकं साध्यमानं पक्षधर्म्मतावलेन वह्निविषयकप्रमात्वे पर्य्यवस्यतीति चेत्—तर्हि प्रथमं कस्यापि स्वार्थं प्रामाण्यानुमानं न स्यात्, प्रामाण्यनिषेधरूपस्य परकीयव्याघातस्य तदा अनुपस्थितेः, स्वयं प्रामाण्यनिषेधस्य तज्ज्ञानपूर्वकत्वात् प्रामाण्यमपरिज्ञाय प्रामाण्य-

सन्देहोत्थापकतापक्षेऽप्यतुल्यबलतया न हेत्वभावसन्देहस्य कोटिद्वयोपस्थापकत्वमिति भावः। न च व्याघातबलेन साध्यप्रसिद्धौ तत एव व्यतिरेक्युपपत्तौ किं ज्ञेयत्वहेतुकान्वयिना, तत एव फलसिद्धौ किं व्यतिरेकिणेति वाच्यं, प्रकारार्थं व्यतिरेक्यादर इति व्यतिरेकिप्रकारस्य वह्न्यवृत्तित्वादेर्व्याघातादनुपस्थितेरन्वयिनश्च पक्षधर्मतावलेन तत्पर्यवसानस्य वह्निज्ञानस्येत्यादिग्रन्थ एव स्फुटत्वात्। अत एव नाग्रिमव्यतिरेकिव्यर्थतापि, प्रकारार्थं तदवतारात्, अन्यथा व्यतिरेकिमात्रविलयापत्तेः। अत्र वह्न्यवृत्तिप्रकारानवच्छिन्नत्वमपि व्याघातबलादेवास्तूपस्थितं किं अन्वयिना। न च तस्यासार्वत्रिकत्वं दोषः, तर्हि प्रकृतेऽपि तथेत्याह—तर्हीति।

ननु प्रामाण्यमज्ञात्वैव स्वयं प्रामाण्यं निषिध्यतामित्यत आह—प्रामाण्यमिति। प्रामाण्यमज्ञात्वापि चेत्–तन्निषेध्यम्, तदा व्याघातबलादपि न तदुपस्थितिरित्यर्थः।

आशयं प्रकटयति मूले—**वह्निज्ञानस्येति**। वह्निर्विशेष्यावृत्तिप्रकारानवच्छिन्नज्ञानविषय इत्यन्वयिनेति शेषः।

अत्र वदन्ति—वह्निर्विशेष्यावृत्तिप्रकारानवच्छिन्नज्ञानविषय इत्यन्वयिना कथं वह्न्यवृत्तिप्रकारानवच्छिन्नज्ञानविषयत्व विषयीकर्त्तव्यम्; अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमात्। वह्न्यवृत्तिप्रकारानवच्छिन्नज्ञानस्यापि विशेष्यावृत्तीत्यादिव्यापकतावच्छेदकाक्रान्ततया तादृशविषयतानियमाच्चानुमितेः सङ्गतमेवेदमिति चेत्—न। तथापि वस्तुगत्या वह्न्यवृत्तिप्रकारानवच्छिन्नज्ञानविषयः स्यान्न तु वह्न्यवृत्तिप्रकारानवच्छिन्नत्व तद्धर्मः। न च पक्षधर्मताबलेन तद्विषयत्वमुक्तमेवेति वाच्य, यद्विषयीकरणमन्तरेणानुमितिर्नोत्पद्यते तस्यैव पक्षधर्मताबललभ्यत्वादन्यथाख्यातिप्रसङ्गात्, पक्षधर्मताबललभ्यस्याप्रकारतया तत्प्रकारकसाध्यप्रसिद्ध्यभावेन व्यतिरेक्यनुपयोगाच्चेति।

मैवम्। उपनीतभानमादाय विशेष्यावृत्तिप्रकारानवच्छिन्नज्ञानविषयो वह्निरित्यनुमितेर्विशेष्ये वह्नित्वप्रकारत्वसम्भवात्, एकदेशिनाऽनुमितावुपनीतभानाभ्युपगमे क्षत्यभावात्। न चाग्रिमव्यतिरेकिवैयर्थ्यम्, ज्ञानविशेषस्य वह्न्यवृत्तिप्रकारानवच्छिन्नत्वसिद्ध्यर्थं तदादरात्, तेन विना निष्कम्पप्रवृत्त्यनुत्पत्तेः। इदमभिप्रेत्यैव टीकायामुक्त – इदं वह्निज्ञानमिति[1], प्रकारार्थं तदवतारात् इति च, ज्ञानविशेषविशेष्यकप्रकारार्थमित्यर्थः।

---

1. 'इदं वह्निज्ञानमिति' पाठः आलोके न दृश्यते।

निषेधेन परकीयव्याघातस्याप्यज्ञानाच्च। प्रवृत्तिसंवादविसंवादाभ्यां तद्धेतुज्ञान[1]-वैचित्र्यानुमानेऽपि यथोक्तरूपप्रामाण्यस्य विशिष्याप्रतीतेरिति—उच्यते। प्राग्भवीय[2]संस्काराद्विशेष्यावृत्त्यप्रकारकत्वं तद्वति तत्प्रकारकज्ञानत्वं वा प्रामाण्यमात्रं स्मृतं वह्निज्ञानादौ साध्यमानं सर्वनाममहिम्ना पक्षधर्मताबलाद्वह्निज्ञानस्य विशेष्यावृत्त्यप्रकारकत्वादौ पर्य्यवस्यति। स्वतः प्रामाण्यनिषेधे[3] प्राथमिकप्रामाण्यज्ञानस्यान्यथोपपादयितुमशक्यत्वादिति संप्रदायविदः।

अपिः स्वव्याघातसमुच्चयार्थः। न परप्रतिषेधेन न वा स्वप्रतिषेधेन तत्प्रसिद्धिरिति भावः।

प्रामाण्यमात्रमित्यत्र मात्रशब्देन विषयादिव्यवच्छेदेनान्वयित्वशङ्का निराकृता।

प्राग्भवीयसंस्कारोद्बोधको न जीवनादृष्टादन्यो दृष्टचरः, तच्च तदा स्याद्यदि

ननु प्रामाण्यमिति। अत्र च व्याख्यानेऽज्ञानाच्चेति मूले। अज्ञानात् अज्ञापकत्वादित्यर्थः। चकारश्च प्रामाण्यनिषेधेन इत्यनन्तरं योज्यः। यद्वा माऽस्तु स्वार्थानुमान इयं गतिः, परार्थानुमाने तु स्यादेव इत्याशंक्य मूले—प्रामाण्यमिति प्रामाण्यज्ञानरहितस्य परस्य निषेधवाक्ये कर्त्तव्ये व्याघातात्मकवाक्यविषयस्याभावस्याज्ञानादित्यर्थः। वाक्यप्रयोक्त्राऽपि प्रामाण्याभावस्याज्ञानादिति यावत्। तथा च नाभावज्ञानेन प्रतियोगिज्ञानाद्यनुमानमिति भावः।

समुच्चयार्थतामेव विवृणोति—न परप्रतिषेधेनेति। यदि च शब्दविधयैव परकीयं स्वकीयञ्च वाक्यं पूर्वाज्ञातमेव प्रामाण्यं अभावप्रतियोगितया बोधयेदिति पक्षस्तदा स्वस्याज्ञातप्रामाण्यस्याभिप्रायं विना तादृशशब्दोच्चारणानियमादसार्वत्रिकत्वमेव दूषणं द्रष्टव्यम्। एतच्च सर्वमुपलक्षणम्। परकीयवाक्यश्रोत्रा प्रमात्वेन प्रतियोगित्वेन वा प्रमाऽनुमेया। तत्र नाद्योऽप्रसिद्धेः। न द्वितीयः, प्रमात्वप्रकारकव्यतिरेकिण्यनुपयोगादित्यपि दूषणं द्रष्टव्यम्।

विषयादीति। विषयविशेषादीत्यर्थः। मूले—सर्वनाममहिम्नेति दृष्टान्तार्थम्। तथा च यथा शाब्दबोधः सर्वनाममहिम्ना विशेषे पर्यवस्यति तथेत्यर्थः। यद्वा पक्षधर्मताया विशेषबोधनसामर्थ्यं सर्वनाममहिमपदेनोक्तमन्यथाऽनुमितौ तदनुपयोगादिति। प्राग्भवीयेत्युपलक्षणम्। देवदत्तत्ववति देवदत्तत्वप्रकारकत्वादिप्रामाण्यस्थले प्राचीनसंस्कारो नास्तीत्यपि बोध्यम्।

---

१. संवादिप्रवृत्तिहेतुज्ञानेति भावः। २ जन्मान्तरीयेत्यर्थः। ३ प्रामाण्यस्य स्वतस्त्वनिषेधे इति भावः।

वयन्तु ब्रूमः । प्रथममप्रामाण्याभाव एव प्रामाण्यं व्यतिरेकिणा साध्यम्;

तद्विना न जीवनमित्यपरितुष्यन्न प्रसिद्धसाध्यकोऽपि व्यतिरेकीति इतरभेदस्थले व्यवस्थापितमेकदेशिना, तन्मतमत्र सञ्चारयन्नाह—वयन्त्विति ।

ननु प्राथमिकप्रामाण्याभावानुमानस्थले यदि साध्यसन्देहस्तदा कोटिप्रसिद्ध्यनुरोधेन जन्मान्तरीयसंस्कारापेक्षेति पूर्वकल्प एव सम्यक् किमनेन । यदि च न सन्देहस्तदा निःशङ्कादर्थनिश्चयादेव प्रवृत्तिरिति किं प्रामाण्यानुमानेनेत्युभयथाऽप्यसामञ्जस्यमिति ।

मैवम् । संशयो हि न प्रवृत्तिप्रतिबन्धको येन तदुच्छेदार्थं प्रामाण्यानुमानम्, तदानीं संशयेनार्थनिश्चयस्यैवोच्छेदेन हेत्वभावादेवाप्रवृत्त्युपपत्तेः, संशयपूर्वं प्रवृत्त्यापत्तेश्च । न वा साध्यसन्देहः पक्षता, व्याप्तिस्मृत्यादिना तन्नाशेऽनुमितिपूर्वक्षणे तदभावेनानुमित्यनुत्पादापत्तेः । पक्षताहेतुत्वस्य सिद्धसाधनेऽनुमित्यनुत्पादेन सर्वसम्मतत्वात् । किन्तु उभयत्र तदुभययोग्यता । सा चागृहीतप्रामाण्यज्ञानासमानविषयत्वमेकत्रोद्देश्यसाध्यवत्त्वनिर्णयनिवर्त्त्यसंशयोत्पत्तिप्रतिबन्धकमानाभावरूपा ।

अपरत्र संशय एव नास्ति कुतः कोटिस्मृतिः कुतस्तरां च तदनुरोधेन प्राग्भवीयसंस्कारापेक्षा ?

वस्तुतस्तु नेह प्रामाण्यानुमानं प्रवृत्त्यर्थम्, प्रवृत्तिहेतुत्वस्यैव लिङ्गत्वात् । न च

सञ्चारयन्निति । तथा च विषयविशेषे सञ्चारस्य स्वकर्तृकत्वात् । **वयमिति** । निर्देश इति भावः । प्रामाण्यानुमानेन अप्रामाण्याभावानुमानेन । एवमग्रेऽपि ।

ननु मास्तु प्रवृत्तिप्रतिबन्धकाप्रामाण्यतदभावकोटिकसंशयः, पक्षताघटकस्तु स्यादेव । तथा च पक्षताऽनुरोधेन पुनः संशयाभ्युपगमे जन्मान्तरीयसंस्कारापेक्षैवागतेत्यत आह—**न वेति** ।

ननु पक्षताविरहात् कथमनुमित्यभावः ? तस्या अनुमितिं प्रति अजनकत्वादित्यत आह—**पक्षताहेतुत्वस्येति** । **उभयत्र** प्रतिबन्धेऽनुमितौ च । **उभययोग्यता** प्रामाण्यसंशययोग्यता साध्यसन्देहयोग्यता च । **अगृहीतप्रामाण्येति** अगृहीताप्रामाण्यविरोधीत्यर्थः । **एकत्र** प्रवृत्तिप्रतिबन्धे । **अपरत्रानुमितौ** । तथा च प्रामाण्यसंशयं विनाऽपि प्रवृत्तिप्रतिबन्धकप्रामाण्यसंशययोग्यतारूपस्यागृहीतप्रामाण्यज्ञानसमानविषयत्वस्य निरासार्थमप्रामाण्याभावानुमानमिति भावः । प्रवृत्तिसामान्ये प्रामाण्यसंशययोग्यतायाः प्रतिबन्धकत्वासम्भवान्निष्कम्पप्रवृत्तौ कुत्रचिदप्रामाण्यसंशयनिरासद्वाराऽप्रामाण्याभावानुमानस्योपयोग इत्याह—**वस्तुतस्त्विति** ।

कर्तृत्वस्य व्यापकतावच्छेदकत्वेऽपि एककर्तृकत्वप्रकारकानुमितिदर्शनादनियममाशंक्याह—**न चेति** । एककर्तुरपि कर्तृत्वालिङ्गितत्वमस्ति न तु प्रामाण्यस्याप्रामाण्याभावत्वालिङ्गितत्वमिति

तत एव निष्कम्पप्रवृत्तरुपपत्तेः, तदेव वा सिध्यत् पक्षधर्मताबलेन तद्वति तत्प्रकारकत्वादिकमादाय सिध्यति, तदनन्तरं अर्थाद्वा[1] सिध्यतीति वक्ष्यते ।

तद्योग्यतापरं, तदा तद्ग्रहात्। फलतस्तस्यैव साध्यत्वात्। न च तत एव निष्कम्प-प्रवृत्तेरित्यनेन विरोधः, तस्य हि आहत्यानेन निष्कम्पप्रवृत्तिरिति नार्थः, किन्त्वर्थ-निश्चये जाते संशयादपि प्रवृत्तौ प्रवृत्तिहेतुत्वलिङ्गनिश्चये तेनाप्रामाण्याभावानुमाने तदनन्तरमुत्तरोत्तरार्थनिश्चयेषु तदनुमानादेव निष्कम्पप्रवृत्त्युपपत्तेः, न तु प्रामाण्यानु-मानपर्यन्तपर्येषणमिति तात्पर्यम्। न चाग्रिमसौकर्यार्थमिदमिति यदि फक्किकार्थः तदा तदनन्तरमित्यादिप्रकारेणोत्तरं प्रामाण्यानुमानसौकर्येऽपि कथमेतदुपन्यास इति वाच्यं, तदनन्तरमर्थापत्त्यवतारस्यासार्वत्रिकत्वात्, क्वाचित्कत्वेनापि प्रामाण्यानुमानस्यानभ्या-सदशापन्ने सम्भवेन तत्र प्रकारोपन्यासादिति। एतावताऽपि प्रामाण्यसाध्यकानुमाना-शक्यतायां स्वतोऽवेद्यं तद्वेद्यमेव स्यादित्यनुशयादाह—तदेव वेति।

ननु अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेनाप्रामाण्याभावानुमितौ कथं प्रामाण्यं विषयः? न चायमनियमः, तथा सत्यपि व्यापकतावच्छेदकावच्छिन्नविषय-त्वस्य सर्वसम्मतत्वेन तद्दोषतादवस्थ्यात्। न चान्वयिन्येव तथा, व्यतिरेकिणि हेत्वभाव-व्याप्याभावप्रतियोगिविषयतानियमस्य तन्नियमस्थानीयत्वात्। न च पक्षताघटक-सन्देहे कोट्योरन्यतरबाधेऽन्यतरप्रकारकतानियमः। प्रागुक्तयुक्त्या सन्देहस्य तदघट-कत्वात्। जन्मान्तरीयसंस्कारानपेक्षतया पृथक् कल्पाश्रयणे कोटिस्मृतेरुपपादयितु-मशक्यत्वाच्च। न च पक्षताघटकयोग्यताप्रतियोगिसन्देहकोट्योरन्यतरबाधे तथा नियमः, अज्ञातस्य प्रकारत्वायोगादित्यस्वरसेनाह—तदनन्तरमिति।

भावः। तथेति व्यापकतावच्छेदकावच्छिन्नविषयत्वनियम इत्यर्थः।

न च पक्षताघटकेति। यद्यपि साध्यसन्देहस्य पक्षताघटकत्वादप्रामाण्यतदभावकोटिकः संशयस्तथा, न तु प्रामाण्यकोटिकः संशय इति शंकेयमनुपपन्ना, तथापि केवलान्वयित्वबोधेन साध्यसिद्धिनिवर्त्यसंशयत्वेन पक्षताघटकत्वात् प्रामाण्याप्रामाण्यसन्देहोऽपि तथेत्याशयः।

प्रकारत्वायोगादिति। यद्यपि अन्यतरप्रकारकतानियम इत्यस्यान्यतरविषयकतानियम इत्यर्थोऽस्तु तथा चाप्रामाण्याभाववत् प्रामाण्य विशेष्यमेवास्तु, तथाऽपि तस्याखण्डत्वाभावाद्विशे-षणीभूतस्य तद्वतीत्यादिभागस्यानुपस्थित्या विशेष्यताऽपि नेति भावः।

अर्थादिति मूले वक्ष्यमाणव्यतिरेकिविशेषादित्यर्थः।

1. व्यतिरेक्यनुमानाद्वा।

तथा हि—अयं वह्नित्वेनानुभवो न वह्नित्वाभाववति वह्नित्वप्रकारकः, अवह्निवृत्तिप्रकारको न, विशेष्यावृत्तिप्रकारको न, वह्नित्वप्रकारकत्वे सति वह्न्यविशेष्यको न, वह्नित्वव्यधिकरणप्रकारावच्छिन्नो न, वह्न्यवृत्तिप्रकारको न वा,

न वह्नित्वाभाववतीति वह्नित्वाभाववद्विशेष्यत्वं सप्तम्यर्थः। तथा च न वह्नित्वाभाववद्विशेष्यक इत्येव साध्यम्, तत्प्रसिद्धिश्च वह्निप्रमायामेव सुलभा, न तु यथाश्रुतं प्रकारान्तर्भावेनैव साध्यम्, व्यर्थविशेषणत्वापत्तेः, व्यतिरेकव्याप्तौ साध्याभावस्य व्याप्यकोटिप्रवेशेन साध्ये व्यर्थविशेषणत्वस्य वज्रलेपत्वात्। प्रकारान्तर्भावेन साध्ये विशिष्टाभावरूपसाध्यसिद्धिरपि नावह्न्यविषयकत्वमात्रसिद्धिरित्यग्रेतन[1] व्यतिरेकिहेतुसिद्ध्यर्थमन्तराऽनुमानान्तरस्वीकारापत्तेश्च। न च वह्नित्वप्रकारकत्वे निश्चिते विशिष्टाभावोऽपि विशेष्यविरहपर्यवसन्न इति वाच्यं, तत्पर्यवसन्नो हि तन्नियतः, न त्वन्यथा, व्यापकतावच्छेदकाद्यनवच्छिन्नत्वात्। एवमग्रेऽपि साध्यं वह्नित्वप्रकारकत्वे सति इत्यन्तशून्यमेव।

विशेष्यावृत्तीत्यत्र प्रकृतज्ञानविशेष्यावृत्तीति।

अयं वह्नित्वेनेति मूलम्। वह्नित्वप्रकारकानुभवमात्रस्य पक्षत्वे इह वह्नौ द्रव्यत्वमित्यादावंशतो बाधः तद्वारणाय **अयमिति**। अयं वह्निरित्याकारकोऽनुभवविशेष इत्यर्थः।

इत्येव साध्यमिति। यद्यपि वह्नित्वाभाववद्विशेष्यकत्वाभावे साध्यमाने नाप्रामाण्याभावसिद्धिः, वह्निविशेष्यकगुञ्जात्वप्रकारकज्ञाने तस्य सत्त्वात्, तथापि वह्नित्वप्रकारकानुभवविशेषे तदभावोऽप्रामाण्याभावपर्य्यवसित इति भावः।

अवह्निवृत्तीत्यादिसाध्यानान्तत्वे हेतुना च विवेकः शेषे करिष्यते।

अग्रेतनेति। वह्नित्वाभाववद्विशेष्यकत्वे सतीति विशेषणासिद्ध्यर्थमित्यर्थः।

न त्वन्यथेति। न तु तदनुमितावेव विषय इत्यर्थः। **व्यापकेति**। वह्नित्वाभाववद्विशेष्यकत्वाभावस्येति शेषः। **अवच्छेदकादीति** पाठे व्यतिरेकिणि विषयतानियामकं व्याप्याभावत्वमादिशब्दार्थः।

वह्नित्वप्रकारकत्वे सतीति साध्येऽपि सत्यन्तं न विवक्षितमित्याह—**एवमिति**।

वह्नित्वप्रकारत्वघटिताप्रामाण्याभावसिद्ध्यर्थमाह—प्रकृतेति। स्वविशेष्यावृत्तिवह्नित्वप्रकारत्वस्य भ्रमे प्रसिद्धस्याभावः साध्य इत्यर्थः।

---

१. 'अग्रिम' इति पाठान्तरम्। दर्पणपाठानुरोधेन 'अग्रेतन' इति पाठोऽत्र धृतः।

दाहसमर्थविषयकप्रयत्नजनकत्वे सति वह्नित्वप्रकारकनिश्चयत्वात्, दाहसमर्थविशेष्यकवह्नित्वप्रकारकनिश्चयत्वाद्वा, यन्नैवं तन्नैवं यथा वह्न्यप्रमा।

एवं सर्वत्रान्योन्यात्यन्ताभावभेदेन साध्यभेदो द्रष्टव्यः।

दाहेति। निश्चयत्वादिति।

वह्निभ्रमजलादिप्रमयोर्व्यभिचारीत्यत उक्तम्—दाहसमर्थेति।

दाहसमर्थविषयकप्रयत्नजनकत्वमात्रमत्र वह्नित्वमिति निश्चये वह्निप्रवर्त्तके व्यभिचारीति वह्नित्वप्रकारकेत्युक्तम्।

निश्चयपदं च संशयान्यज्ञानपरम्। संशयस्य च समानधर्मिकविरुद्धनानाप्रकारकज्ञानतया समानधर्मिकत्वान्तर्भावेन व्यर्थविशेषणतया विरुद्धनानाप्रकारकज्ञानमात्रपरतया तदन्यज्ञानस्य निश्चयस्य चाविरुद्धप्रकारकधीपरता। तथा च भ्रमाभ्रमरूपवह्नित्वप्रकारकसमूहालम्बने व्यभिचारवारणाय निश्चयपदम्। समूहालम्बनेऽन्तत

ननु पञ्चमषष्ठयोरभेदः वह्नित्वव्यधिकरणशब्देनापि वह्न्यवृत्तित्वस्यैव प्रतिपादनादित्यत आह—**एवं सर्वत्रेति**। यत्र पौनरुक्त्यशङ्का तत्रेत्यर्थः।

अन्योऽन्येति। वह्न्यवृत्तित्वं द्विरूपम्, अग्रिमनञर्थो वेति भावः।

वह्निभ्रमेति। वह्नित्वप्रकारकभ्रमेत्यर्थः। **जलादीति**। यद्यपि वह्नित्वप्रकारकत्वेन सा वारिता, तथाप्यनेनाऽपि वार्य्यत इत्याशयः।

नन्वत्र निश्चयपदं वह्निधर्मिकस्यायं वह्निर्वा गुञ्जापुञ्जो वेति संशयस्य वारणाय, तस्य च समानधर्मिकविरुद्धप्रकारकज्ञानान्यज्ञानत्वमर्थः, तत्र चरमज्ञानपदं व्यर्थम्। न चान्यत्वान्तमेव विवक्षितमिति वाच्यम्, तथापि आद्यभागवैयर्थ्यात्। स्वरूपासिद्धत्वेऽपि तद्वारकविशेषणावौचित्यात्। किञ्च तादृशसंशये साध्यसत्त्वात् किञ्चिदपि तद्वारणाय न देयमित्याशंक्याह—**निश्चयपदमिति**।

व्यर्थविशेषणतयेति। आयासगौरवापत्त्येत्यर्थः, विशिष्टाभावे व्यर्थत्वासम्भवात्। इदञ्च वस्तुगतिमभिप्रेत्य तद्विशेषणेऽपि प्रकृते चात्यभावादिति। **विरुद्धाप्रकारकधीपरता** परस्परविरुद्धप्रकारकभिन्नप्रत्ययपरतेत्यर्थः।

तथा चेति। भिन्नत्वान्तं समूहालम्बनवारणायेत्यर्थः। तत्र च विशिष्टाभावतया नाद्यभागवैयर्थ्यम्। स्मरणाद्य प्रवर्त्तकत्वमते तादृशसमूहालम्बनरूपस्मरणे भ्रमांशे प्रमुष्टतत्ताके

इदन्त्वप्रकारस्य विरुद्धस्यापि स्फुरणात्, यदि विरुद्धप्रकारकज्ञानान्यत्वं निश्चयत्वं, तदा वैयर्थ्यमेव न, विशिष्टाभावत्वात्।

निश्चयत्वं जातिरव्याप्यवृत्तिरितिमतेऽयं हेतुरिति न वैयर्थ्याशङ्केति केचित्।

वस्तुतस्तु अत्र वह्नित्वमिति ज्ञाने वह्नित्वाभाववद्विशेष्यके व्यभिचारो मा भून्माभूच्च फलज्ञानादौ फलविशेष्यके व्यभिचार इति दाहसमर्थविषयकप्रयत्नजनकत्व वह्नित्वप्रकारकतया विशेषितम्, तत्र वह्नेः प्रकारतया विशिष्टाभावसत्त्वात्। केवल-वह्नित्वप्रकारत्वे च हेतौ वह्निभ्रमे व्यभिचारः स्फुट एव। न चेह वह्नित्वमिति ज्ञानम-प्रवर्त्तकमेव, इष्टतावच्छेदकधर्माप्रकारकत्वादिति वाच्यं, इष्टतावच्छेदकप्रवृत्तिविषय-वैशिष्ट्यावगाहिज्ञानस्यैव लाघवेन प्रवर्त्तकत्वात्। न तु तद्विशिष्टेष्टतावच्छेदकप्रकारक-ज्ञानस्येत्यलमनेन।

न चैवं निश्चयपदं व्यर्थं, समूहालम्बनेऽशभेदप्रामाण्यानुमानस्याकर एव स्फुट-त्वेन व्यभिचाराप्रसङ्गादिति वाच्यं, वह्नौ वह्नित्वं न वेति संशये व्यभिचारवारकत्वात्। तत्र हि वह्नित्वाभाववद्वह्नित्वं विशेष्यमिति साध्याभावः, वह्नित्वं प्रकारोऽपीति, दाह-समर्थविषयकप्रयत्नजनकत्वं वह्नित्वप्रकारकज्ञानत्वञ्चेति न हेत्वभावः। न चेह वह्नित्वं न वेति ज्ञाने न वह्नित्वं प्रकारः, वह्नौ वह्नित्वनिश्चयेन वह्नित्वं न वेति ज्ञानञ्च न

व्यभिचारवारणाय प्रत्यक्षपदम्। प्रत्यक्षे च नेदन्तामोष इति भावः। इदन्त्वप्रकारविरोध-स्येति क्वचित्पाठः। तदा विरुद्धयत इति विरोधो विरुद्धम्। तथा च इदन्त्वस्यैव प्रकारविरुद्धस्य स्फुरणादित्यर्थः।

ननु प्रत्यक्षत्वे हेतौ सामानाधिकरण्येन विरुद्धप्रकारकान्यत्वापेक्षया सप्रकारकान्यत्वं लघ्ववच्छेदकमुचितम्। यदि प्रत्यक्षत्वञ्च व्यर्थम् उपादानप्रत्यक्षत्वेन प्रवृत्तिहेतुताया स्मरणस्याप्रवर्त्तकत्वादित्यरुचेराह—यदीति। न चात्रापि सप्रकारकान्यत्वमेव लघुहेतुरस्त्विति वाच्यम्, अवच्छेदकयोरेकधर्म्यसमावेशादिति भावः। निश्चयत्वं जातिरिति। तथा च वह्निगुञ्जापुञ्जयोरिमौ वह्नी न वेति संशयवारणाय निश्चयत्वमिति भावः। एतच्च इमौ वह्नी इति निश्चयस्यावारणेनाव्याप्यवृत्तिजातिस्वीकारेऽपिसिद्धान्तेन चायुक्तमित्यरुच्या किञ्चिदित्युक्तम्।

निश्चयपदस्य व्यावर्त्यान्तर वक्तुं पूर्वोक्तमेव युक्तिमनुवदति—वस्तुतस्त्वित्यादिना न चैवं निश्चयेत्यतः प्राक्तनेन ग्रन्थेन। फलेति। इदं च फलविशेष्यकज्ञानस्य प्रवर्त्तकत्वपक्षे।

विशिष्टेति। वह्नित्वप्रकारकत्वविशिष्टस्य हेतोरभावसत्त्वादित्यर्थः। अंशेति। इदमुपल-क्षणम्। विरुद्धाप्रकारकत्वेनैव वह्निभ्रमवारणे दाहेत्यादिवैयर्थ्यम्। न च प्रमुष्टतत्ताकभ्रमरूपस्मरण-वारणाय तदिति वाच्यम्, प्रयत्नजनकत्वेनैव तद्वारणे दाहसमर्थांशवैयर्थ्यादित्यपि ज्ञेयम्।

भवत्येव, वह्नित्वविशिष्टत्वेनोपस्थिते तदभावसन्देहाभावादिति वाच्यं, वह्नित्वं नेत्यस्यैव ज्ञानस्य वह्नित्वप्रकारकतया प्रथमप्रत्यय एव व्यभिचारात्, वह्नित्वाभावविशेष्यके ज्ञाने प्रतियोगिनो वह्नित्वस्य प्रकारत्वात्। न चेह वह्नित्वं नेति निश्चये व्यभिचार-तादवस्थ्यम्, तस्य दाहसमर्थविशेष्यकप्रयत्नजनकत्वाभावेनैव हेत्वभावात्। न च संशयोऽप्यप्रवर्त्तक इति सम्भवति, येन निश्चयपदं अनर्थकं स्यात्। अत एवाग्रिम-हेतावपि वह्नित्वप्रकारकनिश्चयपदयोः सार्थकता। न चेह वह्नित्वमितिज्ञानस्य प्रवर्त्तकतया भवतु प्रथमहेतावुक्तव्याख्यानसम्भवः, न च वह्नित्वमपि दाहसमर्थं येन तद्विशेष्यक-प्रत्यये व्यभिचारप्रसङ्गेनोभयोः पदयोरवैयर्थ्यं समर्थ्येतेति वाच्यं, दाहसमर्थविशेष्य-कत्वस्य दाहसमर्थवैशिष्ट्यविषयकत्वपरत्वात्। न च भ्रमेऽपि दाहसमर्थवैशिष्ट्यं वह्नित्वस्य विषयो येन व्यभिचारः स्यादिति सर्वं रमणीयम्।

न च वह्नौ पर्वतो वह्नित्वाभाव इदंवृत्तिरिति ज्ञाने व्यभिचारः, संशयो हि न भास-मानविरोधिकोटिद्वयविषयकज्ञानमात्रं, पीतः शङ्ख इत्यस्यापि तथात्वापत्तेः, किन्तु एकत्र परस्पराभावविषयकज्ञानम्, अतोऽत्र निश्चयो वह्नित्वाभावाविषयकज्ञानमेवाभिमत इति न व्यभिचारस्तस्य तदभावगोचरत्वात्, उक्तसंशये व्यभिचारस्याप्युक्तक्रमेणैव निश्चयपदाद्व्यावृत्तेः, न तु यथाश्रुतनिश्चयपदात्। इह वह्नित्वं तदभावो वेत्याकार उक्त-संशयो हि वह्निवृत्तित्वादिकोटिकः समूहालम्बनात्मा, तस्य धर्मिनिर्णयत्वनियमाच्च।

तस्य दाहेति। इदञ्च दाहार्थिप्रयत्नमभिप्रेत्य आपातत उक्तम्। वस्तुतोऽग्रे वाच्येन वह्नित्वाभावविषयकत्वविशेषणेन एतद्वारणमिति ध्येयम्।

ननु इह वह्नित्वं नेति निश्चयवदिह वह्नित्वं न वेति संशयस्यापि दाहसमर्थप्रयत्नजनकत्वं न भविष्यतीत्यत आह—न च संशयोप्यप्रवर्त्तक इति।

अत इति। अत्र वह्नित्वमितिनिश्चयवारणाय वह्नित्वप्रकारकपदम्, अत्र वह्नित्वं न वेति संशयवारणाय निश्चयपदं यत इत्यर्थः।

न च भ्रमेऽपीति। यद्यपि वह्नितादात्म्यारोपे दाहसमर्थनिरूपित वैशिष्ट्य वह्नित्वे विषय एव, तथापि तादात्म्येनेतराविशेषणदाहसमर्थनिरूपितसमवायो दाहसमर्थवैशिष्ट्यशब्देन विवक्षितः, तथा च तत्र दाहसमर्थस्य तादात्म्येनेतरविशेषणत्वान्नोक्तदोषः दाहार्थीतिविशेषणापेक्षया हेतुद्वये।

यद्वा द्वितीयहेतावेव व्यभिचारमाशङ्क्याह— न चेति। पर्वतो वह्नित्वाभाव इति। वह्न्यधिकरणे वह्नित्वाभाव इदवृत्तिः। निर्णयत्वनियमादिति। इद च संशये धर्मिणो विशेष्यत्वं कोट्योः प्रकारत्वन्नियतमिति सिद्धान्तमनुसृत्योक्तम्।

समूहालम्बनस्थले च व्यभिचारसम्भव इति पूर्वमुक्तमिति न काप्यनुपपत्तिः।

वस्तुतोऽनुमितौ पर्वतो वह्निमान् पर्वते वह्निरिति द्वैरूप्यवत् संशयेऽपि द्वैरूप्यमेवोचितमिति नियमाच्चेति पाठे तस्य चेत्यन्वयः।

ननु वह्नित्वाभावाविषयकत्वं यदि निश्चयपदार्थः तदा भ्रमाभ्रमरूपे वह्नौ इति समूहालम्बने व्यभिचारतादवस्थ्यमित्यत आह—समूहेति। उक्तमिति। अंशभेदेन तत्रापि साध्यमस्त्येवेत्युक्तमित्यर्थः।

नन्वत्र वह्नित्वं न वेति संशयस्य च तेनैव वारणे निश्चयपदं व्यर्थमिति चेत्—अत्रोच्यते। (नन्वत्र वह्नित्वं न वेति संशयेऽभावांशे वह्नित्वप्रकारकेऽपि दाहसमर्थांशे वह्नित्वप्रकारत्वं नास्ति, तच्चावश्यं वाच्यम्, अन्यथाऽत्र वह्नित्वमत्रत्य इति निश्चये इह वह्नित्वं वह्नित्वभिन्नधर्मवदितिप्रत्यये च व्यभिचारस्य वज्रलेपत्वापत्तेः। तथा च वह्नित्वाभाव इदवृत्तिरिति ज्ञानस्यात्र वह्नित्वं न वेति संशयस्य च तेनैव वारणे निश्चयपदं व्यर्थमिति चेत्—अत्रोच्यते[1]—) वह्नित्वाभावाविषयकशब्देन (वह्नित्वविशेषितदाहसमर्थान्याविषयत्वस्य विवक्षितत्वादत्र सम्बन्धादेरेव तथाभूतस्य भानादिति[2]) वह्नित्वसाक्षाद्विशेषणकतया दाहसमर्थभिन्नविषयकादन्यत्वं विवक्षितमिति नोक्तदोषः।

तदिह संक्षेपः। वह्नित्वाभाववद्विशेष्यकत्वाभावः प्रथमसाध्यार्थः। वह्न्यविशेष्यकत्वाभावश्चतुर्थसाध्यार्थः। दाहसमर्थविषयकप्रयत्नजनकत्वे सति वह्नित्वप्रकारकत्वे च सति वह्नित्वसाक्षाद्विशेषणतया दाहसमर्थभिन्नविषयकादन्यत्वं प्रथमहेत्वर्थः। तत्र च वह्नितादात्म्यभ्रमवारणाय दाहेत्यादितादात्म्येनेतराविशेषणदाहसमर्थनिरूपितं समवायमवगाहते, वह्नित्वं प्रकारीकरोति, वह्नित्वसाक्षाद्विशेषणकतया दाहसमर्थभिन्नं नावगाहते च यत्तत्त्वं द्वितीयहेत्वर्थः।

नन्वत्र वह्नौ रूपमित्यादिज्ञाने उक्तहेत्वोर्व्यभिचारः। किञ्च द्वितीयतृतीयपञ्चमषष्ठसाध्येऽग्रे निर्वाच्येषु व्यर्थविशेषणतया नोक्तौ हेतू युज्येते इति चेत्—न, एतदस्वरसादेवात्र दाहेत्यादिना खण्डितहेतूपादानस्य करिष्यमाणत्वात्।

वस्तुतस्तु प्रयत्नस्य व्यापार्यतया वह्निरिव साध्यतया वह्न्यादानक्रिया[3] विषयः। तथा चेदत्वावगाहिवह्निप्रत्यक्षमिव वह्न्यादानमिष्टसाधनमित्यनुमितिरपि दाहसमर्थविषयकप्रत्यक्ष[4]हेतुरिति

---

१ इति 'क' पुस्तकपाठ। २ कोष्ठस्थपाठोऽधिक कपुस्तके। ३ व्यापारत्वेनेति शेषः। ४ प्रयत्नहेतुरिति गपुस्तके।

एवं च सर्वत्र] साध्ये' यथोक्तहेतुसमर्थने प्रथमचतुर्थपरित्यागेन निश्चयगर्भहेतूपादाने स्वीकारः कुसुमाञ्जलिप्रकाशविरोधादेव नोचितः। तत्र हि सिद्धवत्प्रथमसाध्य एव निश्चयगर्भहेतूपादानात्।

यत्तु वह्निगुञ्जयोर्वह्निगुञ्जे इति समूहालम्बने दाहसमर्थविषयकप्रयत्नजनके व्यभिचारवारणाय वह्नित्वप्रकारकपदं, तेन वह्नित्वप्रकारकत्वपुरस्कारेण तादृशप्रयत्नजनकत्वरूपहेतुलाभात्। इदमेव चाग्रिमहेतावपि तत्पदप्रयोजनं दाहसमर्थे विशेष्ये तत्-

वस्तुस्थितिः। एवञ्च गुञ्जापुञ्जेऽयं वह्निरित्यत्र व्यभिचारात् दाहेति। अत्र च वह्नित्वमित्यादिप्रत्यक्षे व्यभिचारात् वह्नित्वेति। तदर्थश्च विशेषणगततया इदन्त्वाप्रकारकत्वम्। तेनेह वह्नौ द्रव्यत्वमित्यादेरपि प्रत्यक्षस्य निवारणम्। अनुमितौ व्यभिचारात् निश्चयेति। तदर्थश्च प्रत्यक्षत्वम्।

न चोपनीतभानात्मकेष्टसाधनताप्रत्यक्षे एवमपि व्यभिचार इति वाच्यम्, लौकिकप्रत्यक्षत्वस्य विवक्षितत्वात्। द्वितीयहेतौ तु इह वह्नौ द्रव्यत्वमित्यादौ व्यभिचारात् दाहेति। न च तावदेवास्त्विति वाच्यम्, वह्नितादात्म्यारोपे वह्निः तादात्म्यप्रतियोगितया भासमानोऽपि संसर्गतया संसर्गप्रतियोगितया च न भासते। भासते चेति सर्वजनीनम्। तदेव [1]चात्र विशेष्यमभिमतमिति तादृशभ्रमे व्यभिचारात् निश्चयेति। तच्चैकस्मिन् धर्मिणि परस्परविरुद्धाप्रकारकपरम्। तादृशभ्रमजनिते प्रमुष्टतत्ताके स्मरणे व्यभिचारात् वह्नित्वेति। तच्च विशेष्यनिष्ठासाधारणधर्मप्रकारकपरम्।

यद्वा दाहेत्यादिना दाहसमर्थाप्रकारकत्वं यथाश्रुतमेव, वह्नित्वप्रकारकत्वं निश्चयेत्यनेन वह्नित्वविशेषणकतया दाहसमर्थभिन्नाविषयकत्वं विवक्षितम्। तथा चेह वह्नौ द्रव्यत्वमित्यादौ व्यभिचारादाद्यम्। अयं घट इत्यादौ व्यभिचाराद् द्वितीयम्। गुञ्जापुञ्जे वह्निर्न वेत्यादिव्यभिचारात् तृतीयं विशेषणमिति दिक्।

अत्र केचित्। प्रवृत्तिविषयविशेष्यकमेव ज्ञानं प्रवर्त्तकम्। तथा च वह्नित्वप्रकारके भ्रमे व्यभिचारवारणाय दाहसमर्थेति। वह्निगुञ्जयोर्विपरीतसमूहालम्बने व्यभिचारवारणाय वह्नित्वप्रकारकेति। सति सप्तमीमहिम्ना दाहसमर्थविषयकप्रयत्नजनकतावच्छेदेन दाहसमर्थविशेष्यकत्वावच्छेदेन च वह्नित्वप्रकारकत्वलाभात्। न च गुञ्जावह्न्योर्वह्नी इति भ्रमाभ्रमरूपे समूहालम्बने व्यभिचार इति वाच्यम्, दाहसमर्थविषयकप्रयत्नमात्रजननानुकूलवह्नित्वप्रकारकत्ववन्निश्चयस्य दाहसमर्थमात्रविशेष्यकवह्नित्वप्रकारकत्ववन्निश्चयस्य च विवक्षितत्वात्। न च निश्चयपदवैयर्थ्यम्, प्रथमचतुर्थसाध्ययोस्तदप्रवेशात्। वह्निविशेष्यकेऽयं वह्निर्गुञ्जा वेति संशयेऽवह्निवृत्तेर्विशेष्यावृत्तेर्वह्नित्वव्यधिकरणस्य वह्न्यवृत्तेश्च गुञ्जात्वस्य प्रकारतया साध्यचतुष्टयाभावेन तत्रैव निश्चयपदप्रवेशात्। प्रथमचतुर्थसाध्ययोरपि संशयव्यावृत्तिलाभाय निश्चयप्रकारीभवद्वह्नित्वाभाववद्विशेष्यको न निश्चयप्रकारीभवद्वह्नित्ववदविशेष्यको नेत्यत्र पर्यवसाने वा निश्चयपदस्य सार्थकत्वात्। न चैकधर्मिकविरोधिनानाप्रकारकज्ञानान्यज्ञानत्वं निश्चयत्वम्, तत्र चाद्यभागश्चरमज्ञानशब्दश्च व्यर्थ इति वाच्यम्, विशिष्टाभावत्वाच्चरमज्ञानशब्दस्याप्रवेशाच्च।

यद्वा निश्चयत्वं जातिरेवेति न व्यर्थतेति वदन्ति। तत्र प्रथमचतुर्थयोस्तदप्रवेशादिति दूषयन्ति—एवञ्च सर्वत्रेति।

वह्निगुञ्जयोरित्यादि लाभादित्यन्तमनुवदति—यत्त्विति।

---

[1] संसर्गतया संसर्गप्रतियोगितया वा भासमानत्वे सति भासमानत्वमेवात्र विशेष्यमित्यर्थः।

प्रकारकत्वलाभात्, निश्चयपदञ्च वह्निर्वा गुञ्जा वेति संशये व्यभिचारवारणाय, तत्र[1] व्यधिकरणप्रकारकत्वात्। न च वह्निरयं गुञ्जापुञ्जश्चेति समुच्चये व्यभिचारः, निश्चयपदस्य विरुद्धाप्रकारकज्ञानपरत्वात्। न च गुञ्जात्ववह्नित्वे परस्परविरुद्धे। न च विरुद्धाप्रकारकतयैव भ्रमवारणे दाहेत्यादिकमनर्थकं, प्रमुष्टतत्तेदन्ताकवह्निभ्रमे व्यभिचारवारकत्वादिति।

तन्न। अस्तु प्रथमसाध्यं[2] विहाय निश्चयोपादाने ग्रन्थान्तरविरोधः विशेष्यावृत्तिप्रकारकत्वाभावस्य साध्यस्य वह्नित्वांशविशेषणविशेषितत्वेनात्रापि निश्चयपदोपादानानुपपत्तेः तदुपादानस्य चावश्यकत्वात्, प्रकारान्तर्भावेन[3] प्रामाण्यस्यानुमेयत्वात्, तस्यैव प्रवृत्त्यौपयिकत्वात्। तद्वक्ष्यति—पृथिव्यांशे प्रमैवेति।

यत्तु प्रमुष्टेत्यादि—तदसत्, विशेष्यज्ञान[4]स्येदन्ताप्रमोषे प्रत्यभिज्ञाया अपि तथाभावापत्तौ अभेदोच्छेदापत्तेः। प्रमुष्टतत्ताकस्मरणस्य प्रवर्त्तकत्वे च भ्रमपूर्वजातस्मरणस्य

वह्निविशेष्यके इत्यादि प्रवेशादित्यन्तमनुवदति—निश्चयपदञ्चेति। तत्र व्यधिकरणेति। तथा च वह्नित्वव्यधिकरणेत्यादिसाध्यस्य तत्राभाव इति भावः। इदमुपलक्षणम्। अपरसाध्यत्रयस्याप्यभावो द्रष्टव्यः। तत्र यथाश्रुतनिश्चयपदार्थमादाय शङ्कां निरस्यति—न चेति। दाहेत्यादिकमिति। प्रथमहेतौ दाहसमर्थविषयकप्रयत्नजनकत्वम्। द्वितीयहेतौ च दाहसमर्थविशेष्यत्वमित्यर्थः। प्रमुष्टेति। प्रमुष्टतत्ताके स्मरणरूपे प्रमुष्टेदन्ताके प्रत्यक्षरूपे वह्नित्वप्रकारके भ्रमे विशेष्यावृत्तिप्रकारको नेति साध्यासत्त्वादिति भावः।

अत्रावह्नीति वह्नित्वव्यधिकरणेति वह्न्यवृत्तीति साध्यत्रयस्य प्रमुष्टतत्तेदन्ताकवह्निभ्रमे सत्त्वात् तत्र दाहेत्यादिकमनर्थकमेवेति स्फुटत्वात् उपेक्ष्य पूर्वोक्त ग्रन्थविरोध चास्त्वित्यादिनाऽदोषत्वेनाभ्युपेत्य तृतीयसाध्ये निश्चयपदं दूषयति—विशेष्यावृत्तीति। विशेष्यावृत्तिवह्नित्वप्रकारकत्वाभावस्य वह्निधर्मिकसंशये सत्त्वात्तद्वारणाय निश्चयपदं व्यर्थमित्यर्थः।

प्रकारान्तर्भावेनेति। त्वयैव वह्नित्वस्य प्रवेशादिति भावः। इदमुपलक्षणम्। अवह्निवृत्तीतिसाध्येऽपि इदन्तात्वेतिप्रकारविशेषणस्य द्रव्यमयं वह्निरित्यत्र व्यभिचारवारकस्यावश्यकत्वे उक्तसंशये साध्यसत्त्वेन निश्चयपदं व्यर्थमित्यपि ध्येयम्। यच्च भ्रमाभ्रमरूपसमूहालम्बनवारणाय वह्नित्वप्रकारकपदमिति यत्त्वित्यादिनाऽनूदित—तदयुक्तम्, अंशभेदेन साध्यसत्त्वादित्यपि द्रष्टव्यम्।

विशेष्यज्ञानस्येति। विशिष्टप्रत्यक्षस्येत्यर्थः। अभेदेति। अभेदविषयकत्वनियमेत्यर्थः। प्रमुष्टेति। तथा च दाहसमर्थविषयकेति व्यर्थम्, प्रयत्नजनकत्वेनैव तद्वारणादिति भावः।

---

१. दर्पणपाठानुरोधादत्र 'तस्य चे'ति स्थाने 'तत्र' इति पाठः स्वीकृतः।

२. प्रथमहेतुसाध्यमिति नपुस्तके। प्रथमे साध्ये हेतुमिति कपुस्तके।

३. 'प्रकारविशेषान्तर्भावेणे'ति पाठान्तरम्। ४. सविशेष्यकानुभवस्येति कपुस्तके।

प्रवर्त्तकतापत्तेः। यद्पि निश्चयपदसार्थकत्वाय साध्ये निश्चयप्रकारीभवद्वह्नित्वाभाववतीत्यादि विवक्षणीयं, तेन वह्निर्न वेति वह्निविशेष्यकसंशये दाहसमर्थविशेष्यकप्रयत्नजनके व्यभिचारवारणाय हेतौ निश्चयपदम्—

तन्न। पुरुषान्तरीयकालान्तरीयनिश्चयविषयतया वह्नित्वस्योक्तसंशये साध्याभावासत्त्वे व्यभिचाराप्रसङ्गात् तत्कालीनतत्पुरुषीयनिश्चयप्रकारकत्वविवक्षायां त्वप्रसिद्धेरिति संक्षेपः। अत्र दाहसमर्थविषयकप्रयत्नजनकत्वं वह्नित्वप्रकारकनिश्चयत्वञ्च हेतुद्वयम्। अत्र वह्नित्वमित्यादेर्वह्न्यप्रवर्त्तकत्वस्य वक्ष्यमाणत्वात्, निश्चयपदस्य विरुद्धाप्रकारकपरत्वाच्च, भ्रमस्य चान्योन्यविरुद्धेदंत्ववह्नित्वादिप्रकारकत्वात्। न चाग्रिमहेतौ हेतुभेदपक्षे द्वितीयाभेदः। विरुद्धाप्रकारकज्ञानविरुद्धप्रकारज्ञानान्यज्ञानत्वरूपार्थयोर्भेदादिति रहस्यम्।

निश्चयप्रकारीभवदित्यादि दूषयितुमनुवदति—यद्पीति। तत्कालीनेति। इदमुपलक्षणम्। स्वसमानविशेष्यकेत्यपि ज्ञेयम्। अन्यथा वह्न्यन्तरगोचरवह्नित्वप्रकारकनिश्चयसमानकालोक्तसंशयाव्याप्तेरिति।

अप्रसिद्धेरिति[1]। तादृशप्रकारत्ववद्वह्नित्वस्येति शेषः। तथा च तदभावाप्रसिद्ध्या तद्घटितव्यभिचारवारणाय हेतौ निश्चयपदं व्यर्थमिति भावः। यद्यपि स्वसमानाधिकरणस्वसमानविशेष्यकनिश्चयप्रकारत्वविशेषितवह्नित्वस्य स्वकालेऽभावो यत्र तत्र तद्विशेष्यकत्वाभावस्य तादृशवह्नित्ववतः स्वकाले यत्र ज्ञाने विशेष्यत्व नास्ति तदन्यत्वस्य च साध्यत्वे नायं दोषः, तथापि स्वशब्देन निश्चयाभिधाने संशये साध्यमेवेति न तद्व्यावृत्तिः, स्वशब्दस्य समभिव्याहृतपरतया क्वचित्संशयपरत्वे क्वचिच्च निश्चयपरत्वेऽननुगमादनुमानाप्रवृत्तिरिति दूषणं द्रष्टव्यम्। दाहसमर्थमात्रविशेष्यकवह्नित्वप्रकारकनिश्चयत्वे द्वितीयहेतौ मात्रपदेनैव विपरीतसमूहालम्बनवारणे वह्नित्वप्रकारकपदं व्यर्थमिति केचित्। दाहसमर्थविषयकप्रयत्नमात्रजननानुकूलवह्नित्वप्रकारकतावन्निश्चयत्वादित्यत्र वह्नौ इति भ्रमाभ्रमरूपसमूहालम्बने गुञ्जाशे दैवाद्दुःखसाधनताग्रहाद्व्यभिचारः। दुःखसाधनताज्ञाने सति तदंशे प्रयत्नाभावादित्यन्ये।

पूर्वोक्तास्वरसात् खण्डितहेतूनालम्बते—अत्र दाहेति। विरुद्धाप्रकारकपरत्वादिति। विरुद्धाप्रकारकप्रत्यक्षपरत्वादित्यर्थः। तेन प्रमुष्टतत्ताकभ्रमरूपस्मृतौ न व्यभिचारः। अत एवाग्रे विरुद्धाप्रकारकज्ञानेति वक्ष्यति। विरुद्धाप्रकारकप्रत्यक्षेति तदर्थः। अत्र वह्नित्वाभाववद्विशेष्यकत्वाभावे वह्नित्ववदविशेष्यकत्वाभावे च साध्ये दाहसमर्थविषयकप्रयत्नजनकप्रत्यक्षत्वमाद्यो हेतुः,

[1] अप्रसिद्धिरिति गपुस्तके।

तत्र[1] बाधानन्तरं स्मृत्युपनीते भ्रमे वह्नित्वाभाववति वह्नित्वेन मम ज्ञानं वृत्तमित्यप्रामाण्यं मनसैव परिच्छिद्यते मानान्तरेण वेति[2] सर्वसिद्धम्[3] । एवं

सर्वत्र न मनसा स्मृतोपनयः, अन्यथा प्रामाण्येऽपि तथाभावापत्तेरित्यत आह—मानान्तरेण वेति ।

प्रत्यक्षत्वाप्रवेशे इष्टसाधनतानुमितौ व्यभिचारात् । इतरविशेषणानिरूपितवह्नित्वप्रकारकविरुद्धप्रकारकभिन्नप्रत्यक्षत्वं द्वितीयो हेतुः, अनिरूपितेत्यन्तस्याप्रवेशे इह वह्नौ व्यभिचारादौ व्यभिचारात् । प्रत्यक्षत्वाप्रवेशे च प्रमुष्टतत्ताकभ्रमरूपस्मरणे व्यभिचारात् । दाहसमर्थविशेष्यकत्वं तृतीयो हेतुः । इतरविशेषणानिरूपितवह्नित्वप्रकारकविरुद्धप्रकारकत्वात्यन्ताभाववत्प्रत्यक्षत्वं चतुर्थो हेतुः । तत्र च विशेषणकृत्यं द्वितीयहेताविव ज्ञेयम् ।

ननु द्वितीयसाध्यस्य यथाश्रुतत्वेऽयं वह्निर्द्रव्यमित्यत्र व्यभिचारः, वह्निवृत्तीति नञ्-व्यत्यासे चरमाभ्यां सह पौनरुक्त्यम्, अनुष्णो वह्निरित्यत्र व्यभिचारश्च । इदन्ताख्येति प्रकार-विशेषणे एतद्रूपवानयं वह्निरित्यत्र व्यभिचारः ।

विशेष्यनिरूपितेदन्ताख्येति विशेषणे इहायं वह्नित्वसम्बन्ध इत्यत्र व्यभिचार इति चेत्—न, स्वजन्यप्रयत्नविषये कश्चिद्वह्निवृत्तीदन्त्वाख्यप्रकारको नेति साध्यार्थत्वात् । तत्र दाहसमर्थविषयकप्रयत्नजनकत्वं, वह्नित्वप्रकारकत्वे सति विरुद्धप्रकारकभिन्नत्वं, दाहसमर्थविशेष्यकत्वं, वह्नित्वप्रकारकत्वे सति विरुद्धप्रकारकत्वाभाववत्त्वञ्च हेतवः । एवमेव पञ्चमं षष्ठञ्च साध्यम् । एत एव च तयोर्हेतवः । विशेष्यावृत्तिवह्नित्वप्रकारको नेति च साध्यं तृतीयम् । तत्र च दाहसमर्थविषयक-प्रयत्नजनकत्वम् इतरविशेषणानिरूपितवह्नित्वप्रकारकत्वे सति विरुद्धप्रकारकभिन्नप्रत्यक्षत्वं दाहसमर्थ-विशेष्यकत्वम् इतरविशेषणानिरूपितवह्नित्वप्रकारकत्वे सति विरुद्धप्रकारकत्वाभाववत्प्रत्यक्षत्वञ्च हेतवो ज्ञेयाः । अत्र चायं वह्निरित्यनुभवे इदन्ताघटितसाध्यानाम प्रामाण्याभावे पर्यवसानान्नोद्देश्यासि-द्धिशङ्का तेष्विति दिक् ।

मानान्तरेण वेतीति । इदं ज्ञानं वह्नित्वाभाववद्विशेष्यकं विसंवादिप्रवृत्तिजनकत्वादित्या-द्यनुमानेन शब्देन वेत्यर्थः । यद्यपि शब्देन वाक्यार्थमर्यादया पूर्वज्ञानस्याप्रामाण्यं बोध्यते, अनु-माने तु यत्र ज्ञाने साध्यप्रसिद्धिः तत्रैव व्यतिरेकव्याप्तिग्रहसम्भवेऽस्य वैयर्थ्यं, तथापि साध्यप्रसिद्ध्य-धिकरणे यत्र प्रकृतहेतोरसत्त्वं न ज्ञातं तत्र तदनु[4]मानमप्युपयुज्यत एवेति भावः ।

---

१. अप्रमायामिति भावः । २. मानान्तराद्वेति पाठान्तरम् ।
३. अप्रामाण्यस्य परतस्त्वे च मीमांसकस्याप्यविवादादिति भावः ।
४. ईदृशेति गपुस्तके ।

वह्न्यप्रमायां वह्नित्वाभाववति वह्नित्वप्रकारकत्वादिसमर्थप्रवृत्तिजनकत्वाभाव-योर्व्याप्तिग्रहेऽप्रामाण्यव्यापकहेत्वभावाभावरूपाद्धेतोरप्रामाण्याभावरूपं साध्यं सिध्यति। यद्व्यापकतया हेत्वभावो गृहीतस्तदभाव एव हेतुना साध्यते। यत्र त्वभावस्य व्यापकता हेत्वभावस्य ज्ञायते तत्र साध्यप्रसिद्धिरङ्गं, तां विना[1] तदज्ञानात्।

ननु साध्यप्रसिद्धिं विना तदभावाग्रहाद्व्यतिरेकव्याप्त्यग्रहे कथमेतदित्यत आह–यद्व्यापकतयेति। यस्य व्यापकतया हेत्वभावो गृहीतस्तदभावो हेतुना सिद्ध्यतीति प्रतियोगिप्रसिद्धिरेवाङ्गं न तु तदभावरूपसाध्यप्रसिद्धिरपीत्यर्थः।

ननु यत्र दुःखाभाव एव सुखमिति ज्ञात्वा तद्व्यापकतया मुक्तत्वाभावो गृहीत-स्तत्र मुक्तत्वेन सुखाभावानुमानं न स्यात्, वस्तुतो दुःखाभावव्यापकतया हेत्वभाव-ग्रहादिति।

मैवम्। येन रूपेणोपस्थितं यं प्रति व्यापको हेत्वभावो गृहीतस्तद्भावत्वेन तदभावो हेतुना[2] सिध्यतीति तत्सिद्धान्तादित्यनुमानपरिच्छेदे विवेचयिष्यामः।

तद्व्यापकतया कालिकतद्व्यापकतया। न स्यादित्युपलक्षणम्। स्याच्च मुक्तत्वेन दुःखानुमानमित्यपि द्रष्टव्यम्। यमित्यनन्तरं कञ्चिदिति शेषः।

तद्भावत्वेनेति। तद्धर्मावच्छिन्नाभावत्वेन तद्धर्मावच्छिन्नाभावः सिद्ध्यतीत्यर्थः। व्यधि-करणधर्मावच्छिन्नाभावपरतया वा इदं योज्यमिति केचित्—तन्न, सुखत्वावच्छिन्नदुःखाभावाभा-वस्य केवलान्वयितया व्यतिरेकित्वायोगादिति।

ननु द्रव्यत्वव्यापकतया संयोगाभावो गृहीत इति संयोगेन द्रव्यत्वाभावानुमानापत्तिः। न च हेत्वभावे प्रतियोगिव्यधिकरणत्वविशेषणान्नैष दोष इति वाच्यम्, विभागाभावं प्रति संयोगाभावस्य व्यापकत्वे गृहीतेऽपि तं प्रति प्रतियोगिव्यधिकरणस्य तस्य व्यापकत्वाग्रहात् संयोगेन विभागाननुमानापत्तेरित्यत आह—इत्यनुमानपरिच्छेद इति। प्रतियोगिव्यधिकरणस्य यद्धर्माव-च्छिन्नोपस्थितिकस्य यत्सम्बन्धावच्छिन्नस्य व्यापकतया यद्धर्मावच्छिन्नस्याभावो यत्सम्बन्धावच्छिन्न-प्रतियोगिताकः प्रतियोगिव्यधिकरणो गृहीतस्तत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिकाभावस्तत्स-म्बन्धवता तद्धर्मावच्छिन्नेन तेन सिद्ध्यतीति निर्गलिते नोक्तदोषो न वा सम्बन्धभेदादिकमादायाति-प्रसङ्ग इति भावः।

---

१. प्रतियोगिनः साध्यस्य ज्ञानं विना तदभावज्ञानासम्भवादिति भावः।

२. तदवच्छिन्नाभावभावो हेतुनेत्यादि नपुस्तके।

यत्र तु भावव्यापकता हेत्वभावस्य, तत्र न तदङ्गम्, तेन विनापि व्यतिरेकव्याप्तिग्रहात्। अत एवेतर[1]व्यापकता आकाशत्वाभावस्य गृहीतेत्या-

इतरेति। इतरतादात्म्येत्यर्थः। यथा चेतरतादात्म्यव्यापकाभावप्रतियोगिना हेतुना अन्योन्याभावः सिध्यति तथा च तादात्म्यं तदसाधारणधर्ममात्रम्। यथा चान्योन्याभावस्याजानिकः संसर्गाभावभेदस्तत्सर्वमग्रे वक्ष्यामः।

वस्तुतस्तु यदभावव्यापकतया यदभावो गृहीत. स तेन सिद्ध्यतीति नियमः। तेनेतरतादात्म्याभावारूपत्वेऽपि इतरान्योन्याभावस्य इतरान्योन्याभावाभावरूपेतरतादात्म्यव्यापकाभावप्रतियोगिना हेतुनेतरान्योन्याभावसिद्धिरप्रत्यूहाऽप्रत्यूहा च यत्रेतरान्योन्याभावाभावस्तत्र पृथिव्यन्योन्याभाव इति व्याप्त्यवगमेनापि पृथिव्यन्योन्याभावाभावात्मनाऽपि पृथिवीत्वेनेतरान्योन्याभावसिद्धिरिति सर्वं सुस्थम्।

ननु यथाश्रुतमितरेति मूलमसङ्गतम्, आकाशे इतरस्य शब्दादेः सत्त्वेऽपि आकाशत्वाभावाभावात्। इतरशब्दस्येतरत्वपरत्वे तद्व्यापकतया आकाशत्वाभावग्रहेऽपि इतरत्वात्यन्ताभावः सिद्ध्येन्न त्वितरान्योन्याभाव इत्यत आह—इतरतादात्म्येत्यर्थ इति।

ननु तादात्म्यव्यापकत्वे हेत्वभावस्य गृहीते कथमितरान्योन्याभावसिद्धिः, तावता तादात्म्यात्यन्ताभावस्यैव सिद्धिसम्भवादित्यत आह—यथा चेति। यस्य सम्बन्धिनो यत्सम्बन्धावच्छिन्नस्य व्यापकतया हेत्वभावो गृहीत इत्यपेक्षया सम्बन्धव्यापकत्वस्य लघुतया गमकत्वेन तादात्म्यलक्षणसम्बन्धव्यापकतैवेतरव्यापकता, तया च तादात्म्यसम्बन्धावच्छिन्नाभावः सिद्ध्यतीत्यर्थः।

ननु तादात्म्यं भेदाभेदरूपः सम्बन्धः। स चाप्रसिद्ध इत्यत आह—तथा चेति।

अत्र केचित्—इतरत्वात्यन्ताभाव एव इतरान्योन्याभावः, इतरत्वम् इतरान्योन्याभावविरहरूपम्। अत एव इतरान्योन्याभावस्य इतरत्वविरहात्मकत्वमावश्यकम्। यो यद्विरहरूपः स तद्विरहरूप एवेति व्याप्तेरित्याहुः। तत्राह—यथा चेति। समानाधिकरणव्यधिकरणनिषेधधीगम्यत्वेन इतरत्वावच्छिन्नेतरज्ञानेतरत्वावच्छिन्नेतरत्वज्ञानाधीनज्ञानत्वेन अधिकरणयोग्यताप्रतियोगियोग्यताधीनसाक्षात्कारविषयतया स्वयमेव स्वीकारेण च तयोर्भेदोऽनुमानखण्डे वाच्य इत्यर्थः।

ननु सर्वमिदमनुपपन्नम्, इतरत्वात्यन्ताभाववत्त्वेतरान्योन्याभाववत्त्वरूपधर्मावच्छेदेन विरुद्धधर्माणामुपपत्तेः। यच्चोक्तं–'सम्बन्धाव्यापकत्वं लघ्वि'ति–तदपि न। सम्बन्धिविशेषितसम्बन्धव्यापकतायामुच्यमानाया सम्बन्धिसम्बन्धोभयप्रवेशस्योभयत्र तुल्यत्वाद्विशेषणविशेष्याभावमात्रविपरिवर्त्तनात्।

अत्रोच्यते—पृथ्वीतरत्वस्याभावतया पृथिवीतरस्य भावतया तदत्यन्ताभावतदन्योन्याभावयोर्भावात्मकयोः कथमैक्यम्? सामान्याभावव्यवस्थापनावसरे स्वयमेव भावाभावकरम्बितवस्त्वापातादिति वक्ष्यमाणत्वात्।

---

१. आकाशेतरेत्यर्थ.।

काशत्वेनाप्रसिद्ध एवेतरान्योन्याभावः सिध्यति। विशेषणज्ञानं विना कथं प्रामाण्यविशिष्टानुमितिरिति चेत्—प्रथमं न कथञ्चित्। ज्ञाने प्रामाण्यमित्यनुमित्यनन्तरं तेनैव हेतुना तत्रैव प्रामाण्यविशिष्टानुमितिः अभाव-

ज्ञाने प्रामाण्यम्। ज्ञानेऽप्रमाण्याभाव इत्यर्थः।

प्रामाण्यविशिष्टानुमितिरिति। अप्रामाण्याभावविशिष्टानुमितिरित्यर्थः। अयञ्च प्रकारो व्यतिरेकिणि व्यतिरेकव्याप्त्यवगमस्य गमकत्वपक्षे नान्यथेति वक्ष्यते।

ननु चरममपि कथं तद्विशिष्टानुमितिः, प्रथममपि वा कुतो न तद्विशिष्टानुमितिः, पक्षविशेष्यकपरामर्शस्य पक्षविशेषणकानुमित्यजनकत्वात् कथमुक्तानुमितिः, कुतो वा तेनैव हेतुनेति, मनसैव तथासम्भवादिति[१]।

मैवम्। साध्यप्रसिध्या विशेषणज्ञानेन चरमं प्रकारत्वसम्भवात्, न च प्रथमम्, अज्ञातस्य प्रकारत्वायोगेन परामर्शानुमित्योरेकत्रोपसर्ज्जनस्यापरत्राप्युपसर्ज्जनतानियमेन पक्षविशेषणकपरामर्शस्वीकारात्। तेनैव हेतुनेति चोपलक्षणम्। एवंविधान्तरस्याबाधादिति[२] न किञ्चिदेतत्।

किञ्चैतद्घटप्रागभावादीनामारोप्यसम्बन्धभेदेन विशेषाभावसामान्याभावयोश्च प्रतियोगितावच्छेदकभेदेन भेदव्यवस्थितौ आरोप्यसम्बन्धभेदवतोः प्रतियोगितावच्छेदकभेदवतोश्चानयोः कथमैक्यमिति। सम्बन्धं प्रति व्यापकता तु बाधकाभावमात्रादुक्ता, तादात्म्यावच्छिन्नेतरव्यापकताऽप्यत्र द्रष्टव्या। यदभावव्यापकतया यदीयाभावं प्रति व्यापकतयेत्यर्थः। यदभावो[३]योऽभावो यस्येति बहुव्रीहिः। तेन यत्प्रतियोगीत्यर्थः।

अत्र वदन्ति—नन्वेवं पृथिवीतरत्वव्यापकतया गन्धाभावग्रहे गन्धेन पृथिवीत्वानुमाने पृथिवीत्वस्य गन्धव्यापकत्वग्रहे पृथिव्यन्योन्याभावेन गन्धाभावानुमाने चोक्तनियामकस्यासम्भव इति।

अत्रोच्यते—यदभावव्यापकतयेत्यस्य प्रतियोग्यनुयोगिभावलक्षणसम्बन्धवतो यद्विरोधिनो व्यापकतयेत्यर्थः[४]। यदभाव इत्यस्य च प्रतियोग्यनुयोगिभावलक्षणसम्बन्धवान् यद्विरोधीत्यर्थः। तथा च व्याप्याभावरूपस्य व्याप्यप्रतियोगिनश्च साध्यस्य व्यापकाभावरूपस्य व्यापकप्रतियोगिनश्च हेतोः संग्रह इति क्वापि नाव्याप्तिरिति। विधान्तरं प्रकारान्तरम्[५]।

---

१ ननु चरममपि कथं तद्विशिष्टानुमितिः। पक्षविशेष्यकपरामर्षस्य पक्षविशेषणकानुमित्यजनकत्वात्। कुतो वा तेनैव हेतुनेति मनसैव तथासम्भवादित्यादर्शतालपत्रपुस्तकधृतपाठः।

२. विधान्तराबाधान्तराबाधादिति आदर्शतालपत्रपुस्तकधृतः पाठः।

३. 'यदभावो यदभावकभावः' इति कपुस्तकपाठः।

४ एवं यत्र पृथिवीभेदस्तत्रगन्धाभाव इति व्याप्तिग्रहे इयं पृथिवी गन्धवत्त्वादित्यनुमानं न स्यात्। नहि पृथिव्यन्योन्याभावः पृथिवीत्वाभाव इति। मैवम्। यदभावव्यापकतयेत्यत्र यद्विरोध्यभावव्यापकतयेत्यर्थः। भवति च पृथिवीत्वविरोधी पृथिव्यन्योन्याभावोऽपीति प्रतियोग्यनुयोग्यन्यतरसम्बन्धवत एव तद्विरोधित्वादिति।

५. विधान्तरमपि हेत्वन्तररूपं मनोरूपञ्च। तत्राद्ये यथापरामर्शं व्यवस्था, अन्त्ये तु सति परामर्शेऽनुमितिरेव। मानसज्ञानसामग्रीतस्तत्सामग्र्या बलवत्त्वात् असति तु मनसेति व्यवस्थेति।

विशेष्यकप्रतीत्यनन्तरमभाववद्भूतलमिति ज्ञानवत्। एवञ्चेदं वह्नित्वप्रकारकज्ञानं तद्वति तदभाववति वेति संशयानन्तरं तदभाववति तत्प्रकारकत्वव्यतिरेकः सिध्यन् तद्वति तत्प्रकारकतामादाय सिध्यति, तृतीयप्रकाराभावेन तेन विना साध्यस्योपसंहर्तु[1]मशक्यत्वात्, ज्ञाननित्यत्ववत्[2]।

यद्वा इदं वह्नित्वप्रकारकज्ञानं वह्नित्ववद्विषयकं, वह्नित्वाभाववदविषयकत्वे सति सविषयकत्वात्, यन्नैवं तन्नैवं, यथा वह्न्यप्रमेति व्यतिरेक्यन्तरात्तत्सिद्धिः।

वह्नित्ववद्विषयक[3]मिति। वह्नित्ववद्विशेष्यकमित्यर्थः। एवं हेतावपि। यथा च वह्नित्वाभाववद्विशेष्यकत्वाभावः प्रागनुमानात् सिद्धो न विशिष्टाभावस्तथोपपादितमधस्तात्।

नन्वत्र वह्नित्ववद्विशेष्यकत्वं साध्यमप्रसिद्धं, किं बहुना सविशेष्यकत्वहेत्वसिद्धिरेव। ज्ञानग्राहिणा तदग्रहात्। अन्यथा प्रामाण्यस्य स्वतस्त्वापत्तेः। न च ज्ञानान्तरात् तत्सिद्धिः। तद्धि किञ्चिद्विशेष्यकत्वं वा वह्न्यवह्न्यन्यतरविशेष्यकत्वं वा। नाद्यः, मानाभावात्। नान्त्यः, तत एव। प्रामाण्याप्रामाण्यान्यतरावधारणप्रसङ्गाच्चेति।

मैवम्। जन्मान्तरीयसंस्कारवशादनुव्यवसायविशेषेण ज्ञानान्तरोपस्थितौ वा

तादात्म्यभ्रमव्यावृत्त्यर्थमाह—वह्नित्ववद्विशेष्यकमिति।

एवं हेतावपीति। यथाश्रुते वह्नित्वाभाववतो वह्नित्वादेर्विषयत्वेन स्वरूपासिद्ध्यापत्त्या वह्नित्वाभाववद्विशेष्यकत्वाभावे सतीत्यर्थः। निर्विकल्पकादौ व्यभिचाराच्च सविषयकत्वस्य सविशेष्यकत्वमर्थः। विशिष्टाभावतया चा[4]वैयर्थ्यमिति भावः।

विशेषणासिद्धिं परिहरति—यथा चेति। अन्यथा प्रामाण्यस्येति। विशेष्यत्वांशं विहायान्येषा भागाना स्वतो ग्रहे बाधकासम्भवादि[5]त्युक्तत्वादिति।

तद्धीति फक्किकानन्तरं गृह्णीयादिति शेष.। मानाभावादिति। किञ्चिद्विशेष्यकत्वग्राहिज्ञानेनोत्पादकाभावादित्यर्थः। तत एवेति। वह्निविशेष्यकत्वग्राहिज्ञाने अवह्निविशेष्यकत्वग्राहिज्ञाने चोत्पादकाभावादित्यर्थः।

अग्रिमपक्षद्वये दोषान्तरमाह—प्रामाण्येति। जन्मेति। जन्मान्तरीयसंस्कारेण स्मृतं सविशेष्यकत्वमनुव्यवसायेन प्रकृतज्ञाननिष्ठतया गृह्यते।

---

१ ज्ञातुमित्यर्थः। २ यथा पृथिवी ज्ञानजन्या, कार्यत्वादितीश्वरसिद्ध्यनुमानेऽनित्यज्ञानबाधेन ज्ञानस्य नित्यत्वसिद्धिस्तद्वदिति भावः। ३. विषयत्वमिति पाठान्तरम्।
४. कपुस्तके 'च' नास्ति। ५. बाधकाभावादिति गपुस्तके।

सविशेष्यकत्वग्रहात्। न चैतावतापि साध्याप्रसिद्धिर्न परिहृतेति वाच्यं, इदं सविशेष्यकं सप्रकारकत्वादिति सामान्यतो दृष्टेनावह्निविशेष्यकत्वबाधसहकृतेनैव एतज्ज्ञानविशेष्यत्वं वह्निवृत्त्यवह्न्यवृत्तित्वे सति वृत्तिमत्त्वादित्यनेनानुमानेन वा तत्सम्भवात्। न चैवं व्यतिरेकिवैयर्थ्यं, प्रकारार्थं तदुपासनात्। न च द्वितीयानुमानेन प्रकृतज्ञानविशेष्यत्वं वह्नौ गृहीतं न तु वह्नि[1]विशेष्यकत्वं ज्ञान इति वाच्यं, समानवित्तिवेद्यत्वात्। न चैवमिदं ज्ञानं वह्निविशेष्यकं, वह्निनिष्ठविशेष्यत्वप्रतियोगित्वादित्येव व्यतिरेक्यव्याकुल इति वाच्यं, उपायस्योपायान्तरादोषत्वादिति सर्वमवदातम्।

अत्र वयं तु ब्रूमः। वह्नित्वाभाववद्विशेष्यकत्वाभावानुमानपूर्वकमेव सर्वत्रानुमानमिति नोचितं, किन्त्वयमपि काचित्कः प्रकार इतीदमुपन्यस्तम्। तथा हि—वह्नित्वाभाववद्विशेष्यकत्वस्य प्रतियोगिनः किं मनसोपस्थितिरनुमानतो वा ? शब्दादेस्तथाप्रसंगस्य तथाविषयनियमादिना असार्वत्रिकत्वात्। आद्ये प्रत्यक्षेण योग्यानुपलब्ध्यैव तदभावो ज्ञायताम्। प्रतियोग्यधिकरणयोर्योग्यत्वादनुपलम्भसम्भवाच्च। किञ्च तस्य योग्यत्वे तद्वत्प्रामाण्यमपि योग्यमेव किमनया प्रणालिकया ? वह्नित्वाभाववत्त्वस्य बाधगम्यतया तदपेक्षया सम्वादगम्यतद्वत्त्वस्य सुग्रहत्वात्। तस्य च प्रकारस्याकर एवाग्रे सुप्रतिपादितत्वात्।

यद्वा स्मृत्यादिनोपस्थिते प्रकृतज्ञाने स्मृत्युपस्थितसविशेष्यकत्वं मनसा सप्रकारकत्वेन लिङ्गेन वा परिच्छिद्यत इत्यर्थः। व्यापकतावच्छेदकानाक्रान्तस्य नानुमितिविषयत्वमित्यरुचेराह—**एतज्ज्ञानविशेष्यत्वमिति**। वह्नित्वाभाववद्विशेष्यकत्वप्रसिद्ध्या वह्न्यभाव[2]वद्विशेष्यकत्वाभावमनुव्यवसाये च वह्नित्ववद्विशेष्यकत्वमनुमेयमेवेति नियमद्वयं नास्ति, किन्तु कदाचिदियमपि रीतिः सम्भवतीति **मणिकृतो**ऽभिसन्धिरिति।

वयन्तु ब्रूम इत्यादेः **पन्था** इत्यन्तस्य प्रघट्टकस्यार्थः पूर्ववदेव। **सर्वत्रेति**। प्रामाण्यानुमानस्याप्रामाण्याभावानुमानपूर्वकत्वनियमः सार्वत्रिकत्वञ्च न युक्तमित्यर्थः।

तत्राप्रामाण्याभावानुमानपूर्वकत्वनियमं निराकरोति—**तथा हीत्यादिना सिद्धसाधना**त्यन्तेन। **प्रत्यक्षेणेति**। तथा चाप्रामाण्याभावज्ञानपूर्वकत्वनियमेऽपि न तदनुमानपूर्वकत्वनियम इति भावः। **किमनयेति**। तथा च न तज्ज्ञानपूर्वकत्वेऽपि नियम इति भावः। प्रामाण्याप्रामाण्ययोर्योग्यताया विशेषमुक्त्वा प्रामाण्येऽतिशयमाह—**वह्नित्वाभाववत्त्वस्येति**। तद्घटिताप्रामाण्यस्येत्यर्थः। एवं **तद्वत्त्वस्ये**त्यत्रापि। **बाधेति**। वह्निभ्रमे जाते तत्रैव नाय वह्निरिति बाधावतारे वह्नित्वाभाववत्येव मम ज्ञानं वृत्तमित्यप्रामाण्यबाधगम्यमित्यर्थः। एवं प्रामाण्ये सम्वादगम्यत्वम्।

यद्वा **वह्नित्वाभाववत्त्वस्येति** यथाश्रुतमेव, **बाधगम्यत्वं** च बाधविषयत्वम्। एवं **तद्वत्त्वस्ये**त्यत्रापि संवादगम्यत्वं च विसंवादाविषयत्वम्। साध्यपर्यालोचनया अनुमानपूर्वकत्वनियमं

१, वह्नित्ववदिति कपुस्तके। २. वह्नित्वाभाववद्विशेष्यकत्वेति गपुस्तकपाठः।

अपि च प्रामाण्यग्रहलिङ्गं दाहसमर्थविशेष्यकत्वमगृहीत्वा क्व प्रामाण्यग्रहवार्त्ता तत्प्रकारश्चाग्रे प्रदर्शनीयः। तथा च तदवगमकाले वह्नित्ववद्विशेष्यकत्वं किं हस्तपिहितम्। प्रत्युत वह्नित्वस्य लघुत्वेन दाहसमर्थतावच्छेदकत्वेनोपजीव्यतया च प्राथमिकोपस्थितिरिति मानमेव प्राथमिकप्रामाण्यग्रह इत्येव न्यायः, न त्वियं कल्पना, असार्वत्रिकत्वात्, उक्तक्रमेण हेतुग्रहपूर्वं प्रामाण्यग्रहे सिद्धसाधनाच्च।

वस्तुतस्तु प्रामाण्यग्रहोत्तरमप्यर्थविशेष्यकव्यवसायानन्तरं प्रवृत्त्यर्थमास्थेयम्। तथा च स एव प्रामाण्यग्रहः, अत एव संवादेन प्रामाण्यं गृह्यत इति सिद्धान्तप्रवादः। न चार्थनिश्चयस्य न प्रामाण्यनिश्चयत्वं ज्ञानागोचरत्वादिति वाच्यं, व्यवसायानन्तरमनुव्यवसायोपनीतघटत्वप्रकारकज्ञानविषयत्वविशिष्टस्यार्थस्य द्वितीयनिश्चयविषयतया प्रामाण्यनिश्चयत्वसम्भवात्। प्रामाण्यनिश्चयानुरोधेनापि द्वितीयप्रवर्त्तकार्थनिश्चयपूर्वं प्रथमार्थनिश्चयानुव्यवसायस्य स्वीकारात्। न चोपनीतभानेऽपि घटविशेष्यत्वं नोपस्थितमिति वाच्यं, अयं घटो वस्तुत एतर्हि घटत्वप्रकारकं ज्ञानमित्येतावत एव प्रामाण्यग्रहत्वात्। न चैतावताऽपि घटविशेष्यकस्तद्ग्रहोऽस्तु, न तु ज्ञानविशेष्यकं प्रामाण्यविशेषणकं वा ज्ञानमिति वाच्य, तावद्दूरस्यानपेक्षितत्वात्। कथमप्यपेक्षणे वा मानसतादृशप्रत्ययस्योत्तरकालसुलभत्वात्। न चैवं सर्वत्र प्रामाण्यस्य मनोवेद्यत्वे प्रथमतो व्यतिरेकिणा चरमं तज्जातीयत्वेनान्वयिना प्रामाण्यग्रह इति ग्रन्थविरोध इति वाच्यं, सर्वत्रैवमुपनयनियमाभावेन सर्वसामञ्जस्यात्।

ननु अस्तु प्रामाण्यमनुमानोपस्थितमिति द्वितीयः कल्प इति—

मैवम्, तथा सत्यन्योन्याश्रयापत्तेः। तथा हि—वह्निज्ञानस्योक्तक्रमेण तावद्वह्नित्वाभाववद्विशेष्यत्वाभावानुमानं वह्नित्वाभाववति तज्ज्ञानस्य तूक्तरीत्या वह्नि-

निरस्य हेतुपर्यालोचनया निरस्यति—अपि चेति। प्रामाण्येति। अप्रामाण्याभावेत्यर्थः। हेतुप्रामाण्ययोरविशेषमुक्त्वा प्रामाण्येऽतिशयमाह—प्रत्युतेति। किं हस्तपिहितमित्युपसंहरति—इति मानमेवेति। प्रत्युतेत्युपसहरति–उक्तक्रमेणेति। सार्वत्रिकत्वं निरस्यति–वस्तुत इति। प्रामाण्यनिश्चयेति। अनुव्यवसायाभावे पश्चाज्ज्ञानान्नाप्रामाण्याभावनिश्चय इति तत्पूर्वमवश्यमनुव्यवसाय इति भावः। एतर्हीति। एतद्विशेष्यकमित्यर्थः। एतच्च विशेष्यत्वांशस्यानुव्यवसायग्राह्यतापक्षम वलम्ब्योक्तम्।

अन्योन्याश्रयेति। यथा वह्निप्रमायां वह्नित्वाभाववद्विशेष्यकत्वलक्षणाप्रामाण्यस्याभावमनुमाय वह्नित्ववद्विशेष्यकत्वानुमितिः तथा वह्निभ्रमे वह्नित्ववद्विशेष्यकत्वाभावलक्षणं प्रामाण्य-

अतिरिक्तविषयतापत्ते अयं वह्नित्वेनानुभवोऽवह्निवृत्तिवह्नित्वप्रकारकविषयताको न, वह्नित्वासमानाधिकरणवह्नित्वप्रकारकविषयताको न, विषयताश्रयावृत्तिप्रकारो न वेति साध्यम्, वह्निवृत्तिवह्नित्वप्रकारकविषयताकत्वं विषयताश्रयवृत्तिप्रकारकत्वं वा अर्थात् सिध्यति, न तु प्रथमं, साध्याप्रसिद्धेः। वह्निभ्रमे च

विशेष्यकत्वाभावरूपाप्रामाण्यानुमानं ततस्तदनुमानम्। अन्यथा वह्नित्वाभाववद्विशेष्यकत्वमेव नोपस्थितं कुतस्तदभावप्रत्ययव्याप्तिबोधादिः? तथा च वह्नित्वाभाववद्विशेष्यकत्वे ज्ञाते तदभावानुमानपूर्वकार्थापत्त्या वह्निविशेष्यकत्वसिद्धिः, वह्निविशेष्यकत्वे च ज्ञाते तदभावानुमानपूर्वकार्थापत्त्या वह्नित्वात्यन्ताभाववद्विशेष्यकत्वसिद्धिरिति व्यक्तमन्योन्याश्रय इति नैष प्रकारः, किन्तु कदाचिदयमपीत्युक्तमिति युक्तमुत्पश्यामः।

किञ्चोक्ताप्रामाण्याभावानुमानानन्तरं प्रामाण्यानुमानमपि साध्याप्रसिद्ध्यादिना दुर्लभमित्युक्तम्। तथा च तल्लाभाय कथितप्रकारानुसरणमेव रमणीयमिति किं प्राथमिकाप्रामाण्याभावानुमानेनेति नायं पन्थाः। अपूर्वव्यक्तिगोचरज्ञानप्रामाण्यस्य पूर्वमननुभवात् स्मरणासम्भवेनैतस्य प्रकारस्य अवश्याश्रयणीयत्वमिति वृद्धैः परिशीलितः पन्थाः।

स्याभावमनुमाय वह्नित्वाभाववद्विशेष्यकत्वानुमितिरिति अप्रामाण्यज्ञानप्रामाण्यज्ञानयोः परस्परापेक्षत्वापत्तेरित्यर्थः। वह्नित्वाभाववद्विशेष्यकत्वाभावानुमानमित्यनन्तरं ततो वह्निविशेष्यकत्वानुमानमिति शेषः। तदनुमानमिति। वह्नित्वाभाववद्विशेष्यकत्वानुमानमित्यर्थः।

उक्तमन्योन्याश्रयं स्पष्टयति–तथा चेति। प्रामाण्यज्ञानस्यावश्यकत्वेऽपि नाप्रामाण्याभावानुमानपूर्वकतानियमः, दाहेत्यादिहेतुना मनसा वा तत्सम्भवादित्याह—किञ्चेति। इदञ्चोपलक्षणं, शङ्कानिरासार्थं प्रामाण्यानुमानं, शङ्का चाप्रामाण्याभावानुमित्यैव निरस्तेति व्यर्थमप्रामाण्याभावानुमानपूर्वकं प्रामाण्यानुमानम्। न चाप्रामाण्यतदभावकोटिकशङ्कायास्तदा निरासेऽपि प्रामाण्यतदभावकोटिकशङ्काया निरासार्थं प्रामाण्यानुमानमिति वाच्यम्, सन्देहनिरासे विरोधिविषयकनिश्चयमात्रस्य हेतुतया ग्राह्याभावनिश्चयपर्यन्तस्यानावश्यकत्वात्। तथापि अप्रामाण्याभावानुमानपूर्वकत्वे नियामकाभावाच्चेत्यपि द्रष्टव्यम्। अपूर्वव्यक्तिगोचरज्ञानप्रामाण्यस्य पूर्वमननुभवात्स्मरणासम्भवेन एतस्य प्रकारस्यावश्याश्रयणीयत्वमिति वृद्धैः परिशीलितः पन्था इति क्वचित्पाठः स चायुक्तः। दाहसमर्थविशेष्यकत्वन्यायेन तत्रापि प्रामाण्यस्योपनीतभानसम्भवादिति।

विषयताश्रयेति मूलम्। स्वविषयताश्रयावृत्तिवह्नित्वप्रकारको नेत्यर्थः। प्रकारविशेषघटिताप्रामाण्याभावस्य सिसाधयिषितत्वात्। **विषयताश्रये**ति मूलम्। अत्रापि स्वविषयताश्रयवृत्तिवह्नित्वप्रकारकत्वं साध्यं ज्ञेयम्। **वह्निभ्रम** इति मूलम्। वह्नितादात्म्यारोप इत्यर्थः। वह्नित्वासमानाधि-

विषयताश्रयो न वह्निः, विषयताया विशेष्यवृत्तित्वादिति भ्रमत्वेन न सिद्ध-साधनम् ।

अन्ये तु वह्निभ्रमे या विशेषणवृत्तिर्विषयता सा विशेष्यवृत्तिविषयताया अभिन्नेति न सा वह्नित्वासामानाधिकरणधर्मानवच्छिन्नेति न सिद्धसाधनमिति ।

न च मणिज्ञानस्य प्रामाण्यानुमाने[1] मणिप्रभायां मणिभ्रमेण प्रवृत्तस्य

विशेष्यविशेषणयोरुभयोरपि एकविषयताभ्युपगमपक्षेऽपि वह्नित्वासमानाधि-करणधर्मानवच्छिन्नत्व विषयताया अंशभेदेनैव वाच्यम्. अन्यथा वह्निप्रमायामपि साध्यबाधापत्तेः । अत्रापि वह्नित्वविशेषणवृत्तितया विषयतायास्तद्वृत्तिवह्नित्वासमाना-धिकरणवह्नित्वत्वाद्यवच्छिन्नत्वात् । तथा चांशभेदविवक्षायामत्रापि वह्नित्वासमाना-धिकरणधर्मानवच्छिन्नत्वमस्त्येवेति भ्रमत्वेन सिद्धसाधननादवस्थ्यम् । तथा च तद्वारणाय विशेष्यांशे वह्नित्वासमानाधिकरणधर्मावच्छिन्नविषयताकत्वविशिष्टविशे-ष्यताकत्वाभावपर्यन्तं साध्यमिति पदान्तरप्रक्षेपगौरवमित्यरुचि प्रकाशयति—अन्ये त्विति ।

ननु प्रभागोचरमणित्वनिश्चये मणित्वाभाववद्विशेष्यत्वाभावो नास्तीति व्यभि-चार इत्यत आह—न चेति । न च मणिप्रभाजनके मणौ प्रभागोचरमणिभ्रमे मणिर्मणि-जनक इति ज्ञानवतः फलज्ञानत्वेन प्रभागोचरमणित्वनिश्चयस्य मणिप्रवर्त्तकतया मणि-त्वाभाववद्विशेष्यतया च व्यभिचारः स्यादिति वाच्यं, समानविषयत्वेनाफलज्ञानत्वा-दिना वा जनकत्वस्य विवक्षणादिति भावः ।

करणधर्मावच्छिन्नविषयत्वाभावपर्यन्तमिति पाठेऽप्यभावपदस्य पूर्वत्र नयनेन वह्नित्वासमानाधिकरण-धर्मानवच्छिन्नविषयताकत्वमेवार्थ इति ज्ञेयम् । पदान्तर वह्निवृत्तिपदम् ।

ननु वह्निवृत्तिपदस्यैव विशेष्ये वह्नित्वासमानाधिकरणधर्मानवच्छिन्नत्वमर्थोऽन्येषामभि-मतस्तत्कुतो गौरवमिति चेत्—

अत्र ब्रूमः । विशेष्यांशे वह्नित्वसमानाधिकरणवह्नित्वप्रकारकविषयताकत्वमेव लघु साध्य-मस्तु कृतं गुरुणा विशेष्यांशे वह्नित्वासमानाधिकरणेत्यादिना इत्यभिप्रायः । तदिदमुक्तम्—पदा-न्तरेति । नञ्द्वयादीत्यर्थः ।

· यथाश्रुत निश्चयपदार्थमादायाशङ्कामाह—नन्विति । मणिर्मणिजनक इति । यद्यपि प्रभाविशेष्यकमणित्वप्रकारकभ्रमे व्यभिचारात् स एव वक्तव्यो न त्विदमपि ज्ञानं, तथापि तस्य फलज्ञानत्वनिष्पत्तये इदमुक्तम्—समानेति । इदञ्च फलविशेष्यकज्ञानस्य प्रवृत्तिजनकत्वमभ्यु-पेत्योक्तम् ।

---

१. मणिगोचरप्रयत्नजनकत्वे सति मणित्वप्रकारकनिश्चयत्वेन हेतुना प्रामाण्यानुमाने इति भावः ।

मणिप्राप्तौ[1] मणिगोचरप्रयत्नजनकमणित्वप्रकारकनिश्चयत्वमनैकान्तिकमिति[2] वाच्यम्, मणिप्रभाविषयज्ञानेन भिन्नविषयतया मणिगोचरप्रयत्नानुत्पादात्, मणिप्राप्तिस्तु नान्तरीयकत्वात्[3]। ज्ञानप्रयत्नयोरसमानकालत्वेऽप्यनुभवस्मरण-

ज्ञानप्रयत्नयोरिति। अत्र वदन्ति—कार्यकारणभावज्ञानं तदुभयावच्छेदकावधारणसाध्यम्। न च समर्थप्रवृत्तिजनकतावच्छेदकं प्रामाण्यादन्यत्। तथा च तदवगमानवगमाभ्यामुभयथाऽप्यसिद्धो हेतुरवगमे सिद्धसाधनादाश्रयासिद्धेरनवगमे च स्वरूपासिद्धेः।

ननु 'तृणारणिमणिन्यायेन'[4] व्यक्तावेव तद्ग्रहः। ततस्तज्जनकत्वे गृहीते सामान्यधर्मेण तेनैव सर्वोपस्थितौ व्याप्तिग्रहः। अस्तु वा अवच्छेदकग्रहणपूर्वकतानियमः कार्यकारणभावग्रहस्य। न चैतदपि दुर्लभम्। तथा हि दाहसमर्थविषयकप्रयत्नजनकत्वं हि विशिष्टं लिङ्गम्। तत्र च द्वयी विशिष्टवैशिष्ट्यावगाहिधीसामग्री एका विशिष्टज्ञानपूर्विका, अपरा विशेष्ये विशेषणम्, तत्र च विशेषणान्तरमिति। तत्र आद्यायाः प्रामाण्यरूपावच्छेदकाग्रहादसम्भवेऽपि द्वितीयायाः स्वविषयावच्छेदेन प्रवृत्तिसामान्यं प्रति गृहीतज्ञानसामान्यकारणत्वस्य प्रवृत्तिविषये विशेष्ये दाहसामर्थ्यरूपविशेषणान्तरज्ञानसम्पत्तेः को वारयितेति तेनैव कल्पेन हेतोरियमसिद्धिरुद्धरणीयेति।

अस्तु तावदेवं, तथाऽप्यसिद्धिः। तथा हि—मनसा द्वयोः कार्यकारणग्रहो द्वयोरुपस्थितौ, न च द्वयोर्युगपदवस्थानं येन मनसोभयोपस्थितिः। न च स्मृत्युपनीते तद्ग्रहः। स्मृतेरपि तद्गोचरायाः तदनुव्यवसायपूर्वकत्वात्। तथा च प्रवर्त्तके ज्ञाने

वस्तुतस्तु तदेव नास्तीति द्रष्टव्यम्। आश्रयासिद्धिरिति। प्रमात्वनिश्चयस्याप्रमात्वाभावनिश्चयपूर्वकतया पक्षविशेषणपक्षताविरहादिति भावः। **स्वरूपासिद्धेः** अज्ञानरूपासिद्धेः। ज्ञायमानत्वरूपोऽसाधारणो यो धर्मः स्वरूपं तदसिद्धेरित्यर्थः। अभावसाध्यक इति मूलम्—अप्रामाण्याभावसाध्यक इत्यर्थः। निर्विकल्पकस्येत्युपलक्षणं घटादेरपि द्रष्टव्यम्। न च द्वयोर्युगपदवस्थानमिति। यद्यपि प्रत्यक्षरूप वह्निज्ञान साक्षादेव प्रयत्नजनकमिति द्वयोर्युगपदवस्थानमेव, तथापि तद्विद्यमानमेव विशेष्यं जनकमिति मतमाश्रित्य वह्निप्रत्यक्षस्य प्रत्यक्षासंभवार्थप्रयत्नोत्तरक्षणे द्वयोर्युगपदनवस्थानमुक्तम्।

---

१. मणिप्राप्तिस्थले इति यावत्। २. मणिप्रभायां मणित्वभ्रमेऽनैकान्तकमिति भावः।

३. मणिप्रभाश्रकरणे देशे मणेरप्यवश्यं सत्त्वादिति भावः।

४. तार्णवह्नि प्रति तृणस्य आरणेयवह्नि प्रति अरणेः, मणिजन्यवह्निं प्रति मणेश्च कारणत्वं, न तु वह्नित्वावच्छिन्नं प्रति तृणादे. कारणत्वं, परस्परव्यभिचारात्। एवं यत्र कार्यकारणभावबाहुल्यं कार्यतावच्छेदकं कारणतावच्छेदकं च नाना तत्रास्य न्यायस्य प्रवृत्तिः।

योरिव मनसा कार्यकारणभावग्रह इति नासिद्धिः। अभावसाध्यके च निर्विकल्प-

जाते यदि तदनुव्यवसायस्तदा तत्र प्रवर्त्तकज्ञानविनाशे प्रवृत्तिरेव हेत्वभावे दुर्लभा, कुतस्तद्धेतुत्वधीः,अननुव्यवसाये च संस्कारानुत्पादे क स्मृतिद्वारोपनयो यतः कार्यकारण-भावधीः ? न हि गुरोरिवास्माकमपि व्यवसाय एवानुव्यवसायो येन संस्कारसुलभतया स्मृतिनिबन्धनं हेत्ववधारणमिति।

अत्र ब्रूमः—ज्ञाने जाते तस्य ज्ञानत्वेन समानविषयकज्ञानत्वेन वा सामान्य-लक्षणया ज्ञाने तत्ज्ञानेन चानागतस्यापि विषयीकृतत्वे तादृशस्य ज्ञानान्तरस्य पुनरु-त्पादे प्रवृत्त्यनन्तरं कार्यकारणभावपरिच्छेदः, सामान्यलक्षणया प्रागेव विषयीकृतस्य चरमोत्पन्नस्य प्रवृत्तिजनकस्य ज्ञानस्य प्रवृत्त्युत्तरं स्मृत्युपनये बाधाभावात्। इदमेव च सामान्यलक्षणास्वीकारे बीजान्तरम्। अन्यथा तदस्वीकर्तॄणां गुरुप्रभृतीनामिच्छा-प्रयत्नादिक्षणिकवस्तुकारणधीर्दुर्लभेति वक्ष्यते।

अभावेति। इदञ्चोपलक्षणम्, प्रामाण्यसाधके समूहालम्बनस्येति द्रष्टव्यम्। स-पक्षत्वेन साध्यवत्त्वेन, अन्यथा सपक्षशब्दस्य निश्चितसाध्यवद्वचनतया निश्चयनिश्चया-भावो हेतुर्लभ्यते। न चैवं युज्यते, निश्चयज्ञानस्याभासत्वाप्रयोजकत्वादिति।

वयन्तु ब्रूमः—असाधारणो दशाविशेष इति सर्वसिद्धम्। तथा च साध्यवत्त्वा-निश्चयान्नासाधारण इत्ययुक्तम्। तथा सति घटादावेवासाधारणत्वस्य दुर्वारत्वापातात्।

यद्वा व्यापारवत्तया वह्निरिष्टसाधन कृतिसाध्यश्चेति ज्ञानस्यापि उपादानगोचरचिकीर्षा-द्वारा प्रयत्नजनकतया तदभिप्रायेण युगपदनवस्थानं द्वयोरुक्तमिति।

गुरुमते ज्ञानस्य स्वप्रकाशतयोपपत्तिमभिप्रेत्याह—इच्छेति। कारणत्वधीर्दुर्लभेति। अत्र वदन्ति— ज्ञाने जाते द्वितीयक्षणे तदनुव्यवसाये तृतीयक्षणे च विनश्यत्ता, तेनेच्छाया जनितायां चतुर्थे च तदनुव्यवसाये विनश्यन्त्या तया पञ्चमे यत्नोपपत्तौ बाधकाभावात् सम्भवत्येव ज्ञानेच्छयोः स्मृत्युपनयः। न च निर्विकल्पकार्थमेवैकक्षणवर्द्धने ज्ञानेच्छयोः इच्छा-प्रयत्नयोश्चाव्यवधानं न सम्भवतीति वाच्यम्, नरसिंहाकारयोर्ज्ञानत्वेच्छात्वाश निर्विकल्पकस्वरूप-योरनुव्यवसाययोः स्वीकारात्। न च तथा सति ज्ञानत्वेच्छात्वविशिष्टगोचरस्मृत्यभावात्तेन तेन रूपेण हेतुता न गृह्येतेति वाच्यम्, तावताऽपि क्षत्यभावात् हेतुतामात्रस्य प्रकृतत्वात्। पूर्वकाले दैवाधीनज्ञानत्वेच्छात्वोपस्थितौ विशिष्टज्ञानस्यापि सम्भवाच्च। न च ज्ञानस्य यत्नकर्त्तव्ये इच्छा-द्वारम्, द्वारत्वञ्च द्वारिणि सत्येव तत्तत्फलजनकत्वमिति कथमुक्तरीत्या निर्वाह इति वाच्यम्, व्यापारत्वमात्रेणोपपत्तौ द्वारत्वे मानाभावादिति।

कस्य प्रथमं सपक्षत्वेनानिश्चयान्नासाधारण्यम्। तथेयं पृथिवीत्यनुभवः पृथिवीत्वाभाववति पृथिवीत्वप्रकारको न, अपृथिवीवृत्तिप्रकारको न, विशेष्यावृत्तिप्रकारको न, पृथिवीत्वप्रकारकत्वे सति पृथिव्यविशेष्यको न, पृथिवीत्वव्यधिकरणप्रकारावच्छिन्नो न, पृथिव्यवृत्तिप्रकारको न वा गन्धवद्विशेष्यकपृथिवीत्वप्रकारकनिश्चयत्वादिति व्यतिरेकी। पृथिवीत्वभ्रमः पृथिवीत्वाभाववति पृथिवीत्वप्रकारक इति न भ्रमत्वेन सिद्धसाधनं; न वा गन्धवद्विशेष्यक इति न व्यभिचारः। पृथिवीत्ववति पृथिवीत्वप्रकारकत्वादिकमर्थात् सिद्ध्यति।

विषयतापत्ते[1] अयं पृथिवीत्वेनानुभवः अपृथिवीवृत्तिपृथिवीत्वप्रकारक-

न हि तस्यापि साध्यसत्त्वानिश्चयः, सविषयकत्वाभावेनैवाप्रामाण्याभावसाध्यनिश्चयात्। वह्नित्वाभाववद्विशेष्यत्वादीनां मनसा मानान्तरेण वा व्यतिरेकव्याप्त्यवगमानुरोधेनावश्यकोपस्थित्यभ्युपगमे घटादौ तदभावावधारणावश्यकत्वात्। न हि तदा तदुपस्थितिर्हस्तपिहिता। अस्तु वोपस्थित्यनियमः। यदातूपस्थितिस्तदाऽसाधारण्ये को वारयिता? न च विपक्षबाधकेन हेतोः साध्यव्याप्यतया साध्याभावसिद्धिपर्यवसायिन्याः सपक्षव्यावृत्तेरतुल्यबलतया नास्य दोषतेति वाच्यं, तथा सति निर्विकल्पके साध्यनिश्चयेऽपि का क्षतिरिति तदनिश्चयोपवर्णनमसङ्गतं स्यात्। न च तन्निर्विकल्पकादि तन्निष्ठहेत्वादि वा तदा नोपस्थितमिति वाच्यं, सपक्षत्वेनेति व्यर्थतापत्तेः, निर्विकल्पकत्वादेरेव हेतुत्वाच्च।

किञ्चैवं निश्चयत्वादिकमपि हेतौ त्यज्यताम्। तदा संशयाद्यानुपस्थित्यैव व्यभि-

अत्रोच्यते—इच्छाप्रयत्नसामग्रीबलवत्त्वेन ज्ञानेच्छानुव्यवसायो दुर्घटः। न हीच्छाप्रयत्नयोः प्रतिबन्धकम् अनुव्यवसायथोश्चाप्रतिबन्धकं किञ्चित्तत्र पश्याम इति। यद्यपि प्रयत्नाग्रिमक्षणे विनश्यदविनश्यदवस्थयोरिच्छाप्रयत्नयोर्ग्रहेऽनुपपत्त्यभावः, तथापि विद्यमानस्यैव विशेष्यस्य जनकत्वमिति मतेनेदमुक्तम्। निर्विकल्पकादीति। तथा च तदनुपस्थितौ न तस्य साध्यवत्त्वनिश्चय इति भावः। तन्निष्ठेति। तथा च निर्विकल्पकाद्युपस्थितावपि साध्यसाधनहेत्वादेरज्ञानान्न साध्यवत्त्वनिश्चय इति भावः।

आद्यं दूषयति—सपक्षत्वेनेति। द्वितीयं दूषयति—निर्विकल्पकत्वादेरेवेति।

---

१. अतिरिक्तविषयतापत्ते इति राजपुस्तकपाठः।

विषयताको न, पृथिव्यवृत्तिपृथिवीत्वप्रकारकविषयताको न पृथिवीत्वासमानाधिकरणपृथिवीत्वप्रकारकविषयताको न, विषयताश्रयावृत्तिप्रकारताको न वेति साध्यम्[1]। पृथिवीत्वसमानाधिकरण[2]पृथिवीत्वप्रकारकविषयताकत्वादिकं अर्थात् सिद्ध्यति।

चाराज्ञानमित्यादेरपि सुवचत्वात्। तस्मात् संशयस्थले सत्प्रतिपक्षे व्यापकतापक्षे वा द्वयोस्तुल्यबलत्वेनासाधारणावतार इति वाच्यं. अन्यतरस्य व्याप्तिनिश्चये अन्यतरस्य दुर्बलत्वनियमेनासाधारणाप्रसङ्गात्। न चेह द्वयोस्तुल्यबलत्वम्।

यत्राप्रामाण्याभावस्तत्र दाहसमर्थविषयकवह्नित्वप्रकारकनिश्चयत्वाभाव इति सपक्षव्यावृत्तेः साध्याभावसिद्धिपर्यवसानाभावात्[3], व्यर्थविशेषणतया हेत्वभावस्य साध्यव्यापकत्वाग्रहात्, वह्नित्वप्रकारकनिश्चयत्वाभावमात्रस्यैव साध्यव्यापकत्वग्रहेण व्यर्थविशेषणत्वात्। न हि निर्विकल्पकं घटादिकं वा परित्यज्य तदा साध्यमुपस्थितं येन व्यभिचारवारकतया विशेषणमर्थवत् स्यात्। न च व्यापके न व्यर्थविशेषणता, बीजसाम्यात्। तस्मात् साध्याभावव्यापकत्वमेव हेत्वभावस्य गृहीतं न तु[4] साध्यव्यापकत्वमिति क संशयः सत्प्रतिपक्षता चेति। यत्रैवोभयोस्तुल्यबलता न त्वन्यतरत्र विनिगमना तत्रैवासाधारणो दोष इति युक्तमुत्पश्याम.।

पृथिवीत्वासमानाधिकरणेति। साध्ये यदि प्रकारपदं धर्ममात्रपरं निर्विकल्पके च

सिद्धान्तमाह—तस्मादिति। वह्नित्वप्रकारकेति सप्रकारकेत्यर्थः। साध्यस्येत्यनन्तरं व्यापकत्वमिति शेषः। युक्तमुत्पश्याम इति। यद्यपि विशिष्टाभावस्य व्यापकतया न वैयर्थ्यं तथापि व्यतिरेकसहचारात् अन्वयव्याप्तिरेव गृह्यत इति चेत् अन्वयव्याप्तिं गृहीत्वा सत्प्रतिपक्षसंशयाववतारणीयौ। तत्र च लाघवात् सप्रकारकनिश्चयत्वस्यैवाप्रामाण्यव्यापकत्वनिश्चयेऽनुक्तम्। मूले पृथिवीत्वाभाववतीत्यादिसाध्यक[5]षट्कं साधनञ्च पूर्ववद्व्याख्येयम्। मूले विषयताश्रयेति। स्वविषयताश्रयावृत्तिपृथिवीत्वप्रकारको नेत्यर्थः। मूले साध्यमित्यनन्तरं गन्धवद्विशेष्यकपृथिवीत्वप्रकारकनिश्चयत्वादिहेतुनेति शेषः। मूले अर्थात् सिद्ध्यतीति। पृथिवीतादात्म्यारोपे च न विशेषणभूताया पृथिव्या विषयतेति न भ्रमत्वेन सिद्धसाधनमित्युक्तप्रायम्।

---

१. साध्यम् इति नास्ति राजपुस्तके। २ पृथिवीवृत्ति इति पाठो राजपुस्तके।

३. पर्यवसायिन्या इति कपुस्तके।

४. न तु साध्यव्यापकत्वमिति' अस्य स्थाने 'न तु साध्यस्येति' इति पाठो दर्पणसम्मतः।

५. 'साधन' इति गपुस्तकपाठः।

अन्ये तु पृथिवीत्वासमानाधिकरणप्रकारावच्छिन्नविषयताकत्वाभावः साध्यः, गन्धासमानाधिकरणाप्रकारकगन्धसमानाधिकरणप्रकारकविषयताप्रतियोगिज्ञानत्वात् । तेन संशयव्यवच्छेदः निश्चयत्वं वा विवक्षितमित्याहुः ।

विषयता तदा तद्व्यभिचारवारणाय गन्धसमानाधिकरणेत्यादिकमर्थवत्, अन्यथा तावन्मात्रस्य पृथिवीत्वसंशयव्यभिचारितया गन्धासमानाधिकरणेत्यादेरावश्यकत्वेन तत एव व्यभिचारे निरस्ते गन्धसमानाधिकरणेत्यादिकमफलमापद्येतेत्यरुचेराह—निश्चयत्वं वेति । तेन गन्धसमानाधिकरणप्रकारकनिश्चयत्वं हेतुरिति वेत्यर्थः ।

न चात्रैकदेशिप्रयोगे[1] शीता पृथिवीत्यनुभवपक्षत्वे बाध इत्याह—

ये तु विशेषणविशेष्ययोरेका विषयता मत्वा पृथिवीत्वासमानाधिकरणधर्मानवच्छिन्नविषयताकत्वं साध्यं वर्णयन्ति न तत्र नञ्द्वयादिगर्भत्वगौरवमिति पूर्ववदेव सर्वं द्रष्टव्यम् । अपृथिवीवृत्तिपृथिवीत्वप्रकारकविषयताकत्वाभावादीनि चत्वार्यभावरूपाणि साध्यानि स्वयमुक्त्वा अन्येषा मतेनाभावसाध्यकमनुमानमाह मूले—अन्ये त्विति । तदेति । पृथिव्यवृत्तिधर्मो या विषयता प्रति अनतिप्रसक्तस्तद्विषयतावत्त्वस्य . लनिर्विकल्पके सत्त्वात् तद्वारणाय गन्धसमानाधिकरणेति विशेषणमित्यर्थः ।

अत्रास्वरसमाह—अन्यथेति । वैयर्थ्येन प्रकारपदस्य धर्मपरत्वाभावे निर्विकल्पके विषयताविरहे चेत्यर्थः । इदमुपलक्षणम् । सप्रकारकत्वमात्रेण निर्विकल्पकवारणे गन्धसमानाधिकरणपदवैयर्थ्यम् । जलविशेष्यके पृथिवीत्वप्रकारके प्रमुष्टतत्ताके स्मरणे व्यभिचारित्व वाऽरुचिबीजं द्रष्टव्यम् । गन्धसमानाधिकरणप्रकारकेति । गन्धव्याप्यप्रकारकविषयताप्रतियोगिनिश्चयत्वमित्यर्थः । जलगोचरपृथिवीत्वसंशयभ्रमयोर्वारणाय निश्चयपदं तस्य परस्परविरुद्धाप्रकारपरत्वात् । इह पृथिव्यां रूपमिति ज्ञानस्य वारणाय विषयताधावनम् । इदं जलं द्रव्यमिति प्रमाया वारणाय गन्धव्याप्येति । प्रमुष्टतत्ताकोक्तस्मरणस्य वारणाय साध्यस्थप्रकारपदं यथाश्रुतमेवेति भावः । बाध इति ।

ननु अवच्छेदकत्वमनतिप्रसक्तत्वम् । तथा च शीता पृथिवीत्यनुभवस्यापि विषयता पृथिवीवृत्तित्वेनैवावच्छिद्यते न तु शीतत्वेनेति साध्यसत्त्वान्न बाधः ।

अत्रोच्यते—बाधपदेन हेतुबाधोऽत्र विवक्षितः । गन्धासमानाधिकरणप्रकारकत्वाद्विरुद्धप्रकारकत्वाच्च । यद्वा निश्चयत्वगर्भहेतुपक्षे पृथिवीत्वासमानाधिकरणप्रकारोऽनतिप्रसक्तो यत्र तद्विषयतावत्त्वाभावः पृथिवीत्वासमानाधिकरणप्रकारकविषयताकत्वाभावश्च साध्यः सम्भवति । तत्र द्वितीयं साध्यमादाय बाध उक्तः । न चैवं प्रमुष्टतत्ताकस्मरणमादायार्थान्तरम् । अनुभवपक्षत्वेनैव तद्वारणादिति ।

---

1. एकदेशिमते इति कपुस्तके ।

शीता पृथिवीत्यनुभवः पृथिव्यंशे प्रमैव। भ्रमप्रमारूपे च समूहालम्बने न व्यभिचारः, अंशे तस्यापि प्रमात्वात्, विशेष्यभेदेन विषयताभेदाच्च[१]। न च प्रकारभेदेन विषयताभेदः, मानाभावात्।

शीतेति। पृथिवीत्वांशे तस्मिन्ननुभवे पक्षे तत्साध्यसाधनादित्यर्थः[१]।

न चेमाः पृथिव्य इति समूहालम्बने व्यभिचार इत्याह—भ्रमेति।

नन्विमाः पृथिव्य इत्यत्र पृथिवीत्वासमानाधिकरणधर्म्मावच्छिन्ना विषयता यदंशे तत्र हेत्वभाव इत्याह—विशेष्येति।

न च प्रकारभेदेन विषयताभेद इति सर्वपृथिव्यपृथिवीवृत्तिः पृथिवीत्वप्रकारिकैव विषयता। तथा च पृथिवीत्वासमानाधिकरणप्रकारावच्छिन्ना या विषयता तत्प्रतियोगित्वं पृथिव्यंशे ज्ञानस्यास्तीत्युक्तव्यभिचारस्तदवस्थ इत्यत आह—प्रकारभेदेनेति। तेन तथानभ्युपगमादित्यर्थः।

वस्तुतस्तु शीतेत्यारभ्य प्रथमानुमानेष्वेव योजनम्। तथा हि ननु पृथिव्यवृत्तिपृथिवीत्वप्रकारकविषयताकत्वाभाव. शीता पृथिवीति भ्रमे गतस्तत्कथं भ्रमव्यावृत्त साध्यमत आह—शीतेति। ननु जलपृथिव्योरिमे पृथिव्याविति समूहालम्बने गन्धवद्विशेष्यकपृथिवीत्वप्रकारकनिश्चयत्वादिति हेतुरस्ति। अपृथिवीवृत्तिपृथिवीत्वप्रकारकविषयताकत्वाभावरूपसाध्यं नास्तीति व्यभिचार इत्यत आह—भ्रमेति। पृथिव्यंशे साध्यहेत्वोः सत्वान्न व्यभिचार इति भावः।

ननु द्वयोर्विशेष्ययोरेकैव विषयता, तथा च पृथिव्यंशेऽपि साध्यं नास्तीत्यत आह—विशेष्येति। ननु पृथिवीत्वस्य प्रकारस्यैकत्वादेकैव विषयता प्रकारभेदेन विषयताभेदादित्यत आह—न च प्रकारेति।

केचित्तु पृथिवीत्वासमानाधिकरणप्रकारकत्वपृथिवीत्वासमानाधिकरणधर्मसमानाधिकरणत्वान्यतरवद्विषयताकत्वाभावः साध्यतयाऽभिप्रेतः तत्तांश[२]रहितायथार्थस्मरणे पृथिवी जलं वेति पृथिवीविशेष्यकसंशये एकैकगर्भसाध्यस्य गतत्वेन उभय[३]गर्भताया आवश्यकत्वात्। हेतौ च संशयवारणाय गन्धासमानाधिकरणप्रकारकत्वं, संशये च प्रकारभेदेन विषयताभेदो नास्ति। प्रत्येक स्मरण हि विषयताभेदे मान न च संशयस्थले तदस्तीति संशये साध्यहेत्वोः सत्त्व नाशङ्कनीयम् पृथिवीत्वासमानाधिकरणत्वञ्च साध्ये पृथिव्यवृत्तित्वम्। हेतौ च गन्धासमानाधिकरणत्वम् गन्धानधिकरणवृत्तित्वमभिमतम्। तथा च जलादिनिर्विकल्पके गगने गगनत्वमिति ज्ञाने प्रमुष्टतत्ताकायथार्थपृथिवीस्मरणे च व्यभिचारवारणाय गन्धसमानाधिकरणप्रकारकत्वम्। तत्र आद्ये सप्रकारकत्वेन द्वितीये साधिकरणसप्रकारकत्वेन तृतीये गन्धेत्यादिना व्यभिचारवारणमिति द्रष्टव्यम्। गन्धसमानाधिकरणप्रकारकत्व तादृशप्रकारसमानाधिकरणत्वम्, तेन व्यभिचारवारणं सम्भवति। यद्यपि गन्धसमानाधिकरणत्वमेव विषयताविशेषणमुचित न त्वधिक, तथाऽपि यथोक्तविशेषणविशेष्यभावे न वैयर्थ्यमिति। शीतेति। प्रकारभेदेन विषयताभेदादिति भावः।

ननु विशेष्ययोर्विषयतैक्ये पृथिव्यंशेऽपि न साध्यमस्तीत्यत आह—विशेष्येति।

ननु शीता पृथिवीति ज्ञानेऽपि सन्देह इवैकैव विषयता तत्कृत साध्यसत्त्वमित्यत आह—न च प्रकारेति। निश्चयरूपज्ञाने प्रकारभेदे सत्यपि विषयताभेदो नेति न चेत्यर्थः। मानाभावात्।

---

१ पृथिवीत्यनुभवपक्षे तत्साध्यसाधनादित्यर्थ इति कखपुस्तकयोः।

२. तत्तांशेति गपुस्तकपाठः। ३. उभयाभावेति कपुस्तकपाठः।

यत्त्वियं पृथिवीत्यनुभवः पृथिवीत्वसमानाधिकरणधर्मावच्छिन्नपृथिवीविशेष्यकविषयताकः पृथिवीत्वव्यधिकरणधर्मानवच्छिन्नपृथिवीविशेष्यकविषयताकः, पृथिव्यवृत्तिधर्मानवच्छिन्नपृथिवीवृत्तिविषयताको वा, गन्धासमानाधिकरणधर्माप्रकारकविषयताप्रतियोगिज्ञानत्वात् अगन्धवदवृत्तिपृथिवीत्वप्रकारकविषयताकत्वात्; गन्धसमानाधिकरणविषयताप्रतियोगिज्ञानत्वाद्वेति ।

तन्न । साध्याप्रसिद्धेः । किन्त्वर्थादेव तत् सिध्यति । एवं यत्प्रकारव्याप्यतया यद्गन्धस्नेहसमर्थप्रवृत्तिजनकत्वकरचरणादिकमवगतं तद्वति तत्प्रकारकज्ञानत्वमेव प्रामाण्ये लिङ्गम् । ननु वह्निज्ञानस्य दाहसमर्थविषयत्वं न दाह-

एवमिति । यत्प्रकारः पृथिवीत्वादिः ।

तद्वति व्याप्यवति, व्याप्यवद्विशेष्यकत्वे सतीति यावत् ।

तत्प्रकारकज्ञानत्वं व्यापकप्रकारकज्ञानत्वम् ।

प्रत्येकास्मरणरूपमानाभावादिति वदन्ति । तत्र गगनगन्धयोर्विरोधग्रहे गगनवान् गन्धवान् वेति घटविशेष्यकसंशये व्यभिचारात् ।

साधिकरणमात्रप्रकारकत्वमत्र केचिदाहुः—तदपि न । प्रमुष्टतत्ताकायथार्थपृथिवीस्मरणे व्यभिचारादिति गन्धाधिकरणावृत्त्यप्रकारकत्वरूपं प्रथमविशेषणमुक्तसंशयवारकम् । द्वितीयस्य गन्धसमानाधिकरणः सन् प्रकारो यस्या इत्यर्थः । तेन गन्धसमानाधिकरणात्मकसम्बन्धेन प्रकार इति लभ्यते । तथा च प्रमुष्टतत्ताकायथार्थपृथिवीस्मरणे तेन व्यभिचारवारणं, साध्यं चात्र पूर्वोक्तमन्यतरधर्मवद्विषयताकत्वाभावरूपमेव ।

यद्वा पृथिव्यवृत्तिप्रकारकविषयताकत्वाभावः साध्यः । गन्धानधिकरणवृत्त्यप्रकारकनिरधिकरणप्रकारकविषयताप्रतियोगित्वं हेतुः । तत्र इदं जलमितिधीवारणाय **गन्धानधिकरणे**त्यादि । गगने पट इतिधियश्च वारणाय निरधिकरणेत्यादिविशेषणे, ज्ञानत्वनिश्चयत्वविशेषणमहिम्नैवोक्तहेतुलाभान्न तद्वैयर्थ्यमिति **वयम्** ।

पृथिवीविशेष्यकेति मूलम् । विषयतायाः सविशेषकत्वमादाय, यद्वा पृथिवीनिष्ठेत्यर्थः । एवमग्रेऽपि । **पृथिवीत्वव्यधिकरणे**ति मूलम् । पृथिवीवृत्तिभिन्नमात्राप्रकारकेत्यर्थः ।

(तेन पृथिवीत्वव्यधिकरणघटत्वावच्छिन्नत्वाद्यो बाधः स नेति भावः[1]) **पृथिव्यवृत्तीति** मूलम्[2] । सकलपृथिवीनिष्ठात्यन्ताभावप्रतियोगिमात्रप्रकारकेत्यर्थः । **गन्धेति मूलम्** । अत्र निर्विकल्पके विषयताविरहात् न तत्र व्यभिचारः । ज्ञानपदस्यानुभवपरत्वात् जलविशेष्यकपृथिवीत्वप्रकारकप्रमुष्टतत्ताकस्मृतौ न व्यभिचारः, अवृत्तिमात्रप्रकारकपटज्ञाने व्यभिचारात् । **पृथिवीत्वप्रकारके**ति मूलम् । इदञ्च चरमहेतावपि देयम् (अन्यथा पूर्वोक्तपटज्ञाने व्यभिचारः स्यात्)[3] । पृथिवीविशेष्यके पृथिवी जलं वेत्यादिज्ञाने च चरमसाध्यद्वये चरमहेत्वोर्न व्यभिचारः साध्ययोर्मात्रगर्भत्वादिति । मूले विषयत्वं विशेष्यत्वम् । एवमग्रेऽपि । मूलम्—अनुव्यवसायगम्यमिति ।

---

१. कोष्ठगतो ग्रन्थो गपुस्तके नास्ति । २. पृथिवीवृत्तीति गपुस्तकपाठः ।

३. कोष्ठगतो ग्रन्थः ग.पुस्तके नास्ति ।

समर्थोऽयमिति व्यवसायगम्यं, ज्ञानविषयतयोस्तदविषयत्वात्। नापि तदनुव्यवसायगम्यं, पुरोवर्तिदाहसामर्थ्यस्य तदगोचरत्वात्। व्यवसायोपनीतदाहसामर्थ्यस्य च भाने तदसामर्थ्यात्। अन्यथा व्यवसायोपनीतस्य पुरोवर्त्तिनि वह्नित्वस्य अनुव्यवसायविषयत्वे स्वतः प्रामाण्यग्रहापत्तेः। एवं पृथिवीजलज्ञानयोर्गन्धस्नेहवद्विषयकत्वग्रहोऽप्यनुपपन्न इति। उच्यते। वह्नित्वप्रकारकानुव्यवसाये सति तत्र विषये दाहसमर्थस्य ज्ञानानन्तरं स्मृत्युपनीते वह्निव्यवसाये स्मृत्युपनीतदाहसामर्थ्य विषयकत्वम्। एवं जलपृथिवीज्ञानयोः स्मृत्युपनीतयोः ज्ञानोपनीतं स्नेहगन्धवद्विषयकत्वं मनसा परिच्छिद्यते। गन्धादिमत्येव

न च समर्थप्रवृत्तिजनकत्वसमभिव्याहारानुपपत्तिः। न हि गन्धस्नेहवत्तस्यापि प्रकारव्याप्यतया प्रामाण्यग्राहकत्वं ज्ञानवृत्तित्वेन तावत एव प्रामाण्यग्रहसमर्थत्वान्न तु विषयवृत्तित्वादिति वाच्यं, प्रामाण्यज्ञानप्रामाण्यं प्रति समर्थप्रवृत्तिजनकत्वस्यैव तद्व्याप्यत्वेन तद्वति प्रामाण्यज्ञानत्वस्य तत्प्रामाण्यव्याप्यत्वमित्यभिसन्धानात्।

ज्ञानानन्तरमिति। अनन्तरं तदनुव्यवसाये सतीति शेषः।

स्वातन्त्र्येणेति शेषः। एवमग्रेऽपि तदनुव्यवसाये सतीति। ननु दाहसमर्थस्य प्रथमेनैवोपनयेन किमनुव्यवसायेन। न च दाहसमर्थत्ववद्विशेष्यकत्वपर्यन्तोपनयनार्थमनुव्यवसायादरः। वह्निज्ञानानुव्यवसायेन पुरोवर्त्तिविशेष्यकत्वे गृहीते पुरोवर्त्तिनि दाहसमर्थत्वोपनयनमात्रेण विशेष्ये विशेषणमिति न्यायेन विशिष्टवैशिष्ट्यनिर्वाहात्। न च वह्निज्ञानानुव्यवसायेन वह्निविशेष्यकत्वं न गृहीतमिति वाच्यम्। दाहसमर्थज्ञानानुव्यवसायेनापि तथा सति दाहसमर्थविशेष्यकत्वस्याग्रहादिति।

अत्रोच्यते—ज्ञानोपनीतं गन्धस्नेहवद्विषयकत्वं मनसा परिच्छिद्यत इति मूलदर्शनाद्विशिष्टोपनयनसिद्ध्यर्थमेवमुक्तम्। वस्तुगत्या अनुव्यवसायं विनाऽपि अभिमतसिद्धिर्भवत्येव। न चानुव्यवसायेन विशेष्यत्वांशे सत्तानिश्चयरूपेणापि दाहसमर्थत्वांशे सत्तानिश्चयानात्मकेन कथं सत्तानिश्चयानात्मकोपनीतभानमिति वाच्यम्, विशेषणज्ञानमात्रस्यापेक्षितत्वात्। इद चानुव्यवसायस्य विशेष्यत्वग्राहित्वमभ्युपेत्योक्तम्। मतान्तरे तु जन्मान्तरीयसंस्काराद्विशेष्यत्वांशोपस्थितिरिति द्रष्टव्यम्।

वयं तु बहिरर्थेऽर्थे स्वरूपसम्बन्धाद्यात्मकस्य विशेष्यत्वस्य मनसा ग्रहाभावेऽपि अन्तरार्थे मनसा गृहीतं विशेष्यत्वमन्यत्राप्युपनीतं भासत इति न जन्मान्तरीयसंस्कारापेक्षेति। तज्ज्ञानेति मूलम्। तज्ज्ञानविषयकज्ञानव्यतिरेकाप्रयुक्तव्यतिरेकप्रतियोगिज्ञानप्रकारत्वमित्यर्थः। ग्राह्यत्वादिति पाठे कृदभिहितन्यायेन ग्रहणद गृह्यमाणपरम्। करचरणवद्विशेष्यकशरीरत्वप्रकारकज्ञान-

मम पृथिवीत्वाद्यनुभव इति तत्र गन्धादिमत्त्वपरिच्छेदानन्तरमनुभवात्। स्मृत्युपनीते धूमादौ व्याप्तिपरिच्छेदवत् चक्षुषा चन्दने सौरभज्ञानवच्च। तर्हि पृथिवीत्वज्ञाने गन्धवद्विशेष्यकत्ववत् चक्षुषा गन्धवति पृथिवीत्वोपनयानन्तरमियं पृथिवीति पृथिवीत्वप्रकारकानुभवे उपनीते पृथिवीत्ववति पृथिवीत्वप्रकारकत्वं, तथा तत्रैव ज्ञाने घटत्वप्रकारकताविरहवत् पृथिव्यवृत्तिप्रकाराभाववत्त्वं विशेष्यावृत्तिप्रकाराभाववत्त्वं वा प्रामाण्यं मनसैव परिच्छिद्यतामिति स्वत एव प्रामाण्यग्रह इति चेत्, न। ज्ञानान्तरोपस्थापितज्ञानवृत्तिप्रामाण्यग्रहे परतस्त्वानपायात्। यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वं यावत्स्वाश्रयग्राहकग्राह्यत्वं, तज्ज्ञानविषयकजन्यज्ञानाजन्यजन्यज्ञानग्राह्यत्वं वा स्वतस्त्वं, तदन्यथा ग्राह्यत्वं तु परतस्त्वं, मनसा चैवं प्रामाण्यग्रहस्याभ्युपगमे तज्ज्ञानविषयकजन्यज्ञानजन्यज्ञानग्राह्यत्वेन्न परतस्त्वहानिः। व्यतिरेक्यनन्तरं तज्जातीयत्वेनान्वयिना प्रामाण्यानुमानम्। यथेदं शरीरज्ञानं प्रमा करचरणवति शरीरज्ञानत्वात् स्वशरीरज्ञानवत्। न च करचरणान्तरवति करचरणान्तरवत्त्वज्ञाने व्यभिचारः, शरीरांशे तस्य प्रमात्वात्। एतेन करचरणवति शरीरज्ञानत्वादित्यत्र करचरणवत्त्वं नोपलक्षणं व्यावृत्त्योपलक्ष्याभावात्। न च विषयतया ज्ञानविशेषणं, करचरणवत्त्वप्रकारकशरीरज्ञानत्वस्य व्यभिचारात्, शरीरमिति ज्ञाने तदसिद्धेश्च। विषयविशेषणत्वे करचरणवद्विषयकशरीरज्ञानत्वस्य व्यभिचारात्, शरीरज्ञानस्यापि वस्तुतः करादिमद्विषयकत्वात्। नापि करचरणादिशून्ये

शरीरज्ञानम्। प्रमा शरीरत्ववति शरीरत्वप्रकारकमित्यर्थः।

न चेति। न च शरीरत्ववतीत्यत्र सप्तम्यर्थस्य विषयतया भ्रमे साध्यसत्वात् न व्यभिचार इति वाच्यं, तद्विशेष्यकत्वस्य तदर्थत्वादिति भावः।

त्वादित्यस्य हेतोः शरीरान्तराभेदभ्रमे व्यभिचारो मूले शङ्कितः, तत्र विशेष्यांशे व्यभिचारो नास्त्येव। विशेषणांशेऽपि च न सम्भवतीत्यनुक्तिसम्भवत्वं शङ्काया निराकरोति—**न च शरीरत्ववतीति**। वस्तुतः करचरणवत्त्वेन तत्तादात्म्यारोपे शङ्कायां दोषाभावात्। न च विषयतयेति मूलोपरि इदम्। **न चेति**, शरीरांश इति फक्किकयोर्व्यत्ययश्च लेखकप्रमादकृतः। **ऋजुरेव** अभावद्वयाघटितः करचरणवद्विशेष्यकशरीरज्ञानत्वरूपः।

यच्छरीरत्वेन ज्ञानं तदन्यत्वे सतीति विवक्षितम्। शून्य इत्यत्र विषयत्वं सप्तम्यर्थ इति करचरणशून्यविषयकशरीरज्ञानान्यशरीरज्ञानत्वादित्यर्थः, तथा चासिद्धिः, शरीरज्ञानस्य तच्छून्यशरीरत्वादिविषयकत्वनियमात्। न वा करचरणशून्ये यच्छरीरत्वेन ज्ञानं न भवतीति विवक्षितं, तृतीयार्थविषयत्वे उक्तदोषादन्यस्यासम्भवादिति निरस्तम्, करचरणवद्विशेष्यकशरीरत्वप्रकारकज्ञानत्वस्य हेतुत्वात्, शरीरभ्रमे च करचरणवतः शरीरस्य विशेषणत्वात्। विषयतापदे करचरणादिशून्यनिष्ठशरीरत्वप्रकारकविषयताप्रतियोगित्वशून्यत्वे सति शरीरज्ञानत्वादिति हेतुः।

ननु न गृहीतप्रामाण्यं ज्ञानं परप्रामाण्यनिश्चयरूपं, अनवस्थानात्। नापि ज्ञायमानप्रामाण्यं, स्वतः प्रामाण्यग्रहापत्तेः। अतोऽगृहीतप्रामाण्यमेव ज्ञानं परप्रामाण्यनिश्चयरूपमास्थेयम्। तथा च व्यवसायोऽप्यगृहीतप्रामाण्य एव स्वविषयं निश्चाययतु; किं विषयनिश्चयार्थं तत्प्रामाण्यनिश्चयेन। अथ व्यवसायस्याप्रामाण्यदर्शनान्न तन्मात्रादर्थनिश्चयः, तर्हि प्रामाण्यानुमितेरप्यप्रामाण्यदर्शनान्न ततोऽपि प्रामाण्यनिश्चय इति चेत्। न ब्रूमः ज्ञानप्रामाण्यनिश्चयादेवार्थनिश्चय इति, किं तु यत्राप्रामाण्यशंका नास्ति करतलामलकादिज्ञाने, तत्र व्यवसाय एवार्थनिश्चय इति तत एव प्रवृत्तिर्निष्कम्पा, यत्रानभ्यासदशायामप्रामाण्यसंशयेनार्थनिश्चयं परिभूयार्थसंशयः तत्र प्रामाण्यनिश्चयाधीनज्ञानादर्थं निश्चित्य निष्कम्पं प्रवर्तते नान्यथेति सर्वानुभवसिद्धम्। अत एव गृहीतप्रामाण्यमेव ज्ञानं परप्रामाण्यं निश्चाययति अप्रामाण्यशङ्काकलङ्काभावात्।

शरीरांश इति। शरीरत्ववतीत्यादिसाध्यसत्त्वादित्यर्थः।

विषयत्वमिति। विशेष्यत्वपर्यन्तानुसरणे तु ऋजुरेव हेतुः सम्यक् किमनेनेति भावः।

अत्र च शरीरज्ञानत्वादित्यत्र तत्प्रकारकत्वमात्रं विवक्षितम्। विवक्षितसाध्ये ज्ञानगर्भे हेतौ वैयर्थ्यात्। न च प्रमापदस्यानुभवगर्भवचनतया नैवमिति वाच्यं, तथा सति स्मृतौ व्यभिचारापत्तेः, साध्ये तावद्गर्भतायां प्रयोजनाभावाच्चेति।

ननु हेतौ ज्ञानपदस्यानुभवपरत्वान्न स्मृतौ व्यभिचार इत्यरुचेराह—साध्य इति।

यत्र तु प्रामाण्यज्ञाने अप्रामाण्यशङ्कया प्रामाण्यसंशयः तत्र प्रामाण्यज्ञाने प्रामाण्यनिश्चयादेव प्रामाण्यनिश्चयः। एवं यावदप्रामाण्यशङ्कं तज्ज्ञानप्रामाण्यनिश्चयादेव तन्निश्चयः। न चैवमनवस्था, चरमज्ञानप्रामाण्यस्य ज्ञानाभावेन कोटिस्मरणाभावेन विषयान्तरसञ्चारेण वा प्रामाण्यसंशयानवश्यम्भावात्। अन्यथा भट्टमते प्रामाण्यस्य ज्ञानानुमितिग्राह्यत्वेनानवस्था स्यात्। गुरुमते च प्रामाण्यस्य स्वग्राह्यत्वं न स्वग्राह्यं, स्वरूपप्रामाण्याभ्यां बहिर्भूतत्वात्। किन्तु परग्राह्यत्वे अनवस्थानात् परिशेषानुमानेन प्रमाणान्तरेण वा ग्राह्यं, तथा च तत्प्रामाण्यस्यापि स्वग्राह्यत्वमन्येनैवेत्यनवस्थैव।

प्रामाण्यग्रहस्य प्रवृत्त्यनौपयिकस्यावश्यकत्वमिति यदि तथा सत्याह—गुरुमत इति।

अनुभवमिति। ननु किं प्रामाण्यग्रहेण करादिमत्त्वे पुरुषस्य[1] गृहीते तत एव विशेषदर्शनात् संशयाभावः, तदग्रहे तु लिङ्गाभावादेव न प्रामाण्यग्रहः। न च पुरुषत्वव्याप्यत्वेनागृहीते करादौ करादिमति पुरुषत्वज्ञानत्वस्य प्रामाण्यव्याप्यत्वे गृहीते चोभयोरुपपत्तिः। व्याप्यवति व्यापकप्रकारकज्ञानत्वमगृहीत्वा प्रामाण्यव्याप्तेरेव विपक्षबाधकाभावेनाग्रहात्। किं च समानप्रकारकसमानविशेष्यकसंशयस्यैव निर्णयनिवर्त्यतया कुतः प्रामाण्यनिर्णयस्य विषयसंशयापनोदकता, भवतु वा तद्विषयतामात्रेण निवर्त्तकता, तर्हि किमपराद्धं व्यवसायेन, विशेषादर्शनमूलकत्वात्? न स तथेति यदि तदा प्रामाण्यनिश्चयोत्तरार्थनिश्चयोऽपि विशेषादर्शनमूलकः कथं तदपनोदकः? कथं वा प्राथमिक इव द्वितीयेऽपि न प्रामाण्यसंशयाभिभवः? यदपि नानुमितौ प्रामाण्यसंशयो धूमवति वह्निज्ञानत्वादीनां प्रामाण्यव्याप्यादीनां ग्रहे विशेषदर्शनात्, तदपि यत्रानुमितावप्रामाण्यसंशयस्तत्र तत्प्रामाण्यानुसरणमिति स्ववचनविरुद्धम्। लिंगोपधानानुपधानरूपमतभेदेन तदविरोधोपपादनेऽपि धूमवति वह्निज्ञानत्वमिति हेतावपि विषयत्वस्य व्यभिचारितया विशेष्यकत्वस्यानुव्यवसायाग्राह्यत्वेऽसिद्धिः। तद्ग्राह्यत्वे वा किमपराद्धमनुव्यवसायेन प्रामाण्यग्रह इत्यादि सर्वमसमञ्जसमिति[2] चेत्-

अनवस्थैवेति मूलम्। अनुव्यवसायस्य प्रामाण्यमनुव्यवसायान्तरग्राह्यमिति मिश्रमतेऽप्यनवस्था द्रष्टव्या। विशेषादर्शनमूलकत्वात् विशेषदर्शनाजन्यत्वात्। एवमग्रेऽपि। अनुव्यवसायाग्राह्यत्वेति। ग्राह्यत्वे धूमवत्त्वांशे सत्तानिश्चयाभावादिति भावः।

---

१. विषयस्येति क्वचित् पाठः। २ सर्वं असमञ्जसमिति कपाठः।

यत्तु व्यवसायस्य प्रामाण्यनिश्चयादेव प्रवृत्तेर्न तस्यापि प्रामाण्यानुसरणमिति नानवस्थेति। न च प्रामाण्यसंशयादौचित्यावर्जितो विषयसंशय इति वाच्यम्, निश्चिते संशयाभावात्। अन्यथा स्वतोग्रहेऽपि तत्संशयेऽनवस्थेति।

तदसत्। यदि प्रामाण्यसंशयान्न विषये संशयो निश्चितत्वात् तदा विषयनिश्चयार्थं प्रामाण्यनिश्चयो व्यर्थः, प्राथमिकविषयनिश्चयादेव निष्कम्पप्रवृत्त्युपपत्तेः। न हि विषयसंशयमनादृत्य प्रामाण्यनिश्चयः प्रवृत्तिहेतुरित्युक्तम्। अन्यसंशयादन्यत्र निश्चिते कथं संशय इति चेत्—अनुभवं पृच्छ। येन स्वसाक्षिकमेव प्रामाण्याप्रामाण्यसंशयस्य विषयसंशयहेतुत्वमनुमतम्। ज्ञानविषयत्वमपि प्रामाण्यसंशयमासाद्य विषयसंशायकम्।

ननु लिङ्गपक्षव्याप्त्यादीनां ज्ञानस्य प्रामाण्यावधारणेऽनवस्था, अनवधारणे हेत्वसिद्धिः। अथ लिङ्गादिज्ञानं स्वविषयावधारणे कर्त्तव्ये स्वप्रामाण्यज्ञानं नापेक्षते अनुमानमात्रोच्छेदप्रसङ्गात्। लिङ्गादिनिश्चयस्य च स्वकारणाधीनस्य सर्वसिद्धत्वादिति चेत्–न। प्रामाण्यसंशयेन लिङ्गसन्देहात्। न हि न लिङ्गज्ञाने प्रामाण्यसंशयः, अविरोधादिति। उच्यते। अप्रामाण्यशङ्काकलङ्काभावे लिङ्गादिज्ञानस्यैवार्थनिश्चायकत्वात्, तत्कलङ्के तूक्तैव गतिः।

अत्र ब्रूमः—'अनुभवं पृच्छे'त्यनेन सति प्रामाण्यसंशये विषयसंशय आवश्यक इत्युक्तम्। तथा च विषये करादिमत्त्वज्ञानेऽपि करादिमद्विशेष्यकत्वं ज्ञाने न गृहीतमित्यवश्यं प्रामाण्यसंशयेन भाव्यमित्यौचित्यावर्जितो विषयसंशयः। समानप्रकारकनिश्चय एव संशयविरोधीति तद्विशेषदर्शनेऽपि प्रामाण्यसंशयः। तस्मिन् सति विशेषदर्शनेऽपि विषयसंशयः। प्रामाण्ये तु निश्चिते हेत्वभावादेव न विषयसंशय इति किमनुपपन्नम्? किं च तदेव हि विशेषदर्शनं संशयापनोदकं यदभावस्तद्धेतुः। न च करादिमत्त्वादर्शनात् संशयो येन तद्ग्रहस्तद्विरोधी स्यादपि तु प्रामाण्यादर्शनादिति युक्तम्। सति प्रामाण्यादर्शने करादिमत्त्वदर्शनेऽपि संशयतादवस्थ्यम्।

करादिमद्विशेष्यकत्वमिति। विशेष्यत्वांशस्याग्रहात्तद्ग्रहेऽपि वा तद्वत्त्वांशे सत्तानिश्चयाभावादिति भावः। इदं चोपलक्षणम्। करादेः पुरुषत्वव्याप्यत्वाग्रहेऽपि विपक्षबाधकान्तरेणाप्तवाक्येन वा करादिमद्विशेष्यकपुरुषत्वज्ञानत्वस्य प्रामाण्यव्याप्यत्वग्रहसम्भवात् पूर्वपक्षाशङ्कितमपि क्वचित्सम्भवतीति ध्येयम्।

यदप्युक्तं—द्वितीयोऽपि विशेषादर्शनमूलक एव—तदसत्। तथा सति हि संशयोत्तरप्रत्यक्षेऽपि विशेषदर्शनं हेतुरित्यपि भज्येत। तथा च प्रामाण्याश्रयविषयत्वमेव विशेषस्तद्दर्शनमेव तत्र हेतुरिति न प्रथमाविशेषो द्वितीयस्य। न च करादिविशेषदर्शने सति प्रामाण्यसंशयाद्विषयसंशय इति त्वयैव निरटङ्कि, तथा च प्रामाण्यानुमित्यनन्तरार्थनिश्चये प्रामाण्यसंशयस्यापि बाधकाभावेन तदाहितविषयसंशयो दुर्वार इति वाच्यं, तस्य ज्ञानाज्ञानाभ्यां विशेषदर्शनधर्म्यज्ञानयोरावश्यकत्वेन प्रामाण्यसंशयानवकाशात् तदनुव्यवसायेन प्राग् गृहीतप्रामाण्यस्योपनीतस्य भाननियमात्। न हि तत्र किमपि बाधकं पश्यामः। तदुक्तं— त्रिसूत्रीप्रकाशे 'प्रामाण्यानुमितावुपनीतप्रामाण्यभानात् स्वतस्त्वं, सति विशेषणज्ञाने विशिष्टबुद्धेरौत्सर्गिकत्वादि'ति। अत एव प्रामाण्यानुमानमप्यर्थवत्, तस्मिन् सति ज्ञानान्तरे तदुपनीतप्रामाण्यभानादप्रामाण्यसंशयाभावे तदाहितार्थसंशयानुत्पत्तावप्रामाण्यशंकाशून्यमर्थज्ञानान्तरं निर्वहति। अन्यथाऽन्यस्य प्रामाण्यग्रहेऽन्यस्य तत्संशये बाधकाभावादिति किं केन सङ्गतं स्यात्। न च यदवच्छेदेन यत्र यद्विशेषवत्त्वं गृहीतं तद्ग्रहस्यापि संशयविरोधित्वेन तद्विषयकत्वावच्छेदेन प्रामाण्यग्रहात् तद्विषयकज्ञानादेव न प्रामाण्यसंशय इति वाच्यम्, तावताऽपि नः समीहितसिद्धेः।

वस्तुतस्तु तद्ग्रहस्यैव तदुपनीतभानसामग्रीत्वेनैव तावता तदुपनयध्रौव्यमेव। यदप्यनुमितिप्रामाण्यं प्रति पूर्वापरविरोधादि, तदप्यनवबोधनिबन्धनम्। तथाहि— लिङ्गज्ञानादीनामप्रामाण्यशंकाविरहे तज्जन्यानुमितावुत्तरकालं प्रामाण्यसंशये बाधकाभावः। यत्र तु लिङ्गज्ञानस्यैवाप्रामाण्यशंकाकलङ्केनानुमित्यनुत्पादस्तत्र तत्प्रामाण्यानु-

संशयोत्तरप्रत्यक्षेऽपीति। द्वितीयोऽर्थनिश्चयो यः स संशयोत्तरप्रत्यक्षं भवति इति निश्चयो यदि न विशेषदर्शनजस्तदा संशयोत्तरप्रत्यक्षे तद्धेतुरिति सिद्धान्तो भज्येते इत्ययमेव विशेषो द्वितीयस्येत्यर्थः।

तस्येति। द्वितीयनिश्चयस्य ज्ञाने विशेषदर्शनस्य तस्याज्ञाने च धर्म्यज्ञानावश्यकत्वेन संशयो न भवतीत्यर्थः

प्रागिति। द्वितीयनिश्चयानुव्यवसायेन द्वितीयनिश्चये पूर्वव्यवसायगृहीतस्य प्रामाण्यस्योपनीतस्य ग्रहादित्यर्थः। उपनीतप्रामाण्यभानात्स्वतस्त्वं अग्रिमार्थनिश्चयप्रमात्वस्येति शेषः। अत एवेति। द्वितीयनिश्चये उपनीत प्रामाण्यं मानसे भासतेऽप्येतत्प्रामाण्यानुमानमर्थवदित्यर्थः। न चेति। ज्ञानत्वावच्छेदेन घटत्ववद्विशेष्यकत्वं गृहीतमिति ज्ञानत्वग्रहस्यापि संशयविरोधित्वान्न प्रामाण्यसंशय इत्यर्थः।

यत्तु व्यवसाये क्वचिदप्रामाण्यशङ्का भवति क्वचिन्नेति त्वयापि वक्तव्यम्। एवं बहुवित्तव्ययायाससाध्ये स्वर्गसाधनं याग इति ज्ञानं न गृहीतप्रामाण्यं प्रवर्त्तकं प्रामाण्यानुमितेः पूर्वमेव तस्य विनाशात्, किन्तु तज्ज्ञानसमानविषयकमप्रामाण्यशङ्काशून्यं ज्ञानान्तरमेव।

नन्वेवं बहुवित्तव्ययायाससाध्ये निष्कम्पप्रवृत्तावनुपयोगित्वात् निष्फलं प्रामाण्यज्ञानमिति किं तदुपायानुसरणेनेति चेत्—न। स्वर्गसाधनं याग इति ज्ञानप्रामाण्ये निश्चिते तत्समानविषयकज्ञानान्तरे अप्रामाण्यशङ्का न भवतीति ज्ञानान्तरमगृहीतप्रामाण्यमपि स्वार्थनिश्चयरूप निष्कम्पप्रवृत्तिं जनयतीत्यप्रामाण्यशङ्काप्रतिबन्धद्वारा निष्कम्पप्रवृत्तावुपयुज्यते प्रामाण्यज्ञानमिति न निष्फलम्।

यत्त्वनुमानस्य निरस्तसमस्तविभ्रमाशङ्कस्य स्वत एव प्रामाण्यग्रह इत्युक्तं तद्धूमवति वह्निज्ञानत्वमनुमितेः प्रामाण्यनियतमनुव्यवसायेनोपनीतम्। अतो विशेषदर्शनान्न तत्राप्रामाण्यशङ्केति, प्रामाण्यनिश्चयादेवाप्रामाण्यशङ्काविरहात् अर्थं निश्चित्य निष्कम्पव्यवहार इत्यभिप्रायः।

मित्या लिङ्गनिश्चये सत्यनुमितिरिति। तदनुमितौ धूमवद्विशेष्यकत्वमुपनीतं भातुमर्हतीत्युत्पादद्वैविध्यमेवानुमितेरपीति तत्र प्रामाण्यज्ञाने विधाद्वयमिति सर्वं समञ्जसमिति संक्षेपः।

इति महामहोपाध्याय जयदेवमिश्रविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे
ज्ञप्तिवादालोक समाप्तः।

धूमवद्विशेष्यकत्वमिति। न च धूमवद्विशेष्यकत्वस्यानुव्यवसायेन ग्रहेऽपि प्रामाण्यव्याप्यत्वेनाग्रहात् कथं प्रामाण्यशङ्कानिवृत्तिरिति वाच्यम्, धूमवद्विशेष्यकत्वावच्छेदेन वह्निज्ञानस्य प्रामाण्यग्रहाद्व्यावर्तकधर्मग्रहस्यापि संशयविरोधित्वात्। प्रामाण्यव्याप्यत्वमपि यत्र दैववशोपनीतमनुव्यवसाये भातं तदभिप्रायकोऽयं ग्रन्थ इत्याहुः।

प्रामाण्यज्ञाने अप्रामाण्यशङ्कानिरासे।

यत्तु व्यवसाय इति मूलम्। व्यवसाये क्वचिदप्रामाण्यशङ्का क्वचिन्नेति तत्त्वयाऽपि वाच्यमिति योजना।

वस्तुतस्तु परतः पक्षे न क्वचिदपि प्रामाण्यग्रहः प्रवर्त्तक इति। एवमनुव्यवसायस्य प्रामाण्यनियतत्वान्न प्रामाण्यशङ्का। न ह्यजानन् जानामीति प्रत्येति। न वा घटज्ञाने पटं जानामीति। भ्रमेप्यनुव्यवसायेन रजतत्वादिकं व्यवसायप्रकारत्वेनोल्लिख्यते तच्च तथैव।

यत्त्वभ्यासदशायां झटिति प्रचुरतरनिष्कम्पप्रवृत्तिदर्शनात् प्रामाण्यं स्वत एव गृह्यते अन्यत्र तु परत इति तत्—न। विशेष्यनिष्ठात्यन्ताभावप्रतियोगिप्रकारानवच्छिन्नत्वादिकं प्रामाण्यं स्वतो ग्रहीतुमशक्यमिति परत एव गृह्यते। झटितिप्रवृत्तिस्तु करचरणादिमति शरीरज्ञानत्वादेर्विशेषस्यानुव्यवसायेन ग्रहादप्राण्यशङ्काशून्याद् व्यवसायादेव, न प्रामाण्यज्ञानं प्रवर्त्तकमित्युक्तम्। झटिति तत्समवधानन्तु स्वकारणाधीनम्। न हि पिपासूनां झटिति प्रचुरतरा समर्था च प्रवृत्तिरम्भसीति पिपासोपशमनशक्तिरस्य प्रत्यक्षेति।

इति महामहोपाध्यायगङ्गेशविरचितायां तत्त्वचिन्तामणौ
प्रत्यक्षखण्डे प्रामाण्यवादे ज्ञप्तिवादः समाप्तः।

एवमनुव्यवसायस्येति मूलम्। अनुव्यवसायत्वस्येत्यर्थः। तज्ज्ञानञ्च व्यावर्त्तकज्ञानत्वेन शङ्काविरोधीति भावः।

विशेष्यनिष्ठेति मूलम्। तद्वति तत्प्रकारकत्वादिकमादिपदार्थः।

इति महामहोपाध्याय सट्ठकुरमहेशविरचिते चिन्तामण्यालोकदर्पणे
प्रत्यक्षखण्डदर्पणे ज्ञप्तिवाददर्पणः समाप्तः।

अथ प्रामाण्यवादे उत्पत्तिवादः

उत्पद्यतेऽपि प्रमा[1] परतो न तु स्वतो ज्ञानसामग्रीमात्रात्। तज्जन्यत्वेनाप्रमापि प्रमा स्यात्। अन्यथा ज्ञानमपि सा न स्यात्। ज्ञानसामग्र्यां दोषा-

अथ प्रामाण्यवादे उत्पत्तिवादः

प्रसङ्गादुत्पत्तिमपि निरूपयति। उत्पद्यतेऽपीति। क्वचिदुत्पादकस्यैव ग्राहकत्वमतस्तद्व्युत्पादयतीत्यन्ये।

ननु गुणदोषाभावेन प्रमाऽप्रमाभावे तयोस्ते प्रति हेतुता, न च तथेत्याह—अथेति।

विशेषसामान्ययोर्हेतुभेदोऽस्तु अवच्छेदकभेदान्न तु सामग्रीभेदः। फलाव्यभिचारिसमुदायस्य स्वरूपतोऽवच्छेदकतो वाऽभेदादित्यस्वरसादाह—तामिति। तथा च गुणाद्यभावस्य सामग्र्यभावसम्पादनद्वारा फलाभावप्रयोजकत्वमस्त्येवेति भावः।

अथ प्रामाण्यवादे उत्पत्तिवादः

क्वचिदुत्पादकस्यैवेति। यथार्थवाक्यार्थज्ञानादेः शाब्दप्रमाहेतोरेतच्छब्दजं ज्ञानं प्रमा यथार्थवाक्यार्थज्ञानजशब्दजत्वादित्येवं लिङ्गेत्यापकतया ग्राहकत्वम्। अत उपोद्घातसङ्गत्या एतन्निरूप्यत इति भावः। अन्ये त्वित्यपरितोषबीज तु उत्पत्तौ परतस्त्वाभावेऽपि प्रकृतवाक्यार्थज्ञानं प्रमा। आप्तोक्तजत्वरूपपरतस्त्वसिद्धेरलम् उत्पत्तिपरतस्त्वचिन्तयेति[2]।

उत्पादकस्य यथार्थविशेषदर्शनादेः सार्वत्रिकत्वाभावादरुचिं प्रकाशयति—अन्ये त्विति। मूले स्वत इत्यस्य विवरणं ज्ञानसामग्रीमात्रादिति।

ननु प्रमाऽप्रमयोर्वैचित्र्याद्गुणदोषजन्यत्वे उक्ते अथेत्यादिना अन्वयव्यतिरेकान्यथासिद्धिप्रतिपादनमसङ्गतमित्यत आह—नन्विति। अनन्यथासिद्धावन्वयव्यतिरेकौ व्यतिरेकिवस्तुकारणताग्राहकौ[3] न च प्रकृते तथेत्यर्थः। तटस्थशङ्केयमिति केचित्।

नन्वेवं सामग्रीव्यतिरेकात् प्रमाप्रमयोरभावौ न गुणादिव्यतिरेकादित्याशङ्क्याह—तथा चेति। अन्यथेति मूलम्। सर्वत्रापि सामान्यसामग्रीव्यतिरेकेणैव कार्यव्यतिरेकोपपत्तेरिति भावः। प्रमात्वं यमजगतवैधर्म्यवत्स्यादि[4]त्युक्तेः।

---

१ प्रामाण्यमिति पाठान्तरम्। २. उपरितनो ग्रन्थो गपुस्तके नास्ति।

३ व्यापकाविति गपुस्तके। ४ वैधर्म्यवत्स्यादिति गपुस्तके। यत्तुव्यवसाय इति मूलम्।

नुप्रवेशादप्रमेति चेत्, तर्हि ज्ञानविशेषवदप्रमा प्रमाविशेषः स्यात् ज्ञानसामग्रीजन्यत्वात्। तस्मात् प्रमाप्रमयोर्वैचित्र्यात् गुणदोषजन्यत्वम्। अथ यः गुणदोषौ विना तयोरभावस्तत्र ज्ञानसामग्र्येव नास्ति तत्सत्त्वे ज्ञानमात्रोत्पत्तिप्रसङ्गादिति चेत्—न। विशेषविनाकृतसामान्यकार्याभावात्। तत्सामग्रीमादायैव हि सामान्यसामग्री तां विना नास्त्येव वा, अन्यथा कार्यविशेषे कारणविशेषोच्छेदः।

ननु यथैकजातीयसामग्रीसत्त्वेऽपि घटयोर्भेदो यमजयोर्वैधर्म्यञ्च तथ प्रमाप्रमयोर्भेदो वैधर्म्यञ्च[1] भविष्यति। अथानुगतव्यवहारात् प्रमात्वमनुगतमिति प्रमामात्रे अनुगतो हेतुर्वाच्यः, अनुगतकार्यस्याननुगतादनुत्पत्तेरिति चेत्—न। प्रमात्वस्योपाधित्वेन कार्यतावच्छेदकत्वे मानाभावात्, कार्य

भेदो व्यक्तिभेदः।

वैधर्म्यं वैजात्यम्।

ननु सामग्रीव्यक्तिभेदात् कार्यव्यक्तिभेदः, कार्यव्यक्तिभेदे तद्वैधर्म्ये तद्वैधर्म्यप्रयोजकमस्तु। यमजयोरप्यदृष्टविशेषघटितसामग्रीवैधर्म्यमेवेत्याशयेनाशङ्कते—अथेति

अथानुगतेत्यादिशङ्कानुत्थानमाशङ्क्याह—ननु सामग्रीति। उपाधित्वेनेति मूलम्। जातित्वे कार्यमात्रवृत्तिजातित्वं प्रमाणं स्यादिति भावः।

[[2]इष्टत्वादिति। त्वन्मते जन्यप्रमेयत्वस्यैवेत्यर्थः। ननु नेदं विशेषण ग्रन्थकृतोऽभिमतः तत्राश्रुतेरत आह—नहीति। तथा च ग्रन्थस्यैवंरूपबाधकमात्रनिरासप्रवृत्तत्वान्न तत्र तथाश्रुतिः। मया तु 'तुष्यत्वि'तिन्यायेन व्याप्यधर्मोपदर्शनेऽपि न क्षतिरेवविशेषणेन तन्निर्वाहादिति उच्यत इति तदेव दृष्टान्तेन दुष्यति—कार्यमात्रेति। बाधकं विना कार्यमात्रवृत्तित्वादित्यग्रे करिष्यमाणहेताविवेत्यर्थः।

नन्वेवं बाधकाभावमात्रमेव हेतुरस्तु कृत विशेष्यभागेनात आह - तदर्थस्त्विति बाधकाभावरूपविशेषणार्थः। तथा च तत्रैवात्रापि न बाधकसामान्याभावो विशेषणमपि तु विशेष्याभाव इति न वैयर्थ्यमित्यर्थः। इयत्परमत्रावधेयम् यत्तत्पदान्तर्भाव एव सर्वस्येति विशेषणमन्यथ प्रमेयत्वादेरप्यदृष्टजन्यतावच्छेदकतया साध्यत्वेनातिप्रसङ्गाभावादिति। एवञ्च यद्धर्मेत्यत्र धर्मं लघुत्वमपि विशेषणमतो न घटत्वादिसमनियतकम्बुग्रीवादिसत्त्वादावतिप्रसङ्ग इति न चैवं ईश्वर

मात्रवृत्तिधर्मत्वस्य नीलघटत्वघटज्ञानत्वादौ व्यभिचारात्। अथ प्रमा ज्ञानहेत्वतिरिक्तहेतुजन्या जन्यज्ञानत्वात् अप्रमावदिति चेत्—न। प्रमाया ज्ञानस्य तद्धेतुजन्यतया साध्ये[1] बाधात्, ज्ञानाजनकजन्यत्वे विरोधात्, अप्रमायां

ननु ज्ञानहेत्वजन्यत्वं न साध्यं येन बाधस्तथा सति ईश्वरज्ञानेऽपि साध्यसत्त्वेन व्यभिचाराभावात् तद्वारणाय हेतौ जन्यपदोपादानानुपपत्तेः। अपि तु ज्ञानाजनकजन्यत्वमित्यत आह—ज्ञानेति।

विरोधात् साध्यसिद्धिविरोधादप्रसिद्धेरिति भावः। अत एव नात्र बाधो न वा आद्ये विरोध इति ध्येयम्।

अत एव कुतो विरोध इत्यपेक्षायामाह—अप्रमायामिति।

ज्ञानजन्यतावच्छेदक जन्यत्वन्न स्यात्तदपेक्षया लघोः सत्त्वस्यैवावच्छेदकत्वसम्भवादिति वाच्यम्। एतन्मते इष्टापत्तेरिति। न व्यभिचारो न वा व्यर्थविशेषणत्वमिति। ईश्वरज्ञाने आपादकाभावात् न व्यभिचारः जन्यत्वविशेषणानुपादानात् तदुपादानकृता च न व्यर्थविशेषणतेत्यर्थः। न तु सामान्यतो व्यर्थविशेषणताविरह। यथोक्तापादकव्यतिरेकस्येश्वरज्ञानसाधारणतया मौलहेतौ व्यर्थविशेषणताध्रौव्यादिति। उपन्यस्तेति उपन्यासापादकस्य यो विपर्ययः तस्य विरोधो मौलेन हेतुना साधनायोगश्च कार्यत्वविशेषणवैयर्थ्येन व्याप्यत्वासिद्धेरित्यर्थः। तदेतत्प्रपञ्चयति—तद्विपर्ययस्येति। उपन्यस्तविपर्ययस्येत्यर्थः। तादृशि साध्य इति। इदं च प्रमात्वासामानाधिकरण्य तदनधिकरणाधिकरणत्वमित्यभिप्रेत्येति द्रष्टव्यम्। तेन ज्ञानत्वमप्रमात्वानधिकरणप्रमावृत्तीति भवति सिद्धसाधनमिति। एवञ्चापाद्यविपर्ययः प्रकृतानुमानहेतुरुपन्यस्यतीत्याह—तद्व्यतिरेकस्त्विति। यथाश्रुतमेवेति अप्रमा स्यादित्यापाद्यदिशीति शेषः। आपादके जन्यत्वविशेषणादेवेश्वरज्ञाने व्यभिचाराभावात् तत्साधारण्यार्थमर्थान्तरविवक्षाव्यावृत्तेरभावादित्यर्थ.।]

ज्ञानहेत्वतिरिक्तहेतुजन्येति साध्ये एकविशेष[2]विधिर्विशेषान्तरनिषेधफलकतया ज्ञानहेत्वजन्यत्व विवक्षितम् यथाश्रुतमेव वा, आद्ये मूलकृता बाधो दत्तः। तत्र शङ्कते—नन्विति। ज्ञानाजनकजन्यत्वं यथाश्रुतमेवेति शेषः।

अत एवात्र न बाध इति। ज्ञानजनकत्वस्य केवलान्वयितया ज्ञानहेत्वतिरिक्तहेतोरप्रसिद्ध्या तज्जन्यत्वाभावरूप[3]बाधासम्भवादित्यर्थः। इदमुपलक्षणम्। अत एव यथाश्रुतविरोधो न व्याख्यात इत्यपि द्रष्टव्यम्। न वा आद्ये विरोध इति। ज्ञानहेत्वजन्यत्वस्य[4]अकाशाद प्रसिद्ध्या साध्याप्रसिद्धिरूप[5]विरोधासम्भवादित्यर्थः। मूले अप्रमायामित्युपलक्षणम्। सर्वत्र तदप्रसिद्धेरिति द्रष्टव्यम्।

---

१. तदतिरिक्तजन्यत्वे साध्ये इति पाठान्तरम्।

२ एकशेषविधेरिति गपुस्तके। ३ भावप्रमारूपेति गपुस्तके। ४ ज्ञानजन्यहेत्वजन्येति गपुस्तके। ५. प्रसिद्धिरूपेति गपुस्तके।

तदसिद्धेः, व्यर्थविशेषणत्वात् व्यावर्त्त्याप्रसिद्धेः।

किञ्च यत्किञ्चिज्ज्ञानहेत्वपेक्षया सर्वतद्धेत्वपेक्षया वा अतिरिक्तत्वे इन्द्रियादिभिः सिद्धसाधनात्। नापि ज्ञानसामान्यसामग्र्यतिरिक्तसामग्रीजन्येति साध्यम्, पूर्ववत् सिद्धसाधनात् विरोधाच्च।

न च सामान्यविशेषयोः सामग्रीद्वयम्, प्रमाया ज्ञानभिन्नत्वापत्तेः, अन्यथा

व्यर्थेति। ज्ञानत्वमात्रे व्यभिचाराभावादित्यर्थः।

न चेश्वरज्ञाने व्यभिचार इत्यत आह—व्यावर्त्त्येति। प्रमामात्रे गुणजन्यत्वस्थितौ[1] वैदिकप्रमायास्तादृप्येणेश्वरज्ञानसिद्धेर्विशेषणोपादानं हेतो[2]रन्योन्याश्रयग्रस्तत्वमित्याशयः। ज्ञानमात्रसामग्र्यतिरिक्तत्वमिति कोऽर्थो यदि ज्ञानत्वावच्छिन्नप्रतियोगिक[3]सामग्र्यन्यत्वम्, तदेन्द्रियादिना सिद्धसाधनम्। यदि च ज्ञानत्वाश्रयजनकसामग्र्यन्यत्वन्तदा अप्रसिद्ध्या विरोध इत्याह—सिद्धसाधनादिति।

न चेति। फलोपधाननियतसमुदायः सामग्री। स च न सामान्यविशेषयोर्भिन्न इति प्रागुक्तम्। तथा च बाध इत्यर्थः।

केचित्तु ज्ञानाजनकत्वमनीन्द्रिये प्रसिद्धम्। न च तस्य सामान्यप्रत्यासत्तीभूय ज्ञानजनकत्वम्। तदिन्द्रियग्राह्यसामान्यस्यैव तदिन्द्रियप्रत्यासत्तित्वात्। योगिज्ञानञ्च न विषयजन्यमित्यभिसन्धाय विरोधहेत्वाभासपरतया प्रतिज्ञाविरोधपरतया चविरोधादिति साध्यविकल्पपरतयाऽप्रमायामिति व्याचक्षते (तेनातीन्द्रियस्यापि ज्ञानजनकत्वमेव। अन्यथा परमाणौ महत्परिमाणाभावसाक्षात्कारो न स्यात्)[4]। व्यर्थेत्यस्य विशिष्यत इति व्युत्पत्त्या विशेषणपदेन विशेष्याभिधानात् व्यर्थविशेष्यत्वादित्यर्थः। व्यावत्याप्रसिद्धेरित्यस्य जन्यपदवैयर्थ्यादित्यर्थ इति स्वतन्त्रावेव हेतू। अत एव चकारोऽपि सङ्गच्छत इति व्याख्यानमयुक्तम्, यथाश्रुतविशेषणपदार्थेनैवोपपत्तेः। चकारश्च व्यावर्त्त्येत्यादेर्हेतूपपादकत्वेऽपि पूर्वहेत्वपेक्षया सङ्गत एवेत्यभिप्रेत्य व्याचष्टे—ज्ञानमात्र इत्यादि। यत्किञ्चिदिति मूलम्। यत्किञ्चिज्ज्ञानस्य यज्जनकमनुमानादिजन्यसकलज्ञानाना च यज्जनकं कालादि तद्भिन्नत्वमिन्द्रियादावस्त्येवेत्यर्थः।

ज्ञानत्वावच्छिन्नसामग्र्यन्यत्वमिति। सर्वासु ज्ञानसामग्रीषु प्रविष्ट यत्कारण कालादि तदन्यकारणघटितत्वमित्यर्थः। ज्ञानत्वाश्रयेति। ज्ञानत्वाश्रयसामग्रीप्रविष्टकारणत्वावच्छिन्नान्यकारणघटितत्वमित्यर्थः। अत्रापि कारणत्वाश्रयान्यत्वमात्रेऽभिमते पूर्ववत्सिद्धसाधनमिति द्रष्टव्यम्। यदि तु यथाश्रुतं ज्ञानसामग्रीभिन्नजन्यत्वं तदा बाध इत्याह—फलेति। हेत्वसिद्धिरिति। ज्ञानत्वकारणस्याप्रसिद्धिरित्यर्थः।

---

१. सिद्धौ इति कपाठः। २ हेतौ इति कपाठ।
३. 'प्रतियोगिके'ति पाठो दर्पणे नास्ति। ४, कोष्ठगतो ग्रन्थः गपुस्तके नास्ति।

सामग्रीभेदासिद्धिः, तस्य कार्यभेदकल्प्यत्वात् । एतेन 'ज्ञानसामान्यहेत्वतिरिक्तहेतुजन्येति साध्यं' प्रत्युक्तम् । सकलज्ञानाभिप्राये चेन्द्रियादिभिः सिद्धसाधनम्, ज्ञानत्वाभिप्राये हेत्वसिद्धिः । नापि ज्ञानत्वावच्छिन्नकार्यत्वान्यकार्यत्वप्रतियोगिककारणजन्येति साध्यम्, ज्ञानत्वस्य नित्यवृत्तितया कार्यत्वानवच्छेदकत्वात् ।

अथ यद्धर्माश्रयस्यासतः सत्त्वं हेत्वधीनं तत् कार्यतावच्छेदकं, ज्ञानत्वञ्च तथा । न चासत इत्यधिकं, व्योमादिसाधारणसत्त्वमात्रस्य हेत्वनियम्यत्वा-

हेत्वसिद्धिरिति । तथा च तद्धेत्वन्यहेतुजन्यत्वं साध्यमप्रसिद्धमिति भावः ।

व्योमादीति । व्योम्नः सत्त्वमनुत्पत्तिरूपम् । तथा च व्योमादिसाधारणसत्त्वमात्रस्यानुत्पत्तिरूपसत्त्वमात्रस्य हेत्वनियम्यत्वादित्यर्थः । हेतुनियम्यत्वं हेत्वधिकरणक्षणाव्यवहितोत्तरक्षणमात्रवृत्तित्वम्, न चानुत्पत्तिरूपं सत्त्वं[1] तथा, क्षणान्तरेऽपि सत्त्वात् । न तूत्पत्तिरपि क्षणान्तरे, येनानियम्या स्यात् । तथा च यद्धर्म्माश्रयस्योत्पत्तिर्हेतुनियम्येत्यत्र तात्पर्यम् ।

यद्वा हेत्वधीनत्वं हेत्वन्वयव्यतिरेकानुविधायित्वम् । तत्रापि कथितैव रीतिरनुसर्त्तव्या । अत्र च यद्धर्म्माश्रयस्य सर्वस्यासतो यदधीनं सत्त्वमित्यादिनियमस्वरूपं, यथाश्रुते मेयत्वादेरपि दण्डजन्यतावच्छेदकतापत्तेः । न चादृष्टजन्यतावच्छेदकत्वमेवमपि मेयत्वेन त्यज्यतामिति वाच्यं, इष्टत्वात् । न च नीलघटत्वादावतिप्रसङ्गः, बाधकाभावे सतीत्यनेन विशेषितत्वात् । न हीदं कार्यतावच्छेदकत्वव्याप्यधर्मोपदर्शनमपि तु नित्यवृत्तितारूपबाधकनिराकरणमिति कार्यमात्रवृत्तिधर्मत्वे यथा व्याप्यतानिर्वाहार्थं तद्विशेषणं तथेहापि । तदर्थस्तु अग्र एव वाच्य इति नेह कथित इति ।

नित्यवृत्तेरपि ज्ञानत्वस्य कार्यतावच्छेदकत्व सम्भवतीति शङ्कते–मूलम् अथेति । व्योम्न इति । असत इति विशेषणमहिम्ना आद्यक्षणसत्त्वमुत्पत्तिरूपं लभ्यते । तस्य च सर्वस्य हेत्वधिकरणक्षणाव्यवहितोत्तरक्षणवर्त्तित्वं सम्भवति । विशेषणादाने तु द्वितीयादिक्षणसत्त्वस्यापि लाभात् सर्वस्य सत्त्वस्योक्तहेतुनियम्यत्व न सम्भवतीत्यर्थः ।

तथा च यद्धर्माश्रयस्येति । यद्धर्माश्रयस्य सर्वा उत्पत्तिर्हेतुनियम्येत्यर्थः । कथितैवेति । सर्वस्य सत्त्वस्य हेत्वन्वयव्यतिरेकित्वाभावादित्यर्थः

ननु सर्वपददानेऽप्ययं दोषः, तदेव किमर्थमित्यत आह—अत्र चेति । सर्वस्येति ।

---

१. उत्तरक्षणमात्रस्यानुत्पत्तिरूपं सत्त्वमिति कपुस्तकपाठः ।

दिति चेत्—न, यदालिङ्गितस्य स्वरूपं हेत्वधीनं तत्कार्यतावच्छेदकं लाघवात्, ज्ञानत्वन्तु न तथा। अनित्यज्ञानत्वेतिवरणे इन्द्रियादिभिर्यथायथं सिद्धसाधनम्, तेषां प्रत्येकं ज्ञानमात्राहेतुत्वात्। एतेन प्रमात्वं ज्ञानत्वावच्छिन्नकार्यतानिरूपितकारणताभिन्नकारणताप्रतियोगिककार्यतावच्छेदकं ज्ञान-

यदिति। यदवच्छिन्नस्योत्पत्तिरित्येव लघु न तु यदाश्रययावदुत्पत्तिरित्यर्थः। यदवच्छेदेन हि यत्रान्वयव्यतिरेकानुविधानं तदवच्छेदकम्। न चातिप्रसक्तमन्वयाद्यवच्छेदकम्। व्यभिचारेण ग्राहकाभावेन कार्यत्वस्यैव दुर्ग्रहत्वादिति भावः।

वस्तुतस्तु हेतुनियम्यत्वं हेत्वधिकरणक्षणोत्तरक्षणानियतत्वम्। तथा च यत्स्वरूपं हेतुनियम्यमित्यनेनावच्छेदकस्यानतिप्रसक्तिनियमेन तादृशहेतुनियम्यतावच्छेदकमेव कार्यतावच्छेदकम्। तादृशहेतुनियम्यत्वस्यैव कार्यस्वरूपत्वादिति तत्त्वम्।

अनित्येति। यद्यप्येतज्ज्ञानगर्भप्रथमसाध्येऽपि तुल्यं, तथापि तत्र दोषान्तरस्योद्भटतयैव तदुपेक्षितम्।

प्रमात्वमिति। यद्यपि कार्यतावच्छेदकत्वमात्रे साध्ये पक्षधर्मताबलादभिमतसाध्यसिद्धिरप्रत्यूहा, एकनिरूपितैकाधिकरणकार्यतावच्छेदकद्वयानङ्गीकारादिति, तथापि दूरबाधकप्रतिसन्धिक्लेशो मा भूच्छिष्याणामिति विशिष्टमेव साध्यमुपात्तम्। साध्ये च न व्यर्थविशेषणतेति प्राचीनमतेन प्रयोगादिति ध्येयम्।

ज्ञानत्वेति। ज्ञानसाक्षाद्विभाजकोपाधित्वादित्यर्थः। विद्या चाविद्या चेति प्रथमविभागादिति भावः।

इदञ्चासत इत्यस्य विशेषणम्, तेन सर्वा उत्पत्तिर्लभ्यते, न तु यद्धर्माश्रयस्य, तथा सत्यसङ्गत्यापत्तेरित्यवधेयम्। तदर्थः बाधकाभावरूपविशेषणार्थः[1]। यद्धर्माश्रयस्य सर्वा उत्पत्तिर्हेतुनियम्येत्यपेक्षया यद्धर्माश्रयः सर्वो हेतुनियम्य इत्येव लघु उत्पत्त्यप्रवेशान्न च ज्ञानाश्रयः सर्वो हेतुनियम्य इति सिद्धान्तयति—यदवच्छिन्नस्येति। अत्र उत्पद्यत इति उत्पत्तिः स्वरूपम्। यदवच्छिन्नस्येत्यवच्छिन्नपदाच्च सर्वत्वलाभः तेन यद्धर्माश्रयः सर्व इति लभ्यते। हेतुनियम्यत्वञ्च हेत्वन्वयव्यतिरेकानुविधायित्वम्।

युक्त्यन्तरमाह—यदवच्छेदेन हीति। इतिशब्दानन्तरं चकार पूरणीयः।

हेत्विति। हेत्वधिकरणक्षणोत्तरत्वव्याप्यस्वाधिकरणक्षणत्वकत्वमित्यर्थः। अत्र चाव्यवहितविशेषणत्यागादपि लाघवं ध्येयम्।

भ्रान्तः शङ्कते—यद्यपीति। दोषान्तरस्य अप्रसिद्धिरूपस्य। उद्भटतया सिद्धसाधनविरोधितया। ज्ञानत्वावच्छिन्नेति मूलम्। अनित्यज्ञानत्वावच्छिन्नेत्यर्थः। एकनिरूपितेति।

---

1 तथा च तत्रेवाऽत्रापि न बाधकसामान्याभावो विशेषणमपि तु विशेष्याभाव इति न वैयर्थ्यमित्यर्थ।

त्वसाक्षाद्व्याप्यधर्मत्वात् अप्रमात्ववदिति निरस्तम्, प्रमात्वस्य नित्यवृत्तित्वात्।

अनित्यप्रमात्वं तथा कार्यमात्रवृत्तिधर्मत्वादित्यपि नीलघटत्वादिना व्यभिचारि। अनित्यप्रमा प्रमाप्रमोभयहेतुभिन्नहेतुजन्या, जन्यत्वात्, अप्रमावदिति चेत्—न, दोषस्य पित्तादेः स्वविषयप्रमाहेतुत्वेनाप्रमायां साध्याप्रसिद्धेः। घटदृष्टान्तत्वे तयैव[1] व्यभिचारात्। शङ्खाद्यंशे पीतः शङ्ख इति ज्ञानस्यापि प्रमात्वात्, कारणव्यक्तिभेदजन्यत्वेन सिद्धसाधनाच्च।

अथ प्रमा अप्रमाव्यावृत्तधर्मावच्छिन्नकार्यत्वप्रतियोगिककारणजन्या, अप्रमाविजातीयकार्यत्वात् घटवत्। यदि प्रमा अप्रमात्वासमानाधिकरणरूपनिरूपितकार्यत्वप्रतियोगिककारणजन्या न स्यात् अप्रमा स्यादिति चेत्—न,

ननु स्वाविषयक[2]प्रमाप्रमोभयहेतुभिन्नहेतुजन्यत्वं साध्यमतो नोक्तदोष इत्यत आह—शङ्खेति।

ननु यद्विषयकत्वेन ज्ञानं प्रति जनकत्वं तत्र प्रमात्वादिति विवक्षितम्। अतो[3] दोषान्तरमाह—कारणेति।

अप्रमात्वेति। ननु यथाश्रुतमिदमीश्वरज्ञानादावनैकान्तिकं, जन्यत्वविशेषणे विपर्ययपर्यवसायि, जन्यत्वे सत्यप्रमात्वासमानाधिकरणरूपनिरूपितकार्यत्वप्रतियो-

एकस्या हेतुताया उपाधिरूपसामान्यस्य उपाधिरूपविशेषस्य च कार्यतावच्छेदकत्वानङ्गीकारादित्यर्थः। तेन द्रव्यनिष्ठकारणताया जन्यगुणत्वसंयोगत्वयोः कार्यतावच्छेदकत्वेऽपि न व्यभिचारः। यथाश्रुते ज्ञानत्वसाक्षाद्व्याप्यत्वमसिद्धम्, अनुभवत्वस्यैव साक्षाद्व्याप्यत्वादित्यतोऽन्यथा व्याचष्टे-ज्ञानत्वेति। वैशेषिकानुसारिविभाजकं चात्र द्रष्टव्यम्।

ननु स्वान्यविषयकप्रमाया विवक्षितत्वान्नोक्तदोष इत्यत आह—मूले शङ्खेति। यद्विषयकत्वेनेति। यद्विषयकत्वावच्छिन्नं ज्ञानं प्रति जनकता पित्तस्य तत्रांशे भ्रमत्वमेवास्ति न तु प्रमात्वमित्यर्थः। कारणेति। यया इन्द्रियसन्निकर्षव्यक्त्या प्रमैव जनिता तज्जन्यत्वेन प्रमाप्रागभावजन्यत्वेन वेत्यर्थः।

केचित्तु प्रमापदेन सर्वांशप्रमा विवक्षितेत्यस्वरसेन कारणेति मूलमवतारयति। जन्यत्वविशेषण इति। आपादकस्येति शेषः। (कथं विपर्ययपर्यवसानमित्यत आह- जन्यत्वे सतीति)[4]।

---

१ अप्रमयैवेति भावः। २. स्वविषयतातिरिक्तविषय इति कपुस्तकपाठः।

३. 'नोक्तदोष इति' इति अधिकः पाठः कपुस्तके। ४. कोष्ठगतो ग्रन्थः गपुस्तके नास्ति।

अप्रमाव्यावृत्तधर्मावच्छिन्नकार्यत्वं संयोगस्य तत्प्रतियोगिककारणमिन्द्रियादीति तज्जन्यत्वेन सिद्धसाधनात्। अप्रमासाधारणव्यक्तिजन्यत्वञ्चाग्रेऽप्रमातादात्म्ये

गिककारणजन्यत्वरूपे व्यतिरेके जन्यत्वविशेषणवैयर्थ्यात्। नन्व्यत्यासे तादृशरूपा-निरूपितकार्यत्वप्रतियोगिककारणजन्यत्वरूपापादके न व्यभिचारो न वा व्यर्थविशेषणता यद्यपि, तथाप्युप·यस्तविपर्ययविरोधः। तद्विपर्ययस्याप्रमात्वासमानाधिकरणरूपा-निरूपितकार्यत्वप्रतियोगिकारणजन्यत्वाभावरूपतया तस्य च नित्यानित्यसाधारणत्वे-नाप्रमाविजातीयत्वमात्रस्यैव सामर्थ्येन कार्यत्वविशेषणोपादानानुपपत्तेः। तादृशि साध्ये ज्ञानसामान्यहेतुजन्यत्वे सिद्धसाधनाच्चेति।

अत्राहुः—अप्रमा स्यादप्रमाविजातीयकार्यं न स्यादित्यर्थः। तद्व्यतिरेकस्तु अप्र-माविजातीयकार्यत्वमेवमग्रेऽपि अप्रमाविजातीयकार्य्यासाधारणकारणजन्यत्वमप्रमा-विजातीयकार्यभिन्नात्मकत्वे प्रयोजकमित्यर्थः। अतो न तद्विरोधः।

वस्तुतस्तु अप्रमा स्यात् प्रमा न स्यादित्यर्थः। ईश्वरज्ञानं तु न प्रमेति न व्यभि-चारः। जन्यत्वसमानाधिकरणाप्रमात्वा[१]समानाधिकरणरूपनिरूपितकार्यत्वप्रतियोगि-ककारणजन्यत्वाभावाभावस्य व्यतिरेकत्वात् यथाश्रुतमेव वा समादरणीयमिति।

कारणजन्यत्वरूपे जन्यत्वसमानाधिकरणस्योक्तकारणजन्यत्वाभावस्याभावरूपे। जन्यत्वविशे-षणवैयर्थ्यादिति। यादृशे विपर्यये तर्कपर्यवसानं तदेव चानुमाने साध्यमिति तर्कविपर्ययस्य नित्यसाधारणत्वेन हेतौ जन्यपदवैयर्थ्यादित्यर्थः।

यद्वा विशेषणवति विशिष्टाभावो विशेषणसहिते विशेष्याभावे पर्यवसित इत्यभिप्रायेण यथाश्रुत एव ग्रन्थो योज्यः। जन्यत्वविशेषणवैयर्थ्यात् व्यापक इति शेषः।

केचित्तु आपादके ईश्वरज्ञानवारणाय जन्यपदम् परमते व्यावर्त्याप्रसिद्धया वैयर्थ्यमि-त्यर्थमाहुः। तन्न, आकाशादिव्यभिचारवारकत्वेन सार्थकत्वात्। न वेति। द्वितीयपक्षे व्यापके या जन्यपदव्यर्थता उक्ता तदप्रवेशात् सा नेत्यर्थः।

सिद्धसाधनादिति। स्वसिद्धेनैवापादकेनेह साधनापादनादित्यर्थः। तथा च तद्व्यति-रेके साध्ये बाध इति भावः। न स्यादित्यर्थ इति। तथा च साध्यव्यतिरेकेण हेतुव्यतिरेकापादन मेवात्र विवक्षितमिति भावः।

नन्वग्रेऽप्रमातादात्म्ये प्रयोजकमितिमूलदर्शनादप्रमातादात्म्यस्यैवापाद्यत्वं लभ्यते इत्यत आह—अग्रेऽपीति। आपादकव्यतिरेकस्यानुमानसाध्यस्य चैक्यमावश्यक, न तु आपाद्यव्यतिरेक-हेत्वोरपीत्यभिसन्धायाह—वस्तुतस्त्विति। जन्यत्वेति। विपर्ययरूपे साध्ये जन्यत्वपदं न व्यर्थम्[२], विशिष्टाभावस्य साध्यत्वादित्यर्थः। न च हेतौ जन्यपदं व्यर्थम्, तस्यैवात्रानयनादिति भावः।

१. जन्यत्वे सत्यप्रमात्वेति कपुस्तकपाठ।

२. तदयं समुदायार्थः। तर्कस्यापादकव्यतिरेकसाधकानुमान एव सहकारित्वम्। तथा चायं तर्कस्तदा प्रकृतानुमानसहकारी स्याद्यदि प्रकृतानुमानसाध्यमापादकव्यतिरेक. स्यात्तच्च नित्य साधारणम्। अतो नित्ये व्यभिचारवारणाय कार्यत्वविशेषणमनर्थकं स्यादिति न प्रकृतानुमान-

|योजकमिति तर्कोऽप्यप्रयोजकः। अथानित्यप्रमा प्रमाप्रमान्यतरप्रतिबन्धकजन्या, प्रमाप्रमान्यतरत्वात् अप्रमावत्, चाक्षुषप्रमा चाक्षुषप्रमाजनकजन्या अनित्यप्रमात्वात् रासनप्रमावदिति चेत्—न। प्रमाजनकासाधारणव्यक्तिभेदस्याप्रमाप्रतिबन्धकत्वेन चाक्षुषप्रमाजनकत्वेन च सिद्धसाधनात्। एतेन प्रमा स्वविरोध्यनुभवप्रतिबन्धकजन्या, अनित्यानुभवत्वात् अप्रमावत्। दूरात्पुरुषस्य

नन्वप्रमाव्यावृत्तधर्मावच्छिन्नज्ञानवृत्तिकार्यत्वनिरूपितेति करणान्न सिद्धसाधनम्। न तु ज्ञानवृत्ति-वहीनं साध्यं, येन तत् स्यात्। अन्यथा कार्यत्वमात्रमेव हेतुः क्रियेत। उक्तरीत्या इन्द्रियजन्यत्वेन तत्रापि साध्यसत्त्वात्। न चैवं घटदृष्टान्तविरोधः। व्यतिरेकदृष्टान्तत्वेनापि उपपत्तेः। न च तत्र हेत्वभावाभावान्नेदमिति वाच्यं, घटव्यभिचारभयेनाप्रमाविजातीयकार्यज्ञानतरत्वाद्धेतोः। यो यद्विजातीयकार्यः स तद्व्यावृत्तधर्मावच्छिन्नकार्यत्वप्रतियोगिककारणजन्य इति सामान्यव्याप्तौ वा तद् दृष्टान्तत्वात्। न चैतादृशसाध्याप्रसिद्धिः। प्रमानिष्ठमप्रमाव्यावृत्तधर्मावच्छेद्यम् अप्रमाविजातीयनिष्ठकार्यत्वादित्यादिना तत्प्रसिद्धिसौकर्यात्। न चैतावता समीहितसिद्धेरनुमानान्तरानवकाश, प्रकारार्थं तत्सम्भवादित्यत आह—अप्रमेति। न हि अप्रमाव्यावृत्तधर्मावच्छेद्यकार्य-त्वनिबन्धनं तद्वैजात्यमपि तु तदजनकव्यक्तिविशेषजन्यत्वनिबन्धनमिति।

तर्कोऽनुमानञ्चाप्रयोजकमित्यर्थः।

अपि समुच्चये।

स्वविरोधीति। अत्रानुभवग्रहणं स्वविरोधिस्मृतिप्रतिबन्धकानुभवसामग्रीजन्य

अन्यथा ज्ञानवृत्तित्वविशेषणानुपादाने। तत्रापि अप्रमायामपि। इत्यत आहेति। इत्यस्वरसदाहेत्यर्थः।

अपिशब्दः समुच्चयमाह—अनुमानञ्चेति। प्रमाप्रमान्यतरत्वादिति मूलम। ईश्वरज्ञानमुभयबहिर्भूतमिति न तत्र व्यभिचार इति भावः।

ईश्वरज्ञानस्य प्रमात्वपक्षे मूलम्- अनित्यप्रमात्वादिति। अनित्यानुभवत्वादिति मूलम्। निर्विकल्पके व्यभिचारवारणाय सप्रकारकत्वं विशेषणमित्येके। तस्यापि गुणजन्यत्वसाध्यमस्तीत्यपरे। बाधपरिहाराय मूलम्—दूरादिति। दृष्टान्ते साध्यवैकल्यपरिहाराय मूलम

स्थाणुतया ज्ञाने सन्निधौ च भूयोऽवयवेन्द्रियसन्निकर्षस्य विरोधिस्थाण्वनुभव-प्रतिबन्धकत्वं पुरुषज्ञानजनकत्वञ्च दृष्टम्। अप्रमायां तु पित्तादेर्लिङ्गादिभ्रमस्य च तथात्वमिति निरस्तम्। प्रमाजनकव्यक्तिविशेषस्याप्रमाप्रतिबन्धकत्वं प्रमा-जनकत्वञ्चास्तीति सिद्धसाधनादिति न प्रमायामतिरिक्तगुणसिद्धिः। किञ्च प्रत्यक्षप्रमादौ अनुगतस्यार्थान्तरस्य गुणस्याभावः। इन्द्रियसन्निकर्षादीना-ञ्चाननुगमः। न च जात्यैव गुणदोषौ, प्रमाजनकत्वं गुणत्वं, भ्रमजनकत्वं च दोषत्वमतिप्रसक्तं, तन्मात्रजनकत्वञ्चासिद्धमिति।

इति महामहोपाध्यायगङ्गेशविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे
प्रामाण्यवादे उत्पत्तिवादपूर्वपक्षः समाप्तः

त्वेन सिद्धसाधनवारणाय। स्वपदं स्वसमभिव्याहृतपरम्। अतोऽत्र पक्षीभूतप्रमा-मात्रविरोधीति लाभान्न प्रत्यक्षप्रतिबन्धकानुमितिसामग्रीजन्यत्वेनांशतः सिद्धसाधनम्। हेतावपि अनुभवपदं स्मृतावेव व्यभिचारवारणाय।

नन्वेवं अनुगतहेतुमात्रोच्छेद इत्यस्वरसादाह—किञ्चेति। यत्र तत्सम्भवस्तत्र त्यागायोगादस्तु तथा। न चेह तथा, अनुगतहेत्वभावादित्यर्थः।

न चेति। न हि गुणत्वदोषत्वजात्यवच्छेदेन तदुभयहेतुत्वम्, तदभावादित्यर्थः। तथा च गुणदोषशब्दावननुगतवचनतया नानार्थावेवेति भावः।

ननु कुतो नानार्थौ तादृशजात्यभावेऽपि प्रमाजनकत्वादीनामेवानुगतानां तन्निमित्तत्वसंभवादित्यत आह—प्रमेति।

तन्मात्रेति। अन्ततः स्वध्वंसादिकं प्रत्यपि जनकत्वादिति भावः।

इति महामहोपाध्यायजयदेवापरनामकपक्षधरमिश्रविरचिते प्रत्यक्षतत्त्वचिन्तामण्यालोके
प्रामाण्यवादे उत्पत्तिवादपूर्वपक्षः समाप्तः

अप्रमायां त्विति। इत्यस्वरसादाहेति। इत्यत आहेत्यर्थः। प्रमाप्रमाजनकतावच्छेदकगुणत्व दोषत्वनिरूपणप्रस्तावे प्रमाजनकत्वं गुणत्वमित्यादिग्रन्थासङ्गतिमालोच्य तदुपपादनाय पूरयति— तथा चेति। वस्तुतः प्रमाजनकत्वमित्यादिमूले जनकत्वं पूर्ववर्तित्वं विवक्षितमिति सम्मुख एवार्थः।

इति महामहोपाध्यायमिथिलाराज्यसमुपार्जकमहेशठक्कुरकृते
प्रत्यक्षखण्डे उत्पत्तिवादपूर्वपक्षदर्पणः समाप्तः

अथ उत्पत्तिवादसिद्धान्तः

उच्यते—एवमप्रमापि स्वत एव स्यान्न तु परतः, प्रमात्वदसाधारणकारणादेव तदुत्पत्तौ दोषस्य तत्राहेतुत्वात्। अथ ज्ञानसामग्रीसत्त्वेऽपि विशेषादर्शनादिपित्तादेरनुविधानादप्रमायां दोषो हेतुरिति चेत्तर्हि विशेषदर्शनपित्ताद्यभावादितस्तत्रैव विषये प्रमा तदभावान्नेति प्रमायामागन्तुककारणापेक्षेति कथं न परतस्त्वम्। अपि च नियमगर्भः कार्यकारणभावः। नियमश्च न व्यक्तयो-

अथ उत्पत्तिवादसिद्धान्तालोकः

प्रतिबन्दिमात्रस्यादोषत्वमिति मूलयुक्तिमाह—नियमश्चेति। न हेतुहेतुमद्भाव इति शेषः।

अथ उत्पत्तिवादसिद्धान्तदर्पणः

यद्यप्यथ यत्र गुणदोषौ विनेत्यादिग्रन्थपर्यालोचनयाऽप्रमाया दोषजन्यत्वाभावान्न प्रतिबन्दिसम्भवस्तथापि तस्य तटस्थस्य शङ्कितुर्मते तथात्वेऽपि मीमांसकस्याप्रमाया दोषजन्यत्वाभ्युपगमोऽस्त्येवेत्यभिप्रायेणाह मूले—एवमिति। यदि च मुख्यपूर्वपक्ष्यभिप्रायेणैव स ग्रन्थो व्याख्यायते तदाऽन्वयव्यतिरेकाभ्यामप्रमाया पित्तादिदोषजन्यत्वं प्रसाध्य प्रतिबन्दिरियमवतारणीया। तस्मिंश्च पक्षे पूर्वपक्षग्रन्थे दोषजन्यतामादाय यदप्रमाया दृष्टान्तत्व तदपि प्रसाध्याङ्कमेवेति ध्येयम्। मूले—तर्हि विशेषदर्शनेति।

ननु नैयायिकानां गुणेनान्यथासिद्धो दोषाभावो हेतुरिति चेत्—न। भूयोऽवयवेन्द्रियसन्निकर्षे सत्यपि पित्तादिप्रयुक्तप्रमाव्यतिरेकदर्शनात् स्वतन्त्रान्वयव्यतिरेकाद्यनुविधायी सोऽपि हेतुरिति भावात्। प्रतिबन्दिमात्रस्येति। यद्यप्यन्वयव्यतिरेकयोरुक्तत्वान्न प्रतिबन्दिमात्रमिद तथाप्यसाधारणव्यक्तिमादायान्वयव्यतिरेकयोरन्यथासिद्धत्वादेवमुक्तम्।

नियमश्चेति मूलम्। अत्र ज्ञानत्वावच्छेदेन इन्द्रियसन्निकर्षादिव्यक्तिभेदस्य हेतुत्वं प्रमात्वावच्छेदेन वा तत्तत्प्रमात्वावच्छेदेन वा? त्रिष्वपि कल्पेषु प्रत्येक हेतुताऽनुगतरूपेण वा? तत्र प्रथमद्वितीययोर्न प्रत्येकं हेतुता, व्यभिचारात्। तृतीये नानुगतरूपेण हेतुता, अन्वयव्यभिचारात्। द्वितीये यद्यनुगतेन तृतीये यदि प्रत्येक हेतुत्व तदा सिद्धो गुणः, प्रमात्वव्याप्यधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयस्यैव गुणत्वात्।

किञ्च प्रमात्वादिकमनुगतं हित्वा या व्यक्ति प्रति या व्यक्तिर्नियतपूर्ववर्त्तिनी सा तत्र कारणमिति तृतीयपक्षाश्रयणे रासभादेर्घटविशेषहेतुतापत्त्याऽतिप्रसङ्गः। तत्र ह्यन्यत्रेत्याद्यन्यथासिद्धिर्बाधिका। न च सर्वत्राननुगतकार्यपक्षे तत्सम्भव इति निर्गलितार्थः।

नियमश्च न व्यक्तयोरित्ययुक्तम्, रूपरसव्यक्तयोस्तद्दर्शनादित्यत आह—हेत्विति।

रेव व्यभिचारादतिप्रसङ्गाच्चेति नियमनिरूपकमनुगुणमनुगतमास्थेयम् । एवञ्चा-प्रमायामिव प्रमायामपि तद्व्यावृत्तं कारणमनुगतमास्थेयम् ।

यद्यवच्छेदकमन्तरेण[1] यत कुतश्चिद्व्यक्तेस्तज्जातीयजन्म तदा तत्तद्व्यक्त्यभावेऽपि तज्जातीयसत्त्वाद्व्यभिचारः, यदि च या व्यक्तिर्यत्पूर्वनियता सा तद्व्यक्तिहेतुरिति तदाऽतिप्रसंगः, पूर्ववर्त्तिरासभव्यक्तेरपि वह्निव्यक्तिहेतुत्वापत्तेः । न च नियमसत्त्वेऽपि अन्यथासिद्धतया तस्य नायं दोष इति वाच्यं, अन्यत्रेत्यन्यथासिद्धयतिरिक्तान्यथा-सिद्धावनन्तर्भावात् तस्यां चान्तर्भावस्तदा यदि तज्जातीयं प्रति नियमः, न हि तत्र व्यक्तिं प्रत्यन्यत्र पूर्ववर्त्ती क्लृप्तः । तज्जातीयनियमे च तद्व्यक्तेर्व्यभिचार एव । तथा चाननुगते कार्ये भवतु अननुगतो हेतुः दोषाभावात् , न त्वनुगते कार्येऽननुगत-हेतुता, ग्राह्यग्राहकयोरुभयोरप्यभावादित्यभिसन्धायाह—व्यभिचारादतिप्रसङ्गाच्चेत्यादि ।

ननु व्यक्त्योरेव नियमः कार्यकारणभावः । न हि घटोत्तरवर्त्तिदण्डव्यक्तेरपि तद्घटहेतुता । तथा च यथा सामान्यतोगृहीतनियमस्तत्तद्व्यक्त्योरेव दण्डघटादि-स्थले कार्यकारणभावस्तथा सामान्यतो ज्ञानं तत्तत्कारणयोर्नियमग्रहे तत्तद्व्यक्ते-स्तत्तत्प्रमाव्यक्तिं प्रति जनकत्वमस्तु । प्रमात्वं तु तत्र घटादावनुगतसंस्थानवत्त्ववद्-

प्रत्येकं हेतुता अनुगतेन कार्यतेति निराकरोति—यदीति । इदमुपलक्षणम् । अनुगतेन रूपेण व्यक्तिविशेषं प्रति हेतुत्वेऽन्वयव्यभिचारः, अनुगतेन रूपेण प्रमात्वावच्छिन्नं प्रति प्रत्येकरूपेण तत्तत्प्रमां प्रति हेतुत्वे समीहितसिद्धिरित्यपि द्रष्टव्यम् ।

चरमपक्षे दोषान्तरमाह—यदि चेति ।

ननु 'सति सम्भवे त्यागायोगादि'ति न्यायेन घटत्वाद्यवच्छिन्नं प्रति दण्डादेर्हेतुत्वम् । तथा चान्यत्र क्लृप्तदण्डादित एव कार्यसम्भवे रासभोऽन्यथासिद्ध इत्याशङ्क्याह—तज्जातीयेति । तर्हि प्रकृतेऽपि प्रमाजातीयकार्यसम्भवात्तत्रैव हेतुता, सा च न प्रत्येकं व्यभिचारादित्यर्थः । इदमेवो-पसंहरति—तथा चेति । प्रकरणार्थं मूलमवतारयति—इत्यभिसन्धायेति । प्रथमपक्षेऽनुगतेन रूपेण हेतुतेत्यंशमादाय शङ्कते—ननु व्यक्त्योरिति । स्वरूपयोग्यता सामान्ययोः फलोपधानात्मिका कारणता विशेषयोरित्यर्थः ।

ननु कार्यगतप्रमात्वस्य कार्यतानवच्छेदकत्वे तदाकस्मिकं स्यादित्यत आह—प्रमात्वं त्विति ।

---

१. यद्यवच्छेदकव्यतिरेकेणैवेति कपुस्तके ।

किञ्च यत्कार्यं यत्कार्यविजातीयं तत्तत्कारणविजातीयकारणजन्यम्, यथा घटविजातीयः पटः, अन्यथा कार्यवैजात्यस्याकस्मिकतापत्तेः। घटज्ञानजातीयमपि कार्यं तद्विजातीयकार्यकारणविजातीयघटेन्द्रियसन्निकर्षादिजन्यमिति न व्यभिचारः। एवञ्चानित्यप्रमा अप्रमाकारणविजातीयकारणजन्या[1], अप्रमाविजातीयकार्यत्वात्, घटवत्। एवञ्चानुगतस्य प्रमाहेतुत्वे प्रमा स्वविरोध्यनुभवप्रतिबन्धकजातीयजन्या, जन्यानुभवत्वात्, अप्रमावदित्यादावपि न सिद्धसाधनम्। अपि चानित्यप्रमात्वं कार्यतावच्छेदकं बाधकं विना कार्यमात्रवृत्तिधर्मत्वात्, अप्रमात्ववत्। नीलघटत्वं तु विशिष्टं न कार्यतावच्छेदकं, प्रत्येकानुगतप्रयोजकद्वयादेव विशिष्टसिद्धिरार्थः समाजः। घटज्ञानत्वादौ तु बाधकम्।

वेदित्यपि वक्तुमापाततः शक्यत एवेत्यरुचेराह—किञ्चेति। तादृशसंस्थानवत्त्वमपि यद्यनुगतं तर्हि कुम्भकारविशेषनिबन्धनमेव, अन्यथाऽननुगतमेवेति सामान्यतो नियमग्रहे अनुगते विशेषावच्छेदके तदवच्छिन्ने विशेषसामग्र्यपि कल्प्यत एवेति भावः।

ननु बाधकाभावे सत्येव धर्मस्यावच्छेदकत्वम्; तच्चाननुगतादौ यथाऽननुगतत्वं तथोपाधित्वमत्रापीत्याशङ्क्याह—अपि चेति। अवच्छेदकान्तरोपपन्नकार्यत्वाधिकरणत्वस्वावच्छिन्नकार्यत्वप्रतियोगिककारणासम्भवैकव्यक्तिकत्वरूपबाधकाभावे सति कार्यमात्रवृत्तित्वं कार्यतावच्छेदकत्वे प्रयोजकम्। एवं सति बाधकपदस्य संकोचवृत्तित्वेनाकार्यवृत्तित्वरूपबाधकासंग्रहेण तद्रूपमात्राबाधकवति ज्ञानत्वादौ व्यभिचारवारणाय कार्यमात्रवृत्तित्वं[2] न तूपाधित्वमपि तद्बाधकमभावस्याजन्यतापत्तेरित्यभिसन्धाय हेतुमाह—बाधकमिति।

आपातत इत्यनेन युक्त्यसहत्वमुक्तम्। तदेव विवृणोति—तादृशेति। ननु बाधकाभावपदेन, सकलबाधकाभावो वा यत्किञ्चिद्बाधकाभावो वाऽभिमतः? आद्ये विशेष्यवैयर्थ्यम्। अकार्यवृत्तित्वस्यापि बाधकत्वात्। अन्त्ये नीलघटत्वादौ व्यभिचारः। अकार्यवृत्तित्वरूपकिञ्चिद्बाधकाभावस्य तत्रापि सत्त्वादित्यत आह—अवच्छेदकान्तरेति। अवच्छेदकान्तरोपपन्नकार्यत्वाधिकरणवृत्तित्वं नीलघटत्वे बाधकम्। स्वावच्छिन्नकार्यतानिरूपितैककारणासम्भवोऽनित्यघटज्ञानत्वे बाधकः। एकव्यक्तिकत्वमेतद्घटत्वादौ बाधकम्। एतत्त्रयाभावमात्रकं विवक्षितम्, न त्वकार्यवृत्तित्वरूपबाधकस्याप्यभावो विवक्षितो येन विशेष्यपदवैयर्थ्यं स्यादिति भावः।

---

१. एवं प्रमा अप्रमाकारणविजातीयकारणजन्या इति पाठान्तरम्।

२. एवमित्यारभ्य वृत्तित्वमितिपर्यन्तो ग्रन्थः आदर्शतालपुस्तके 'न' पुस्तके च नास्ति।

अस्तु वा तत्राप्यनुगतभोजकादृष्टहेतुकत्वम् , अन्यथा कार्यमात्रे नादृष्टं

अस्तु वेति । न चेहापि तादृशानुगतादृष्टहेतुकत्वेनैव साध्यसिद्धेरर्थान्तरमिति वाच्यं, दृष्टेनैवोपपत्तौ अदृष्टकल्पनानवकाशात् , तादृशादृष्टस्यापि गुणत्वाच्चेति भावः । अत्र यद्यपि यथाश्रुतं साध्यं बाधितमनित्यप्रमामात्रानुगतहेत्वसिद्धेः, अत एव स्वरूपा-

ननु स्वावच्छिन्नेत्यादिनैवाकार्यवृत्तेरपि वारणं (तथा सति विशेष्यं व्यर्थम्)[1] इति चेत्—न, स्वावच्छिन्नयावत्कार्यनियतपूर्ववर्त्त्यसम्भवस्य विवक्षितत्वात् । अस्ति च ज्ञानत्वाव-च्छिन्ना यावत्यः कार्यव्यक्तयस्तन्नियतपूर्ववर्त्यात्ममनोयोगादिरिति ।

नन्वेकव्यक्तिकत्वं न बाधकम् । एतद्घटप्रागभावादीनामेतद्घटत्वाद्यवच्छेदेन जनकत्वादिति चेत्—न । लघुयद्धर्मावच्छिन्नं प्रति अनन्यथासिद्धनियतपूर्ववर्त्तिसम्भवः स धर्मः कार्यतावच्छेदकः, तत्र तद्धर्मावच्छिन्नयावत्कार्याणां यद्यनुगतं पूर्ववर्त्ति नास्ति यदि वा स धर्म एवाकार्यवृत्तिरुभयथाऽपि नियतत्वाशबाध इति प्रथमवारणाय **स्वावच्छिन्नेत्यादि** । द्वितीयवारणाय **कार्येत्यादि** । अवश्यक-ल्प्यपूर्ववर्त्तिन एव कार्यसम्भव इत्यादिरूपान्यथासिद्धिर्द्वेधा पर्यवस्यति—अवच्छेदक[2]धर्मिणञ्चादाय । तत्र प्रथमा यथा दण्डत्वेन घटं प्रति हेतुताया क्लृप्ताया एतद्घट प्रति एतद्दण्डत्वेनान्यथासिद्धिः । यथा वा कपालत्वेन घटं प्रति हेतुताया क्लृप्ताया नीलकपालत्वेन नीलघट प्रति अन्यथासिद्धिः । द्वितीया यथा दण्डादिना एतद्घटस्याप्युपपत्तौ रासभ एतद्घट प्रत्यन्यथासिद्धिः । तत्र आद्याया वारक—**अवच्छेदकान्तरेति** । स्वावच्छिन्नकार्यतावच्छेदकान्तरावच्छिन्नकारणताकादेव यस्मा-त्तन्निष्ठधर्म्मान्तर कारणतावच्छेदकीकृत्य तन्न कार्यतावच्छेदकमित्यर्थः । एतावता द्वितीया न वारितेति तद्वारणाय **एकव्यक्तिकत्वम्** । एकमसाधारण कारणान्तरोपपन्नमिति यावत्तद्व्यक्ति-कत्वमित्यर्थः । **इदमुपलक्षणम्** । अन्यथासिद्धिचतुष्टयान्यतरनियतपूर्ववर्त्तिव्यक्तिकत्वं गुरुत्व बाधकतया द्रष्टव्यमिति सङ्क्षेपः ।

न न्वात्रापि विशेष्यसन्निकर्षादित एव प्रमालक्षणकार्योपपत्तिरिति चेत्—न, विशेष्यसन्निकर्षे समानेऽपि किञ्चिज्ज्ञानं घटविशेष्यकं किञ्चिद्घटत्वाभाववद्विशेष्यकमिति वैलक्षण्यस्य गुणकारणता विनाऽनुपपत्तेः । यद्वक्ष्यति—**अन्यथा नियामकं विनेत्यादि** । न च घटत्ववद्विशेष्यहेतुतयैव तदुपपत्तिः । तर्हि तस्यैव गुणत्वादिति सिद्ध नः समीहितमिति संक्षेपः ।

अस्तु वेति मूलमभ्युपगमवादेन । नहि घटज्ञानात् सर्वत्र समानो भोगो येन समानजातीय-मदृष्टं सर्वत्र हेतुः स्यादिति भावः । **अत एवेति** । स्वावच्छिन्नयावत्कार्येष्वनुगतपूर्ववर्त्त्यभावरूप-बाधकसत्त्वादेवेत्यर्थः ।

---

१. कंसगतो ग्रन्थो गपुस्तके नास्ति । २. अवच्छेदिनमिति गपुस्तके ।

सिद्धिरपि. तथाऽप्यनित्यप्रमात्वपदेनानित्यसाक्षात्कारिप्रमात्वादिकमेव विवक्षितम्। कार्यतावच्छेदकव्यापकत्वं साध्यं तादृशकार्यमात्रवृत्तिधर्मव्यापकत्वादिति हेतुरिति वा स्मर्तव्यम्।

वस्तुतस्तु सकलकार्यप्रमासाधारणमीश्वरीयमप्यज्ञानमेव गुण इत्यग्रे वक्ष्यामः। तथा च यथाश्रुतमेव सम्यगिति सारम्।

अनित्यसाक्षात्कारीति। यावदनुपदेऽनुगतो गुणो निरुक्तिं तदेवात्र विवक्षितम्। तच्चाग्रे विवेचनीयमेवेति भावः। कार्यतेति। समानाधिकरणवमात्रे साध्ये न गुणसिद्धिरिन्द्रियजन्यतावच्छेदकानित्यसाक्षात्कारत्वादिसामानाधिकरण्यमादायोपपत्तेरिति व्यापकत्वपर्यन्तमुक्तम्। इति सारमिति।

अत्र वदन्ति। यथार्थत्वं नैकम्। तद्वति तत्प्रकारकत्वमित्यत्र तत्पदार्थस्य घटत्वपटत्वादेरननुगतत्वात्।

किञ्च यत्र यद्ग्राह्यं तत्र तद्यथार्थज्ञानं गुण इति वाच्यम्। तथा चाननुगम एव। अत एव विशेष्यवृत्तिविशेषणज्ञानं सर्वत्रानुगतमिति केषाञ्चिन्मतमपास्तम्। येन सम्बन्धेन यो विशेष्यवृत्तिरित्यादेर्लोहितः स्फटिक इत्यादिप्रमात्वानुरोधेनावश्यवाच्यतयाऽननुगमात्।

अदृष्टमेवानुगतमित्यप्ययुक्तम्। सर्वत्र समानजातीयभोगाभावेन समानजातीयादृष्टे मानाभावात्।

किञ्च यद्यनित्यप्रमात्वमेकं भवेत्तदाऽवच्छेदकं स्यात्। तदेव तत्तत्पदार्थाननुगमेनाननुगतमिति। तस्मादाद्यपक्ष एव सम्यगिति।

अत्रोच्यते—स्वविशेष्यावृत्तिप्रकारकत्वरूपाणां भ्रमत्वानामभावसमुदाय एव प्रमात्वमिति न कार्यतावच्छेदकाननुगमः। स्वप्रकारकयद्विशिष्टप्रत्ययविशेष्ये तद्विषयसम्बन्धेन यन्नास्ति तत्प्रत्ययजनकानां तादृशविशेषणज्ञानानां भेदकूटो यत्रास्ति तादृशविशेषणज्ञानं तादृशविशेषणज्ञानविषयतापन्नविशेषणवज्ज्ञानं वा गुणत्वेन विवक्षितमिति न कारणतावच्छेदकाननुगमः। ईश्वरपर्यन्तधावनं तु अभावस्य पूर्वजातस्य प्रमानुरोधेनेति दिक्।

यद्वा विशेषणज्ञानं गुणः सर्वेषां ज्ञानानां प्रमात्वात्। धर्मिणि सर्वमिति न्यायात्। निर्विकल्पकवारणाय विशेषणपर्यन्तधावनम्। ईश्वरपर्यन्तधावनन्तु भावप्रमानुरोधेनेति। यद्वा अनित्यघटप्रमात्वाद्यवच्छेदेन यथार्थघटत्ववज्ज्ञानादिकं गुणः। न चान्वयव्यभिचारो दोषाभावरूपसहकारिविरहेण प्रयुक्तस्य तस्यादोषत्वादित्यत्र तात्पर्यम्।

केचित्तु अनित्यप्रमात्वं स्वाधिकरणमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्ति स्वाधिकरणमात्रावृत्तिधर्मावच्छिन्नकार्यताप्रतियोगिककारणताश्रयमात्रानुत्पाद्यकार्यमात्रवृत्तिधर्मत्वादप्रमात्ववत्। अत्र साध्ये द्वितीयमात्रपदं सर्वास्वनित्यप्रमासु गुणजन्यत्वसिद्धये, आद्यमात्रपदं नीलघटत्ववारणाय, द्वितीयं स्वरूपासिद्धिवारणाय, तृतीयं ज्ञानत्वादिवारणायेत्याहुः।

हेतुः स्यात् । एवमनित्यप्रमात्वं अनित्यज्ञानत्वावच्छिन्नकार्यत्वप्रतियोगिककारणताभिन्नकारणताप्रतियोगिककार्यतावच्छेदकम् , अनित्यज्ञानत्वव्याप्यकार्यतावच्छेदकधर्मत्वात् , अप्रमात्ववत् , इत्यनित्यप्रमायामप्रमाव्यावृत्तानुगतहेतुसिद्धिः, अन्यथानुगतकार्य्यानुपपत्तेः । तथा अनित्यप्रमात्वमप्रमाकारणतानवच्छेदकरूपावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं, भ्रमावृत्तिकार्यतावच्छेदकत्वात् , घटत्ववत् । चाक्षुषप्रमात्वं चाक्षुषाप्रमाकारणतानवच्छेदकरूपावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं, चाक्षुषभ्रमावृत्तिकार्यतावच्छेदकत्वात्, घटत्ववत् । अनित्यरजतप्रमात्वं रजताप्रमाकारणतावच्छेदकरूपानवच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं, रजतभ्रमावृत्तिकार्यतावच्छेदकत्वात् , घटत्ववत् , अन्यथा नियामकं विना चाक्षुषादिरजतज्ञानं किञ्चिद्रजतवृत्तिप्रकारकं किञ्चिद्रजतावृत्तिप्रकारकमिति नियमो न स्यात् , ज्ञानसामग्र्यास्तुल्यत्वात् ।

यत्तु[1] प्रमाया असाधारणकारणजन्यत्वे साध्ये प्रमान्यत्वमुपाधिः, न च पक्षेतरत्वम्, तव ईश्वरज्ञानस्य प्रमात्वात्पक्षस्य व्यावर्त्यत्वात् । उभयसिद्धव्यावर्त्तकत्वं तन्त्रम् , न तु व्यावर्त्त्यस्य उभयसिद्धिः, गौरवात् । व्यतिरेके

अनित्येति । अनित्यज्ञानत्वे व्यभिचारवारणाय व्याप्यान्तम् । तत्तज्ज्ञानत्वे तद्वारणाय कार्यतेत्यादिद्वयमप्युपात्तम् ।

तवेति । न चास्मन्मते पक्षेतरत्वमस्तु तत्र बाधोन्नीतत्वात् । उभयसिद्धं दूषणत्वं तन्त्रं न तु दूषणतया उभयसिद्धिरिति भावः ।

अनित्यप्रमात्वमिति मूलम् । अनित्यतत्तत्प्रमात्वमित्यर्थः । व्याप्यान्तमिति व्याप्यपदञ्चात्र भेदपरमिति ध्येयम् । एतानि च मूलेऽनुमानानि प्रकारार्थमिति द्रष्टव्यम् । दृष्टान्ते चाप्रमात्वपदं तत्तदप्रमात्वपरम् ।

यद्वा यथाश्रुतावेव पक्षदृष्टान्तौ । कार्यतावच्छेदकपदञ्च साध्यहेत्वोः कार्यतावच्छेदकव्यापकपरमिति । चाक्षुषभ्रमावृत्तीति मूले चाक्षुषपदं विशिष्टाभावप्रतियोगिविशेषणतया न व्यर्थम् । एवं रजतपदमपि ।

चाक्षुषप्रमात्वस्य नीलघटत्वतुल्यत्वादवच्छेदकत्वे मानाभावादिति केचित्—तन्न, अञ्जनविशेषादिना सूक्ष्मगोचरचाक्षुषप्रमादर्शनेन तत्र गुणविशेषजन्यताया आवश्यकत्वात् । चाक्षुषप्रमात्वपदेन च तादृशप्रमात्वमेवाभिमतम् । एवं रजतप्रमात्वमप्यूह्यम् ।

न चेति मूलम् । नैयायिकस्येत्यर्थः । न च जन्यप्रमामात्रस्य पक्षत्वादीश्वरप्रमाया अपि व्यावर्त्यत्वेन पक्षमात्रव्यावर्त्तकत्वाभावेन पक्षेतरत्वाभावादिति भावः । प्रमात्वात्पक्षस्येति मूले । न च

ऽसाधारणत्वञ्च पक्षेतरत्वस्यानुपाधित्वे बीजम्, तच्चात्र नास्ति, भगवज्ज्ञानस्य त्वत्सम्मतस्य सपक्षत्वादिति—तन्न, विपक्षबाधकबलेन हेतोः साध्यव्याप्यत्वेनोपाधेः साध्याव्यापकत्वात्।

नन्वस्तु प्रमायां दोषाभावो हेतुः आगन्तुकभावानपेक्ष्यज्ञानसामग्रीजन्यत्वं स्वतस्त्वम्।

यत्त्वभावो न कारणं, किन्तु दण्डत्वादिवत्कारणतावच्छेदकत्वेन सामग्रीभेदोपलक्षक इति—तन्न। जपाकुसुमादिसन्निधौ न प्रमा, तदसन्निधौ स्फटिकादौ प्रमोत्पत्तेरनन्यथासिद्धत्वेन हेतुत्वादिति चेत्—न। भूयोऽवयवेन्द्रियसन्निकर्षविशेषदर्शनादिसमवधाने प्रमा तदभावे त्वप्रमेति प्रमायां गुणोऽप्रमायान्तदभावो हेतुरित्येव किं न स्यात्। अथासदर्थविषयकत्वे सदर्थविषयकहेत्वभावो न प्रयोजकः, ज्ञाने सदर्थविषयतानियमेन तदसम्भवात्। सदर्थविषयकत्वेऽसदर्थविषयकारणाभावो हेतुः सम्भवति। प्रमायाः सदर्थमात्रविषयत्ववदप्रमायामसदर्थमात्रविषयत्वाभावादिति चेत्—तर्ह्यप्रमायाः सदर्थविषयता न स्यात्, हेत्वभावात्। सदर्थमात्रविषयत्वे असदर्थविषयहेत्वभावो हेतुरिति चेत्—तर्हि गुण एव तत्र हेतुः। तदभावस्त्वसदर्थविषयत्वे प्रयोजक इत्यस्तु।

ननु गुणाभावस्य साधारणत्वात्तदेव सत्यमसत्यञ्च न स्यात्, गुणतदभावयोरेकत्रासत्त्वादिति चेत्—न। दोषाभावेऽपि तुल्यत्वात्, क्वचित् कश्चिद्दोष इति गुणेऽपि समानम्। गुणाभावादसन्मात्रविषयकमपि ज्ञानं स्यादिति चेत्—न। दोषादप्यसन्मात्रविषयकज्ञानापत्तेः। सर्वत्र विषये दोषो न सम्भवतीति गुणाभावेऽपि तुल्यम्।

भगवदिति। न च तन्मते सपक्षाभावः बाधोन्नीतपक्षस्यैव सपक्षत्वादिति भावः।

आगन्तुकेति। असाधारणेत्यर्थः। तथा च न प्रमाया गुणजन्यत्वेन भगवत्सिद्धिरिति परं निगर्वः।

सन्मते तस्य पक्षेतरत्वपर्यवसानादनुपाधित्व सन्मते तस्य सत्त्वेऽपि बाधो न। तत्केनोपाधित्वमिति भावः।

न तु दूषणतयेति। न त्वेकरूपेण दूषणतयेत्यर्थः।

UNIVERSITY LIBRARY
1 JUN 950

अथ विशेषदर्शनादिर्गुणस्तदभावश्चाननुगत इति न तौ प्रमाप्रमाहेतू, किन्तु दोषतदभावाविति चेत्—तर्हि पित्तादिर्दोषस्तदभावश्चाननुगत इति तावपि न तत्र हेतू, स्वप्रमायां स्वाभावस्य व्यभिचारश्च। अथ दोषत्वं नैकम्। न हि तत्तद्भ्रमहेतुत्वं तत्, आत्मादौ गतत्वादननुगमाच्च। नापि भ्रममात्रहेतुत्वं, पित्तादेरननुगतत्वेन तदभावादसम्भवाच्च। नापि प्रमाहेत्वभावप्रतियोगित्वं, अन्योन्याश्रयात्, पित्तादेः स्वप्रमाहेतुत्वाच्च। नापि स्वप्रमाभिन्नप्रमाप्रतिबन्धकत्वम्। एवं हि प्रत्यक्षप्रतिबन्धकस्य सल्लिङ्गपरामर्शस्य दोषत्वादनुमितिः प्रमा न स्यात् भ्रमश्च स्यात्। तस्मात् क्वचित् कश्चिद्दोष इति चेत्—तर्हि

मुरारिमतमाशंक्य निषेधति—यत्त्विति। तथा चाप्रमावैलक्षण्येन प्रमायास्तद्धेतुविचित्रहेतुसिद्धिरेव पक्षधर्मताबलाद्गुणविषयत्वपर्यवसन्नेति भावः।

नन्वविनिगमः कारणत्वापादकतयोच्यते स च नास्तीत्याशंकते अथेति।

नैकमिति। तथा च न तदवच्छिन्नाभावत्वेन प्रमाहेतुत्वमिति भावः।

तस्मादिति। प्रकारान्तराभावात् भ्रमहेतुत्वग्रहार्थमुपजीव्यत्वाच्च तत्तत्पित्तत्वादिकमेव हेतुतावच्छेदकं तत्तद्विषयकत्वतत्तत्कालीनत्वादिकमेवाप्रमाया कार्यतावच्छेदकमित्यर्थः।

ईश्वरज्ञानस्यानागन्तुकस्य गुणत्वाद् व्याचष्टे असाधारणेत्यर्थ इति। नन्वेतावता परस्य किमिष्टमागतमित्यत आह—तथा चेति। इतिभावः शङ्कितुरिति शेषः। अथ विशेषदर्शनादिरिति मूलस्य तात्पर्यमाह—नन्विति। अविनिगमः दोषाभावमात्रस्य प्रमाकारणताया गुणाभावमात्रस्याप्रमाकारणताया च विनिगमकाभावः। कारणत्वापादकतया दोषापादकभावमात्रस्य प्रमाकारणत्वापादकतया गुणाभावमात्रस्याप्रमाकारणत्वापादकतया।

नन्वननुगमः कारकत्वाभावतयेति पाठेऽनेनाथ दोषत्वमिति मूलमवतारितमित्यवधेयम्। व्यभिचारोद्धाराय स्वप्रमा प्रति पित्तादेर्दोषत्वाभाव साधयितुं मूलमथेत्यादि कश्चिद्दोष इत्यन्तमित्येके।

अप्रमा प्रति अननुगमो नोद्धृत इत्यत आह—तत्तद्विषयकत्वेति।

गुणेऽपि तुल्यम् । स्यादेतत्, प्रमां भ्रमञ्चाकुर्वति ज्ञानहेतुस्तोमे मण्डूकवसाञ्जनदोषात् वंशोरगविभ्रमः, तदभावे वंशप्रमेति तत्र दोषाभावः प्रमाहेतुरित्यन्यत्रापि तथा, क्लृप्तत्वात् । मण्डूकवसा नयन एव दोषः न त्वचीति तत्र दोषाभावात् त्वचा वंशप्रमैव । गौरोऽहमित्यभेदभ्रमहेतुदोषसंस्कारसत्त्वेपि मम शरीरमिति प्रमेति चेत्—न । विशेषादर्शनस्य तत्र हेतुत्वम्, न तु संस्कारस्य, तदसत्त्वे तदसिद्धः । न च दूरे चक्षुषः सन्निकर्षेऽपि केशादौ सजातीयसंयोगे प्रमा, तदभावे नेति तत्र संयोगरूपो गुणः प्रमाहेतुरित्यन्यत्रापि गुणजन्यतेति वाच्यम्, तावद्देशवर्त्तिकेशसाक्षात्कारे स हेतुः तेन विना तदभावात् । तवापि तावद्दूरप्रमायां स हेतुः सन्निकृष्टकेशप्रमायास्तेन विनापि

स्यादेतदिति । अत्र प्रमामितिस्वरूपनिर्देशपरं भ्रमाजनकत्वमात्रस्य च वक्ष्यमाणान्वयव्यतिरेकप्रयोजकत्वात् ।

ननु तदभावो न प्रमाजनकस्तद्विनाऽपि त्वचा प्रमोत्पत्तेरित्यत आह—मण्डूकेति । तत्तदिन्द्रियतत्तद्विषयतत्तत्कालनियतत्वात् दोषाणामित्युक्तत्वादिति भावः । प्रमात्वनियतधर्मावच्छिन्नकार्यत्वप्रतियोगिककारणताश्रयत्वं गुणत्वञ्च च तावद्दूरवर्त्तिकेशसाक्षात्कारमात्रहेतोस्तद्विशेषप्रमासामान्यहेतुत्वमित्याह—तावदिति ।

ननु भ्रमं प्रति दोषस्यान्वयव्यतिरेकाभ्यां हेतुत्वे सिद्धेऽर्थादेव दोषाभावस्य प्रमाहेतुत्वं सेत्स्यति कृतं तस्य प्रमां प्रति व्यतिरेकप्रदर्शनेनेत्यत आह—अत्र प्रमामिति ।

वस्तुतस्तु द्वे अपि पदे विवक्षितार्थे एव दोषाभावेन विना प्रमामकुर्वति ज्ञानहेतुस्तोमे मण्डूकवसाञ्जनदोषाभावात् प्रमेति प्रमां प्रति दोषाभावस्य स्वतन्त्रान्वयव्यतिरेकयोर्दोषं विना भ्रममकुर्वति ज्ञानहेतुस्तोमे तस्मात् दोषादप्रमेत्यप्रमां प्रति दोषस्य स्वतन्त्रान्वयव्यतिरेकयोश्च प्रदर्शनीयत्वादिति तावद्दूरवर्त्तित्वविशेषणस्यावश्यकतामाह—मूले तवापीति । तथा च तावद्दूरवर्त्तित्वविशेषणे आवयोर्भुवे तावद्दूरवर्त्तिकेशविशेष्यकसाक्षात्कारत्वं वा कार्यतावच्छेदकं तावद्दूरवर्त्तिकेशत्वप्रकारकसाक्षात्कारिप्रमात्वं वा कार्यतावच्छेदकमिति विचारे मम केशपदं तव केशत्वप्रकारकपदमिति प्रकारकत्वांशः प्रमात्वांशश्च तवाधिकः ।

किं च केशे यत्र स्थूलस्य काकादेरभेदारोपस्तत्रापि सजातीयसंयोगस्यापेक्षितत्वात् तदुक्तम्—सामान्यहेतुत्वमेव सम्यगिति भावः,

भावात् । तत्रापि वा दोषाभावः कल्प्यो दोषजन्यत्वे अप्रमात्वापातात् ।

ननु विशेषदर्शनं प्रमाहेतुः विशेषादर्शनस्य दोषत्वे तदभावस्य हेतुत्वादिति चेत्—तर्हि दोषाभावत्वेन स हेतुर्न तु गुणत्वेन भावत्वेन वा । किञ्च

ननु तावद्दूरप्रमायामपि हेतुत्वेन गुणत्वं तावद्दूरप्रमात्वस्यापि प्रमात्वनियतत्वात् । अन्यथा प्रमात्वावच्छिन्नमात्रहेतोर्गुणत्वेन सल्लिङ्गपरामर्शादेरण्यतत्त्वापत्तेरित्यरुचेराह—तत्रापीति ।

ननु भूयोऽवयवेन्द्रियसन्निकर्षे प्रमा तदभावे नेत्यन्वयव्यतिरेकतौल्यात् प्रमायां गुणस्तदभावोऽप्रमायां हेतुरिति तुल्यम् । अन्यथा दूरेऽपि तज्जन्यत्वे प्रमात्वप्रसङ्गादित्यपि सुवचम् ।

वस्तुतस्तु दूरत्वमपि इन्द्रियभूयोऽवयवासन्निधिरेवेति दूरत्वदोषत्ववादिना त्वया तदभावहेतुत्वमभिमतमिति प्रतिबन्दिसत्त्वेऽपि तामुपेक्ष्य त्वदुक्तयुक्तेरेव सिद्धन्नः समीहितमित्यभिसन्धाय शङ्कते—नन्विति ।

ननु विशेषदर्शनाभावाभावो यदि हेतुस्तर्हि लाघवाद्विशेषदर्शनत्वेन हेतुर्न तु तदभावाभावत्वेन गौरवादत एव गुणसिद्धिः । न हि प्रमाजनकतावच्छेदकरूपावच्छिन्नाभावत्वेनाजनकत्वे सति भ्रमजनकत्वादन्यद्दोषत्वम्[1] । अप्रमाजनकत्वावच्छेदकरूपावच्छिन्नाभावत्वेनाजनकत्वे सति प्रमाजनकत्वादन्यद् गुणत्वमिति पूर्वास्वरसादाह—किञ्चेति ।

ननु तावदिति । नन्विदमनुपपन्नम् । उक्तन्यायेन प्रमात्वस्य कार्यतावच्छेदककोटावप्रवेशादिति । मैवम् । सजातीयसंयोगविशेषस्य च भ्रमविरोधितया प्रमाविशेषहेतुत्वेन च तदभिधानात् । अस्ति हि केशानां संयोगविशेषो यस्मिन् सति तेषु न काकादेरभेदारोपः किन्तु केशप्रमैवेति ।

इन्द्रियसन्निकर्षविशेषणस्य कृत्यमाह—अन्यथेति ।

ननु तत्र दूरत्वदोषादेव प्रमानुत्पाद इत्यत आह—वस्तुतस्त्विति । भावत्वेनेति मूलम् । यद्यपि भावत्वमतिप्रसक्तं तथापि भावधर्मो विशेषदर्शनत्वमेव भावत्वपदेनोक्तम् ।

प्रमेति । अत्र सत्यन्तं गुणाभाववारणाय, भ्रमजनकत्वं च भ्रमत्वव्याप्यधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वम् । एवं च दोषत्वनिर्वचनं न दृष्टान्तार्थं, विशेषादर्शनस्यादोषत्वार्थं वा । अप्रमेति । अत्र सत्यन्तं दोषाभाववारणाय । प्रमाजनकत्वं च प्रमात्वव्याप्यधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वम् ।

---

१. अवच्छेदकरूपाभावत्वेनाजनकत्वे सति भ्रमजनकत्वादन्यद्दोषत्वमिति कपुस्तके ।

विशेषदर्शनप्रतिबन्धकाः पित्तादयो दोषाः आवश्यकत्वान्न विशेषादर्शनम्। न च तेषामननुगतत्वेन विशेषदर्शनप्रतिबन्धकतयाऽनुगमे लाघवात् विशेषादर्शनमेव हेतुरिति वाच्यम्। क्वचित् कश्चिद्दोष इत्यनुगमात्। अन्यथा पित्तादितोऽप्यप्रमा न स्यात्। अननुगमात्, मण्यादेरिवाननुगमेप्यदोषत्वाच्च। तदभावकूटस्य हेतुत्वात्। सर्वत्र विशेषादर्शनमेव हेतुः, पित्तादेरननुगमेन तत्रोपक्षयादिति चेत्—न। पित्ताद्युत्कर्षेण भ्रमोत्कर्षात्। पित्तादेरदोषत्वे च विशेषप्रमैव कुतो न भवति, विशेषस्य विशेषान्तरादर्शनादिति यदा तदा अनवस्थैव। किञ्च विशेषदर्शनं न प्रमामात्रे न वा प्रत्यक्षप्रमायां हेतुर्व्यभिचारात्। तत्रैव तद्धेतुत्वेऽनवस्थापाताच्च। अथ प्रत्यक्षे इन्द्रियसन्निकर्षो गुणः अप्रमांशे तदर्थस्यासत्त्वेन सन्निकर्षाभावात् दोषो हेतुः। न च प्रमांशेपि स

विशेषेति। एवकारोऽप्यर्थः। तथा चोपजीव्यतया आवश्यकत्वात् पित्तादिरनुगमकतया लाघवाद्विशेषादर्शनमित्युभयमपि दोष इति भावः। अत एवान्यथेत्यादि वक्ष्यते। अन्यथा पित्ताद्यदोषताया तदलग्नतापत्तेरिति।

क्वचिदिति। विषयेन्द्रियपुरुषसमवायाद्यवच्छेदेन हेतुत्वस्यानुगतत्वादित्यर्थः।

केचित्तु अतएव वा गुणत्वसिद्धिः। न हि प्रमाजनकतावच्छेदकरूपावच्छिन्नाभावत्वेन जनकत्वादन्यत्तव दोषत्वम्। अप्रमाजनकतावच्छेदकरूपावच्छिन्नाभावत्वेन जनकात्वादन्यद्गुणत्वमिति पाठ.। तत्र अत एवेति। विशेषादर्शनाभाववत्त्वेन जनकत्वादेवेत्यर्थः। प्रमेति। प्रमाजनकतावच्छेदकावच्छिन्नो मुख्याभावो यस्य तत्त्वेनोपलक्षितस्य जनकत्वादित्यर्थः। तवेति। तवापीत्यर्थः। एवमप्रमाजनकतावच्छेदकावच्छिन्नो मुख्याभावो यस्य तत्त्वेनोपलक्षितस्य जनकत्वादित्यर्थः। इत्यर्थ इति। तथा चाननुगमकतया विशेषादर्शनस्य दोषत्वं नेति भावः।

ननु विशेषदर्शनप्रतिबन्धकत्वेनानुगमात्कथमननुगम इत्यत आह मूले—मण्यादेरिवेति। तत्तद्भ्रम प्रति तत्तद्दोषस्य हेतुत्वादित्यर्थः। प्रमा प्रति च दोषाभावस्य नाननुगम इत्याह—मूले—तदभावेति।

ननु मण्यादेरननुगतस्य दोषत्वसंगत्या इह न तथेत्याशयेन शङ्कते मूले—सर्वत्रेति।

ननु विशेषप्रमाविरहस्तज्जनकगुणाद्यभावादेव स्यादित्यरुचेराह मूले—किञ्चेति। तत्रैवेति मूलम्। इदं च विशेषदर्शनस्य विशेषप्रमापरत्वे विशेषप्रत्यक्षपरत्वे वा द्रष्टव्यम्।

हेतुः, अदोषत्वप्रसङ्गात्, प्रमांशस्याप्रमात्वप्रसङ्गाच्च। साक्षात्कारित्वञ्चेन्द्रियसन्निकर्षजन्यत्वादिति चेत्—न। ज्ञाने विषयरूपस्यांशस्येन्द्रियतद्दोषाजन्यत्वात् अप्रमांशे चेन्द्रियसन्निकर्षाभावेन साक्षात्कारित्वं न स्यात्। दोषस्य तद्धेतुत्वे अतिप्रसङ्गोऽननुगमश्च। प्रमायां प्रमाप्रमायाश्च याथार्थ्यप्रयोजकमस्त्यप्रमायां दोषवदिति चेत्—न, दोषाभावस्य सत्त्वादिति।

उच्यते। प्रमामात्रे नानुगतो गुणः, किन्तु तत्तत्प्रमायां भूयोऽवय-

यद्यपि प्रमामात्रे नानुगतो गुणस्त्वन्मते तादृशवस्त्वप्रसिद्धेस्तथापि प्रत्येकप्रमितौ प्रत्येकस्य गुणत्वं त्वन्मतेनैवास्त्वित्यभिसन्धाय सिद्धान्तयति—प्रमेति। अस्मन्मते त्वनुगत एव सर्वसाधारणो गुणोऽस्तीति वयं वक्ष्यामः।

अत्र वदन्ति—तत्तत्प्रमायामपि नोक्तानुगतहेतुता। तथा हि न तावत् प्रत्यक्षप्रमायां भूयोऽवयवेन्द्रियसन्निकर्षः, शब्दादिप्रत्यक्षाव्याप्तेः। नापि यथार्थ-

स हेतुरिति मूलम। स एव हेतुरित्यर्थः। तथा चेन्द्रियसन्निकर्षस्य तेनान्यथासिद्ध्या न प्रमाहेतुत्वमिति तटस्थशङ्कार्थः।

अदोषत्वेति मूलम्। अप्रमासाधारणकारणत्वदोषत्वादित्यर्थ.।

नन्वेवं साक्षात्कारित्वमपि भ्रमांशे न स्यात् तदंशे इन्द्रियसन्निकर्षजन्यत्वाभावादित्यत आह—मूले साक्षात्कारित्वं चेति। लाघवादिन्द्रियसन्निकर्षजन्यत्वमेव साक्षात्त्वे तन्त्रम्, न तु तदंशे इन्द्रियसन्निकर्षजन्यत्वमिति भावः।

नन्वंशे जनकत्वमिदमेव यदंशविषयकत्वावच्छेदेन जनकत्वमित्यत आह—मूले अप्रमांशे चेति। स्वप्रकाशाद्यंश विहाय यदंशे यत्सन्निकर्षजन्यत्व तन्मते तदंशे इन्द्रियसन्निकर्षजन्यत्वस्य साक्षात्त्वप्रयोजकत्वात्। अत एव प्रत्यभिज्ञाया तत्तांशे परोक्षत्वम्[1]। न्यायनये च स्मरणरूपसन्निकर्षजन्यत्वात् भ्रमांशे प्रमात्व स्यादिति दूषण बोध्यम्।

अतिप्रसंग इति मूलम्। भ्रमानुमित्यादेरपि साक्षात्त्वापत्ति.। दोषविशेषस्य तथात्वेऽननुगम इत्यर्थः।

ननु प्रमामात्रेऽपि ग्राह्ययथार्थज्ञानमनुगुणं ? वक्ष्यमाणरीत्येश्वरमादाय भवत्येवेत्यत आह–त्वन्मत इति। त्वया ईश्वरानङ्गीकारादित्यर्थः।

वयं वक्ष्याम इति। एतत्तात्पर्यमनित्यप्रमात्वमिति प्रकरणे दर्शितम्।

---

१. तदंशे एव साक्षात्त्वम्। अत एव प्रत्यभिज्ञाद्वैविध्यमिति।

लिङ्गपरामर्शोऽनुमितौ, गन्धप्रागभावावच्छिन्नपक्षकगन्धानुमितेर्बाधप्रतिसन्धानदशायामुत्पन्नाया. प्रामाण्यापत्तेः। सादृश्यधीश्च वैधर्म्योपमितावेव नास्ति। वाक्यार्थधीश्च शुकबालादिशब्दप्रमायामेव नास्ति। न चेश्वरीय तत्रापि सुलभमेवेति वाच्य. अन्योन्याश्रयात्। प्रमाया गुणजन्यत्वसिद्धिं विना नान्यत् तत्र प्रमाणमिति तत्सिद्धौ व्यभिचारस्याभावे वाक्यार्थज्ञानहेतुता. तस्यां च सत्यां तत्सिद्धिरित्यन्योन्याश्रयात्। किं च यदि सामान्यं सामान्ये प्रयोजकं भवेत् तदा तद्विशेषस्य तद्विशेषप्रयोजकता 'यत् सामान्य' इति न्यायात्, न चेह वाक्यार्थज्ञानसामान्यस्य वाक्यजज्ञानसामान्यहेतुत्व येन तद्विशेषयथार्थज्ञानयोर्हेतुहेतुमद्भावः। न च तदेव कुत इति वाच्यं. विसंवादिशुकवाक्यजज्ञानादिषु व्यभिचारात्।

ननु नेदं अन्योन्याश्रयत्वम्, अपूर्वकारणव्यक्तिविशेषाननुमानापत्तेः। तथा हि—सर्वत्र विशेषयोरन्वयव्यतिरेकग्रहः सामान्ये कारणतायां प्रमाणं, न तु पक्षधर्मताबललभ्यान्वयव्यतिरेकग्रहः, अनुमानमात्रोच्छेदात्। न चातिप्रसङ्गः, सामान्यविशेषभावस्य नियामकत्वादिति वक्ष्यते। तथा च लौकिकास्मदादिवचसि गृहीतान्वयव्यतिरेकतयाऽन्यत्राप्यनुमानेन तत्सिद्धया क्वान्योन्याश्रयत्वम्, अनैकान्तिकत्वं वा। न च प्रागेव व्यभिचारस्फुरणे कारणत्वग्रहाभावेनानुमानमेव दुःशकं, निश्चयात्मकस्फुरणाभावात्, संशयात्मकतादृशस्यादोषत्वात्।

यत्तु सामान्याहेतुत्वं विशेषहेतुत्वे बाधकमुपन्यस्तं तत्तु विपरीतनियमप्रतीतिनिबन्धनम्। तथा हि—विशेषाहेतुत्वं सामान्याहेतुत्वे भवति तन्त्रं. निर्विशेषितसामान्याभावात्, ग्राहकाभावाच्च। विशेषान्वयव्यतिरेकस्यैव सामान्यहेतुभावग्राहकत्वात्। तादृशान्वयव्यतिरेकस्य सामान्यहेतुतायामिव विशेषकारणतायामपि प्रमाणत्वात्। न तु सामान्याहेतुत्वमपि विशेषाहेतुत्वे, बीजाभावात्, अत एव यद्विशेषयोरिति नियमे बाधकाभावे सतीति विशेषणम्, अन्यथा विशेषहेतुत्वान्यथानुपपत्त्यैव तद्धेतुत्वावश्य-

प्रामाण्यापत्तेरिति। पक्षतावच्छेदकावच्छिन्नसाध्यविषयत्वस्यानुमितौ वक्ष्यमाणत्वान्नात्रेष्टापत्तिरित्यवधेयम्।

अन्योन्याश्रयमेव विवृणोति—प्रमाणमिति। विसंवादीति। तत्रेश्वरस्यापि वाक्यार्थज्ञानाभावादिति भावः।

अन्यत्राप्यनुमानेनेति। इद च विशेषान्वयव्यतिरेकग्रहकाले सामान्यधर्मयोरनुपस्थितौ, यदा च तत्काले सामान्यधर्मोपस्थितिस्तदा प्रत्यक्षत एव कारणताग्रह इति।

कत्वे नियम एव स्यान्न तु बाधकाभावविशेषणप्रयोजनम्। अथ बाधकं विनेत्यस्याप्रक्षेपे सर्वसामान्यहेतुतापत्त्या प्रमेयाभिधेयहेतुतापि प्रसज्येत। तथा च तत्र व्यभिचार-वारणाय तद्विशेषणम्। तेनायमर्थः—सामान्यत्वे सत्यपि यत्र न बाधकं तत्र हेतुतेति। अत एव यत्सामान्यं हेतुरिति नियमान्तरेऽपि बाधकाभावेऽपि सतीति विशेषणम्। अन्यथा द्रव्यगुणसामान्यहेतुतायां तद्विशेषपृथिवीस्नेहादिष्वपि हेतुभावापत्तिरिति चेत्-

मैवम्। एवं हि न नियमो यद्वाक्यार्थज्ञानसामान्येनैव हेतुना भवितव्यम्। यथार्थवाक्यार्थज्ञाने विशेषप्रमारूपविशेषप्रयोजकत्वेन वक्तृज्ञानसामान्यस्यैव शाब्द-ज्ञानसामान्यहेतुत्वसम्भवात्। विशेषे यथा याथार्थ्यरूपमेकं विशेषणं तथा वाक्यार्थ-विषयत्वविशेषणान्तरप्रक्षेपेऽपि बाधकाभावात्। तथा च सामान्ये वक्तृज्ञानं पदज्ञान-मेव सामान्यकारणमिति किमनुपपन्नम्[1]।

अस्तु वा यावतां विशेषरूपेण विशेषकार्यप्रयोजकता तावतामेव सामान्येन रूपेण सामान्यकार्यप्रयोजकतेत्यर्थः। तेन वाक्यार्थस्य[2] विशेषे प्रवेशे सामान्य-प्रवेशोऽप्यावश्यकः। स चेत्-न, तदा विशेषप्रवेशोऽपि दुर्लभः। सामान्यविशेषकार्य-कारणभावग्रहस्य विशेषान्वयव्यतिरेकमात्रग्राह्यत्वेन समानसामग्रीकत्वादिति यदि, तदा मास्तु अन्वयव्यतिरेकेणास्य विशेषस्य हेतुता कथितविरोधादित्यन्वयव्यतिरेकयोः तत्राप्रामाण्यं प्रमाया गुणजन्यत्वेन पक्षधर्मताबलात् तद्विशेषमात्रहेतुत्वञ्च केन वारणी-यम्। न हि अनुमानेन पक्षधर्मताबलात् विशेषहेतुसिद्धिरपि तत्सामान्याहेतुत्वेन बाध्यते। यद्वा बाधकाभावे सतीति तद्विशेषणादेवैतद्दोषानवकाशः। विसंवादिशुक-वाक्ये व्यभिचारादेव वाक्यार्थज्ञानसामान्ये बाधितत्वम्, विशेषे च तन्नास्तीति किमनुपपन्नम्।

अस्तु वेति। यावता विशेषाणां सामान्येन रूपेण सामान्यकार्यहेतुता तावता स्वातन्त्र्येण विशेषेणावश्यं हेतुतेत्यर्थः, तथा च पदज्ञानादिकमपि स्वातंत्र्येण विशेषे हेतुः स्यादिति भावः। पद-ज्ञानादिकं च तथा न हेतुरिति वाक्यार्थज्ञानमात्रस्य स्वातन्त्र्येण विशेषहेतुताया तन्मात्रनिष्ठं च ज्ञानत्वमुक्तनियमरक्षायै सामान्यहेतुतावच्छेदकमस्त्वित्याह—तेनेति। वाक्यार्थस्य— वाक्यार्थ-मात्रस्य पाठान्तरे। यावत्सामान्यघटितविशेषधर्मो विशेषहेतुतावच्छेदकः तावता सामान्याना सामान्यकार्ये हेतुतावच्छेदकत्वनियम इत्यर्थः। तथा च वाक्यार्थज्ञानत्वयथार्थज्ञानत्वाभ्यामपि सामान्यकार्यहेतुताऽवच्छिद्यतामिति भावः। अप्रामाण्यम्। अग्राहकत्वम्।

---

१. वाक्यार्थविषयत्वविशेषणमिति किमनुपपन्नमित्येव कपुस्तके पाठः।

२. वाक्यार्थविषयत्वस्येति कपुस्तके पाठः।

वस्तुतस्तु वाक्यसामान्ये पदज्ञानमेव हेतुः। तद्विशेषे इदं वाक्यमस्यार्थं बोधयत्विति तात्पर्यपूर्वकवाक्ये वाक्यार्थज्ञानसामान्यं हेतुः, अतस्तद्विशेषे प्रमाणशब्दे यथार्थबुबोधयिषापूर्वकशब्दे वा यथार्थवाक्यार्थज्ञानं हेतुरिति तज्जन्यप्रमायास्तदेव गुण इति सारम्। न चैवं क्वचिद्व्यभिचार इति चेत्—

मैवम्। एवं मा भूदन्योन्याश्रयो मा भूद्वा दोषान्तरम्, ईश्वरज्ञानद्वारा सर्वसामञ्जस्यात्। ईश्वरज्ञानद्वारा प्रमामात्र एव यथार्थग्राह्यज्ञानमात्रस्य गुणत्वमेवं प्रसज्येत। न चेष्टापत्तिः। सामान्यविशेषयोरेकप्रयोज्यतापत्तेः। वाक्यार्थज्ञानमपि ग्राह्यज्ञानमेव। तथा च प्रमामात्रे शाब्दप्रमायाश्च तुल्यप्रयोज्यतापत्तिः। न च वक्तृविशेषणात् विशेषः। न हि तदन्तर्भावेण जनकता, गौरवादपि तु वाक्यार्थज्ञानत्वेन तत्तु वस्तुगत्या वक्तुरित्यन्यदेतदित्यादिकमनुशयस्थानमनेकमिति।

अत्र ब्रूमः। यत्सामान्ये यत्सामान्यं प्रयोजकं बाधकं विना तद्विशेषे तद्विशेषस्य प्रयोजकत्वमिति नियमात् प्रमामात्रे कश्चित्, कश्चित् विशेषे प्रत्यक्षादौ, कश्चित्तद्विशेषेऽपीति वस्तुगतिः। तदिहाप्युक्तस्तगुणानां यदि प्रत्येकं प्रत्यक्षादिप्रमितावपि नानुगमः किमनेन, यावत्स्वेवानुगमस्तावत्स्वेव गुणत्वसम्भवात्। तथा हि—स्थूलावयविप्रत्यक्षप्रमितौ भूयोऽवयवेन्द्रियसन्निकर्षः, पक्षतावच्छेदकाविरोधिसाध्यकानुमितिप्रमायां यथार्थपरामर्शः, सादृश्यगर्भातिदेशवाक्यार्थधीपूर्वकप्रमोपमितौ सादृश्ययथार्थज्ञानं गुणः, प्रमासामान्ये तु यथार्थग्राह्यज्ञानम् ईश्वरज्ञानस्य सर्वविषयकस्य तद्धेतुत्वेन तद्व्यभिचाराभावात्।

शुकाद्युदीरितप्रमाणशब्दे तदभावादाह—यथार्थेति। तज्जन्यप्रमायामित्युपलक्षणम्। वाक्यसामान्यजज्ञाने पदज्ञानबुबोधयिषापूर्वकवाक्यज्ञानं वाक्यार्थज्ञाने हेतुरित्यपि द्रष्टव्यम्। तथा च शुकादिवाक्यजविसंवादिज्ञानविशेषे स्वातन्त्र्येण पदज्ञानस्य हेतुत्वमस्तीत्युक्तनियमोऽस्त्येवेति भावः।

दोषान्तरम्। सामान्यहेतुत्वे विशेषाहेतुत्वम्। ईश्वरज्ञानद्वारा इत्युपलक्षणम्। उक्तगत्या चेति ज्ञेयम्।

स्थूलेति। स्थूलावयवकेत्यर्थः। भूयोवयवेन्द्रियसन्निकर्ष इत्यत्र भूयःपदेन स्थौल्याभिधानादिति भावः।

पक्षतावच्छेदकाविरोधीति। पक्षतावच्छेदकावच्छिन्नपक्षनिष्ठसाध्यव्याप्यवत्त्वप्रमा पक्षतावच्छेदकावच्छिन्नसाध्यकानुमितिः।

ननु प्रत्यक्षानुमित्यादौ ग्राह्यज्ञानस्यान्वयसम्भवोऽपि नास्ति, तत्कुतोऽन्वयव्यतिरेकाभ्यां तद्ग्रहे ईश्वरज्ञानद्वारा ऽव्यभिचारः समर्थनीय इति चेत्—न। क्वचिद्विशेषे तद्ग्रहस्य सामान्यहेतुत्वपर्यवसायित्वात्, न तु प्रतिव्यक्तिविशेषं तद्ग्रहस्तत्र तन्त्रम्, असम्भवात्। क्वाचित्कस्तद्ग्रहः तत्रापि शाब्दज्ञाने तथाभावात्।

वस्तुतस्तु प्रत्यक्षानुमित्योरुपमितेर्वा न तद्दुर्भिक्षं, धारावहनस्थलेऽनुमित्साद्यपेक्षानुमित्यादौ च तद्ग्रहसौलभ्यात्। अत एव न प्रमामात्रस्याकस्मिकत्वम्। अत एव प्राच्यानुमानानि न दुष्टानीत्युक्तम्।

नन्वेवमुक्तविशेषाणां विशेषान्तरे ग्राह्यज्ञानस्य सामान्ये प्रयोजकत्वे प्रत्यक्षादिप्रमायामनुगतानतिप्रसक्तहेत्वभावादा[1]कस्मिकतापत्तिरिति चेत्—न। विशेषणविशेष्योभयेन्द्रियसन्निधि[2]यथार्थपक्षतावच्छेदकसाध्याविरोधित्वज्ञानयथार्थातिदेशवाक्यार्थीभूतधर्मवत्त्वज्ञानयथार्थवाक्यार्थज्ञानानां च तत्सृष्ट्यानुगतानां गुणानां सम्भवात्। विशेषणविशेष्यसन्निकर्षश्चोभयप्रतियोगिक एकस्तेन गृह्यमाणारोपेऽन्यधर्मस्यापरत्रारोपे उभयसन्निकर्षेऽपि न व्यभिचारः। एवं सति दण्डीत्यादिप्रत्यक्षे दण्डपुरुषनिरूपित-

ननु सामान्याहेतुत्वमपीति। प्रमेयत्वाभिधेयत्वाभ्यामकार्यकारणभावेऽपि विशेषयोः कार्यकारणभावादिति। अत एवेति। यत एवोक्तव्याप्तिर्न भवतीत्युत्सर्गः, अत एव तज्ज्ञापनायात्र बाधं विनेति विशेषणम्। तथा च न सामान्ययोर्हेतुहेतुमद्भावाभावेन विशेषयोस्तदभावानुमानमिति भाव —

[3]प्रमाया गुण इत्यर्थः। यद्वा पक्षतावच्छेदकसमानाधिकरणसाध्ये प्रमायामनुमितिप्रमाया यथार्थलिङ्गपरामर्शो गुण इत्यर्थ। गन्धप्रागभावावच्छिन्नपक्षकानुमितेरपि पक्षतावच्छेदकसमानाधिकरणसाध्ये प्रमात्वमिति भावः। इदमुपलक्षणम्। लाघवोपनीतधर्मवत्साध्यगोचरायामनुमितिप्रमाया तद्धर्मवत्साध्यवज्ज्ञानं गुण इत्यपि ज्ञेयम्।

पक्षतावच्छेदकेति। अनुमितिविषयीभूतपक्षतावच्छेदकसम्बन्धाश्रयसाध्यस्य ज्ञानमित्यर्थः। न्त्वेवमित्यादिना गुणान्तरं वक्ष्यति।

नन्वेक इत्ययुक्तम्—विशेषणेन रूपादिना संयुक्तसमवायस्य विशेष्येण घटेन सयोगस्य सन्निकर्षत्वात्। न च विशेष्यसन्निकर्षघटितविशेषणसन्निकर्षस्तदर्थः। दण्डीपुरुष इत्यादावभावादिति चेत्—न। एको विलक्षणो विशेष्यवृत्तिविशेषणसन्निकर्षो यद्वा विशेषणवद्विशेष्यसन्निकर्ष इति भावात्।

---

१. हेतुत्वभावादिति नपुस्तके पाठ। २ विशेष्योभयसम्बन्धि इति क पुस्तक पाठः।
३ अत्र किञ्चित्त्रुटितम्

संयोगयोर्नानात्वे व्यतिरेकव्यभिचारः। एकजातीयत्वविवक्षायां गृह्यमाणारोपस्थले तदेव दोषतादवस्थ्यम्। नापि विशिष्टज्ञानजनकीभूतविशेषणसन्निकर्षस्तथा। तथा सति अन्यं प्रतीत्यादावेवेत्यन्यथासिद्धे सुरभि चन्दनमित्यादौ तदभावाच्च। तस्मात् विशेषणवद्विशेष्येन्द्रियसन्निकर्ष एव तदर्थ इति भाव। तेन गृह्यमाणारोपेऽन्यधर्मस्यापरत्रारोप उभयसन्निकर्षेऽपि न व्यभिचार.[1]। न च प्रथमचरमयोर्निर्विकल्पकाव्याप्तिः सामान्यविशेषोभयैकप्रयोज्यत्वदोषप्रसङ्ग। प्रथमे तस्याप्रमात्वात्। प्रमात्वे वा विशेषणादिपदस्य ज्ञानविषयीभूतयावत्परत्वात्। न च न तु यावत्प्रत्येकत्वेन्द्रियसन्निकर्षो हेतुरिति प्रमाणनिबन्धविरोध.। विशेष्यसन्निकर्षमात्रहेतुत्वनये तत्फक्किकावतारात्। विषयेन्द्रियसन्निकर्षत्वेन हेतुत्वं विषयत्व यावत्येव न तु यावत्त्वसाम्यवच्छेदकत्वेन प्रविष्टमित्यत्र वा तात्पर्यम्। चरमे नूक्तदोषप्रसङ्ग एव नास्ति। प्रमामात्रे ग्राह्ययथार्थज्ञानत्वेन शाब्दप्रमायां वाक्यकारणीभूततादृशज्ञानत्वेनैकपदार्थेऽपरपदार्थसंसर्गविषयक[2]यथार्थज्ञानत्वेन वा जनकत्वात्। न चैवमनुमित्यादावपि पक्षतावच्छेदकसमानाधिकरणसाध्यप्रमात्वादिना जनकत्वमस्तु किमनेन गुणेनेति वाच्यं, गुणान्तरस्य गुणान्तरानपवादकत्वात्। तथा चोक्तरूपगुणान्तरसत्त्वेऽपि प्रत्यक्षादेर्ग्राह्यप्रत्यक्षत्वपक्षतावच्छेदकसमानाधिकरणसाध्यप्रमात्वयथार्थप्रवृत्तिनिमित्तज्ञानत्वादीनामपि तत्तत्प्रयोजकता। अत एव शाब्दप्रमाया गुणान्तरं योग्यताप्रमा।

ननु ग्राह्ययथार्थज्ञानमात्रं तदा प्रमामात्रे तन्त्रमुच्येत यदि ग्राह्यज्ञानमात्र ज्ञानमात्रे तन्त्रं स्यादुक्तयुक्तेरिति चेत्—न। तत्र बाधकसत्त्वेन तथाऽभावादित्युक्तप्रायात्। ग्रन्थस्त्वेव योजनीयः—प्रमामात्रे नानुगता गुण इत्यनन्तरमस्त्वित्यध्याहार्य्यम्। प्रत्येकमेव गुणत्वमित्यत्र केन वारणीयमित्यध्याहार्यम्। तेनाभ्युपगमसिद्धान्तरीतिः स्फुटा

न च प्रथमेति। प्रथमे निर्विकल्पकाव्याप्त्यनुगमे सामान्यविशेषयोस्तुल्यप्रयोजकत्वदोषो न चेत्यर्थः।

एवमिति। ईश्वरज्ञानमादाय गुणसमर्थन इत्यर्थः।

पक्षतावच्छेदकेति। अनुमितिसमानविषयप्रमात्वादिनेत्यर्थः।

अत्र केचित् अनुमितिप्रमात्वादेरनन्तपदार्थघटितत्वेनाननुगतत्वात्, कारणशरीरेऽपि पक्षतावच्छेदकादेर्यथार्थत्वस्य चाननुगतत्वान्नैवमपि हेतुहेतुमद्भावः, किन्तु घटत्ववद्विशेष्यकघटत्वप्रकारकप्रत्यक्षे स्थूलघटावयवसंयोगो गुण इत्यादिक्रमेण सर्वत्रोहनीय इत्याहुः।

---

१. एवमित्यारभ्य व्यभिचार इति पर्यन्तो ग्रन्थभागोनोपलभ्यते आदर्शतालपुस्तके न पुस्तके च।

२. संसर्गविषयकेति पाठो नादर्शतालपुस्तके न च नपुस्तके।

चेन्द्रियसन्निकर्षयथार्थलिङ्गसादृश्यवाक्यार्थज्ञानानां यथायथं प्रत्येकमेव गुणत्वम्, अन्वयव्यतिरेकात्। तत्तदप्रमायां पित्तादिलिङ्गभ्रमादीनां दोषत्ववत् प्रत्यक्षे विशेषदर्शनमपि गुणः, तदनुविधानात्।

ननु विशेषदर्शनहेतुरेव तद्धेतुरस्तु तद्व्यतिरेकादेव तदभावोपपत्तेः। अन्यथा विशेषदर्शनमेव तत्र कुतो न स्यात्। तत्रापि तदपेक्षायामनवस्थाना-

भवति। तथा चेदं पर्यवसितम्। अस्ति तावदनुगतमेव, यदि च तत्र रीत्येश्वरद्वेषान्न तथा सम्भवति तथापि प्रत्येकगुणत्वेऽपि सिद्धं नः समीहितम्। प्रमायां गुणजन्यत्वात् तदनन्तरमनायत्या ईश्वरसिद्धिश्चेति। अत एवाग्रे यदि प्रत्येकगुणताभ्युपगमेन सिद्धान्तस्तदानेश्वरसिद्धि[1]रित्यभिसंधाय वक्ष्यति—अत्र ब्रूम इति दिक्।

विशेषेति। व्याप्यदर्शनमित्यर्थः।

ननु 'तद्धतो'रिति न्यायात् विशेषदर्शनहेतुरेव हेतुरिति तत्प्रत्यक्षमेव व्याप्यमपि गोचरयति। न त्वन्तराऽपि व्याप्यविषयकं ज्ञानमित्याशङ्कते—नन्विति।

अन्यथेति। विशेषदर्शनहेतुसत्त्व इत्यर्थः।

ननु विशेषदर्शनहेतुरपि विशेषदर्शनान्तरमेव। तथा च तद्धेतुहेतुत्वेऽपि विशेषदर्शनमेव हेतुरित्यागतमित्यत आह—तत्रापीति। अनवस्थाभिया विशेषदर्शनादन्यदेव 'तद्धेतु'रिति नोक्तन्यायेन विशेषदर्शनहेतुतेत्यर्थः।

इति दिगिति। अत्र केचिदाहुः यथा गुणानुरोधेन सर्वज्ञसिद्धिः तथा ग्राह्यभ्रमस्यैव सर्वत्र दोषत्वकल्पनान्नित्यभ्रान्तोपि कश्चित् सिद्ध्येत्। यथाहि शाब्दप्रमाया यथार्थग्राह्यज्ञानस्यान्वयव्यतिरेकौ दृष्टौ तथा शाब्दभ्रमे ग्राह्यभ्रमस्याप्यन्वयव्यतिरेकौ दृष्टावेवेति।

अत्रोच्यते—तदभाववति तज्ज्ञानापेक्षया तदभाववज्ज्ञानमेव दोषो लाघवात्। अवश्यं हि भ्रमपूर्वमारोप्याभाववत्ता ज्ञानमस्ति। आरोपविषयाज्ञाने आरोपासम्भवात्। तथा च भ्रान्तपुरुषस्यैव ज्ञान सर्वत्रदोष इति किं भ्रान्तान्तरकल्पनेन। न चैवं प्रमायामपि तद्वति तत्प्रकारकज्ञानापेक्षया तद्वत्ताज्ञानस्यैव गुणत्वमस्त्विति वाच्यम्। तावतापीश्वरसिद्धेः। न हि प्रमापूर्वं स्वकीयं विशेष्यज्ञानमावश्यकम्। क्वचिद्विशिष्टप्रत्यक्षस्य विशेषणस्मरणविशेष्यसंनिकर्षातसम्भवादिति संक्षेपः।

---

1. तदा तेनेश्वरसिद्धिरिति कपुस्तके।

दिति चेत् । एवं व्याप्यविषयकव्यापकप्रत्यक्षनियमे अनुमिताविव पुरुषप्रत्यक्षे प्रामाण्यसंशयो न स्यात् । करादिमति पुरुषज्ञानत्वस्यानुव्यवसायेन निश्चयात् ।

एवमिति । व्याप्यदर्शनसामग्रीजन्यत्वे प्रत्यक्षस्य व्याप्यविषयतानियमेनानुव्यवसायेन प्रामाण्यव्याप्यधर्मोपनीतौ प्रामाण्यसंशयानुपपत्तेरित्यर्थः । यद्यपि व्याप्यवद्विषयकज्ञानत्वमात्रमनुव्यवसायेन[1] शक्योपनेयं, न तु व्याप्यवद्विशेष्यकत्वमपि, तथाऽपि पुरुषप्रत्यक्षप्रामाण्यसंशयाहितसंशयः पुरुष एवानुभूयते, न तु करादाविति सर्वसिद्धम् । तथा च प्रत्यक्षमात्रस्य व्याप्यमात्रगोचरतया व्याप्यवत्तया भातेषु पुरुषेषु पुरुषप्रत्यक्षप्रामाण्यसंशयाहितसंशयविषयता न स्यात् , संशयविरोधिनो विशेषदर्शनस्य विद्यमानत्वात् । न च प्रामाण्यसंशयाहितः संशयः प्रामाण्यग्रहरूपविशेषदर्शनमात्रनिवर्त्यो विषये करादिमत्त्वदर्शनेऽपि तिष्ठति, अन्यथा प्राथमिकपुरुषनिश्चयादेव संशयानुत्पत्तेरिति वाच्यं, तत्प्रत्यक्षस्य शंकास्कन्दितत्वात् । न तु करादिज्ञानमपि तथा, सर्वत्र पुरुषज्ञानप्रामाण्यसंशये करादिसंशयावश्यम्भावस्य त्वयाप्यननुमतत्वादित्यत्र तात्पर्यम् । अक्षरार्थस्तु पुरुषप्रत्यक्षप्रामाण्यसंशयाहितसंशयो न स्यादित्येवं व्याख्येयः ।

ननु विशेषदर्शनस्यापि प्रत्यक्षहेतुत्वे तद्दोषतादवस्थ्यम् । विशेषदर्शनानन्तरं प्रत्यक्षस्यापि अनुमितिवद्बाधकाभावेन व्याप्यविषयकत्वनियमात् । तथा च क्वचित्

व्याप्येति । यथार्थव्याप्यवत्ताज्ञानमित्यर्थः । प्रत्यक्षस्येति । प्रत्यक्षसामान्यस्येत्यर्थः । प्रामाण्यव्याप्येति । पुरुषत्वव्याप्यवति पुरुषत्वज्ञानत्वादीत्यर्थः । न तु व्याप्यवद्विशेष्यकत्वमपीति । विशेष्यतांशाग्रहाद्व्याप्यवत्तांशे सत्तानिश्चयाभावादित्यर्थः । इदं चोपलक्षणम् । व्याप्यवद्विशेष्यत्वग्रहेऽपि तस्य प्रामाण्यव्याप्यत्वेन व्यावर्तकत्वेन चाग्रहात्क्वचित्संशय उपपद्यत एवेत्यपि द्रष्टव्यम् ।

तत्प्रत्यक्षस्येति । पुरुषप्रत्यक्षस्येत्यर्थः । अप्रामाण्यशङ्काशून्यविरोधिज्ञानं सामान्यत एव स्वारसिकमन्याहितं वा संशयं प्रति विरोधीति भावः । इदञ्च मतभेदेनोक्तम् । तेनानुभव प्रत्यक्षे-त्यत्रोक्तं न विरुद्ध्यते ।

वस्तुतोऽवधारणरूपं ज्ञानं संशयविरोधि । यथा च मम विशेषदर्शनत्वमेव वधारणत्वे तन्त्रम् , तथा तवापि व्याप्यविषयकत्वमेव तत्र तन्त्रमिति क्वापि प्रत्यक्षे संशयो न स्यादिति मूलार्थः ।

प्रत्यक्षहेतुत्वे । प्रत्यक्षसामान्यहेतुत्वे ।

---

1. व्यवसायेनेति कपुस्तकपाठः ।

तत्रापि विशेषदर्शनं विना कथं व्यापकप्रत्यक्षमिति चेत्—न। संशयविपर्य्ययोत्तरप्रमायां तस्य हेतुत्वात्। ममापि तद्धेतुस्तत्रैव हेतुरिति चेत्—न। करचरणचिबुकादीनां प्रत्येकं विशेषत्वेन तद्धेतूनामननुगततया तादृशप्रत्यक्षे अहेतुत्वात्। तद्दर्शनेषु च व्याप्यदर्शनत्वमनुगतमस्ति।

नन्वेवं संशयोत्तरं व्याप्यज्ञाने सत्यनुमितिः स्यान्न प्रत्यक्षमनुमिति-

संशयदर्शनात् विशेषदर्शनं विनैव प्रत्यक्षमित्यकामेनापि स्वीकार्यम्, तत् कुतस्तद्व्यभिचारिणस्तत्र जनकत्वमित्याशङ्कते—तत्रेति।

संशयेति। तत्र चाप्रामाण्यसंशयाभावस्योभयसम्मतत्वेनोक्तदोष इत्याशयः।

तद्धेतूना तद्दर्शनहेतूनाम्।

व्याप्यदर्शनत्वमिति। व्याप्यत्वेन दर्शनं संशयाद्युत्तरं प्रत्यक्षमात्रे जनकम्। व्याप्यदर्शनं तु तत्तदुत्तरप्रमायामिति विभागः। व्याप्यग्रहेऽपि व्याप्यत्वाग्रहे तदुत्तरप्रमानुत्पत्तिः, सामान्यहेत्वभावादित्यत्रावधेयम्।

अत्र वदन्ति—व्याप्यदर्शनसामग्रीत्वं तदुत्तरज्ञाने जनयितव्ये, व्याप्यत्वन्तु तदुत्तरप्रमायामनुगतं जनकतावच्छेदकमस्त्विति।

अत्र ब्रूमः—संशयमात्रोत्तर[1]प्रत्यक्षमात्रे न विशेषदर्शनं हेतुः, अन्धकारे घटसंशयोत्तरघटप्रत्यक्षस्य तद्विनाऽप्यालोकसमवधानमात्रेणोत्पत्तेः। किं बहुना कुंकुमगन्धसंशयोत्तरतत्प्रत्यक्षस्य तैलादिसम्बन्धादेवोत्पत्तेः। न हि तदुभयन्तद्व्याप्यं तद्व्याप्यतया गृहीतं वा, किन्तु तत्सामग्री, साऽपि तत्त्वेन न हेतुस्तज्जनकत्वस्यैव तज्जनकता-

व्याप्यदर्शनं त्विति। धर्मिनिष्ठस्य[2] ग्राह्यव्याप्यस्य ज्ञानमित्यर्थः।

ननु यत्रैतादृशं व्याप्यं व्याप्यत्वेन न ज्ञातं, किन्तु स्वरूपेण, तत्र संशयविपर्ययोत्तरं प्रमापत्तिरित्यत आह—व्याप्यग्रहेऽपीति।

तद्धेतूनामननुगतत्वादिति दूषयति—व्याप्यदर्शनेति।

व्याप्यदर्शनं त्विति दूषयति—व्याप्यत्वं त्विति।

तत्सामग्रीति। घटगन्धप्रत्यक्षसामग्रीत्यर्थः।

---

१. संशयोत्तरमात्रे इति कनपुस्तकयोः पाठः।

२. धर्मनिष्ठस्येति गपुस्तकपाठः।

वच्छेदकत्वापत्ते, किं तु संशयविरोधित्वेन, तत्र च निश्चयसामग्रीत्वं तन्त्रमित्यन्यदेतत्। किन्तु यदिन्द्रियजन्यो यः संशयस्तदुत्तरतदिन्द्रियजन्यनिश्चये, यद्वा यत्र विशेषादर्शनं प्रतिबन्धकाधीनं तत्र विशेषदर्शनं हेतुः। अत्र तु न तदधीनं, किन्तु कारणाभावाधीनम्।

यत्तु व्याप्यदर्शनसामग्रीत्वम् अनुगमकमिति—तदतिस्थवीयः। अन्यं प्रति पूर्ववर्त्तित्वे गृहीतेऽन्यत्रान्यथासिद्धत्वेन ज्ञानं प्रत्याकाशवदहेतुत्वात्। विशिष्टज्ञाने तु यद्विशेष्यज्ञानसामग्री हेतुस्तत्र विशिष्टज्ञानस्य विशेष्यज्ञानत्वेन अन्यं प्रतीत्यस्याभावात्।

वस्तुतस्तु व्याप्यदर्शनसामग्री प्रत्यक्षानुमानादिरूपतया नानाविधा। न च तादृशसामग्र्याः संशयोत्तरप्रत्यक्षं प्रति जनकत्वं, जातिसंकरप्रसङ्गात्। तस्मात् अयमर्थः—तद्धेतूनां विशेषदर्शनहेतूनां, अननुगततया प्रत्यक्षादिरूपत्वेन नानाविधतया, तादृशस्य परस्परविजातीयस्य प्रत्यक्षेऽहेतुत्वात्। अनुमानादीनां प्रत्यक्षजनकत्वे विरोधात्। तद्दर्शने तु तत्त्वमनुगमकमिति नाननुगमजातिसंकरादिरपीति।

तदुत्तरेति। घटसंशयौ च न चक्षुर्घ्राणजाविति न व्यभिचारः।

यद्वेति। प्रतिबन्धकाधीनविशेषादर्शनपूर्वकसंशयविपर्ययोत्तरप्रत्यक्षे विशेषदर्शनं हेतुरित्यर्थः। इदमुपलक्षणम्। विशेषादर्शनप्रयुक्तसंशयविपर्ययोत्तरप्रत्यक्षे विशेषदर्शनं हेतुरित्यपि भाव्यम्। प्रासंगिकं विशेषदर्शनव्यभिचारसमर्थनं कृत्वा उक्तसामग्र्या तस्यान्यथासिद्धिं निराकर्तुमनुवदति - यत्त्विति।

चक्रभ्रमिजनकदण्डत्वेन कारणत्वस्य वक्ष्यमाणत्वात्तत्तुल्यन्यायेन इदमपि संभवत्येवेत्यस्वरसादाह – वस्तुतस्त्विति।

नाननुगमेति। इदमुपलक्षणम्। व्याप्यदर्शनसामग्र्यपेक्षया व्याप्यदर्शनस्य लघुत्वादेव हेतुत्वसंभवादिति। स्वरूपतो व्याप्यस्य संशयविपर्ययोत्तरप्रत्यक्षकारणत्वमस्त्विति न दूषितम्, तुच्छत्वात्। तथाहि—सामान्यतो व्याप्यदर्शनस्य कारणत्वे गृहीते तस्यैव प्रमात्वपुरस्कारेण प्रमारूपकार्यविशेषहेतुत्वे संभवति कारणान्तरकल्पना गौरवग्रस्तैव। किं च व्याप्यस्य कारणत्वे लौकिकप्रत्यक्षमात्रे तस्य कारणत्वासंभवान्न संशयविपर्ययोत्तरप्रत्यक्षरूपे विशेषे हेतुत्वमिति। किं च पुरुषत्वव्याप्यापेक्षया पुरुषत्वस्य लघुत्वमिति तस्यैव हेतुत्वमुचितम्। तस्मात्संशयविपर्ययोत्तरप्रत्यक्षे विशेषदर्शनं तत्प्रमायां तत्प्रमा हेतुरिति भावः।

अत्र कश्चिदाह—यत्र संशयस्तत्र विशेषदर्शनाभावे सति प्रत्यक्षं न जायते, तद्भावे च जायते। यत्र तु न संशयस्तत्र तेन विनापि जायत इति प्रत्यक्षसामान्ये विशेषदर्शनविरहविशिष्ट-

संशयस्य प्रतिबन्धकत्वात्तदभावः कारणम्। स च क्वचिद्विशेष्यसंशयविरहात्, क्वचिद्विशेषण-विशेषादर्शनविरहात्। न चैवं दाहे उत्तेजकस्येव विशेषदर्शनस्य प्रत्यक्षहेतुता न स्यादिति वाच्यम्, विशेषदर्शनत्वेन हेतुत्वाभावे दृष्टान्तः। प्रयोजकत्वमात्रस्य विशिष्टाभावसंपादकत्वेनेष्टत्वात्। एवं विपर्ययोपि विशेषादर्शनविशिष्टः प्रतिबन्धकः, तदभावश्च कारणमिति विशेषदर्शनमुत्तेजकतया न कारणम्। अन्यथा विशेषदर्शनत्वेन संशयविपर्ययोत्तरप्रत्यक्षं प्रति कारणत्वाङ्गीकारे संशयस्थले यत्र विशेषदर्शनविरहस्तत्र प्रत्यक्षसामान्यसामग्रीसत्त्वे प्रत्यक्षोत्पादो दुर्वारः। तदसत्त्वे तस्मादेव संशयोत्तरप्रत्यक्षविरहः कृतं विशेषदर्शनस्य हेतुत्वेनेति। न चैव प्रत्यक्षे विशेषदर्शनमपि गुण इति ग्रन्थविरोधः, विशेषदर्शनत्वेनासाधारण्येन त्वया कारणत्वानङ्गीकारादिति वाच्यम्। तत्त्वेन सामा-न्यतः कारणत्वानङ्गीकारेपि संशयविपर्ययोत्तरप्रमाया विशेषप्रमात्वेन गुणत्वाङ्गीकारादिति।

अपरस्त्वाह—विशेषदर्शनसहकृतसंशयस्य प्रतिबन्धकत्वे मानाभावात् आवश्यकदोषे-णैव कार्याभावोपपत्तेः। तथा हि संशयोत्पत्तिकालीनपुरुषत्वनिश्चयाभावे दोष एव तन्त्रम्। कार्ये समानकालीनप्रतिबन्धकाभावहेतुत्वमादाय संशयसामग्रीप्रतिबन्धकत्वमादाय वा तत्रान्यथासिद्धा-वपि धर्मिज्ञानकाले दैवाधीनपूर्वोत्पन्नसंशयाजनकपुरुषत्वस्मृतिमतः कुतो न पुरुषत्वनिश्चयो यदि दोषो न प्रतिबन्धकः, विशेषदर्शने च सति विशेषादर्शनरूपदोषविरहादेव कार्यं, न तु विशिष्टस्य प्रतिबन्धकतया तदभावः कारणम्। न चैव विशेषदर्शने सति संशयानुत्तरप्रत्यक्षमपि न स्यात् दोषसत्त्वादिति वाच्यम्, तत्र तस्यादोषत्वात्, फलबलेन क्वचिदेव तस्य दोषत्वादिति। एवं व्यभिचारसंशयादेरपि नाव्यभिचारनिश्चयादौ प्रतिबन्धकत्वं, किन्तु तत्रत्यविशेषादर्शनादेर्दोषस्यैवेति।

तदयं निर्गलितार्थः। न विशेषदर्शनस्य विशेषकारणत्वं येन कार्यसामान्यापत्तिः। नापि विशेषादर्शनसहकृतसंशयाभावः सामान्यकारणं, मानाभावात्। किंतु दोषाभावः प्रमासामा-न्यकारणं विशेषदर्शनमपि तदन्तर्गतमेवेति।

चिन्तामण्युक्तिस्तु मतभेदेनेति। तदुभयमपि न विशेषदर्शनं यत्र भ्रमरूपं तत्र संशये सत्यपि प्रत्यक्षं भ्रमरूपं न भवत्येवेति दोषतया विशेषभ्रमस्य संशयविपर्ययोत्तरप्रत्यक्षभ्रमहेतुत्वस्या-वश्यकत्वे सामान्यतो विशेषदर्शनस्य हेतुत्वे च 'सामान्य'[1] इति न्यायेन प्रमाविशेषे विशेष-प्रमाया हेतुत्वात्।

किञ्चेति। अपरेण स्थलविशेषे विशेषादर्शनं दोष इति वदता संशयकालीनविशेषादर्श-नस्य दोषत्वाभ्युपगमे विशेषणविशेष्यपरीवर्त्तनमात्रं कृतमिति।

यच्च केनचिदुक्तं—'विशेषदर्शनस्य विशेषकारणत्वे संशयस्थले तद्विरहदशायां कार्यसामा-न्यापत्तिरिति—तन्न, संशयविपर्ययानुत्तरप्रत्यक्षेऽनवधारणरूपे भ्रमाभावस्य संशयविपर्ययोत्तर-प्रत्यक्षेऽवधारणरूपे विशेषदर्शनस्य हेतुत्वात्। न चैवं कारणद्वयाङ्गीकारे गौरवम्। अवधारणा-नवधारणविभागबाध्यबाधकत्वव्यवस्थान्यथानुपपत्त्या गौरवस्य प्रामाणिकत्वात्।

नन्ववधारणत्वं नामेतरकोट्यनवच्छेदविषयत्वम्। तच्चेतरकोट्यभावग्राहकसामग्रीवशादेवोप-पन्नमिति किं विशेषदर्शनहेतुत्वाभ्युपगमेनेति—

1. 'यत्सामान्य' इति न्यायेनेति गपुस्तकपाठः।

मैवम्। विशेषदर्शनं विना घटोऽयं न पट इति निश्चयेपि अवधारणत्वाभावात्। तस्मादवधारणत्वं जातिः यदालिङ्गितं ज्ञानं अत्याहितयापि शङ्कया नाभिभूयते, सा च जातिर्यद्यपि नाना तथापि शङ्काविरोधित्वेनानुगमान्न दोषः। आप्तवाक्यादिना संशयविरोधितर्कादिना च यत्र संशयोत्तरप्रत्यक्षं तत्र व्याप्यदर्शनं व्यभिचरतीति चेत्—न, भ्रमविरोधिदर्शनत्वेन भ्रमविरोध्यदर्शनप्रयुक्तसंशयविपर्ययोत्तरप्रत्यक्षं प्रति हेतुत्वात्।

यद्वा तत्रावधारणाभावान्न व्यभिचारः।

ननु तथापि संशयसामग्र्यभावस्यावश्यं कारणत्वाद्विशेषदर्शनत्वेन कारणत्वे मानाभाव इति चेत्—अवधारणवैचित्र्यान्यथानुपपत्तेरुक्तत्वादिति।

ननु विशिष्टाभावहेतुत्वे कारणाल्पत्वलाघवम्। तथा हि विशेषादर्शनसहकृतव्यतिरेकज्ञानत्वेन सामान्यतः प्रतिबन्धकत्वात्तदभावः सामान्यकारणं, संशयसामग्र्यभावश्च निश्चयं प्रति हेतुरित्युभयमेव मम कारणम्। विशेषदर्शनहेतुत्वे तु संशयविपर्ययोत्तरप्रत्यक्षे विशेषदर्शनं, सामान्ये व्यतिरेकनिश्चयाभावः, निश्चये संशयसामग्र्यभावश्च हेतुरिति कारणत्रयमिति।

न च[1] गन्धप्रागभावावच्छिन्नपक्षकानुमितौ बाधस्याप्रतिबन्धकत्वापत्त्या व्यतिरेकनिश्चयस्य पृथगेव प्रतिबन्धकत्वे विशिष्टाभावहेतुत्वेपि कारणत्रयमिति वाच्यम्, विशेषादर्शनसहकृतव्यतिरेकज्ञानं प्रतिबन्धकमित्यत्र विरोधिविशेषदर्शनाभावस्य विवक्षितत्वात्। तस्य चोक्तबाधस्थले सत्त्वात्। गन्धव्याप्यपृथिवीत्वज्ञानस्य प्रागभावज्ञानाविरोधित्वादिति[2]।

यत्तु तदिन्द्रियजन्यप्रत्यक्षे तदिन्द्रियजन्यव्यतिरेकज्ञानस्य विशेषादर्शनसहकृतस्य प्रतिबन्धकत्वमस्तु, तथा च प्रागभावावच्छिन्नपक्षकानुमितावुक्तदोषो न भवतीति कैश्चिदुद्धृतम्—

तन्न। घटे गन्धो नास्तीति घ्राणजन्यभ्रमरूपप्रत्यक्षदशायां गन्धव्याप्यपृथिवीत्वज्ञाने गन्धप्रत्यक्षतापत्तेः।

न च तदिन्द्रियजन्यविशेषदर्शनमेवोत्तेजकमिति वाच्यम्, घृतादौ पृथिवीत्वसन्देहप्रयुक्तगन्धसन्देहे प्रकारान्तरजन्यपृथिवीत्वनिश्चयात्, घ्राणजगन्धनिश्चयदर्शनादिति। तस्माद्विशेषदर्शनहेतुत्वे कारणबहुत्वगौरवमिति।

मैवम्। गौरवस्य प्रामाणिकत्वात्। अन्यथावधारणानुपपत्तेरुक्तत्वादिति।

वस्तुतस्तु तवापि कारणत्रयमेव। तथा हि सामान्येन रूपेण हेतुत्वमसङ्गतम्। तद्धि निश्चयं प्रति वा विशिष्टज्ञानं प्रति वा। नाद्यः, विशेषादर्शनकालीनव्यतिरेकनिश्चयस्य संशयं प्रत्यपि प्रतिबन्धकतया तदसंग्रहात्। न द्वितीयः, संशयं प्रति विशेषादर्शनसहकृतसंशयस्याप्रतिबन्धकत्वात्। किञ्च विशिष्टाभावापेक्षया विशेषदर्शनं लघु। न च विशिष्टाभावकारणत्वपक्षे कार्यादिविशिष्टं लाघवमिति वाच्यम्, स्वगतलाघवापेक्षया कार्यगतलाघवस्य बहिरङ्गत्वात्, सामान्यलाघवापेक्षया लाघवान्तरस्य बलवत्त्वात्। न चात्र लाघवमेव न, व्यवच्छेदकयोरेकव्यक्तयामात्रेशादिति वाच्यम्, सति सम्भवे धर्मिलाघवस्यान्याय्यादरात्। न चैवमुक्तरीत्या सिद्धयुत्तरानुमितौ सिषाधयिषाया हेतुत्वापत्तिरिति वाच्यम्, अत्रावधारणत्वस्येव तत्रानुमितौ वैलक्षण्यस्याभावादिति संक्षेपः।

---

1. ननु इति गपुस्तकपाठः।
2. पृथिवीत्वस्य गन्धप्रागभावाविरोधित्वादिति गपुस्तकपाठः।

सामग्र्या बलवत्त्वात् दिति चेत्—न। अन्यत्र तथात्वेऽप्यत्र प्रत्यक्षसामग्र्या बलवत्त्वात्। तत्र[1] पुरुषं पश्यामीत्यनुव्यवसायात्। अत एव

अन्यत्रेति। विषयभेद इत्यर्थः। अत्र विषयैक्ये।

नन्वेवमनुमित्सयाऽपि नाध्यक्षविषयानुमितिः स्यादित्यनुमितिसामग्र्यबलवत्त्वमित्यस्यानुमितिसामग्र्यभावोऽर्थः। तथा हि—पक्षताऽनुमितिसामग्रीनिविष्टा न च सिसाधयिषाविरहसहकृतानुमानातिरिक्तमानाभावरूपा सा। अनुमानातिरिक्तप्रत्यक्षप्रमाणस्थले संशयोत्तरप्रत्यक्षे।

यद्वा[1] अनुमित्यापत्त्याऽत्र विशिष्टधीरेव न, किन्तु करादि पुरुषत्वव्याप्यम्, अयञ्च करादिमानिति ज्ञानद्वयादेव संदेहोत्तरप्रत्यक्षम्। तथा च सर्वत्र प्रत्यक्षसामग्री बलवतीत्यनुमितिसामग्र्येव न, पश्यामीत्यनुव्यवसायसाक्षिकप्रत्यक्षताबलेन प्रामाणिकतया कल्पनागौरवस्यादोषत्वादिति चेत्—

मैवम्। पक्षतायाः संशयस्थलेऽपि सत्त्वमिति वक्ष्यमाणत्वात्। अनुमितिप्रत्यक्षयोः सामग्रीभेदमात्रसिद्ध्याऽनुमितौ ज्ञानद्वयमन्यत्र विशिष्टधीरित्यस्यापि सुवचत्वात्।

एवमिति। विषयैक्येऽपि सामान्यतएव प्रत्यक्षसामग्र्या बलवत्त्वे इत्यर्थः।

तथेति। सिसाधयिषाविरहसहकृतप्रत्यक्षादिप्रमाणाभावस्य पक्षताघटकस्य सत्त्वादनुमित्सास्थले नानुमितिसामग्र्यभाव इति पर्यवसितोऽर्थः।

नन्वेवं ज्ञानद्वयस्य प्रत्यक्षहेतुत्वे गौरवमित्यत आह—पश्यामीति। अनुमित्सास्थले च विशिष्टज्ञानमेव[3] जायत इत्याशयः।

आद्यं दूषयति[4]—पक्षताया इति। सिसाधयिषाविरहसहकृतसिद्ध्यभाव एव लाघवेन पक्षतेति वक्ष्यमाणत्वादित्यर्थः। न चोक्तदोषभिया मानाभावोऽपि पक्षतान्तर्गत इति वाच्यम्। समाधानस्य लघुनो वक्ष्यमाणत्वात्।

द्वितीयं दूषयति—अनुमितीति। तथा च विनिगमनाविरहादुभयत्र विशिष्टज्ञानमेव हेतुरिति भावः।

---

१. संशयोत्तरप्रत्यक्षस्थले इति भावः।

१. मिश्रमतमाह—यद्वेति।

३ विशिष्टाभावज्ञानमेवेति गपुस्तकपाठः।

४ सिद्ध्यभावमात्रं पक्षतेत्यभिप्रेत्य उपाध्यायमतं दूषयति।

विशेषदर्शनजन्यत्वेन ज्ञातं बाधकम्[2] । तद्दर्शनजन्यं बाध्यम्[3] । अन्यथा[4] बाध्यबाधकव्यवस्था न स्यात् । न च प्रमा बाधिका, करभ्रमजन्यपुरुषज्ञानस्यापि स्थाणुज्ञानबाधकत्वात् । नापि विपरीतबोधकत्वेन बाधकत्वं, बाध्यतुल्यत्वात् । अनन्यथासिद्धं बाधकमिति चेत्—न । विशेषदर्शनजन्यत्वस्यैव तदर्थत्वात्[5] ।

अत्रोच्यते—इच्छाघटिता सामग्री बलवतीत्याहार्यज्ञानादौ क्लृप्तत्वात् सिसाधयिषाविषये यथोक्तनियम एवादरणीयो बाधकाभावात् । इदञ्चैकत्रोभयसामग्रीसत्त्वे द्रष्टव्यम् । अन्यथा पर्वतप्रत्यक्षस्यापि दुर्वारत्वमिति दिक् ।

बाधकमप्रमात्वज्ञापकम्, बाध्यमप्रमात्वेन ज्ञाप्यम्, न त्वनुत्पादकरूपो बाध ज्ञातमिति विरोधात् ।

अनन्यथेति । यद्यनन्यथासिद्धत्वं प्रमात्वं तदा दत्तमुत्तरं प्राक् ।

अथ प्रमात्वेन ज्ञातं[3] तदाह—विशेषेति । विशेषदर्शनजन्यत्वस्यैव तदर्थत्वात् तत्पर्यवसन्नत्वात् । विशेषदर्शनजन्यत्वेनैव तत्प्रामाण्यानुमानादिति यावत् । न हि समानविषयज्ञानयोरन्यतरस्याप्रामाण्यमन्यतरस्मिन् विनिगमकप्रवृत्तिं विना शक्यग्रहं, न च विनिगमकं विशेषदर्शनजन्यत्वादन्यदिति भावः ।

इच्छाघटितेति । यत्रोभयसामग्री इच्छारहिता तत्र समाने विषये प्रत्यक्षसामग्र्या बलवत्त्वम् । यत्रान्यतरेच्छा तत्रेच्छाघटितसामग्र्या बलवत्त्वमित्यर्थः । इदं चोपलक्षणम् । यत्रोभयसामग्री इच्छाघटिता तत्रापि समाने विषये प्रत्यक्षसामग्र्या बलवत्त्वं ज्ञेयम् । न चेच्छाघटितसामग्र्या बलवत्त्वमित्यस्यायमर्थो यत्सा प्रतिबन्धिका । तथा च सिसाधयिषाविरहसहकृतप्रत्यक्षादिसामग्रीविरहो हेतुरागत एवेति वाच्यम्, प्रत्यक्षादीच्छासहकृतप्रत्यक्षादिसामग्रीविरहस्य हेतुत्वेऽप्यनुमितावसाधारण्याभावात् । तदिदमुक्तम्—आहार्यज्ञानादाविति । अत एव मानाभावस्य पक्षताप्रवेशापेक्षयात्र लाघवं क्लृप्तसामान्यहेतोरेव कार्योत्पत्तेर्विशिष्यहेतुत्वे मानाभावात् । तथात्वेऽपि वा न पक्षताप्रवेशः, किन्तु पृथगेव हेतुत्वमित्यनुमानालोके वक्ष्यते । तदभिप्रेत्याह—इति दिगिति । दूरतो नहि समानविषयेत्यादि नियमस्तत्रत्वम् । अनुमित्यनुकूलप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वान्न पर्वतप्रत्यक्षमिति नव्याः ।

---

२. एतस्येति कपुस्तके ।

२. भ्रमत्वज्ञापकमित्यर्थः । ३ भ्रमत्वेन ज्ञाप्यम् ।

४ कस्यचिदपि ज्ञानस्य विशेषदर्शनाजन्यत्वे इति भावः । ५ तज्ज्ञापकत्वादिति भावः ।

न च पीतः शङ्ख इत्यत्र विशेषदर्शनेऽपि श्वैत्यप्रमा नेति न तद्धेतुः, यद्विशेषदर्शनं हि भ्रमविरोधि तद्भावः प्रमाहेतुः। प्रत्यक्षभ्रमे च प्रत्यक्षविशेषदर्शनं विरोधि, दिङ्मोहे गौरोऽहमिति भ्रमे च तथा दर्शनात्। तच्च तत्र दोषान्नास्ति। अपि च लिङ्गसादृश्यवाक्यार्थभ्रमदोषाभावमात्रान्नानुमित्यादिरिति सत्यपरामर्शादिगुणसिद्धिः। एवं प्रमाया गुणजन्यत्वेन वेदेऽपि प्रमा वाक्यार्थयथार्थज्ञानगुणजन्येति तदाश्रयेश्वरसिद्धिः।

यदिति। संशयविपर्ययोत्तरप्रत्यक्षं प्रति तदुभयविरोधित्वेन विशेषदर्शनस्यापि जनकता न विशेषदर्शनत्वेनेत्युक्तम्। तथा च तदेव व्याप्यदर्शनमपि, तत्र जनकं यद्भ्रमविरोधि तच्च तदेव। यच्छ्वैत्यप्रत्यक्षाव्यभिचारिव्याप्यदर्शनं तत्तु पित्ताद्युत्तरकालीनं, न तु व्याप्यदर्शनमात्रं, शङ्खत्वग्रहे व्यभिचारादित्यर्थ।

इदमेव[४] कथमित्यत आह—प्रत्यक्षेति। प्रत्यक्षभ्रमे प्रत्यक्षविपरीतज्ञानस्यैव विरोधितया विरोधिसामग्रीत्वेन तदेव प्रतिबन्धकं यत्तदव्यभिचारि, न शंखत्वज्ञानमात्रमित्यर्थः। अत्र भ्रम इत्युपलक्षणम्। साक्षात्कारिणि निर्णये तद्विपरीतप्रत्यक्षनिर्णयो विरोधी, न त्वानुमानिकविपरीतग्रहः प्रत्यक्षरूपतद्व्याप्यग्रहो वा, प्रत्यक्षरूपप्रमायामपि व्यभिचाराभावादिति पृथिवीभ्रमानन्तरं स्नेहप्रत्यक्षादेस्तद्व्याप्यदर्शनवद्विपरीतप्रत्यक्षसामग्रीत्वेन प्रतिबन्धकता न स्वातन्त्र्येणेति न व्यभिचारः।

अपि चेति। न चेदमपि असङ्गतम्, सामान्यसामग्र्यां सत्यां नियमादेवासत्यां तत एव फलाभावादिति वाच्यम्। सामान्यसामग्री हि लिङ्गादिज्ञानम्। तथा च दोषाभावसहितलिङ्गादिज्ञानमेव पर्यवसन्नम्। एवं च लिङ्गभ्रमादेर्दोषतया तद-

एकस्य विशेषदर्शनस्य। तथा च विशेषदर्शनं यत्राध्यक्षसामग्री तत्रेच्छाविरहे सा बलवती। न च पर्वताध्यक्षे तत्सामग्रीति न पर्वताध्यक्षम्। तथा च यत्र विशेषदर्शनमध्यक्षसामग्री तत्र बलवत्त्वमन्यत्रानुमितिसामग्र्या भावादेव नानुमित्यभाव इति किं तत्साधारणप्रतिबन्धकत्वेनेति भाव इति नव्याः।

वयं तु यथाश्रुतमेव सम्यक्, संशयोत्तरमेकमेव विशेषदर्शनात्प्रत्यक्षानुमितिसामग्री। अत्र च परामर्शोऽनुमितेरिन्द्रियसन्निकर्षः पर्वताध्यक्षस्येति न तत्सामग्र्या तत्रानुमितिप्रतिबन्ध इति। शातमिति। अनुवादे स्वस्वरूपसत एव प्रयोजकत्वादिति भावः। तत्प्रकारकदर्शनत्वेनेति भावः। उच्चारमूकरभ्रमजन्यपुरुषभ्रमस्यापि स्थाणुप्रमाप्रतिबन्धकत्वम्।

४. नहि इदमेवेति नपुस्तके।

ननु प्रत्यक्षादावस्तु गुणजन्यत्वं, वेदे तु भ्रमाद्यभावचतुष्टयं प्रमाहेतुः। लोके च भ्रमाद्यभाव एव प्रमोत्पत्तेरिति चेत्——न। तत्र लाघवाद्वाक्यार्थ-यथार्थज्ञानस्य[1] हेतुत्वेन भ्रमाद्यभावानामन्यथासिद्धत्वात्। आप्तस्य भ्रमाद्य-भावमात्रेण वाक्यार्थज्ञानं विना तादृशवाक्याभावाच्च। अन्यथा तवापि तत्र वक्तृज्ञानानुमानं न स्यात् तस्याहेतुत्वात्।

अस्तु[2] वोभयमपि हेतुः, विनिगमकाभावात्। तथापि वेदे गुणसिद्धिः। न च नित्यनिर्दोषत्वाददृष्टादेव वेदे प्रामाण्योपपत्तौ नापरिदृष्टनित्यज्ञानादि-सर्वज्ञकल्पनं गौरवादिति वाच्यम्, प्रमाणवतःफलमुखगौरवस्यापि स्वर्गादावविवादोषत्वात्, पूर्वं कारणताग्रहसमये फलानुपस्थित्या गौरवाज्ञानात् लोके नित्यत्वाभावाच्च। अथ वेदे कर्त्रस्मरणादेर्बाधकात् लोकेऽपि निर्दोषत्वेनैव प्रमाहेतुत्वं, वेदे तु नित्यत्वेनैव वक्तुरभावेऽपि निर्दोषत्वमवधार्यत इति चेत्—न, बाधकस्य बहुशो निराकरिष्यमाणत्वात् भ्रान्तप्रतारकवाक्ये, घटोस्तीति वाक्ये पटोऽस्तीति दोषजन्यवाक्ये च विसंवादात् प्रमाणे तदभावाच्च।

किञ्च दैववशसम्पन्नं चैत्यं वन्देतेत्यादिकं शुकबालादिवाक्यमप्येवं प्रमाणं स्यात्, वक्तृदोषाभावात् प्रमाणानपेक्षत्वेन वेदतुल्यत्वाच्च।

ननु तवापि शुकादिभ्रान्तप्रतारकवाक्यं कथं प्रमाणं, गुणाजन्यत्वात्। न च गुणाजन्यत्वात् वक्तृतात्पर्याविषयत्वाच्च तदप्रमाणं, संवादेन साध्ये बाधात्।

भावसहितलिङ्गादिज्ञानं प्रमाजनकं वाच्यम्, तथा च तदपेक्षया भ्रमत्वाभाववल्लिङ्ग-ज्ञानं वा प्रमारूपलिङ्गज्ञानं वा कारणमिति, इदमेव गुणजन्यत्वमिति सिद्धं नः

तदपेक्षयेति। अत्रावच्छेदकमात्रकल्पनालाघवमिति भावः। तत्राप्यभावस्यावच्छेद-कत्वे गौरवादाह प्रमेति।

दोषाभावहेतुतेति। दोषाभावमात्रस्य हेतुत्यर्थं। मूले वाक्यार्थज्ञानस्येति। वाक्यार्थ-प्रमाया इत्यर्थः।

---

१. वक्तृवाक्यार्थज्ञानस्येति पाठान्तरम् दर्पणसम्मतम्।

२. भ्रमाद्यभावसत्त्वे यथार्थशाब्दबोधोत्पत्तिः भ्रमादिसत्त्वे तदनुत्पत्तिरिति सोऽपि कारणमित्यभि-प्रायवानाह—अस्तु वेति।

यत्तु भ्रान्तप्रतारकवाक्ये योग्यतैव नास्ति वक्तृज्ञातवाक्यार्थाबाधो हि योग्यता, भ्रमविषयश्च बाधित इति—तन्न। घटवति घटो नास्तीति भिन्नविषयतया भ्रमस्याहेतुत्वात्। किञ्च वाक्यार्थाबाधो योग्यता लाघवात्, वाक्यार्थश्च तत्राबाधित एव। न च शुकबालादिवाक्यादर्थबोध एव न भवति किन्त्वेवमयं वदतीत्येवंप्रकारा प्रतीतिरिति वाच्यम्, आकांक्षादेरन्वयबोधसामग्र्याः सत्त्वेऽनुभवानपलापात्, संवादेन यथार्थत्वानुभवाच्च। एवं धूमभ्रमाद्वह्निमत्येव वह्न्यनुमितिर्न प्रमा स्यात् यथार्थलिङ्गज्ञानाजन्यत्वात्। न च वह्न्यन्तरमेव तत्र विषयः, प्रत्यभिज्ञानात्, गोत्वाद्येकव्यक्तिके तदभावाच्च।

समीहितम्। न च भ्रमो न दोषः, किन्तु भ्रमत्वमिति, तदभावतन्त्रतायां दोषाभावतन्त्रतैव न गुणतन्त्रतेति वाच्यम्, स एव दोषो यो भ्रमहेतुः, न च भ्रमत्वं तथा, जनकतावच्छेदकत्वात्। तथा चैनं कल्पमपुरस्कृत्य दोषाभावहेतुता वाच्या, तत्रायं ग्रन्थावतार इति भावः।

वक्तृज्ञातेति। अत्र प्रकृतवाक्यप्रयोगकारणीभूतवक्तृज्ञानविषयवाक्यार्थाबाधो वाऽन्यवाक्यप्रयोगकारणीभूतज्ञातृज्ञानविषयतदबाधो वा। तत्राद्ये घटवतीति। द्वितीये किञ्चेति।

मूले उभयमपीति। वाक्यार्थप्रमाभ्रमाद्यभावश्चेत्यर्थः। नित्यत्वे सति निर्दोषत्व विशिष्टप्रामाण्यप्रयोजकमिति दूषयति मूले लोक इति। निर्दोषत्वमेव प्रामाण्ये तन्त्रम् नित्यत्वं तु वेदे निर्दोषत्वोत्पादकमात्रेणोक्तमित्याशङ्कते मूले अथेति।

भ्रान्तप्रतारकस्थले भ्रमो भिन्नविषयक एव, प्रतारणापि न दोषरूपा, अविद्यमानप्रतिविवादयिषाया एव तथात्वात्। करणापाटवमप्यविद्यमानविषयकमेव दोषो नतु विद्यमानविषयकमित्यरुच्या मूले-किञ्चेति।

योग्यतासहितः सम्वादः प्रामाण्ये तन्त्रमित्याशयवतो मूले-यत्त्विति शङ्का।

यद्वा तटस्थस्य शङ्केयम्। घटवतीत्यादिमूलस्य यथाश्रुतस्यालग्नकतया विकल्पयति—अत्रेति। द्वितीयविकल्पे कारणपदं प्रयोजकपरम्।

कारणीभूतेति पाठेऽपि प्रयोजकत्वमेवार्थः, वस्तुतो वाक्यस्य बाध इत्यत्र वाक्यत्वेन, तदबाध इत्यत्र च तद्वाक्यत्वेन तद्वाक्यस्य प्रवेशात् विकल्पयोर्भेदः।

आद्य इति। तथा च वाक्ये कारणमाहार्यज्ञानमेव, तद्विषयश्चाबाधित एवेत्यर्थः।

नापि तत्रान्यतादात्म्यारोपः, संसर्गारोपात् लिङ्गोपधानांशे भ्रमत्वेऽपि साध्यांशे प्रमात्वादिति ।

नापीति । गव्येव लिङ्गाभासान्न गोत्वानुमानम् , किन्तु प्रागनुभूतगोत्वाश्रय-व्यक्त्यभेदानुमानम् , तत्रासद्विषयकतया भ्रम एवेति नेत्यर्थः ।

संसर्गारोपादिति । संसर्गारोपाभ्युपगमादित्यर्थः । गोत्वेन समं व्याप्तिग्रहो गो-तादात्म्येन समं वा सामान्यत एव, न त्वन्यगोव्यक्तितादात्म्येनेति, तथा व्याप्त्यग्रहात् । त्वयापि लिङ्गभ्रमात्मक[1]दोषबलेन संसर्गारोपस्यैवाभ्युपगमान्न त्वन्याभेदारोपाभ्युप-गमाद्बीजाभावादिति भावः ।

वस्तुतस्तु एकव्यक्तिक[2]पक्षे एकव्यक्तिकसाध्ये लिङ्गाभासजन्यायामनुमिता-

द्वितीये तु वाक्यप्रयोजकस्य भ्रमव्यापीति पूर्वदोषालम्बकतया दोषान्तरपरं मूलं—**किञ्चेति** ।

वस्तुत इति व्याख्याने तु पूर्वदोषलम्बकत्वेऽप्युक्तगौरवपरं मूलं—किञ्चेति । तदवतारयति **द्वितीय** इति ।

लाघवादिति मूलम् । यद्यपि यथाश्रुते वाक्यजन्यप्रतिपत्तिविषयस्य वाक्यार्थतया न लाघवं, प्रत्युतान्यथासिद्धप्रवेशादित्युक्तापेक्षया गौरवम् , तथापि परम्परया भ्रम-मूलकत्वसत्त्वाद्वाक्यप्रयोजकेत्यादेर्यथाश्रुतस्यासम्भवितया प्रकृतवाक्यप्रतिपाद्यविषयकप्रकृतवाक्य-प्रयोजकज्ञानविषयाबाधो वाच्यः, तथा सति प्रकृते तुल्यमात्रेऽपि वस्तुगत्यनुरोधेन प्रकृत-वाक्यप्रतिपाद्योऽबाध एव योग्यतास्त्विति लाघवमुक्तम् ।

वस्तुत इत्यादिव्याख्याने तद्वाक्यार्थाबाधाप्रवेशात् स्फुटं लाघवम् ।

वस्तुतस्तु मूले एव विकल्पनीयम् सम्वादे सत्यपि योग्यता नास्तीति वदतः प्रकृतवाक्या-र्थस्य कारणज्ञानविषयस्याबाधो वा प्रकृतवाक्यार्थस्य प्रयोजकज्ञानविषयस्याबाधो वा योग्यता विवक्षिता ।

द्वयं दूषयति मूले—**घटवतीति** किञ्चेति च । अत एव समानविषयतया किञ्चेति सङ्गच्छत इति ज्ञेयम् ।

विकल्पस्य दोषान्तरमाह—**गोत्वेनेति** । आद्ये दोषं विवृणोति—**त्वयापीति** ।

द्वितीयम् विवृणोति—**न त्विति** । तत् लिङ्गे मानम् ।

---

१ 'त्वयापि लिङ्गभ्रमात्मकेति' । अनुमितिसामग्र्या व्यापकत्वेन गृह्यमाणस्य पक्षे संसर्गमात्रस्यै-वोपनयान्न तु पक्षे साध्यवद्धर्मितादात्म्यस्य । येनावान्तरतादात्म्यारोपः स्यादित्यर्थः ।

२ 'एकव्यक्तिक' इति । स्वार्थे कप्रत्ययः । अयमेतदभिन्नमित्याद्यनुमितावेकव्यक्त्यात्मके पक्षे साध्यमेकव्यक्तिकमेव । एतदभिन्नत्वस्य व्यक्त्यन्तरेऽभावादित्यर्थः ।

उच्यते। भ्रान्तप्रतारकवाक्ये शुकादिवाक्ये च प्रमाणशब्द-त्वेनाप्तोक्तत्वात् वेदवदीश्वरस्यैव यथार्थवाक्यार्थज्ञानं जनकम्, तस्य कार्य-मात्रे कर्तृत्वात्। शुकादिवाक्यस्य च वेदतुल्यता दोषाभाववादिनापि वाच्या।

नन्वेवं शब्दाभासोच्छेदः तस्यापीश्वरवक्तृकत्वादिति[1] चेत्—न। तद्-वाक्यार्थस्यासत्त्वेन भगवज्ज्ञानागोचरत्वात्। एव लिङ्गाभासजन्यप्रमायामपि वह्निव्याप्यवत्त्वज्ञानमीश्वरस्यैव जनकमिति सम्प्रदायविदः।

वन्यतादात्म्यभानमसिद्धमिति तत्र गुणदोषयोर्व्यतिरेकान्वयव्यभिचारो ब्रह्मणापि दुरुद्धरः।

लिङ्गेति। अयमभ्युपगमवादः, लिङ्गोपधानाभावात्। भावे वा व्याप्यत्वेन तन्न तु धूमत्वादिना। तथा च व्यापकवति यत्किञ्चित्व्याप्यावश्यम्भावे लिङ्गोप-धानांशेऽपि न भ्रमतेति।

भ्रान्तेति। इदं चोपलक्षणम्। संशयोत्तरप्रमायामपि विशेषप्रमाजन्यायामी-श्वरीयविशेषप्रमैव गुण इति स्मर्त्तव्यम्।

ननु प्रतारणा नाहार्यारोपं विना, तथा च स एव विषयाबाधादनारोपरूपं ज्ञानमिति किमीश्वरेण। किञ्च शुकादिवाक्यस्य केवलपदज्ञानसाध्यत्वान्न वाक्यार्थ-धीहेतुः। न चेश्वरज्ञानस्य जगज्जनकतया अनायत्यैव तदत्र जनकमिति वाच्यं, वाक्यार्थविषयज्ञानतया तस्यात्राजनकत्वात्। तथा चाज्ञातजनकभावस्य प्रमात्वाप्रमा-त्वाभ्यां गुणदोषत्वादिति—

मैवम्। लाघवादी[2]श्वरीयज्ञानस्य गुणत्वाभ्युपगमात्। आहार्या[3]रोपस्य गुणत्वे बाधकाभावादेकत्र गुणद्वयजन्यत्वदर्शनात्।

विशेषप्रमेति। समानाधिकरणविशेषप्रमेत्यर्थः। इदमप्युपलक्षणम्। सादृश्यभ्रम-मूलिकायां प्रमोपमितावीश्वरसादृश्यप्रमैव गुण इत्यपि ध्येयम्। वस्तुत इत्याद्यापाततः प्रमाणफलत्वेन जनकत्वे गौरवाद्यथार्थत्वमात्रस्यापेक्षितत्वादिति।

---

१. ईश्वरीयज्ञानस्योपादानप्रत्यक्षविधया कार्यमात्रं प्रति कारणत्वमिति भावः।

२. 'लाघवादि'ति। शाब्दप्रमा गुणजेत्यनुमित्या लाघवसहकारेण समवाय इवैवंस्यैव गुणत्वेन विषयीकरणादित्यर्थः।

३. ननु यथार्थवाक्यार्थत्वेन गुणतेति कथमाहार्यारोपो गुण इत्यत आह—'आहार्ये'ति। गुणस्य गुणान्तरानपवादकत्वादित्यर्थः।

अत्र ब्रूमः । शाब्दप्रमायां लोके वक्तुर्यथार्थवाक्यार्थज्ञानं न गुणः, किन्तु योग्यतादिकं यथार्थतज्ज्ञानं वा, लाघवादावश्यकत्वाच्च । भ्रमप्रमादविप्रलिप्साजन्ये वाक्ये विसंवादिनि न यथार्थयोग्यताज्ञानं, वाक्यार्थस्य बाधितत्वात् । एवं करणापाटवादन्यस्मिन्वक्तव्येऽन्याभिधाने विसंवादिनि, संवादिनि तु प्रमाणमेव । योग्यतादिज्ञानमेव क्वचिन्नास्ति ।

नन्वेवं नानार्थादन्यपरात्तात्पर्यभ्रमे तं विनैव वा यथार्थयोग्यतादिज्ञाने सति संवाद्यपरशक्यज्ञानमपि प्रमेति तत्रापि तद्वाक्यं प्रमाणं स्यादिति चेन्न, इष्टत्वात् । तात्पर्यविषये च तद्वाक्यं न तदा प्रमाजनकमिति न प्रमाणम् । एवं वेदेऽपि यथार्थयोग्यताज्ञानमेव गुण इति न वैदिकप्रमायां गुणजन्यत्वेनेश्वरसिद्धिः ।

वस्तुतस्तु प्रमा गुणः । सा च प्रमाफलम । न चाहार्यारोपः काकतालीयसम्वादस्तथा । तथा सति प्रमाणान्तरापत्तेरनुगतानतिप्रसक्तधर्मावच्छेदकं विना प्रमाणत्वासम्भवात् ।

यच्च विशेष्येत्यादि--तन्न । वाक्यार्थविषयकत्वं जनकत्वं च ज्ञानस्य गुणत्वे तन्त्रम्, लाघवात्, न तु विशिष्टवैशिष्ट्यं गौरवादिति दिक् ।

वाक्यार्थयथार्थज्ञानं गुण इति व्यवस्थितम । तत्र गुणान्तराभावात् उक्तगुणव्यवस्थया ईश्वरसिद्धिरित्यसहमानः प्रकारान्तरेण यद्यायाति भगवांस्तदायातु । यदि चान्वयव्यतिरेकाभ्यां यथार्थवाक्यार्थधीर्गुणस्तदा भवतु न तु गुणान्तराभावात् परिशेषेण तस्य गुणत्वम्, न वा तत एवेश्वरसिद्धिरिति मनसिकृत्यासाधारणं सिद्धान्तान्तरमाह—अत्र ब्रूम इति ।

न तु विशिष्टवैशिष्ट्यमिति । प्रकृतवाक्यार्थविषयकत्वावच्छिन्नप्रकृतवाक्यजनकप्रमात्वेन गुणत्व गौरवान्नेत्यर्थः ।

दिगिति । अबाधितार्थकवाक्यप्रयोक्तुः पदज्ञानादिकमपि गुणः सम्भवतीति भावः ।

नैयायिकस्येश्वरनिराकरणमयुक्तमित्याशोच्य साम्प्रदायिकोक्तयुक्तिनिराकरणमात्रे मणिकृतः तात्पर्यमाह—वाक्यार्थेति । योग्यतेति । इदमुपलक्षणम् । समर्गात्मकयोग्यतापक्षेऽपि संसर्गस्यातीतादावजनकत्वादित्यपि द्रष्टव्यम् ।

स्यादेतत् । वेदे वक्तुर्यथार्थवाक्यार्थज्ञानमपि गुणः, लोके प्रमाणशब्दं प्रति तादृशस्य ज्ञानस्य हेतुत्वात् । अत एव तव लोके वक्तृज्ञानानुमानम् । एवं च वेदो वाक्यार्थगोचरयथार्थज्ञानवत्स्वतन्त्रपुरुषप्रणीतः प्रमाणशब्दत्वात् गामानयेति वाक्यवदितीश्वरसिद्धिः ।

मैवम् । प्रमाणशब्दत्वं हि वाक्यार्थयथार्थज्ञानपूर्वकतां विनापि सम्भवति, अवश्यकयोग्यतादिसत्त्वात् यथार्थतज्ज्ञानाद्वेत्युपपादितमतोऽप्रयोजकमेतदिति । तथापि लोके वाक्यार्थज्ञानं प्रमाणवाक्ये कारणं गृहीतमिति तेन विना कथं तदिति चेत्—न । प्रवृत्त्याद्यर्थं हि प्रयोज्यस्य वाक्यार्थज्ञानमुद्दिश्यैतादृशं पदेभ्यो वाक्यार्थं ज्ञास्यतीमिति बुद्ध्या वाक्यप्रयोग इत्यन्यथासिद्धं प्रथमं वक्तुर्वाक्यार्थज्ञानम्, न तु तादृशपदावलीप्रयोगे तस्य हेतुत्वम् । तादृशपद-समूहस्य प्रत्येकपदहेतोरेव शुकादिवदुपपत्तेः ।

अथ तात्पर्यविषये वेदः प्रमाणं तात्पर्यञ्च तत्प्रतीतीच्छयोच्चारणम्, न चास्मदादेर्वेदं विनातीन्द्रियवेदार्थगोचरज्ञानं, येन तत्प्रतीतीच्छयोच्चारणं भवेत् । न च वेदादेव तत्, अन्योन्याश्रयात् । अतः सकलवेदार्थदर्शिना यस्य वेदस्य यदर्थप्रतीतीच्छयोच्चारणं कृतं स तत्र प्रमाणमिति तादृशेच्छैव गुण-

योग्यता बाधकमानाभावात्मिकेति दोषाभाव एव पर्यवसन्नमित्यरुचेराह—तज्ज्ञानं वेति । इदञ्चोपलक्षणम् । अनुमानेऽपि बाधाभावयथार्थज्ञानं गुण इति बोद्धव्यम् ।

ननु बाधाभावः स्वरूपसन्नेवानुमानाङ्गं न ज्ञातः, लाघवात्, साध्याभावाभावस्य साध्यपर्यवसितत्वेन साध्यज्ञानस्य साध्यज्ञानजनकतापत्तेः । न चैतत् सम्भवति, तत् सिद्धसाधनस्यानुमितिप्रतिबन्धकत्वादिति—

मैवम् । प्रकृतेऽपि वाक्यार्थज्ञानस्य वाक्यार्थबोधजनकतापत्तेः । न चेष्टापत्तिः, अनुमाने सिद्धसाधनवत् शब्दे पुनरुक्तत्वस्य दोषत्वात् । तस्य चाकांक्षाविरहपर्यवसन्नस्यात्रापि ज्ञाने जिज्ञासानुदयेन सुलभत्वात् । न च प्रकृते योग्यतानिश्चयो न सम्भवत्येव

बाधाभावेति । अनुमितिविपक्षपक्षतावच्छेदकसम्बन्धाश्रयसाध्यस्य ज्ञानमित्यर्थः । इदमप्युपलक्षणम् । विशेषभ्रमजन्यसंशयविपर्ययोत्तरप्रमाया यथार्थाबाधितत्वज्ञानं ग्राह्यवति व्याप्यज्ञानं वा अग्रे वक्ष्यमाणं गुणः उपमितिप्रमाया तु उपमितिविषयप्रवृत्तिनिमित्तवद्वाच्यस्य ज्ञानं ग्राह्यत्यतिदेशवाक्यार्थज्ञानं वा गुणः, इति ध्येयम् । साध्याभावनिश्चयः साध्याभावो वा बाधः । आद्ये स्वरूपसन्नेवेति । अन्त्ये साध्याभावाभावस्येति ।

स्तज्जन्या वेदार्थप्रमेति तदाश्रयस्वतन्त्रपुरुषधौरेयसिद्धिरिति चेन्—मैवम् । मीमांसादिसकलाङ्गसाचिव्याद्वेदवाक्यार्थज्ञानवताऽध्यापकेन तत्तदर्थप्रतीती-च्छया वेदस्योच्चारणमिति वेदार्थयथार्थविदस्तत्तदर्थे तात्पर्यमस्त्येव । एवं पूर्वपूर्वताद्दशाध्यापकेन तत्तदर्थप्रतीतीच्छयोच्चारितत्वं तत्परत्वमवगम्योत्तरो-त्तरेषां वेदार्थप्रत्यय इत्यनादित्वात्पर्यपरम्परेति किमीश्वरेण । तर्हि वेदार्थान-भिज्ञाध्यापकेनोच्चारितवेदस्य न तदर्थप्रतीतीच्छयोच्चारणमिति तात्पर्याभावान्न प्रमाणं न वा ततोऽर्थनिश्चय इति चेन्—न । अनादौ संसारे तस्य वेदस्य कदाचित् केनचित् मीमांसाद्यधीनवेदार्थज्ञानवता तत्प्रतीतीच्छयोच्चारणं कृतं तावतैव तत्परत्वमिति ।

प्राभाकरास्तु प्रामाण्य स्वत एव उत्पद्यते ज्ञायते चेति । तथाहि— निष्कम्पप्रवृत्त्यङ्गं स्मृत्यनुभवसाधारणं यथार्थत्वमेव प्रामाण्यम् । तच्च ज्ञान-मात्रसामग्रीजन्यं, न तु गुणं दोषाभावं वाऽपेक्षते । सर्वज्ञानानां यथार्थत्वेना-व्यभिचारात् । अयथार्थस्तु व्यवहारः, तस्यैव बाध्यत्वात् । ज्ञानन्तु न बाध्यते, बाधकाभिमतज्ञानतुल्यत्वात् । ज्ञाने चायथार्थत्वव्यपदेशो विपरीत-

संशयस्य जनकत्वे दोषाभावादिति वाच्यं, तुल्यत्वात् । साध्यनिश्चयस्यैव[1] सिद्धसाध-नत्वात्, तत्सन्देहस्याङ्गत्वेनानुगुणत्वात् । एतेन प्रकारान्तरेण योग्यताज्ञाने पदार्थ-वैशिष्ट्यं विषयः प्रकारान्तरेण च शाब्द इति दोषापहारः प्रत्युक्तः, अनुमानतुल्य-त्वात् । तस्मादेकपदार्थेऽपरपदार्थनिष्ठधर्मविरोधितावच्छेदकशून्यत्वरूपयोग्यताज्ञान-वत्पक्षतावच्छेदकसाध्ययोरविरोधविषयकयथार्थज्ञानं गुण इति । तच्च योग्यताज्ञानवत् सन्देहासन्देहसाधारण विरोधिनिश्चयेऽनुमित्यनुत्पादेनायोग्यतानिश्चयाभावव्यापक-योग्यताज्ञानमात्रवत्तदविरोधज्ञानमात्रस्यानुमितिसामान्यहेतुतया प्रमात्वविशेषितस्य

साध्याभाव बाधमादाय समाधत्ते-मैवमिति । पक्षतावच्छेदके ति । एतदर्थः प्रागेवा-नुमितिविषयेत्यादिनोक्तः ।

यथाश्रुते शङ्कते—एवमिति । पक्षतावच्छेदकसाध्याविरोधित्वज्ञानस्य जनकत्वे तद्विषय कस्यैव विरोधिज्ञानस्य व्याप्तिज्ञानविघटकव्यभिचारज्ञानस्येव परम्परया प्रतिबन्धकतायामित्यर्थः । यद्यपि विवक्षिते गुणे नोक्तदोषावकाश किञ्च यथाश्रुतगुणपक्षेऽपि तद्विघटन[1]द्वारा उक्तविरोध-ज्ञानस्य परम्पराप्रतिबन्धकत्वेऽपि पक्षतावच्छेदकसाध्यसामानाधिकरण्यरूपग्राह्यविरहावगाहि

१. साध्यानिश्चयस्यैवेति कपुस्तके ।

व्यवहारजननोपाधिकः। अथ यथार्थत्वस्य प्रामाण्यत्वे रजतज्ञानं शुक्तौ कथमप्रमाणं, अप्रामाण्यञ्च कथं परत उत्पद्यत इति चेत्—न। अयथार्थत्वं गुणत्वौचित्यात्। अत एव बाधकानवतारदशायां गन्धप्रागभावावच्छिन्नपक्षके गन्धानुमितेराभासता, अन्यथा यथार्थलिङ्गपरामर्शसापेक्षतया तत्रानुमितेर्यथार्थताया वज्रलेपापत्तेः।

नचैवम्, अधिकहेत्वाभासतावच्छेदकसाध्यविरोधज्ञानस्यान्यत्रासंकीर्णस्य प्रतिबन्धकत्वात्। न च तद्विरोधज्ञाने यदि न साध्यं, तदा बाधः, अपरथाश्रयासिद्धिरित्युभयथाऽपि नाधिक्यमिति वाच्यम्, विरोधज्ञानस्य तदुपजीव्यत्वात्, स्वतो दूषणत्वाच्च। ग्राह्यतदुभयसामानाधिकरण्याभावावगाहित्वात्, अन्यथाऽसिद्धिबाधोभयसमावेशविकल्पनेन विरुद्धोऽपि हेत्वाभासो न स्यादिति दिक्।

अत्र ब्रूमः[1]। भ्रम एव दोषः, प्रमैव गुण इति न विभागः, प्रतियोगिप्रमाया अभावभ्रमं प्रति प्रतियोग्यारोपस्याभावप्रमां प्रति जनकत्वेन व्यभिचारात्, किन्तु प्रमाजनकतावच्छेदकरूपावच्छिन्नाभावत्वेनाजनकत्वे सति प्रमात्वावच्छिन्नकार्यताप्रतियोगिककारणताकत्वं गुणत्वं प्रमाजनकतावच्छेदकरूपावच्छिन्नप्रतियोगिकाभावत्वेनाजनकत्वे सति भ्रमत्वावच्छिन्नकार्यताप्रतियोगिककारणताकत्वं दोषत्वं, तदिह व्याप्यवति व्याप्यज्ञानमव्याप्यवति व्याप्यज्ञानं प्रमाऽप्रमाजनकत्वेन गुणो दोषश्चास्तु लाघवात्, न तु तद्व्याप्यवति तद्व्याप्यज्ञानादि, गौरवात्। तथा च वस्तुतो वह्न्यादिमति यत् किञ्चिद्व्याप्यावश्यम्भावे तद्ज्ञानेऽपि तद्व्याप्यतया गृहीतस्य धूमादेस्तत्रासत्त्वेऽप्यनुमितेः प्रामाण्यं केन वारणीयम्?

वस्तुतो व्याप्यवति व्याप्यान्तरज्ञानेऽपि व्याप्यवत्त्वज्ञानसम्भवात्। न हि यदेव व्याप्यन्तत्रास्ति तद्व्याप्यवत्त्वेनैव ज्ञानमनुमितिहेतुरिति सम्भवति, गौरवादित्युक्तत्वादित्यस्मदादिज्ञानेनैव तदुपपत्तेः, किन्तु तदनुरोधेनेश्वरज्ञानस्वीकार इति दिक्[2]।

तया बाधान्तरात्तर्भावात् न हेत्वाभासाधिक्यम्, तथापि स्फुटत्वादिदमुपेक्ष्य गुणान्तरस्यैव सुलभत्वाद्धेत्वाभासाधिक्यशङ्कापि नेत्याशयेनाह—अत्र ब्रूम इति। वयं तु ब्रूम इति तु पाठ प्रामादिकः।

केन वारणीयमित्यत्र हेतुमाह—वस्तु तस्त्विति। व्यापकवति व्याप्यज्ञानादिकमप्यत्र गुणः संभवतीति दिगर्थः। स्वत उत्पद्यत इति मूलम्। ज्ञानसामान्यकारणमात्रप्रयोज्यमित्यर्थः।

---

१. वह्निघटकस्येति गपुस्तकपाठः।

२. किन्त्वस्यारभ्य दिगिति ग्रन्थो नास्ति आदर्शतालपुस्तके।

नाप्रमाण्यं, सबाधयां यथार्थत्वात् । किन्तु विपरीतव्यवहारप्रवर्त्तकत्वम् । तच्च ज्ञानसामग्र्यामधिकदोषानुप्रवेशात् दोषहेतुकासंसर्गाग्रहाद्वा उत्पन्ने ज्ञाने दोषसहकाराद्वा धर्मधर्मिणोरसंसर्गाग्रहरूपमेकत्वासंसर्गाग्रहसहितं परत उत्पद्यते, न तु ज्ञानमात्रसामग्रीतः, प्रमायामतिप्रसङ्गात् । उन्नीयते च विपरीतव्यवहारजनकत्वं बाधकात् । तस्य तेन तदनुव्यवसायेन वा ग्रहीतुमशक्यत्वात् ।

किन्तु विपरीतेति । व्यवहारप्रवर्त्तकत्वं यदि तद्योग्यत्वं यदि वा तदुपधानं उभयथाऽपि योग्यतावच्छेदकधर्मरूपतयाऽसंसर्गाग्रहात्मकत्वेन ज्ञानसामग्र्यां दोषानुप्रवेशात् यो दोषहेतुकोऽसंसर्गाग्रहस्तस्मादेकत्वासंसर्गाग्रहसहितमिति तदुत्पन्ने ज्ञाने दोषसहकाराद्वा धर्मधर्म्यसंसर्गाग्रहरूपं परत उत्पद्यत इत्यर्थः ।

इति महामहोपाध्यायपक्षधरापरनामजयदेवमिश्रविरचिते तत्त्वचिन्तामण्यालोके प्रत्यक्षालोके प्रामाण्यवादालोके उत्पत्तिवादालोकः समाप्तः ।

एवमग्रे जन्यपदमपि प्रयोजनपरम् । योग्यतावच्छेदकेतिरूप्यते निरूप्यते तदधीनमिति यावत् । रूपनयेत्यनन्तरमावश्यकतया । तस्यैवाप्रमाण्यरूपतामिति शेषः । तेनोपधानपक्षे नासङ्गतिरिति ध्येयम् ।

असंसर्गेति । ज्ञाने एकत्वासंसर्गाग्रहसहितधर्म-धर्म्यसंसर्गाग्रहस्यैव योग्यतावच्छेदकत्वादिति भावः ।

दोषहेतुकोऽसंसर्गाग्रहः धर्मधर्म्यसंसर्गाग्रहः । तस्माद्धर्मधर्म्यसंसर्गाग्रहरूपं योग्यतावच्छेदकं एकत्वासंसर्गाग्रहसहितं भवति, धर्मधर्म्यसंसर्गाग्रहात् एकत्वासंसर्गाग्रह इति यावत् । यद्वा यथा धर्मधर्म्यसंसर्गाग्रहो दोषात्तथा एकत्वासंसर्गाग्रहोऽपि दोषादेवेति । प्रथमो ज्ञानोत्पत्तिक्षणे द्वितीयोऽग्रिमक्षण इति विशेषः । स्वाग्रपक्षे विनिगमनाविरहोऽस्वरसबीजम् । एतच्च पक्षद्वयपरतया व्याख्यानं मध्ये वाकारदर्शनात् ।

वस्तुतो मूले व्यवहारप्रवर्त्तकत्वं व्यवहारोपधानम् । तच्च दोषहेतुकज्ञानादित्याद्यः पक्षः । यथार्थज्ञाने दोषस्य न जनकत्वमित्यरुच्या द्वितीयमाह—**दोषेति** । दोषहेतुकासंसर्गाग्र-रूपादित्यर्थः । तृतीयमाह—**उत्पन्न** इति । दोषसहकृतज्ञानादित्यर्थः । ननु किं दोषज्ञानयोरेव व्यवहारोपधाने तन्त्रत्वं न त्वसंसर्गाग्रहस्येत्याशङ्क्य व्यवहारोपधानं विशिनष्टि—**धर्मे**-त्यादि । रूप्यते कार्यतयेति रूपं सहितं कारणं येत्यर्थः । मध्ये च वाकारः प्रामादिकः ।

उपाध्यायास्तु विपरीतव्यवहारजनकज्ञानोत्पत्तिकाले ज्ञाने धर्मधर्मिणोरसंसर्गाग्रहे दोषस्योपयोगोऽग्रे ज्ञानयोरेकत्वासंसर्गाग्रहे धर्मधर्म्यसंसर्गाग्रह एव मूलमित्याद्यः कल्पः । तादृश-

ज्ञानस्वरूपे च न दोषतदभावौ हेतू, व्यभिचारात्। ज्ञानायथार्थत्वेऽपि यथार्थत्वं ज्ञानसामग्रीजन्यमेव, न तु गुणाद् दोषाभावात् वा, विपर्ययादेरपि धर्म्यंशे यथार्थत्वात् असदर्थविषयता दोषात् इन्द्रियाणामसन्निहितेऽसदर्थे सामर्थ्याभावात्।

नु दोषमात्रं न कारणं, किन्तु तदपेक्षा ज्ञानसामग्रीति यथार्थत्वे दोषाभावसापेक्षा सा हेतुरिति चेत्—न। सैव सामग्र्यसदर्थांशे दोषसापेक्षेति तदंशे ज्ञानमयथार्थं, सदर्थांशे दोषनिरपेक्षेति तदंशे यथार्थं, न तु सैव तत्रैव ज्ञाने दोषतदभावसापेक्षा, विरोधात्, अयथार्थयथार्थत्वे दोषतदभावौ नान्तरीयकौ, यथार्थत्वञ्च ज्ञानोल्लिखितप्रकारवत्त्वमर्थस्य, यद्धर्मवत्त्वमर्थस्य तत्प्रकारकज्ञानत्वं वा। इदं रजतमिति ज्ञानमर्थस्य रजतत्वं स्वस्य रजतत्वाश्रय-

ज्ञानसामग्रीकालीनधर्मधर्म्यसंसर्गाग्रहे दोषो मूलम्, अग्रे च धर्मधर्म्यसंसर्गाग्रह एवेति द्वितीयः कल्पः। तादृशज्ञानोत्पत्त्यनन्तरमेकत्वासंसर्गाग्रहे दोष एव मूलमिति तृतीयः कल्पः। धर्मधर्म्यसंसर्गाग्रहेण कारणेन रूप्यते एकत्वासंसर्गाग्रहेण कारणेन सहितमित्यर्थमाहुः। अप्रामाण्यं धर्मो दोषादिति पूर्वोक्ते

ननु भट्टादिमत इव धर्मिण एव परतस्त्वमुचितमित्याशङ्क्य 'सिंहावलोकित' न्यायेनाह-मूले ज्ञानस्वरूपे चेति। तथा च धर्म एव दोषान्नतु धर्मीत्यर्थः। अभावग्रहणं च दृष्टान्तार्थम्। व्यभिचारादिति मूलम्। अन्वयव्यतिरेकविधानस्य अन्यथासिद्धेऽपि सतः कारणताया व्यभिचारादित्यर्थः। मूले जन्यमेव प्रयोज्यमेव। अप्रमारूपज्ञाने दोषस्य हेतुत्वमुक्त्वा सर्वधीयथार्थत्वपक्षे दोषतदभावयोर्न ज्ञानस्वरूपे हेतुत्वमिति पूर्वोक्तं स्मारयति-मूलं--यथार्थत्वे ति। यत्र ज्ञानेऽयथार्थत्वं तत्र दोषपूर्वकत्वम्, यत्र ज्ञाने यथार्थत्वं तत्र दोषाभावपूर्वकत्वमिति व्याप्तिमात्रं, न तु दोषतदभावयोर्ज्ञानस्वरूपे हेतुतेत्यर्थः।

यद्वाऽयथार्थयथार्थत्वशब्दाभ्या धर्मिणावेवोक्तौ, तत्र च नान्तरीयकौ इत्यस्य नियमतः पूर्ववर्त्तिनावित्यर्थः। ज्ञप्तिमधिकृत्याह—यथार्थत्वं चेति मूलम्। ज्ञानप्रकाराश्रयत्वे सति विशेष्यत्वमर्थगतम्, विशेष्यगतप्रकारकत्वं ज्ञानगतं वा प्रामाण्यमित्यर्थः।

इदं रजतमिति मूलम्। पुरोवर्त्तिनो रजतत्ववं गृह्णात इति सर्वजनीनमेव तादृशस्य विशेष्यत्वम्, तादृशविशेष्यकत्वं च ज्ञानस्य स्वप्रकाशतया ग्राह्यम्, प्रकारत्वग्रहणञ्च सर्वजनीनमेवेति भावः।

विषयकत्वं यथार्थनिश्चयरूपम्, तदतिरिक्तञ्च न प्रामाण्यं, मानाभावात्। अस्तु वा तदपि स्वतो ज्ञायतां परतो वा मा वा ज्ञायि किं तन्निरूपणेन, प्रवृत्तावनुपयोगात्। अर्थं हि निश्चित्य प्रवर्त्तत इत्यावश्यकार्थनिश्चयादेव प्रवृत्त्युपपत्तेः।

अथार्थनिश्चयादेव प्रवृत्तिरिति सत्यं, किन्त्वेवंरूपोऽयमर्थ इति निश्चयो ज्ञानप्रामाण्यग्रहाधीन इति चेत्—न। सर्वं हि ज्ञानं रजतरूपोऽयमर्थ इत्याद्याकारं स्वार्थनिश्चयरूपमेवोत्पद्यते, का तत्र परापेक्षा। अत एवार्थतथात्वं स्वयमेव परिच्छिद्यत इति स्वतः प्रामाण्यग्रहः। यदि च तज्ज्ञानं न स्वार्थनिश्चयरूपं तदा प्रामाण्यज्ञानमपि न प्रामाण्यनिश्चयरूपं, न वा तदधीनं ज्ञानान्तरमपि स्वार्थनिश्चयरूपमिति व्यर्थमर्थनिश्चयार्थं प्रामाण्यनिरूपणम्। प्रामाण्यज्ञानेऽपि स्वविषयनिश्चयार्थमन्यापेक्षायामनवस्था। किञ्च परतः पक्षे गृहीतप्रामाण्यस्य परस्य प्रामाण्यनिश्चायकत्वेऽनवस्था, अतो यथा ज्ञानान्तराऽगृहीतप्रामाण्यमेव परप्रामाण्यनिश्चयरूपं, यदा तु तत्प्रामाण्यजिज्ञासा तदा तस्यापि प्रामाण्यमगृहीतप्रामाण्येनैव परेण निश्चीयत इति नानवस्था। तथा अर्थज्ञानमपि अनिश्चितप्रामाण्यमेवार्थनिश्चयरूपमविशेषात्। न ह्युत्पन्ने ज्ञाने अर्थसंशयः किमेवमनेवं वेति। अथ ज्ञानमर्थनिश्चयरूपमपि स्वमगृह्णत्कथं स्वप्रामाण्यं गृह्णीयादिति चेत्। तर्हि स्वप्रकाशत्वे विवादः, अर्थस्य तथाभावरूपं प्रामाण्यं स्वत एव गृह्यत इति तवाप्यनुमतम्। अथ स्वतः प्रामाण्यग्रहे अनभ्यासदशापन्नज्ञाने इदं प्रमा न वेति संशयो न स्यात्, निश्चिते तदभावात्, अत एवाप्रमात्वशङ्कया अर्थेऽपि किमेवमनेवं वेति संशयात् न ज्ञानमात्रात्करतलामलकादावप्यर्थनिश्चयो व्यभिचारादिति चेत्-न। न ह्यत्र ज्ञाने सत्यत्वासत्यत्वसंशयः, सर्वज्ञानानां सत्यत्वात्। किन्तु अगृहीतभेदं ज्ञानद्वयमेकं वा ज्ञानमित्याकारो ज्ञानं प्रमा न वेति संशयः, स च कारणदोषसंशयात्, स च ज्ञानान्तरान्निवर्त्तते।

नन्वनुभूतित्वं प्रमात्वम्, तच्च स्मृत्यन्यज्ञानत्वम्, स्मृतित्वञ्च संस्कारासाधारणकारणकत्वमिति स्वतो न गृह्यते, संस्कारादेरग्रहात्, अतएव न स्वत एव उत्पद्यते, स्मृतिसाधारणत्वादिति चेत्-न। प्रवृत्त्यौपयिकं हि

प्रामाण्यमर्थतथात्वनिश्चयत्वम्, तच्च स्वत एव गृह्यते उत्पद्यते च, न त्वनुभूतित्वसहितं, गौरवात्। तथापि संवादादिना प्रवृत्तेः प्रामाण्यं यथार्थत्वमेवानुमीयते, न त्वनुभूतित्वे सति, स्मृतौ व्यभिचारात्। स्मृत्यनुभवयोरप्रमाप्रमाव्यपदेशस्तान्त्रिकाणां सापेक्षत्वनिरपेक्षत्वनिबन्धनः। 'यथार्थानुभवो मानमनपेक्षतयेष्यते' इति तैरभिधानादिति।

अत्र ब्रूमः[1]। प्रामाण्यनिश्चयो निष्कम्पप्रवृत्तिहेतुः, न तत्संशय इत्यनुभवसिद्धम्, त्वदनुमतञ्च, तच्च प्रामाण्यं नार्थतथात्वनिश्चयरूपम्। अनभ्यासदशापन्नज्ञानस्य स्वप्रकाशेनानुव्यवसायेन वार्थतथात्वनिश्चयत्वग्रहेऽपि निष्कम्पप्रवृत्त्यभावात्, प्रामाण्यसंशयाच्च। सर्वधियां यथार्थत्वनियमेनार्थतथात्वनिश्चयत्वस्य स्वरूपतो विषयतश्चागृहीतभेदज्ञानद्वयरूपभ्रमसाधारणत्वात्। तस्मान्न भ्रमसमानाकारादिदं रजतमिति ज्ञानान्निष्कम्पप्रवृत्तिः, किन्तु तद्व्यावृत्ताकारात्। अथ तत्र प्रामाण्ये न संशयस्तस्यार्थतथात्वनिश्चयत्वरूपस्य निश्चयात्। किन्त्वगृहीतभेदं ज्ञानद्वयं विशिष्टज्ञानं वेति संशयः। स एव निष्कम्पप्रवृत्तिप्रतिबन्धकोऽपि। अतस्तस्य ज्ञानान्तरान्निवृत्तौ निष्कम्पप्रवृत्तिरिति चेत्—तर्हि यस्य संशयो व्यतिरेकनिश्चयश्च यत्प्रतिबन्धकस्तन्निश्चयस्तद्धेतुरिति व्याप्तेः भ्रमव्यावृत्तस्य विशिष्टज्ञानत्वस्य निश्चयः प्रवृत्तिहेतुर्न त्वर्थतथात्वस्य, भ्रमसाधारण्यात्, तस्मिन् सत्यप्यप्रवृत्तेश्च। तत्संशयाभावसहितस्यार्थतथात्वनिश्चयस्य प्रवर्त्तकत्वे गौरवात्। किञ्च

नार्थतथात्वनिश्चयत्वरूपमिति मूलं नोक्तरूपमित्यर्थः।

अस्मन्मते विपरीततसमूहालम्बनेऽतिप्रसक्ततयाऽवच्छेदकघटितस्य प्रामाण्यस्य वाच्यत्वादिति भावः।

गुरुमते दोषमाह—धियामिति।

अगृहीतासंसर्गादिति मूलम्। यद्यपि परस्परनिरूपितधर्मत्वधर्मित्वविषयकत्वरूपतदैतद्व्याख्यातं, तच्च ग्रहीतुं शक्यमेव, तथापि लोहित स्फटिक इत्याद्यनुरोधेन सम्बन्धविशेषघटितमेव तदपीति दुर्ग्राह्यमेवेति भावः॥ छः।

उत्पत्तिवादः समाप्तः।

---

1. मीमांसकैकदेशिसंवादमाह—अत्रेति।

प्रवृत्तिहेतुज्ञानं विघटयत एव ज्ञानस्य तत्र प्रतिबन्धकत्वम्, न चेह तथा, संशये सत्यपि तस्य सत्त्वात् ।

अपि च विशिष्टज्ञानत्वमेव प्रामाण्यं भ्रमव्यावृत्तत्वात् । लौकिकपरीक्षकाणां भ्रमव्यावृत्ते प्रामाण्यव्यवहारात् । तदतिक्रमे प्रमात्वस्य पारिभाषिकत्वापत्तेः । तस्मात् भ्रमव्यावृत्तत्वात् निष्कम्पप्रवृत्तिहेतुत्वात् प्रामाण्यसंशयनिवर्त्तकत्वाच्च विशिष्टज्ञानत्वमेव प्रामाण्यम् ।

नन्वस्तु तथा तदेव स्वतो गृह्यते इति चेत्—न । अगृहीतासंसर्गधर्मधर्मिविषयैकज्ञानत्वं भ्रमव्यावृत्तं विशिष्टज्ञानत्वम्, तत्तु स्वतो ग्रहीतुं न शक्यते, अगृहीतासंसर्गादेः प्रागनुपस्थितेः सामग्रीविरहात् । स्वप्रकाशता हि स्वमात्रसाक्षिणी, अन्यथाऽनभ्यासदशापन्नेऽपि तस्य स्वतो ग्रहादप्रामाण्यसंशयो न स्यात् । अतएव न ज्ञानसामग्रीत एव प्रामाण्यमुत्पद्यते, भ्रमस्यापि तथात्वापत्तेः ।

नव्यास्तु अविद्यमानभेदस्याग्रहः प्रामाण्यं, स चात्यन्ताभावः, कदापि तस्य ज्ञानाभावादत्यन्ताभावरूपतया स्वतः सिद्धत्वेन प्रामाण्यं स्वत इत्युच्यते । विद्यमानभेदस्याग्रहोऽप्रामाण्यम्, स चाग्रहः प्रागभावः, अग्रे भेदस्य ग्रहात् । भेदग्रहे प्रसक्ते न स जायते दोषादित्युत्तरकालसंसर्गरूपस्य तत्परिपालनस्य दोषजन्यत्वेनाप्रामाण्यं परत उत्पद्यते । विसंवादिसंवादिविचित्रव्यवहारोऽपि विद्यमानाविद्यमानभेदाग्रहरूपविलक्षणहेतुक एव । व्यवहारापयुक्तन्तु प्रामाण्यं यथार्थत्वमेव । तच्च ज्ञानहेतुमात्रहेतुकम् । अप्रामाण्यं दोषात् । अनभ्यासदशापन्ने प्रामाण्यसंशयोऽपि विद्यमानाविद्यमानभेदाग्रहकोटिद्वयावलम्बी, स एव निष्कम्पप्रवृत्तिप्रतिबन्धक इति ।

तन्न, निष्कम्पप्रवृत्तिहेतुर्हि प्रामाण्यं ग्राह्यं, न त्वन्यत्, निष्प्रयोजनत्वात् । तच्च यद्यपि अविद्यमानभेदाग्रहरूपं, तदा तन्न स्वतो ज्ञातुं शक्यते, अविद्यमानभेदग्रहस्य तत्प्रतियोगिनोऽसत्त्वात्, प्रागनुपस्थितेश्च अनभ्यासदशायां ज्ञाने ज्ञातेप्यविद्यमानभेदाग्रहे संशयाच्च । एतेनौत्सर्गिकः संसर्गग्रह एव प्रामाण्यं, संसर्गाग्रह एवाप्रामाण्यमिति निरस्तम् । संसर्गग्रहत्वस्य स्वेन

ग्रहीतुमशक्यत्वात् । शक्यत्वे वानभ्यासदशायामपि तद्ग्रहे तत्संशयो न स्यात् । तस्मात् भ्रमव्यावृत्तं निष्कम्पप्रवृत्तिहेतुः प्रामाण्यमगृहीतासंसर्गधर्मं धर्मिविषयैकज्ञानत्वरूपं विशिष्टज्ञानत्वं, संसर्गज्ञानत्वं वा, अविद्यमानभेदाग्रहत्वं वा स्वतो ज्ञातुं न शक्यते, किन्तु विशेषदर्शनादिजन्यज्ञानादवधार्य्यत इति वज्रलेपायितं परतः प्रामाण्यम् इत्युत्पत्तिवादः ।

उत्पत्तिवादः समाप्तः

—:॰॰:—

अथ प्रमाणलक्षणपूर्वपक्षः ।

अथ किं तत् प्रामाण्यम् ? न तावज्जातिः । योग्यव्यक्तिवृत्तित्वेन प्रत्यक्षत्वे प्रमात्वसंशयानुपपत्तेः, प्रमात्वस्यानुमेयत्वाच्च । साक्षात्त्वादिना सङ्करापत्तेश्च, वीजसाम्येन गुणेऽपि तस्य दोषत्वात् । तारत्वादेरुत्कर्षरूपतया जातित्वनियमे चानन्यगतिकतया च नानात्वात् । प्रमात्वनानात्वे त्वननुगमः । किञ्चैवमप्रमाया अंशे प्रमात्वं न स्यात्, जातेर्व्याप्यवृत्तितानियमात् ।

आलोकः

ननु पक्षमज्ञात्वा न साध्यतदभावयोः सिद्धिः, हेत्वभावात् । अत एव धर्मः सर्वतन्त्रसिद्धान्त इत्याशयेन पृच्छति—अथ किमिति ।

स्थाणुत्वं योग्यवृत्ति, अथ च दोषात्तदनिश्चये भवति संशयास्पदमित्यरुचेराह प्रमात्वस्येति । तदा संशयोत्तरं स्थाणुत्वादिवत् प्रामाण्यबुद्धिः प्रत्यक्षा स्यात्, नानुमितिः, तादृशस्थले प्रत्यक्षसामग्र्या बलवत्त्वादिति भावः ।

ननु तदनुमितिरसिद्धैव, अपि तु संशयोत्तरं पुरुषप्रत्यक्षवत् तत्प्रत्यक्षमेवेत्यरुचेराह—साक्षात्त्वेति ।

न च गुणगतजातौ संकरो न दोष इत्यत आह—बीजेति । कार्यकारणभावव्यवस्थाभङ्गात्मकबीजस्य द्रव्यजाताविव गुणजातावपि सम्भवादिति भावः ।

ननु नानातारत्वेष्वेकोपाधिवदिहापि संवादिप्रवृत्तिजनकतावच्छेदकत्वमेवोपाधिः प्रमात्वानामनुगमकः स्यादित्यस्वरसादाह—किञ्चेति ।

दर्पणः

हेत्वभावात् पक्षधर्मताज्ञानात्मककारणाभावात् । हेत्वज्ञानादिति पाठे लिङ्गस्य पक्षधर्मत्वेनाज्ञानादित्यर्थः ।

न चेष्टापत्तिः। अंशे संवादिनि विसंवादिनि च समूहालम्बने प्रमात्वाप्रमात्वयोरनुभूयमानत्वेन एकशेषस्य कर्त्तुमशक्यत्वात्। अथ विपर्ययस्यांशे न प्रमात्वं, किन्तु स्मृतिवद्यथार्थत्वमेवेति चेत्, तर्हि यथार्थानुभवत्वमेव प्रामाण्यमावश्यकत्वात्। न च तदपीति वक्ष्यते। अथ यथा भावोऽभावो वा नाव्याप्यवृत्तिरिति नियमन्तिरस्कृत्याबाधितानुभवबलात् संयोगतदभावयोरव्याप्यवृत्तित्वं, तथा जातिर्व्याप्यवृत्तिरेवेति व्याप्तिमभिभूयानुभवबलादेव प्रमात्वतदभावयोरव्याप्यवृत्तित्वमस्तु।

न च यदव्याप्यवृत्ति तन्न व्याप्यवृत्ति, यच्च व्याप्यवृत्ति न तदव्याप्यवृत्तीइति व्याप्तेः प्रमात्वस्य नोभयरूपत्वमिति वाच्यम्। संयोगात्यन्ताभावे व्यभिचारात्। न च तस्याभावद्वयम्। मानाभावात्। गुण-दोषयोरेकत्र सत्त्वे अव्याप्यवृत्तित्वं, गुणमात्रसत्त्वे व्याप्यवृत्तित्वमित्यन्यथोपपत्तेश्च। अन्यथा प्रमात्वस्योपाधेरप्यत्यन्ताभावसामानाधिकरण्यं न स्यात् सामान्यत्वात्, न स्याच्चोभयरूपत्वमिति। मैवम्। अवच्छेदकभेदं विना विरुद्धयो-

तादृशेति समाने विषय इत्यर्थः। साक्षात्त्वादिनेति मूलम्। यद्यपि सर्वानुभवानां धर्म्यंशे प्रमात्वात् साक्षात्त्वादिव्यापिकैव प्रमात्वजातिरिति न जातिसङ्करः, तथापि यथार्थज्ञानमात्रे वा यथार्थानुभवमात्रे वा प्रमात्वं जातिः, आद्ये प्रमुष्टतत्ताकायथार्थस्मरणे प्रमात्वं विहाय स्मृतित्वमस्तीति स्मृतित्वेन सह जातिसङ्करः। साक्षात्त्वादिनेति चातद्गुणसंविज्ञानो बहुव्रीहिः। अन्त्ये प्रमात्वात्यन्ताभावसामानाधिकरण्य यथार्थसाक्षात्कारादावारोप्यांशे साक्षात्त्वादेरस्त्येवेति साक्षात्त्वादिना सह तस्य सङ्कर एव।

अत्र शङ्कते—समस्त ज्ञान व्याप्यैव प्रमात्वजातिरस्ति अप्रमात्वमपि तद्व्याप्या जातिः, तथैव धर्म्यंशे प्रमेति व्यवहारस्य च धर्म्यंशे प्रमात्वप्रयुक्त कार्यमित्यर्थः। भवतु वा अव्याप्यवृत्तित्वं, तथापि किं हीयेत? एतादृशजातिसङ्करस्यानुभवबलादङ्गीकारात्। प्रथमकल्पेपि जातिसङ्करस्य दोषत्व परिभाषामात्रम्। न च द्वितीयेनुभवत्वेन तुल्यव्यक्तिकत्वान्नेयं जातिरिति वाच्यम्। तुल्यव्यक्तिकत्वस्य अन्यत्र जातिबाधकत्वेऽपि[1] प्रकृते व्यवहारभेदात्तदभावात्। अत एव महत्त्वदीर्घत्वे ह्रस्वत्वाणुत्वे जाती व्यवहारवैचित्र्यनिर्वाहाय लीलावतीकारैः[2]

१, व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितः
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः—इत्युक्तत्वादुदयनाचार्यैः किरणावल्याम्।

२. न्यायलीलावत्यां वल्लभाचार्यैः।

म्यङ्गीक्रियेत । न च कार्यतावच्छेदकतया कारणतावच्छेदकतया वा जातिः सिद्ध्यति, तदभावान्नेयं जातिरिति वाच्यम् । संवादिव्यवहारजनकतावच्छेदकतया प्रमापदप्रवृत्तिनिमित्तत्वेन वा तत्सिद्धिसम्भवादिति ।

अत्रोच्यते । न तावद् व्याप्यवृत्ति प्रमात्वमारोप्यांशे न[१] प्रमेति व्यवहारानुपपत्तेः न च प्रमात्वप्रयुक्त कार्यमारोप्यांश इति न तत्र प्रमेति व्यवहार इति वाच्यम् । नहि घटपटाविति समूहालम्बनज्ञाने घटांशमात्रे प्रवृत्तिजनके पटविषयत्वेन ज्ञानं प्रमेति व्यवहारो दृष्टः । नाप्यव्याप्यवृत्तित्वम् । स्वात्यन्ताभावविरोधस्य जातावनवधारितस्य सति सम्भवे त्यागानुपपत्तेः । नापीदृशो जातिसङ्करो न दोष इति वाच्यम् । परस्परात्यन्ताभावसमानाधिकरणजातिद्वयसामानाधिकरण्यस्यैव जातिसङ्करपदार्थत्वात् । नापि व्यवहारवैचित्र्यात् तुल्यव्यक्तिकजातिद्वयम् । विषयविशेषाङ्कितव्यवहारस्य प्रमात्वजात्यनिर्वाह्यत्वात् । उपाधिसङ्करवज्जातिसङ्करोपि त्यज्यताम्[२] । यथाहि क्वचिदुपाध्योरसाङ्कर्येपि क्वचित्साङ्कर्ये दर्शनबलात्स्वीक्रियते तथा जात्योरप्यस्त्विति परिशिष्यते ।

तत्रोच्यते । अस्ति हि आकाशपरिमाणादेः स्वन्यूनाधिकरणकत्वव्याप्यादन्यत् स्वाधिकरणसमवेत यावन्नित्य तद्व्याप्यता । तत्र च समवेतानित्यत्वमेवावच्छेदकं लाघवाद्गृहीतमिति तद्भङ्गभीत्यैव जातिसङ्करो नाङ्गीकार्यः । यथा हि लाघवाद्वह्नित्वेन धूमत्वावच्छिन्नं प्रति जनकता गृहीतेति वह्निं विना धूमोत्पत्तिर्न शंक्यते, तथा जातिसङ्करोपि नाशंक्यः । नहि कारणतावच्छेदककल्पनाया सकाशाद्व्याप्यव्यापकभावावच्छेदककल्पनन्यूनताया किञ्चिदियामकमस्ति ।

नन्वस्ति अनुगतमवच्छेदकं विनाऽनुगतकार्यं प्रति व्यभिचारेण कारणत्वानिर्वाहात् तत्तद्व्यक्तिं प्रति तत्तद्व्यक्तेः कारणत्वे प्रवृत्त्यनुपपत्तेः कारणतावच्छेदकस्यावश्यकत्वम्, व्याप्यतावच्छेदके तु नैवमिति चेत्—मैवम् । यत्र कारणे ज्ञानादौ न प्रवृत्तिस्तत्रानुगतावच्छेदके कार्यताच्छेदके चानुगते मानाभावात् प्रतिव्यक्ति कार्यत्वादिदुर्ग्रहः, सति सम्भवे त्यागायोगश्चेति व्याप्यतायामपि तुल्यम् । संवादिव्यवहारजनकतावच्छेदकतावच्छेदकतया तु न प्रमात्वजातिसिद्धिः । सर्वासु प्रमास्वनुगतसंवादिव्यवहारानिर्वचनात् । प्रमापदप्रवृत्तिनिमित्तमपि न प्रमात्वं जातिः । ज्ञानत्ववद्विषयविशेषावच्छिन्ने प्रमापदप्रयोगानुपपत्तेरिति संक्षेपः ।

कार्यकारणभावेत्युपलक्षणम् । समवेतनित्यत्वावच्छेदेन स्वन्यूनाधिकरणकत्वव्याप्यान्यस्य समानाधिकरणयावन्नित्यव्याप्यताभङ्गात्मकबीजस्येत्यपि ज्ञेयम् ।

---

१ आरोपांशेनेति कपुस्तकपाठः ।

२. ईष्यतामिति गपुस्तकपाठः ।

रेकत्रासमावेशादप्रतीतेश्च । न च विषय एवांशरूपः प्रमात्ववृत्तावच्छेदकः । तद्विषयत्वस्य भ्रमेऽपि सत्त्वात् ।

ननु विशेष्यावृत्त्यप्रकारकत्वं, विशेष्यावृत्तिप्रकारकत्वञ्च प्रमात्वतदभावयोर्वृत्तावच्छेदकमस्तीति चेत्–तर्हि तयोरेव प्रमाऽप्रमाव्यवहारजनकत्वमस्तु, आवश्यकत्वात्, प्रथमोपस्थितत्वाच्च, किं जात्या । न च तदपीति वक्ष्यते । नापि यथार्थागृहीतग्राहित्वं लोकसिद्धप्रमात्वं, धारावाहिकबुद्ध्यव्याप्तेः । न च प्रत्यक्षस्य वर्त्तमानार्थग्राहित्वेन स्वाश्रयक्षणविशिष्टस्तम्भादिग्राहकत्वेनागृहीतग्राहित्वं लोकसिद्धमन्यथैकसमये ज्ञानयौगपद्यप्रसङ्ग इति वाच्यम् , क्षणानामतीन्द्रियत्वात्, स्थूलोपाधिमादाय वर्त्तमानत्वग्रहात् स्वरूपसत्क्रमिकन चेति । तथा च इदं रजतमिति ज्ञाने विषयरूपधर्म्यंशावच्छेदेन प्रमात्वं जातिः, तदभावश्च विषयशून्यरजतमित्याकारांशे वर्त्तत इति न विरोधः ।

तद्विषयत्वस्येति । रजतमित्याकारकभ्रमेऽपि तद्विषयत्वस्य रजतेऽपि सत्त्वात्, तद्विषयरूपांशावच्छेदेन तत्रापि प्रमात्वं स्यादित्यर्थः ।

क्षणानामिति । यद्यपि प्रहरादीनामपि अतीन्द्रियत्वमेव, सूर्यक्रियारूपत्वात्, उपनीतभानञ्च क्षणस्यापि सुलभं, तथापि कालो विद्यमानतयोपनीतोऽपि प्रत्यक्षेण ग्राह्यः । तथा चोपनयेन भानपर्यन्तमुपस्थीयमानः प्रहरोपाधिरवतिष्ठत इति वर्त्तमानविषयशून्येति । असतो रजतस्य भानादित्यभिमानः ।

वस्तुतस्तु शुक्ताविदं रजतमिति भ्रमे धर्मिस्वरूपो विषयः प्रमात्ववृत्तावच्छेदको वाच्यः, तस्य चावच्छेदकत्वं न सम्भवति, यत्र हि स एव धर्मी कश्चिदन्यत्रारोप्यते तद्भ्रमे तद्विषयत्वावच्छेदेनाप्रमात्वस्य वृत्तेरिति मूलार्थः, तेन 'तद्विषयत्वस्येति' तत्पदं सङ्गच्छते ।

यथार्थागृहीतेति मूलम् । प्रथमद्वितीयविशेषणाभ्यां भ्रमस्मृत्योर्व्यवच्छेदः । अन्यथेति मूलम् । यदि स्थूलकालोपाधिग्राहित्वं तदा सामग्रीसाम्यात् ज्ञानानां यौगपद्यापत्तिरित्यर्थः ।

तथापीत्यादिकमापाततः, आगामिनो ज्ञानोत्पत्तिक्षणस्य पूर्वकाले ज्ञानसम्भवात् ।

परमार्थतस्तु यत्र न तादृगुपनयस्तत्रैवाव्याप्तिरिति । ज्ञानसामान्यसामग्रीमहिम्ना अज्ञातोपि स्थूलकालोपाधिर्भासते, तेन ज्ञाने कालभाननैयत्यमिति ये मन्यन्ते, तद्रीत्या सर्वत्र क्षणभानं स्यादिति चेत्[1]—न, तैरपि कालान्तराभाने सति वर्त्तमानकालभाने नियमस्य वाच्यतया यत्रातीतानागतोल्लेखिधारावाहिज्ञानं तत्र वर्त्तमानक्षणभानाप्रसङ्गेनाव्याप्तेर्वज्रलेपत्वादिति ।

क्षणग्राहित्वेपि[2] ज्ञानायौगपद्यमुपपादयति—मूले —स्वरूपेति ।

क्षणभानं दुरुपपादमिति चेदिति गपुस्तकपाठः । २. 'क्षणग्राहित्वे' इति कपुस्तकपाठः ।

क्षणोत्पत्तिकत्वेन ज्ञानायौगपद्यात्। न च स्तम्भादिषु प्रतिक्षणं गुणकर्माद्युत्पत्तिरस्ति, येन तदादायागृहीतग्राहित्वं स्यात्, वेदात् क्रमोत्पन्नवेदार्थगोचरधारावाहिकबुद्ध्यव्याप्तेश्च। नापि यथार्थानुभवत्वम्, ज्ञाने घटत्वादिना यथाशब्दार्थसादृश्याभावात्, सादृश्यमात्रस्य भ्रमेऽपि गतत्वात्। न च गुणजन्यानुभवत्वं, दोषाभावजन्यानुभवत्वं वा, तयोरननुगतत्वात्, प्रमाप्रमानिरूप्यत्वाच्च। नाप्यबाधितानुभवत्वं, बाधस्य विपरीतप्रमात्वात्। नापि

तया तदुपनयनं सम्भवति। क्षणोपाधेस्तु अत्यन्ताशुविनाशितयोपनयपर्यन्तमनवस्थित्या न तदुपनयनं सम्भवति। अतीतस्यैव यथाकथञ्चित् वर्त्तमानतया ग्रहे प्रमात्वेन तत्संग्राह्यतैव नेत्यत्र तात्पर्यम्।

न चेति। ज्ञाततायाः निराकरिष्यमाणत्वादिति भावः।

भावे वा तत्राव्याप्त्युद्धारेऽप्यन्यत्र का गतिरित्याह—वेदादिति।

धारावाहिकबुद्धिः समानविषयकनानाबुद्धिरव्यवधानेन तादृशशाब्दज्ञानानुत्पत्तेरत एवाह—क्रमोत्पन्नेति।

ज्ञान इति। साकारवादनिषेधादित्याशयः।

प्रमाजनकत्वादिनैवानुगमः स्यादित्यत आह—प्रमेति।

बाधस्येति। विपरीतप्रमा बाध इति तल्लक्षणादित्यर्थः।

ननु पूर्वक्षणस्यानधिकरणत्वादधिकरणक्षणस्य च पूर्ववर्त्तित्वाभावान्न कारणत्वम्, कारणक्रमं च विना न कार्यक्रम इति चेत्—न, पूर्वक्षणोत्पत्तिक्षणघटितकालोपाधेः कारणत्वमादाय कार्यक्रमसम्भवादिति। न संग्राह्यता तस्य सग्राह्यता नेत्यर्थः, यथार्थत्वाभावादिति भावः। **ज्ञाततया इति** तज्ज्ञानज्ञेयसम्बन्धे तज्ज्ञानजन्यत्वस्य निराकरिष्यमाणत्वादित्यर्थः, अतो न सिद्धयसिद्धिव्याघातः। अतीतानागतस्थले तदसम्भवमभिधाय वाशब्देनास्वरसः सूचितः।

साकारज्ञानवादिमते ज्ञानेऽपि घटत्वादिकमस्त्येवेत्यत आह—साकारेति। **प्रमेतीति।** तथा च प्रमात्वनिरूपणे सति गुणत्वनिरूपणं गुणत्वनिरूपणे सति प्रमात्वनिरूपणमित्यन्योन्याश्रय इति भावः।

विपरीतेति। तथा चात्राप्यन्योन्याश्रय इति भावः। फलोपधानं जनकत्वं यदि तदा

संवाद्यनुभवत्वं, ज्ञानान्तरेण तथोल्लिख्यमानत्वस्य संवादित्वस्य भ्रमसाधारणत्वात्। नापि समर्थप्रवृत्तिजनकानुभवत्वं, उपेक्षाप्रमायामव्याप्तेः, तद्योग्यतायाः प्रमानिरूप्यत्वात्। नापि तत्त्वानुभवत्वं, अवस्तुनोऽभानात्, भाने वा भ्रमसाधारण्यात्। नापि विशेष्यनिष्ठात्यन्ताभावाप्रतियोगिधर्मप्रकारकानुभवत्वं, संयोगादिप्रमाऽव्याप्तेः। अभावे व्याप्यवृत्तित्वविशेषणे संयोग-

तद्योग्यताया इति। कारणतावच्छेदकधर्मस्यैव योग्यतात्वादिति भावः।

अवस्तुन इति। तथा च व्यावर्त्याप्रसिद्धिरिति भावः।

भाने वेति। न तावत् परिदृश्यमाने अवस्तुभानं पश्याम इति व्यावर्त्यस्य कस्यचित् असत्ख्यातिरूपस्य प्रसिद्धावपि शुक्तिरजतभ्रमादीनामतथाभावेन वस्त्वनुभवत्वरूपस्य लक्षणस्य भ्रमसाधारण्यत्वादिति भाव.।

संयोगभ्रमेति। गुणोऽयं संयोगवानिति ज्ञानस्य गुणनिष्ठात्यन्ताभावप्रतियोगिसंयोगप्रकारकत्वेऽपि तदत्यन्ताभावस्याव्याप्यवृत्तित्वेन व्याप्यवृत्तीभूत[1]तन्निष्ठात्यन्ताभावप्रतियोगितायां संयोगस्य विशिष्टाभावसत्त्वादतिव्याप्तिरित्यर्थः।

मूलमुपेक्षेति। यदि स्वरूपयोग्यत्व तदा मूल–तद्योग्यताया इति। तद्व्याचष्टे–कारणतेति। अवस्तुन इति मूलं नवीनन्यायमतमाश्रित्य।

ननु बन्ध्यापुत्रादिशब्दजन्य ज्ञान असत्ख्यातिरूप व्यावर्त्यं प्रसिद्धमित्यत आह—न तावदिति। परिदृश्यमाने प्रत्यक्षादौ कारणाभावादिति भावः। वस्त्वनुभवत्वेति। न च वस्तुमात्रानुभवत्व विवक्षणीयम्, नवीनमते भ्रमे तस्यापि सत्त्वादत एवोक्तम्—अतथाभावेति।

वस्तुतस्तु मूले सदुपरागेणासदपि भासत इति मतमाशङ्क्य भाने वेत्युक्तम्, नात्रतदाश्रवणाच्च भ्रमसाधारणत्वाभिधानम्। इदन्त्वमादाय भ्रमसाधारण्ये सत्येव दोषान्तरमाह—मूले संयोगादीति। व्याप्यवृत्तीभूतेति। स्वात्यन्ताभावाधिकरणवृत्तिभिन्नेत्यर्थः[2]। अधिकरणैकदेशानवच्छिन्नवृत्तिकत्वस्य व्याप्यवृत्तित्वस्य भ्रमेऽपि सत्त्वादिति ध्येयम्।

यद्यपि प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वरूपे व्याप्यवृत्तित्वे नोक्तदोषः, तथापि निर्विकल्पकाव्याप्तिर्द्रष्टव्या।

---

१. तदिति स्थाने विशेष्येति कपुस्तके पाठ।

२. स्वात्यन्ताभावसमानाधिकरणभिन्नेत्यर्थः इति गपुस्तकपाठ.।

भ्रमेऽतिव्याप्तिः, तदत्यन्ताभावस्यैकत्वात्। नापि विशेष्यवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकधर्माप्रकारकानुभवत्वम्, अव्याप्यवृत्तिप्रमानुपग्रहात्। मूले वृक्षः कपिसंयोगवान्नाग्रे इत्यबाधितानुभवात् संयोगवदन्योन्याभावस्याव्याप्यवृत्तित्वात्। भेदाभेद एवं स्यादिति चेत्—अनुभवमुपालम्भस्व, यद्बलादवच्छेदभेदेनात्यन्ताभाववदन्योन्याभावस्याप्यव्याप्यवृत्तित्वमुपेयम्।

अत एव पक्वे इदानीं न श्याम इति धीः समयभेदादविरुद्धा, तत्रैव तदन्योन्याभावमवलम्बते। नापि विशेष्यावृत्त्यप्रकारकानुभवत्वं, एकैकविशेष्यावृत्तिनानाप्रकारकसमूहालम्बना[1]ऽव्याप्तेः। न च प्रकारस्यैकविशेष्यवृत्तितया न विशेष्यावृत्तित्वमिति वाच्यम्, प्रमाप्रमारूपसमूहालम्बनातिव्याप्तः। न च यावद्विशेष्यावृत्तित्वं विवक्षितं, एकैकविशेष्यवृत्तेर्यावद्विशेष्यावृत्तित्वेन समूहालम्बनाव्याप्तेः, एकविशेष्यके यावदर्थाभावाच्च। अथ विषयताया आश्रयो विशेष्यः, ज्ञानं तत्प्रतियोगि, भ्रमे च शुक्तिवृत्तिर्विषयता व्यधिकरणेन रजतत्वेनावच्छिद्यते, रजतवृत्तिस्तु समानाधिकरणेन रजतत्वेन, विषयता च विषये न ज्ञानाहिता[2] ज्ञाततारूपा विवक्षिता, अपसिद्धान्तादसिद्धेः, अतीतानागतप्रमायां तदभावाच्च। किन्तु ज्ञानस्य विषये विशेषणतावि-

ननु कुतो विशिष्टाभावो यतो व्याप्यवृत्तिरन्य एव संयोगाभावो गुण इत्यत आह—तदिति।

ननु प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नविशेष्यनिष्ठात्यन्ताभावप्रतियोग्यप्रकारकत्वं प्रमात्वमित्यत आह—विशेष्येति।

एकदेशिमतमाश्रित्य मूलमव्याप्यवृत्तीति।

ननु विशेष्यनिष्ठेत्यादिलक्षणदोषेणैवेदमपि दूषितमित्याशंक्याह—नन्विति। तथा च व्याप्यवृत्तित्वविशेषणमादाय यो दोषः निर्विकल्पकाव्याप्तिरूपश्च दोषः स न भवति विशेषणान्तरदानाद्विशिष्टाभावस्य निर्विकल्पकेऽपि सत्त्वाच्चेति भावः। लक्षणान्तरकरणाय

१. घटपटाविति समूहालम्बने इति भावः।
२. ज्ञानाजन्येति भावः।

शेषः कश्चित्। परज्ञानं ज्ञानत्वेन तद्विषयं च घटत्वेन जानतो घटमयं जानाति न वेति संशयाद्विषयज्ञानस्वरूपातिरिक्तस्य स्वाश्रयस्वभावादि-विशेषणताविशेषस्यावश्यं स्वीकारात्, अन्यथा घटत्वेन ज्ञातोऽर्थ इति तृतीयार्थासम्भवः। प्रकारत्वमपि विषयस्य ज्ञाने विशेषणताविशेष एव, न तु विषयत्वमतिप्रसङ्गात्, एवञ्च विषयतासमानाधिकरणप्रकारकानुभवः, प्रकारसमानाधिकरणविषयताप्रतियोग्यनुभवो वा, स्वसमानाधिकरणधर्मा-वच्छिन्नविषयताप्रतियोग्यनुभवो वा प्रमेति चेत्—न, निर्विकल्पकाव्याप्तेः, विषयतासमानाधिकरणेदन्त्वप्रकारकभ्रमस्यापि प्रमात्वप्रसङ्गाच्च। भ्रमस्तत्रांशे प्रमैवेति चेत्—तर्हि अनुभवत्वमेव प्रमात्वं, व्यर्थमधिकम्। अनुभव एव क्वचिदंशे प्रमाऽप्रमा चेति चेत्—न, उक्तलक्षणे तादृशालाभात्। अथ

भूमिमारचयति मूले—अथेति। कश्चिदिति मूलम्। क्लृप्तपदार्थातिरिक्तः सम्बन्धरूप इत्यर्थः। प्रमाणान्तरमाह मूले—अन्यथेति। तथा च विषयतैव तृतीयार्थ इति भावः।

ननु प्रकारत्वं तृतीयार्थोऽन्यथा विशेष्येऽपि तृतीयापत्तेरित्यत आह मूले—प्रकारत्व-मपीति।

ननु प्रकारत्वं स्वरूपसम्बन्ध एवास्त्वित्यत आह मूले—न तु विषयत्वमतिप्रसङ्गादिति। न तु स्वरूपसम्बन्धमात्रम्, विशेष्यादावपि तत्सत्त्वादित्यर्थः। यदर्थं भूमिरचना तदाह मूले—एवञ्चेति। मूले—स्वं विषयत्वम्। अग्रिमलक्षणे धर्मपदं प्रकारपरम्, तेन प्रकारघटितानां सर्वेषां निर्विकल्पकाव्याप्तिः सङ्गच्छते। प्रकारीभूतधर्मस्य प्रकारत्वसम्बन्धेनाद्येऽवच्छेदकतासम्बन्धेनान्त्ये विशेषणत्वाल्लक्षणयोर्भेदः।

वस्तुतो विशेष्यवृत्तिविषयतेत्युक्तत्वान्निर्विकल्पकेपि विषयताविरहादेवाव्याप्तिर्द्रष्टव्या।

ननु पूर्वं प्रकारत्वं विषयस्य ज्ञाने विशेषणताविशेष इत्युक्तम्, इदानीं च विषयता सप्रकारकत्वमुच्यत इति विरोध इति चेत्—न। तत्प्रकारकज्ञाने विषयतायास्तत्प्रकारकत्वा-भिधानात्। यद्वा विषयतैव सप्रकारिका ज्ञाने तु स्वीयविषयताप्रकारकत्वं परम्परासम्बन्धि। पूर्वग्रन्थेपि विशेषणताविशेष एव विशेषणताघटित एवेत्यर्थः। उभयमपि सप्रकारकमिति केचित्—तन्न युक्तम्, गौरवात्। निर्विकल्पकासंग्राह्यतापत्ते मूले—विषयतासमाना-धिकरणेति। उक्तलक्षणेति मूलम्। यद्यप्यंशभेदविवक्षा सम्भवति, तथापि विषयताविरह एव तात्पर्यम्।

अथेति मूलम्। अत्र धर्मत्वमविवक्षितम्, तेनाकाशवदिति भ्रमे नातिव्याप्तिः।

स्वव्यधिकरणधर्मानवच्छिन्नविषयताप्रतियोग्यनुभवः प्रमा, समूहालम्बने च प्रतिविशेष्यं विषयताभेदादेकवृत्तिविषयता नापरवृत्तिनाऽवच्छिद्यते, अतो नाव्याप्तिरिति चेत्— न, भ्रमांशप्रमायामव्याप्तेः। न हि या विषयता व्यधिकरणधर्मेणावच्छिद्यते सा तदनवच्छिन्ना, विरोधात्। नापि प्रकारव्यधिकरणविषयत्वाप्रतियोग्यनुभवः प्रमा, प्रकारव्यधिकरणविषयताप्रतियोगिनि तदप्रतियोगित्वस्याभावेन भ्रमांशप्रमाऽव्याप्तेः। नापि स्वव्यधिकरणधर्मावच्छिन्नविषयत्वाप्रतियोग्यनुभवः, स्वाधिकरणावृत्त्यप्रकारकविषयताप्रतियोग्यनुभवो वा प्रमा, तत एव, भ्रमे विषयतायाः स्वव्यधिकरणप्रकारावच्छिन्नत्वात् स्वाधिकरणावृत्तिप्रकारकत्वाच्च। नापि स्वसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकधर्मानवच्छिन्नविषयताप्रतियोग्यनुभवः प्रमा, भ्रमांशप्रमाऽव्याप्तेः, अन्योन्याभावस्याव्याप्यवृत्तित्वेनाव्याप्यवृत्तिप्रमायामव्याप्तेश्च।

यत्तु प्रमात्वाप्रमात्वयोर्विरोध एवेति भ्रमो न प्रमेति, तत्तुच्छम्, अंशभेदमादायोभयस्यानुभवात्। अन्यथा भ्रमस्योभयबहिर्भावापत्तेः। एतेन स्वव्यधिकरणप्रकारकं ज्ञानं भ्रमस्तदन्योऽनुभवः प्रमा, भ्रमो धर्म्यंशे न प्रमेति निरस्तम्। नापि प्रकाराधिकरणावृत्त्यप्रकारकविषयताप्रतियोग्यनुभवः,

प्रथमे प्रकाराधिकरणावृत्तिरेव प्रसिद्ध इति तत्र निर्विकल्पकाव्याप्तिरेव दोष इति। द्वितीये दोषान्तरमाह—प्रमेयमिति।

ननु स्वव्यधिकरणत्वं विषयनाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वं न तु विषयतानधिकरणवृत्तित्वं प्रमेयमितिज्ञाने विषयतानधिकरणाप्रसिद्धेः। तथा च घटपटाविति समूहालम्बनेषु स्वव्यधिकरणं घटत्वादिकमित्यव्याप्तिमाशङ्क्य मूलं—समूहेति। भ्रमांशेति मूलम्। धर्मानवच्छिन्नत्वस्य धर्माप्रकारकत्वस्य तत्रासत्त्वादिति भावः। एतच्चोपलक्षणम्। आकाशे शब्द इत्यादावव्याप्तिर्द्रष्टव्या। स्वाधिकरणेति मूलम्। अनवच्छिन्नत्वाप्रकारत्वयोरन्योन्यात्यन्ताभावरूपतया न पौनरुक्त्यम्। तत एवेति मूलम्। भ्रमांशप्रमायामव्याप्तेरेवेत्यर्थः। अन्यथेति मूलम्। अप्रमात्वविरोधेन प्रमात्वस्य प्रमात्वविरोधेनाप्रमात्वस्यापि निराकरणसम्भवादिति भावः। प्रमेयमित्यादिदोषस्य प्रथमे अलग्नकत्वादाह प्रथम इति। द्वितीये स्वप्रकारानधिकरणवृत्तिविषयत्वप्रतियोगिभिन्नत्वं निर्विकल्पके सम्भवति। प्रथमे तु विषयताप्रतियोगित्वं न सम्भवति। विषयताया विशेष्यवृत्तित्वादिति भावः।

प्रकारानधिकरणावृत्तिविषयताप्रतियोग्यनुभवो वा प्रमा, प्रमेयमिदमिति ज्ञाने प्रकारानधिकरणस्याप्रसिद्धेः।

किञ्च रजतत्वप्रकारकविषयताया रजतवृत्तित्वनियमात् रजतत्वावच्छिन्नैव रजतभ्रमे रजतवृत्तिविषयता, अतो रजतभ्रमोऽपि रजते प्रमा स्यात्। अथ रजतपुरोवर्त्तिनोरेकैव विषयता, सा च प्रकारानधिकरणवृत्तिधर्मावच्छिन्नैवेति चेत्-तर्हि धर्म्यंशेपि तज्ज्ञानं प्रमा न स्यात्, व्यधिकरणप्रकारकत्वस्य तुल्यत्वात्, धर्म्यंशे तु प्रमात्वे रजतेऽपि प्रमा स्यात्। अथ रजतांशे धर्म्यंशे च तज्ज्ञानं प्रमैव वैशिष्ट्यांशे न प्रमेति चेत्—न। वैशिष्ट्यस्य पूर्वज्ञानाविषयत्वेनाप्रकारत्वात्। वैशिष्ट्यवृत्तिविषयतायां रजतत्वपुरोवर्त्तिनोः प्रकारत्वेन भ्रमस्य वैशिष्ट्यांशे प्रमात्वाप्रमात्वापातात्। नापि स्वव्यधिकरणप्रकारानवच्छिन्नविषयताप्रतियोग्यनुभवः प्रमा, प्रमेयमिदमिति ज्ञाने प्रमेयत्वप्रकारकविषयतानाश्रयस्याप्रसिद्ध्याऽव्याप्तेः। न च संयोगित्वादिना प्रमेयत्वप्रकारकविषयताव्यतिरेको घटादौ प्रसिद्ध इति वाच्यम्, प्रतियो-

यदि निर्विकल्पकं व्यवहारानङ्गत्वेनासंग्राह्यमिति ब्रूयात्तदा किं दूषणं प्रथमे स्यादित्यरुचेर्दोषान्तरमाह—किं चेति।

वैशिष्ट्यस्येति। तथा च धर्मिणि सर्वमभ्रान्तं प्रकारे तु विपर्यय इति सिद्धान्तविरोध इति भावः।

विषयमात्रवृत्तिविषयतापक्षे एवेदं दूषणम्, अन्यथा च रजतभ्रमविषयताया रजतवृत्तित्वोपवर्णनविरोधादिति तदनुसारेण दोषमाह—वैशिष्ट्येति।

प्रकारत्वेन निरूपकत्वेन।

किं चेतीति। रजतत्वप्रकारिका रजतमात्रनिष्ठा रजतभ्रमे भिन्नैव विषयतेति मूलाशयः। तत्र शङ्कते मूलं—अथ रजतेति। ननु निरूपकत्वघटितमेव प्रमात्वमप्रमात्वं च, न तु तद्विशेष्यकत्वप्रकारत्वमात्रघटितमित्यत आह मूले वैशिष्ट्यवृत्तीति।

ननु भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वं, न च वैशिष्ट्यनिरूपितं वैशिष्ट्यान्तरं भासत इत्यत आह प्रकारत्वेनेति मूलम्। नापि स्वव्यधिकरणेति। अथ स्वव्यधिकरणेत्यत्र विषयताधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वं स्वव्यधिकरणत्वं विवक्षितम्, प्रकृते तु विषयतानधिकरणवृत्तित्वमत एवाह मूले-विषयतानाश्रयस्येति। अतो धर्मशब्दस्य तत्र यथाश्रुतत्वाद्वा न

गितावच्छेदकरूपवत्त्वेन प्रतियोगिज्ञानस्याभावधीहेतुत्वात् । किञ्च यत्किञ्चिद्व्यधिकरणप्रकारानवच्छिन्नत्वं भ्रमसाधारणं, प्रकृतज्ञानव्यधिकरणप्रकारानवच्छिन्नत्वं निर्विकल्पकाव्याप्तं, तस्य निष्प्रकारकत्वादिति[1] ।

इति प्रमाणलक्षणपूर्वपक्षः समाप्तः

प्रकृतेति । न च प्रकृतज्ञानव्यधिकरणप्रकारावच्छिन्नभिन्नत्वमर्थः, तथा चान्योन्याभावमादाय सर्वं समञ्जसमिति वाच्यं, भ्रमांशप्रमानुपग्रहापत्तेः, अन्योन्याभावस्य व्याप्यवृत्तित्वनियमादिति भावः ।

प्रतियोगितेति । प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानस्याभावधीहेतुत्वात्, न तु सामग्रीत्वादिति भावः । तथा च योग्यानुपलम्भसहितस्य तस्य सामग्रीत्वं वाच्यम्, न च व्यधिकरणधर्मावच्छिन्ने तत्सम्भवति, तथा चोपलम्भकदोषसत्त्वे नानुपलम्भः, दोषाभावे यावत्तदुपलम्भकासत्त्वे[2] योग्यानुपलम्भाभाव इत्युभयथाऽपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावासम्भवः, विस्तरश्चास्यानुमान इति भावः इति च वस्तुगतिमनुरुध्योक्तम् ।

प्रकृते च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगमेऽपि न क्षतिः, तदवष्टम्भेन प्रकृतलक्षणकरणसम्भवात् तादृशविषयतानधिकरणवृत्तिप्रमेयत्वप्रकारावच्छिन्नत्वात् प्रमेयत्वज्ञानविषयतायाः, घटे[3] प्रमेयत्वसत्त्वादितिस्मर्त्तव्यम् ।

ननु स्वव्यधिकरणत्वं न स्वानधिकरणवृत्तित्वं, किन्तु स्वाधिकरणावृत्तित्वम्, तथा चावृत्तिपदार्थमादायाव्याप्त्युद्धारः स्यादित्यरुचेराह—किं चेति ।

पौनरुक्त्यम् । प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञान भ्रमरूपं सम्भवत्येवेत्यन्यथा व्याचष्टे—न तु सामग्रीत्वादिति ।

ननु गुणदोषातिरिक्तसकलोपलम्भकगर्भयोग्यानुपलब्धिहेतुतया नायं दोष इत्यस्वरसादाह—विस्तरश्चेति ।

ननु स्वव्यधिकरणत्वमिति । न च शंकितपौनरुक्त्यान्नायमस्वरसः साधुरिति वाच्यम्, अन्योन्यात्यन्ताभावगर्भतयापि पौनरुक्त्यपरिहारादिति भावः ।

इति प्रामाण्यवाददर्पणे प्रमाणलक्षणपूर्वपक्षः समाप्तः

अथ प्रमाणलक्षणसिद्धान्तः

ननु मूलस्थतत्रेति सप्तम्या अधिकरणत्वमर्थः । तच्चानुभवं प्रति, प्रकारं प्रति वा ? नाद्यः, घटादेरनुभवानधिकरणत्वात् । नान्त्यः । गगने गगनत्वमित्यवृत्तिप्रकारकप्रमायामव्याप्तेः ।

---

१. विषयताया विशेष्यमात्रनिष्ठत्वनियमेन निष्प्रकारकज्ञाने विषयताविरहादिति भावः ।

२. दोषासत्त्वे यावदुपलम्भकाभावेनेति कपुस्तके पाठः ।

३. घट इत्यनन्तरं तादृशतदभाववतीत्यधिकः पाठः कपुस्तके ।

अथ प्रमाणलक्षणसिद्धान्तः

उच्यते । यत्र यदस्ति तत्र तस्यानुभवः प्रमा, तद्वति तत्प्रकारकानुभवो वा ।, यत्र यन्नास्ति तत्र तस्य ज्ञानं, तदभाववति तत्प्रकारकज्ञानं वा

यत्र यदिति । यत्र धर्मिणि येन सम्बन्धेन यो धर्मोऽस्ति तत्र धर्मिणि तद्धर्मप्रतियोगिकतत्सम्बन्धावगाह्यनुभवः प्रमेत्यर्थः । निर्विकल्पकासंग्रहं च स्वयमेव वक्ष्यति ।

यत्तु लक्षणयोर्भेदान्यथाऽनुपपत्त्या निर्विकल्पकसंग्राह्यतैव विशेष इति—तन्न । विशेषान्तरस्य वक्ष्यमाणत्वात्, तत्संग्रहानुरोधेन प्रकृतव्याख्यानादरे[1] भ्रमांशवृत्तिप्रमानुपग्रहस्य दुर्वारत्वापत्तेः । येन सम्बन्धेनेत्यादिप्रवेशप्रयोजनन्तु लोहितः स्फटिक इत्यादीनां साक्षात्परम्परासम्बन्धविषयभेदेन प्रमाप्रमोभयरूपवत्त्वमिति ।

ननु प्रतियोगित्वं स्वरूपसम्बन्धविशेषो न तु निरूप्यत्वं,[2] तत्प्रतीतौ तद्विषयत्वात् । न चैकस्मिन्नेव प्रत्यय एकसम्बन्धप्रतियोगित्वमुभयोर्विषययोः, विशेष्यत्वविशेषणत्वाव्यवस्थाप्रसङ्गात् । न हि भासमानवैशिष्ट्यप्रतियोगित्वानुयोगित्वाभ्यामन्यद्विशेषणत्वं विशेष्यत्वं वा नाम । इदमेव च प्रकारत्वं प्रकारित्वं चेति गीयते, इत्यस्वरसादन्यल्लक्षणमाह—तद्वतीति । अत्रापि तत्सम्बन्धपुरस्कारेणेति पूरणीयम्, तथा च तद्वद्विशेष्यकस्तत्प्रकारकोऽनुभवः प्रमेत्यर्थः ।

स्मृतेरपि भ्रमत्वादाह—यत्रेति ।

रजतत्वस्यापि रजतावेव स्थितस्य रजतभ्रमे प्रकारतया तत्रातिव्याप्तेश्च । मूले अस्तीति वर्तमानता चायुक्ता, अतीतादिविशेषणकप्रमायामव्याप्तेः । सम्बन्धभेदानुक्तया च लोहितः स्फटिक इति साक्षात्सम्बन्धावगाहिनि भ्रमेऽतिव्याप्तेः । परम्परासम्बन्धेन स्फटिकेऽपि लौहित्यसत्त्वात् । अत आह—यत्र धर्मिणीति । तत्र धर्मिणीति । तद्धर्म्यनुयोगिकतयेत्यर्थः । तथा चाधिकरणत्ववर्त्तमानत्वयोरविवक्षया सम्बन्धभेदस्य च विवक्षया यद्धर्म्यनुयोगिको यद्धर्मप्रतियोगिकश्च यः सम्बन्धः तद्धर्म्यनुयोगिकतया तद्धर्मप्रतियोगिकतया च तं सम्बन्धमवगाहमानोऽनुभवस्त्रितयप्रमेत्यर्थः ।

१. व्याख्यानानादरे इति पाठान्तरम् ।
२. निरूपकत्वमिति कपुस्तके पाठः ।

नन्वेवं विशेषणविशेष्यसम्बन्धानवगाहिनि निर्विकल्पकेऽव्याप्तिरत आह—**निर्विकल्पकेति**। **निर्विकल्पकसंग्राह्यतैवेति**। तथा च धर्मे प्रत्येवाधिकरणत्वं न तु सम्बन्धविशेषस्य प्रवेश इति भावः।

भेदानुपपत्तिं दूषयति—**विशेषान्तरस्येति**। अनुयोगित्वाद्यप्रवेशेन ज्ञाननिरूपितसम्बन्धविशेषप्रवेशं दूषयति—**येनेति**। ननु तदनुयोगिकत्वादेः स्वरूपसम्बन्धत्वं वा वैशिष्ट्यत्वं वा प्रकारत्वं वा विवक्ष्यते। नाद्यः, समूहालम्बनाद्विशिष्टधियो भेदानापत्तेः। न द्वितीयः, दण्डपुरुषसंयोगाः प्रतियोगित्वानुयोगित्वानीति समूहालम्बनाद् दण्डीति विशिष्टधियो भेदानापत्तेः। न तृतीयः, पुरुषानुयोगिकत्वदण्डप्रतियोगिकत्वयोः प्रकारतायां तत्सम्बन्धेऽपि विशेष्यानुयोगिकत्वविशेषणप्रतियोगिकत्वयोः प्रकारत्वे एवमेवाग्रे प्रधावनेऽनवस्थानादननुभवाच्च।

अथ पुरुषानुयोगिकत्वदण्डप्रतियोगिकत्वयोर्भासमानं वैशिष्ट्यप्रतियोगित्वं न प्रकारत्वं, किन्तु ज्ञाननिरूपितः कश्चन स्वरूपसम्बन्धोऽभावत्वादेरिव पूर्वाज्ञातयोरेवातो नानवस्था। यद्वा संसर्गमर्यादया पुरुषानुयोगिकत्वदण्डप्रतियोगिकत्वे भासेते, सा च ज्ञाननिरूपितसम्बन्धविशेषरूपा। तथा च विशेष्यत्वं विशेषणत्वं संसर्गमर्यादेति त्रितयमपि ज्ञाननिरूपितविषयताविशेषात्मकमेवाभ्युपेयमिति चेत्—

मैवम्। एवं सत्यनुयोगित्वादौ मानाभावात् त्वदुक्तरीत्या दण्डस्य प्रकारतां संयोगस्य संसर्गमर्यादां दण्डादेरविशेष्यत्वं पुरुषमात्रविशेष्यतां वा आदाय विशिष्टबुद्धेः समूहालम्बनाद् भेदोपपादनात्।

अनुयोगित्वादिसद्भावेऽपि पुरुषानुयोगिकत्वदण्डप्रतियोगिकत्वप्रकारत्वापेक्षया दण्डप्रकारकत्वस्य लघुनः प्रमालक्षणे प्रवेशोचितत्वादित्यस्वरसेनाग्रिमलक्षणमवतारयति— **नन्विति**। **तदविषयत्वात्** तस्य निरूपकत्वस्याविषयत्वात्।

न चेति। तथा च दण्डे सम्बन्धप्रतियोगित्वं पुरुषे च सम्बन्धानुयोगित्वं भासत इत्यर्थः। **नामेत्यनन्तरं तथा च** प्रकारत्वाद्यात्मकज्ञाननिरूपितस्वरूपसम्बन्धविशेषात्मकत्वमेव तदुच्यतामित्यर्थः।

भवत्वेव तथापि किमायातमत आह—**इदमेवेति**। ज्ञाननिरूपितस्वरूपसम्बन्धविशेषात्मकमेव मयाङ्गीक्रियते लघुत्वादित्यर्थः।

अत्रापीति। नन्वेवं पुनरपि सम्बन्धेनेत्यत्र स्वरूपसत्त्वादिकल्पस्तदवस्थ इति चेत्—न। सम्बन्धभेदावच्छिन्नप्रकारत्वस्य सम्बन्धभेदेन भेदात्, अनन्यगत्या प्रकारत्वस्यैव तद्भेदस्यापि कल्पनात्।

नन्वेवमपि घटपटयोर्विपरीतसमूहालम्बनेऽतिव्याप्तिः।

अप्रमा। तदन्यत्वे सत्यनुभवत्वमेव वा प्रमात्वम्। तत्प्रकारकत्वञ्च तद्वैशिष्ट्यविषयकत्वं, तद्विशेषणज्ञानजन्यत्वं वा। ईश्वरस्य तद्विशिष्टविषयं ज्ञानं न

सर्वमन्यत् पूर्ववत्।

तदन्यत्व इति। तत्त्वात्यन्ताभाव इत्यर्थः, अन्यथाऽन्योन्याभावस्य व्याप्यवृत्तित्वनियमेन भ्रमांशप्रमानुपग्रहापत्तेरित्यवधेयम्।

तद्वैशिष्ट्यविषयकत्वे पूर्वलक्षणाभेद इत्यर्थान्तरमाह—तद्विशेषणेति। न च तज्ज्ञानजन्यत्वमेवास्तामिति वाच्यं, विशेषणज्ञानत्वेन जनकत्वलाभार्थं तदुपादानात्,

मैवम्। घटत्ववद्विशेष्यकत्वावच्छेदेन घटावच्छेदेन वा घटत्वप्रकारकत्वस्य विवक्षितत्वात्। न चानतिप्रसक्तत्वरूपमवच्छेदकत्वं समूहालम्बननिष्ठस्य घटत्ववद्विशेष्यकत्वस्य घटस्य वाऽस्त्येवेति वाच्यम्, स्वरूपसम्बन्धस्यावच्छेदकपदार्थत्वात्, तस्य च तत्राभावात्। एतादृशावच्छेदकत्वाग्रहादेव प्रामाण्य न स्वतो ग्राह्यमित्युक्तम्।

केचित्तु भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वमादाय ईश्वरज्ञानसाधारण प्रमाया एकं लक्षणं, जनकीभूतज्ञानविषयत्वं प्रकारत्वमादाय तद्व्यावृत्तं द्वितीयं लक्षणमभिप्रेतमित्याहुः।

सर्वमिति। यः सम्बन्धो यदनुयोगिको न भवति यत्प्रतियोगिको वा न भवति तदनुयोगिकतया तत्प्रतियोगिकतया वा तस्य ज्ञान भ्रमः, न चाननुगमः, अन्यतरत्वेनानुगमात्।

यद्वा तत्सम्बन्धावच्छिन्नतदभाववद्विशेष्यकं तत्सम्बन्धावच्छिन्नतत्प्रकारक ज्ञानं भ्रम इत्यादि व्याख्यातं पूर्ववदित्यर्थः।

अवधेयमिति। यद्यपीदं रजतमिति भ्रमे रजतत्वाभाववद्विशेष्यकरजतत्वप्रकारकत्वं भ्रमत्व, इदन्त्ववद्विशेष्यकेदन्त्वप्रकारकत्वरूपं च प्रमात्वं सकलज्ञानवृत्ति, तथा च कथं भ्रमत्वप्रमात्वयोरत्यन्ताभावोऽव्याप्यवृत्तिः? न च प्रमात्वघटकप्रकारावच्छिन्नभ्रमत्वाभावो विवक्षितः, तथा सत्यव्याप्यवृत्तित्वस्यान्योन्याभावत्यागस्य चानुपपत्तेः, प्रमाभ्रमरूपे एकप्रकारके वह्नी इतिसमूहालम्बनेऽतिव्याप्तेश्च। तथापि यत्र यस्य प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नोऽभावस्तदन्यविशेष्यकत्वे सति तत्प्रकारकोऽनुभवः प्रमेत्यत्र तात्पर्यम्। इदं च घटत्वादिप्रकारकप्रमाभिप्रायेण, प्रमेयत्वादिप्रकारकप्रमायामभावात्।

वस्तुतो यत्र यस्य प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नोऽभावस्तदन्यविशेष्यकस्तदन्यप्रकारकोऽनुभव. प्रमेत्यर्थः। तेन न केवलान्वयिप्रमायामव्याप्तिरिति।

तद्वैशिष्ट्येति। भासमानवैशिष्ट्यप्रतियोगित्वात्मके प्रकारत्वे प्रतियोगित्वे भासमानत्वान्वयात् पूर्वाभेद इत्यर्थः।

तु तत्प्रकारकम्। निर्विकल्पकञ्च प्रमाऽप्रमाबहिर्भूतमेव, व्यवहारानङ्गत्वात्। अव्यपदेश्यपदेन तदुपग्रहस्य नामजात्यादियोजनारहितमपि प्रत्यक्षमस्तीत्यत्र तात्पर्य्यम्। इदं रजतमिति ज्ञानमिदन्त्ववति तदनुभवत्वात् प्रमा, रजतत्वाभाववति तत्प्रकारकज्ञानत्वादप्रमा। अंशे समूहालम्बनञ्च नाप्रमा, एकप्रकाराभाववत्यपि तदप्रतीतेः।

अन्यथा तद्विषयकेश्वरज्ञानजन्यतया भ्रमातिव्याप्तेरिति भावः।

ननु यदि निर्विकल्पकमसंग्राह्यमेव तर्हि प्रत्यक्षप्रमालक्षणसूत्रे इन्द्रियार्थसन्निकर्षेत्यादौ प्रमालक्षणांशेऽव्यपदेश्यपदोपादानं न स्यादित्यत आह—अव्यपदेश्येति। तद्धि न प्रमालक्षणप्रविष्टं, व्यर्थत्वात्, अव्याप्त्यापत्तेश्चेति। तत्रापि परमतनिराकरणार्थं तदुपादानमित्याकर एव स्फुटम्, न तु तदुपादानबलात् प्रमात्वं तस्येत्यर्थः।

योजनारहितं वैशिष्ट्याविषयकम्। न चाभावप्रमायामभावत्ववत्यपि नाभावत्वप्रकारकत्वम् अभावत्वस्य तद्वित्तिवेद्यतयाऽभावत्वविशेषणज्ञानजन्यत्वाभावादिति वाच्यं, तद्वति तत्प्रकारकानुभवो हि तदुभयप्रमेत्युक्तप्रायम्, तथा च प्रतियोग्यादिविशेषणवानभाव इति तद्विशेषणज्ञानजन्यं प्रतियोगिविशिष्टाभावज्ञानं तदुभयं प्रमा, अन्यथा तद्धर्मिप्रमानुपग्रहापत्तेः। न च तद्विशेषणज्ञानजन्यं तदुभयांशप्रमेति वाच्यं, अन्यथा इदन्त्वप्रकारकत्वमादाय रजतांशभ्रमातिव्याप्तिवारणमशक्यम्। तथा च प्रतियोगिनि विशेषणेऽभावे च धर्म्मिणि तज्ज्ञानमस्तु प्रमा, अभावत्वांशे तु तत्प्रमा कुत इति वाच्यं, यद्विशेषणज्ञानजन्यत्वं यादृशि ज्ञाने तादृशि तद्विशेष्यकोऽनुभवः प्रमा इत्यत्र तात्पर्यात्। भवति हि अभावत्वज्ञानाजन्येऽपि[1] प्रतियोग्यादिज्ञानस्याभावत्वविशिष्टज्ञाने जनकता। न चेदन्त्वविशिष्टज्ञानस्य रजतत्वविशिष्टज्ञानं प्रति जनकता, येनातिव्याप्तिः स्यादिति भावः।

भ्रमातिव्याप्तेरिति। इदं रजतमितिशुक्तिगोचरभ्रमे शुक्तित्ववति शुक्तित्वप्रकारकत्वरूपप्रमात्वापत्तेरित्यर्थः। इदमुपलक्षणम्। अनुमितेः पक्षादिज्ञानजन्यतया तत्प्रकारकत्वापत्तेरित्यपि द्रष्टव्या।

अव्याप्त्यापत्तेरिति। सविकल्पक इति शेषः।

यद्विशेषणेति। यद्विशेषणज्ञानजन्यताया यद्विशिष्टज्ञानत्वमवच्छेदकं तज्ज्ञानं तत्प्रकारकमिति समुदायार्थः। इदञ्च प्रकारत्वं समाधिसौकर्य्यादुक्तम्। वस्तुतो ज्ञाननिरूपितस्वरूपसम्बन्धविशेष एव प्रकारत्वं लक्षणे प्रविष्टमित्युक्तम्। तदेव चानुव्यवसाये प्रकारीभूतमिति ध्येयम्।

---

१. अभावज्ञानजन्येऽपीति कपुस्तके।

नन्वेवमव्याप्यवृत्तिभावाभावयोरेकत्र प्रमाऽप्रमा च स्यात् तदभाववति तत्प्रकारकज्ञानत्वादिति चेत्— न, भिन्नभिन्नावच्छेदेन हि वृक्षे संयोगतदभावौ, न वृक्षमात्रे, विरोधादननुभवाच्च। तथा च यत्र वृक्षे संयोगो न तत्र तदभावः, यदवच्छेदेन यत्र यदस्तीति वा विवक्षितम्। गोत्वादेरपि सास्नाद्यवच्छेदेन वृत्तेः। पाकरक्ते श्यामोऽयमिति धीः प्रमैव, कदाचित्तत्र तत्सत्त्वात्। इदानीं श्याम इति तु अप्रमैव। न च यत्तद्भ्यां लक्षणाऽननुगमः, न हि प्रमा सर्वत्र प्रमा, किन्तु क्वचित्, तथा च किं ज्ञानं कुत्र प्रमेति तत्तद्विशेषस्य लक्ष्यत्वेन यत्तद्भ्यामेव लक्षणं युक्तम्।

ननु अवच्छेदकभेदेनापि वृत्तिर्दृष्ट एव, न च वृक्षं विहाय केवलेऽवच्छेदके तद्वृत्तिः सम्भवतीत्यरुचेराह—यदवच्छेदेनेति।

ननु संयोगवान् गोत्ववानित्यनुभवे अवच्छेदकाविषयकेऽव्याप्तिः। न च तदविषयकः प्रत्ययोऽसिद्ध एवेति वाच्यं, प्रत्यक्षे तथाभावाभ्युपगमेऽपि शाब्दतादृशप्रमानुपग्रहापत्तेरिति—न, तदनतिरिक्तदेशत्वस्यावच्छेदकपदार्थत्वेन संयोगादेरेव तदवच्छेदकपदार्थत्वात्।

वस्तुतस्तु यदवच्छेदेन यत्र यदस्ति तद्विरुद्धधर्म्मानवच्छेदेन तत्र धर्म्मिणि तस्यानुभवः प्रमा, स च विशिष्टाभावोऽवच्छेदकमात्रभानात् प्रकारावच्छेदकभानाच्चाविशिष्ट इति सर्वं रमणीयम्।

पाकरक्त इति। इदञ्च यदि सत्त्वमात्रमस्तीत्यादेरर्थो विवक्षितस्तदा, यदि च वर्त्तमानत्वपर्यन्तं तत्तात्पर्यविषयस्तदा पाकरक्ते श्यामधीरप्रमैवेति तत्त्वम्।

यत्र वृक्ष इति मूलम्। अन्योन्याभावस्याव्याप्यवृत्तित्वाभ्युपगमपक्षे। तदनभ्युपगमपक्षमभिप्रेत्यास्वरसमाह— नन्विति। ननु संयोगादेरवच्छेदकत्व स्वरूपसद्वा ज्ञानविषयतापन्नं वा। आद्ये भ्रमेऽतिव्याप्तिः। अन्त्ये सयोगवानित्याद्यव्याप्तिस्तदवस्थेत्यरुचेराह—वस्तुतस्त्विति। न चैवं मूलवृक्षत्वादेस्तद्विरुद्धत्वाभावात्तदवच्छेदेन संयोगग्रहेऽतिव्याप्तिः। तदत्यन्ताभावावच्छेदकावच्छेद्यस्य तदनवच्छेदकस्य वा तद्विरुद्धपदेन विवक्षितत्वात्।

ननु भ्रमस्यापि यदवच्छेदेन यन्नास्ति तदवच्छेदेन तज्ज्ञानमिति लक्षणं वाच्यम्, अन्यथा संयोगप्रमायामतिव्याप्तेः। तथा च शुक्तिविशेष्यकप्रमुष्टतत्ताकरजतस्मृतावव्याप्तिः। न च वस्तुगत्या तदवच्छिन्ने तज्ज्ञानं विवक्षितम्, तथा च प्रमुष्टतत्ताकस्मृतावपि वस्तुगत्या शुक्तित्वा-

वच्छिन्ने रजतत्वज्ञानमस्त्येवेति वाच्यम्, वृक्षः कपिसंयोगीति प्रमायामतिव्याप्तेः। न च तत्रापि वस्तुगत्या संयोगाभावावच्छेदेन तज्ज्ञानं भ्रम इति विवक्षितम्, तथा च विशिष्टाभावसत्त्वान्नोक्तस्मृतावव्याप्तिरिति वाच्यम्, वृक्षः संयोगीतिप्रमायामतिव्याप्तेः। न च स्मृतिरसंग्राह्यैव, तत्राप्रमाव्यवहारानापत्तेः।

उच्यते। अप्रमालक्षणेऽवच्छेदकप्रवेशो न कर्त्तव्यः, वृक्षः संयोगीति प्रमायामतिव्याप्तिश्चान्योन्याभावस्याव्याप्यवृत्तितया संयोगाभाववदन्यस्यैव वृक्षस्य विशेष्यत्वान्निरसनीयेति यथाश्रुतमेव मूलमव्याप्यवृत्तित्वादेव चान्योन्याभावस्य भ्रमान्यत्वरूपे प्रमालक्षणे भ्रमाशप्रमानुपसंग्रहो नेति।

यद्वा प्रकारीभूतधर्मस्यानवच्छेदकं यद्वृक्षत्व मूलं वा तदवच्छिन्नत्वेनानुल्लिख्यमानस्यातत्त्वतो या विशेष्यता तद्भिन्ना या तदभाववतो विशेष्यता सा तद्विरुद्धधर्मानवच्छेदेनेति विशेषणेन विवक्षिता। अतो वृक्षः कपिसंयोगीत्यत्र नातिव्याप्तिः, सामानाधिकरण्यमात्रेण वृक्षत्वग्रहात्। नापि वृक्षत्वमूलावच्छेदेन कपिसंयोग गृह्णति भ्रमेऽव्याप्तिः। नाप्यन्योन्याभावस्याव्याप्यवृत्तित्वम्, नाप्युक्तस्मृतावव्याप्तिरिति।

वस्तुतस्तु अवच्छेदकप्रवेशो मूलकृता[1] कृतो व्याख्याकृद्भिश्चानुमतोऽपि मह्यं न रोचते। न तावत्प्रवेशः प्रमालक्षणे। तथा हि– मूलावच्छिन्नः कपिसंयोगवान् वृक्षत्वावच्छिन्नः कपिसंयोगवानेवंविधभ्रमवारणायावच्छेदकप्रवेशः। स चायुक्तः, वृक्षविशेष्यकसंयोगप्रकाराशे तयोरनुभवयोः प्रमात्व इष्टापत्तेः। संयोगविशेष्यकवृक्षत्वमूलावच्छिन्नतत्प्रकाराशे च तयोर्भ्रमयोस्तद्विशेष्यकत्वमेव नास्ति। नहि शाखावच्छिन्नस्य कपिसंयोगस्य विशेष्यस्य वृक्षत्वमूलावच्छिन्नत्वे, तस्मान्न प्रमालक्षणेऽवच्छेदकप्रवेशः। नाप्यप्रमालक्षणेऽवच्छेदकप्रवेशः। तथा हि– वृक्षः कपिसयोगीति वृक्षत्वसमानाधिकरणकपिसंयोगावगाहिनि शाखावच्छिन्नो वृक्षः कपिसयोगीति शाखावच्छिन्नकपिसंयोगावगाहिनि च प्रमारूपे ज्ञानेऽतिव्याप्तिवारणायावच्छेदकप्रवेशः। स चायुक्तः, प्रतियोगिव्यधिकरणतदभाववतीति तद्वदन्योन्याभाववतीति वा विवक्षयाऽतिव्याप्तिवारणात्। वृक्षत्वावच्छिन्नमूलावच्छिन्नकपिसंयोगयोश्च प्रतियोगिव्यधिकरणविशेषणाभाववत्त्वात्तद्वदन्योन्याभाववत्त्वाद्वा ज्ञानेऽव्याप्तिर्नाशंकनीयेति सक्षेपः।

अस्तीत्यादेरिति। आदिपदेन तद्वतीति मतुपः संग्रहः। तथा चेति मूलम्। लक्ष्यानुगमे लक्षणाननुगमो दोषो न तु तदननुगम इति भावः।

---

१. चिन्तामणिकृतेत्यर्थः।

अन्ये तु अनुभवत्वमेव प्रामाण्यम्, भ्रमेऽप्यंशमादाय प्रमाव्यवहारात्। रजतादिप्रमाऽप्रमा च विशिष्य लक्षणीया रजतत्ववति तदनुभवः तदभाववति तदनुभवो वेत्यादिना।

नन्वनुभवत्वस्य प्रमाप्रमासाधारण्येन तज्ज्ञानस्य न निष्कम्पप्रवृत्त्यङ्गत्वमिति चेत्- सत्यम्। विशेषविषयप्रमाया एव प्रवर्त्तकत्वात्। अतिरिक्तविषयतापक्षे विषयताश्रयावृत्तिरवृत्तिरेव प्रसिद्धः।

यद्वा यत्प्रकारिका या विषयता तत्प्रकारसमानाधिकरणविषयताकः, स्वप्रकारसमानाधिकरणविषयताको वाऽनुभवः प्रमा।

अन्ये त्वित्यस्वरसोद्भावनम्। स चानुभवत्वं प्रामाण्यमिति किमनुभवत्वं प्रवृत्त्यौपयिकं, प्रमापदप्रवृत्तिनिमित्तं वा, नाद्योऽर्थान्तरत्वात् व्यभिचाराच्च। स्वतो ग्राह्यत्वादिविवादविषयस्य प्रवृत्त्यौपयिकस्य प्रामाण्यस्य प्रस्तावे एतल्लक्षणस्यानाकांक्षितत्वात्, भ्रमांशेऽप्यनुभवत्वाच्च। नापरोऽसम्भवस्याकर एव दर्शितत्वादिति।

प्रकारभेदेन विषयताया भेदेऽपि न दोष इति लक्षणान्तरमाह—यद्वेति। एकस्या विषतायास्तदवच्छिन्नानवच्छिन्नत्वे परं विरुद्धे, न तु विशेष्यवृत्तिप्रकारकत्वाप्रकारकत्वे अपीति भावः।

भ्रमेऽपीति मूलम्। प्रमेतरघटादिभेदस्य प्रमापदवाच्यत्वस्य वा साधकमनुभवत्वम्, न तु भ्रमत्वाद्यभावसाधकमिति भावः। विशेषेति मूलम्। तथा च न प्रवृत्त्यर्थमनुभवत्वं लक्षणं, स्मृतावसत्त्वात्, किन्त्वितरभेदव्यवहारयोः साधनायेति भावः। अर्थान्तर विवृणोति- स्वत इति। व्यभिचारं विवृणोति- भ्रमांशेपीति। मूले विषयताश्रयेति। अत्र निर्विकल्पकं सग्राह्यमेव। गगने शब्द इति प्रमाया च नाव्याप्तिः, येन सम्बन्धेन यस्य विषयताश्रयावृत्तित्वं तेन सम्बन्धेन तत्प्रकारकत्वाभावस्य विवक्षितत्वात्, तस्य च गगने शब्द इत्यत्र सत्त्वादिति भावः। यत्प्रकारिकेति मूलम्। निर्विकल्पकस्यासंग्राह्यत्वं विषयतायाश्च सप्रकारकत्वमुपेत्येदमुक्तम्। यत्पदश्रवणात् तत्तत्प्रकारघटितमिदम्। स्वप्रकारेति मूलम्। स्वं विषयता, यत्पदाश्रवणात् सकलप्रकारघटितमिदम्। अत एव न पौनरुक्त्यम्। प्रकारसमानाधिकरणत्वं च प्रकारतानिर्वाहकसम्बन्धघटितं विवक्षितमतो गगने शब्द इत्यादौ नाव्याप्तिः। नापि सम्बन्धान्तरमादायातिव्याप्तिरिति ध्येयम्।

यत्प्रकारिका या विषयता तत्प्रकारव्यधिकरणविषयताकं, स्वप्रकारव्यधिकरणविषयताकं वा ज्ञानं भ्रमः। प्रकारभेदेनैकत्र विषयताभेद इति लक्षणद्वयसमावेशात् प्रमाभ्रमसङ्करः।

यद्वा विशेष्यनिष्ठात्यन्ताभावाप्रतियोगिप्रकारकविषयताप्रतियोगी, विशेष्यनिष्ठात्यन्ताभावप्रतियोगिप्रकारानवच्छिन्नविषयत्वप्रतियोगी वा, विषयतासमानाधिकरणात्यन्ताभावप्रतियोगिप्रकारकविषयत्वाप्रतियोगी वा, विषयतासमानाधिकरणात्यन्ताभावप्रतियोगिप्रकारानवच्छिन्नविषयताप्रतियोगी वानुभवः प्रमा।

स्वसमानाधिकरणप्रकारानवच्छिन्नविषयताप्रतियोगि ज्ञानं, स्वव्यधिकरणप्रकारावच्छिन्नविषयताप्रतियोगि ज्ञानं वा भ्रमः। इदं रजतमितिभ्रमे च विषयताद्वये व्यधिकरणप्रकारावच्छिन्नत्वतदनवच्छिन्नत्वयोः विषयत्वप्रतियोगित्वतदप्रतियोगित्वयोरविरोधात्,

विषयताद्वय इति प्राग्लक्षणाभिप्रायेण। प्रकृते तु विषयतैक्येऽपि न दोष इत्युक्तमनुपदम्। तदुक्तमात्मतत्त्वविवेक इति शेषः।

यत्प्रकारिकेति मूलम्। विषयताप्रकारभेदघटितमिदम्। स्वप्रकारेति मूलम्। स्वं विषयता। प्रकारपदं सकलप्रकारपरम्, अतो न पौनरुक्त्यम्। द्वितीयचतुर्थयोः प्रकारत्वावच्छिन्नघटितयोविषयतैक्ये विरोधादाह मूले—प्रकारभेदेनेति। इदं च समाधिसौकर्यादुक्तम्।

वस्तुतस्तु द्वितीयचतुर्थयोरपि ज्ञानप्रकारघटितत्वेन न पौनरुक्त्यम् न वा विरोध इति ध्येयम्। प्रकारेति। प्रथमतृतीयलक्षणवद्विषयतैक्येऽप्यविरुद्धं लक्षणान्तरमाहेत्यर्थः। तदवच्छिन्नत्वानवच्छिन्नत्वे इति द्वितीये चतुर्थे च प्रमालक्षणे व्यधिकरणप्रकारानवच्छिन्नत्वं भ्रमलक्षणे च व्यधिकरणप्रकारावच्छिन्नत्वं विशेषणमेकस्या विषयताया विरुद्धमित्यर्थः। विशेष्यवृत्तीति। विशेष्यनिष्ठात्यन्ताभावाप्रतियोगीत्यादिप्रमालक्षणेऽप्रमालक्षणे[1] च प्रविष्ट इति शेषः। प्रागिति। प्राक् प्रथमं लक्षणं विषयतैक्येऽप्यविरुद्धं विशेष्येत्यादिरूपं येषा तदभिप्रायेणेत्यर्थः। प्रकृते प्रथमलक्षणे। विषयत्वप्रतियोगित्वतदप्रतियोगित्वयोरिति मूलम्। व्यधिकरणप्रकारावच्छिन्नविषयत्वप्रतियोगित्वं यद्भ्रमलक्षणम् तृतीये च यत् प्रमालक्षणं तयोरित्यर्थः। यद्यपि विषयताभेदेऽप्यत्र विरोधोऽस्त्येव, तथापि प्रकारभेदावच्छेदेन विषयताप्रतियोगित्वतदभावयोरंगीकाराद्वारणीय इति भावः। सर्वत्र च सम्बन्धभेदप्रवेशाद्गगने शब्द इत्यादौ न दोष इति पूर्वोक्तमनुसन्धेयम्।

---

१. विशेष्यनिष्ठात्यन्ताभावप्रतियोगीत्यादीति यावत्।

समूहालम्बने च विषयताभेदान्न प्रमाऽप्रमालक्षणेऽव्याप्त्यतिव्याप्ती ।

वस्तुतस्तु विशेषणताविशेषो नास्त्येव, मानाभावात् । सामान्यतो ज्ञाने ज्ञाते तस्य क्वचिद्विशेषणतेति सामान्यतो विशेषणताज्ञानेऽपि घटमयं जानाति न वेति सन्देहतादवस्थ्यात् । तस्माद्घटतज्ज्ञानयोः स्वरूपग्रहेऽपि तदीयत्वं तद्विषयत्वं न गृहीतमिति तद्विषयत्वे सन्देहः । तदीयत्वञ्च सम्बन्धं विना तत्सम्बन्धस्वभावत्वम् । तदुक्तम्– "प्रकाशस्य सतस्तदीयतामात्रनिबन्धनः स्वभावविशेषः"[1] तद्विषयत्वम् इति । सम्बन्धं विना कथं तदीयत्वं, अन्यथा-

प्रकाशस्येति । सम्बन्धान्तरं विना तदीयताप्रयोजकः स्वभाव एव विषयत्वं तदिच्छादौ गतमतः प्रकाशस्येत्यादि, प्रकाशत्वे सतीत्यर्थः ।

स्वभावतः सविषयः प्रकाश एव लाघवादिच्छादीनां ज्ञानोपाधिकमेव विषयत्वम् । अत एवेश्वरज्ञानस्वीकारः, कृतेरेव कार्यहेतुतया तस्याश्च ज्ञानं विना सविषयकत्वाभावात्तद्विषयत्वलाभार्थं ज्ञानेच्छयोः स्वीकारः । स्वसमानकालीनेच्छाधीनं कृतौ सविषयत्वं, तादृशज्ञानाधीना चेच्छा सविषयता । अत एव न ज्ञानवदिच्छापि प्रत्यासत्तिरभ्युपगम्यते, ज्ञानेनैवान्यथासिद्धेः ।

वस्तुतस्तु ज्ञानमेव विषयता, लाघवात् । न च विषयता स्वरूपसम्बन्धः स चात्र स्वरूपद्वयमिति वाच्यं, विशिष्टधीहेतोस्तत्त्वात् । न च विषयोऽपि तद्धेतुः, अतीतेऽनागते च विषये ज्ञातत्वव्यवहारानापत्तेः । न च ज्ञानमात्रस्य विषयतात्वे तद्ग्रहे विषयतासन्देहानुपपत्तिः, घटज्ञानोभयदर्शनेऽपि संशयदर्शनात् । घटीयत्वं ज्ञानस्य न गृहीतमिति यदि, तदा प्रकृतेऽपि तुल्यम् । न च घटीयत्वं घटविषयकत्वम् । तत्तु

ननु समूहालम्बने घटपटोभयवृत्तिरेकैव विषयता, सा च घटात्मकविशेष्यनिष्ठात्यन्ताभावप्रतियोगिपटत्वावच्छिन्नेति प्रमालक्षणं तत्राव्याप्तम्, भ्रमलक्षणञ्चातिव्याप्तमित्यत आह मूले—समूहेति । विषयताभेदे च घटनिष्ठा विषयता न पटत्वावच्छिन्नेति नोक्तदोष इति भावः ।

एकदेश्यभिमतामतिरिक्तां विषयता दूषयति मूले—वस्तुतस्त्विति । तथा च तद्घटितानि लक्षणानि न सम्भवन्तीति भावः । ज्ञानेनैवेति । इच्छायाः सविषयत्वसिद्ध्यर्थं तयाऽक-

नवस्थानात्। अन्यत्रापि स्वरूपसम्बन्धे एषैव गतिः, अन्यथा सामान्येनाभावसमवाययोर्ज्ञानेऽधिकरणे ज्ञाते तयोः संशयो न स्यात्, अधिकरणतदुभयस्वरूपाणां ज्ञातत्वात्। तत्राप्यभावसमवाययोर्विशेषणताविशेषो न गृहीत इति चेत्– न, सामान्यतस्तद्ग्रहेऽपि संशयात्।

यत्तु समूहालम्बनविशिष्टज्ञानयोर्विशेषानुभवाद्विशिष्टज्ञाने विशेषणताविशेषो विषय इति– तन्न, विशेषणतामादायापि समूहालम्बनसम्भवात्। तत्रापि विशेषणतान्तरस्वीकारेऽनवस्था। समूहालम्बनात्त विशिष्टज्ञानस्य

ज्ञानमेवेति कुतस्तद्ग्रहे सन्देह इति वाच्यं, तदुभयग्रहेऽपि तुल्यत्वात्। तेन रूपेण घटज्ञाने अपि विशिष्टधीजननयोग्यतया न गृहीते। तत्त्वं हि सम्बन्धत्वमतः संशय इति चेत्, इदमपि ज्ञानमात्रविषयतात्वे तुल्यम्। तर्हि ज्ञानस्वरूपं न विषयत्वमपि तु विषयविशिष्टधीजननयोग्यत्वमिति चेत्—न। सोऽयमस्माकं स्वगोत्रकलहो न तु विशेषकृतो विवाद इति। स चाग्रे स्वरूपसम्बन्धनिरूपणप्रस्तावे मया समर्थयिष्यत इति दिक्।

याभ्युपेयेनेत्यर्थः। पूर्वं ज्ञानविषयस्वरूपे विषयते इत्यभिप्रेतम्, इदानीं ज्ञानस्वरूपमेव तद्विषयकत्वमित्याह– वस्तुतस्त्विति। यद्यपि ज्ञानेऽतीते विषये च विद्यमाने विशिष्टव्यवहारदर्शनाद्वैपरीत्ये किं बाधकम्, न वानेकविषयकस्य ज्ञानस्यैकत्वाद्विनिगमना, अनेकज्ञानगोचरस्य विषयस्याप्येकत्वदर्शनात्, तथापि ज्ञानव्यक्तीनामनेकत्वात्, सर्वस्य विषयतया विषयव्यक्तीनां बहुत्वात्। अभावज्ञाने विषयस्याभावरूपत्वात्, अतीन्द्रियज्ञाने च विषयस्यातीन्द्रियत्वादल्पं भावरूपमैन्द्रियकं च ज्ञानमेव सम्बन्धतया कल्प्यत इति भावः।

स चेति। विशिष्टबुद्ध्यादेर्विशिष्टज्ञानाविषयतया तज्जननयोग्यत्वं न सम्बन्ध इत्यर्थः। यत्त्विति मूलम्। यद्यपि विषयताप्रस्तावे दण्डादिविशेषणतासाधनमयुक्तं, तथापि तद्विशेषणं तद्विशेषणतावदिति दण्डादिस्थले तद्दृष्टान्तेन ज्ञातो घट इत्यत्र ज्ञानस्य घटे विशेषणता विषयतात्मिका साधनीया, दृष्टान्त एव चासिद्ध इति भावः। भासमानेति। भासमानं यद्वैशिष्ट्यप्रतियोगित्वं तत्कृत इत्यर्थः। न चैवं वैशिष्ट्यप्रतियोगित्वस्यातोऽतिरिक्तस्य स्वीकारापत्तिः, तस्य सम्बन्धनिरूपितस्य विषयतानिराकरणस्यात्र मुख्यत्वात्। वस्तुतः प्रकारत्वं विशेष्यत्वं च ज्ञाननिरूपितः स्वरूपसम्बन्ध-

विशेषः कारणकृतः कार्यकृतः प्रकारकृतो वा। प्रकारोऽपि विशेषणताविशेषः स च धर्मिण्येवास्त्विति चेत्– न, तमादायाऽपि समूहालम्बनसम्भवात्।

इति महामहोपाध्यायश्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ प्रत्यक्षखण्डे
प्रामाण्यवादे प्रमालक्षणसिद्धान्तः
समाप्तश्चायं प्रामाण्यवादः

कारणकृत इति। विशेषणज्ञानं विशिष्टज्ञानकारणम् समूहालम्बने तु युगपदुभयसामग्री तत्कृत इत्यर्थः।

ननु विशेषणज्ञानस्य कारणत्वे गृहीते तत्कृतो विशेषः स्यात् तच्च न विशिष्टज्ञानत्वं कार्यतावच्छेदकमगृहीत्वा गृह्यत इति भेदकान्तरमवश्यमपेक्षणीयमित्यत आह—कार्यकृत इति। अतद्व्यावृत्तिबोधलक्षणकार्यकृत इत्यर्थः।

नन्विदमपि कारणतावच्छेदकविशिष्टज्ञानत्वाग्रहे दुर्लभमिति समूहालम्बनतो भेदकं विषयभेदमाह—प्रकारकृत इति। भासमानवैशिष्ट्यप्रतियोगित्वकृत इत्यर्थः। दण्डपुरुषावित्यत्र दण्डपुरुषावुभौ विशेष्यौ, दण्डी पुरुष इत्यत्र पुरुषानुयोगिकवैशिष्ट्यप्रतियोगित्वं विशेषणत्वं दण्डस्य विषयः। समानवित्तिवेद्यतया वैशिष्ट्ये गृह्यमाणे तत्प्रतियोगिनोऽभावप्रतियोगिन इव तत्प्रतियोगित्वं विषयोऽभावत्वप्रतीताविवेवि प्रतियोगित्वस्य विषयत्वादिति भाव इति दिक्।

इति महामहोपाध्याय पक्षधरापरनामकजयदेवमिश्रविरचिते तत्त्वचिन्तामण्यालोके
प्रत्यक्षखण्डालोके प्रमाणलक्षणसिद्धान्तः समाप्तः
समाप्तश्चायं प्रामाण्यवादालोकः

विशेषो, न तु भासमानविशेषणनिष्ठं वैशिष्ट्यप्रतियोगित्वं प्रकारत्वं, न वा भासमानं विशेष्यनिष्ठं वैशिष्ट्यानुयोगित्वं विशेष्यत्वमित्युक्तं प्रमाणलक्षणे ॥

इति महामहोपाध्यायमिथिलाराज्यसमुपार्जकमहेशठक्कुरविरचिते तत्त्वचिन्तामण्यालोकदर्पणे
प्रत्यक्षखण्डे प्रमाणलक्षणसिद्धान्तः समाप्तः
समाप्तश्चायं प्रामाण्यवाददर्पणः

समाप्तोऽयं प्रामाण्यवादः

शुद्धिपत्रम्

पृ:	पं.	अशुद्धम	शुद्धम
३	२८	विचारदिति	विचार इति
४	१०	त्वम् । तत्र	त्वं तत्र
५	११	ग्रह्. । काय-	ग्रह: कार्य-
६	१७	-दिहेतुः	-दिति हेतुः
१२	७	-मित्यग्रे । त-	मित्यग्रे त-
१६	३०	-माणस्य	-मानस्य
१६	३०	-मर्णत्व-	-मभ्यर्णत्व-
१७	१३	यदिदं	यदीदं
१६	१२	साध्यव्यपकतेति	साध्यव्यापकेति
२१	२३	जनकत्वेत्यादि	जनकेत्यादि
२२	२५	-यतपूर्वं	-यतापूर्वं
२३	१२	लभ्यते । अ-	लभ्यते अ-
२४	१०	विघ्नसंशयेति	विघ्नसंशय इति
३४	२१	-वच्छेदक-व-	-वच्छेदकत्व-
३७	१६	प्रधानं न चा	प्रधानेन चा-
३८	१	-र विनव	-रं विनैव
३८	२३	भोया	भीत्या
४५	६	-त्वात्	-त्वेति
४६	२२	अत्र इति महामहोपाध्यायजयदेवापरनामकपक्षधरमिश्र-विरचिते प्रत्यक्षखण्डचिन्तामण्यालोके मङ्गलवादालोकः समाप्त इति योजनीयम् ।	

४८	२३	तदाचाराचष्टेचेति ।	आचारे चेति ।
४६	१५	यद्वेति	वेदेति
५१	८	योगिरूपत्वेन	योगिज्ञानत्वेन
५१	२२	प्रतियोगिरूपत्वेनेति	प्रतियोगिज्ञानत्वेनात
५१	३०	प्रतियोगीत्यादि कृतमित्यन्तम्	
५३	११	तत्प्रकारत्वेन	तत्प्रकारकत्वेन
५६	७	-कत्वादिति सामान्य-	-कत्वादिसामान्य-
६१	१५	-मत्	-मात्
६२	१७	तज्ज्ञान-	तज्ज्ञानो-
६३	१६	तद्दशायां	०
७८	२२	ननु	न तु
८१	७	तद्वि-	तद्बुद्धि-
८१	२३	कत्वादिति	कत्वनिश्चयादिति
८३	१७	-दिनाऽतथात्वेऽपि	-दिना तथात्वेऽपि
६२	२१	-श्चेति	-श्चेतीति
६६	५	हेतुकृता	हेतूकृता
१००	२५	-स्तम् । अ-	-स्तम-
१०८	१	निश्चयः क्षण।	निश्चयक्षणः
१२२	११	मूले । अज्ञानात्	मूले अज्ञानात्
१२३	१७	-त्वात् । वयमिति । नि-	त्वाद्वयमिति नि-
१२६	४	-दिति । वह्नि-	-दिति वह्नि-
१२७	२४	किञ्चिदित्युक्तम्	केचिदित्युक्तम्
१२७	२५	पूर्वोक्तिमेव	पूर्वोक्तामेव
[illegible]	३	[illegible]	परस्पराविरुद्धे
१३३	५	[illegible]	विशेषणानि

१३४	२४	-योगिका	-योगिताका
१३५	२६	-भोवात्म-	-भावाभावात्म-
१४८	२०	करणप्र-	करणाप्र-
१४८	२८	-गान् । प्र-	-गान प्र-
१५०	१६	-नम् । प्रमा	-नं प्रमा
१५१	६	शशीरस्य	शरीरस्य
१५४	२०	भज्येत इत्यप-	भज्येतेत्यप-
१५६	१२	विरचितायां	विरचिते
१५६	१३	मारण-	साधारण-
१५६	२६	-काशाद	-काशादौ
१७७	१५	भाववस्त्वेन	भावत्वेन
१८२	१४	ननु सामान्यहेतुत्वमपीति दर्पणपाठ एव ।	
१८५	२४	मेव वधा-	मेवावधा-
१८७	१३	घटसं-	घटगन्धसं-
१८७	१६	वस्तुस्त्विति	वस्तुतस्त्विति
१९५	१४	-लया	-तया
१९८	१३	-च्छयचारणं	-च्छयोच्चारणं
२०१	१२	-क्रेति रू-	-केति, रू-
२०२	५	नु	ननु
२०२	१६	ननु धमत्यर्थः	-ननु धर्मीत्यर्थः ।
२०७	६	वृत्ती इति	वृत्तीति
२०८	४	पत्तेः न च	पत्तेः । न च
२०८	२३	जनकतावच्छेदका- वच्छेदकतया	जनकतावच्छेदकतया
२०९	१५	-तयाप-	-तयोप-

२१२	१	भावस्यक-	भावस्यैक-
२१२	१०	व्याप्तः।	व्याप्तेः।
२१४	४	धर्मणा-	धर्मेणा-
२१६	५	प्रकृतेति	स्वव्यधिकरणेति
२१६	१८	०	इतिप्रामाण्यवादालोके प्रमाण-लक्षणपूर्वपक्षः समाप्तः ।
२१७	४	०	अथ प्रमाणलक्षणसिद्धान्तः।
२१७	२०	भ्रमेऽतिव्याप्तेः।	भ्रमेऽतिव्याप्तेः
२२७	२४	दर्पणं	दर्पणः॥